सर्वत्र लोष्टमित्येव पाठो युक्तः। लोष्टपलितावित्युणादिसूत्रे क्तांततया एव निपातनात् तस्यै दिशो लोष्टमाहरेदिति श्रुतौ स्पष्ट एव क्तांतः पाठः । लेन लोष्ठामित्यपयाउ [तेन लोष्ठमित्यपपाठ] एवेति ज्ञेयम्॥
इति श्रीमदोकोपाह्वाग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विषाहस्राग्नियुक्तपौंडरीकयाजिगणेश.......
निगूढार्थरत्नलाभ..........सप्तमस्य प्रश्नस्य द्वितीयः पटलः ॥ २ ॥
च.–इति..........नवमप्रश्नस्याष्टमः ॥ ८ ॥ समाप्तो नवमः प्रश्नः ।

३१ हिरण्यकेशीयसूत्रवृत्तिः ।

आ.–उक्ता अग्निष्टोमादयः संस्थाः पश्वैकादशिनीर्यूपैकादशिन्यौ च अथेदानीमग्निष्टोमादिष्वाकांक्षितं याजमानकर्म्म वक्तुं शिष्यावधानाय प्रतिजानीते ॥ अग्निष्टोमस्य याजमानं व्याख्यास्यामः ॥..........अपूर्णम् ॥

३२ हिरण्यकेशीयसूत्रे हौत्रप्रकरणम्-महादेवसोमयाजी ।

आ.–ऋग्वेदाद्युपदिष्टेषु सांगकर्म्मसु कर्तृता ॥ होत्रादेः परिभाव्या याध्वर्योर्याजुषकर्म्मसु ॥ १ ॥
प्रतिज्ञाकरणं तावदादौ सर्वस्य तन्यते ॥ हविर्यज्ञे दर्शपूर्णमासादौ तन्निरूप्यते ॥ ८ ॥ याजमानं व्याख्यास्यामः॥...
च.–इति श्रीहिरण्यकेशिसूत्रे एकविंशतिप्रश्ने महादेवसोमयाजिकृते याजुषहौत्रप्रकरणं समाप्तम् ॥

३३ काम्येष्टिप्रयोगः ।

आ.–वीरेशं विघ्नहर्तारं लक्ष्मीनारायणौ गुरून् ॥ सत्याषाढमहं वंदे अष्टापदशिरोरुहम् ॥ १ ॥
नारायणात्मजेनाथ महादेवेन यज्वना ॥ काम्येष्टीनां यथासूत्रं प्रयोगः क्रियते मया ॥ २ ॥
च.–पुष्टिमंतावाज्यभागौ वग्निनारघिमश्नव इतियथासमाम्नातम् ॥ संवत् १९१३ कण्वशाखीया

३४ दर्शपौर्णमासेष्टिः-सोमराजः

आ.–प्रणम्य विघ्नराजं तं कण्वान्वयविभूषणः ॥ नृहरेरात्मजः कुर्वे सोमराजोऽत्र पद्धतिम् ॥ १ ॥
प्रथमप्रयोगे पौर्णमास्याम्प्रातः काले मातृपूजापूर्वकमाभ्युदयिकं कृत्वा
च.–ततः उँ अन्तरिक्षे विष्णुर्व्यक्रंस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तः ॥ अपूर्णम्

३५ माध्यन्दिनीसंहिताया भाष्यम्-विद्यारण्यः ।

आ.–वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ॥ यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
उँम् इषे इषेरिच्छार्थस्य कर्म्मणि क्विप् कित्वादुपधाया गुणाभावः ॥
च.–२९ राति रसति रस्यते वा रास्ना । रास्ना स्थूला वीणा इति आद्युदात्तनिपाताः ॥

३६ कात्यायनश्रौतसूत्रभाष्यम्-अनन्तदेवः ।

आ.–रामं रमापतिं यस्य नाम कामप्रपूरकम् ॥ अंतरायपिशाचानां नाशकं तं नमाम्यहम् ॥ १ ॥
ब्रह्मविष्णुशिवान्सूर्यं गणेशं च सरस्वतीम् ॥ विद्याप्रदानवपुषः पुष्टाननुभवामृतान् ॥ २ ॥
भवाब्धिशोषणेगस्त्यान्केशवामृतयोगिनः ॥ ग्राहयांचक्रिरेऽपूर्वविद्यायाः सारतां मया ॥ ३ ॥
दुर्दांतांश्चेतसो दोषान् वेदांतैर्यैर्व्यजीगमन् ॥ तथा पूर्वगुरून् नौमि वासुदेवसरस्वतीन् ॥ ४ ॥
सरस्वत्येव मीमांसा यैर्दृत्ता परमार्थतः ॥ मुनिं कात्यायनं कर्कं पितृभूतिं तथादिमान् ॥ ५ ॥
यशोगोपिभर्त्तृयज्ञभाष्यकृतोपरानपि ॥ पद्धत्यादिप्रणेतृंश्च जनकं वेददान्गुरून् ॥ ६ ॥
वेदार्थयज्ञविद्यैया [द्यावा] ददुः सम्राट् सुताः स्वयम् ॥ संम्राजोग्निचितस्त्यक्तसर्वसंगमदास्तु तान् ॥ ७ ॥
वाचस्पत्यभिधान्नत्वा परमात्मानमप्यथ ॥ यज्ञज्ञानां गुरुर्येस्तु कर्मपद्यरविस्तथा ॥ ८ ॥
एकैकदेशदानन्यान्गुरून् बुद्धिविवृद्धये ॥ प्रणम्य क्रियते यत्नः कातीयसूत्रसंस्थितः ॥ ९ ॥
भाष्यरूपेऽत्र संदिग्धं सर्वं निर्णेष्यते मया ॥

च.–द्विरभ्यास उक्तार्थः ।

रुद्रसंख्यैरभिषिक्तो वाजपेयैस्त्रिरग्निचित् ॥ एकाशीतिं च सोमान्य ईजे भाष्यपरोपि सन् ॥ १ ॥
सम्राजां वंशजो यस्य वाचस्पतिरिवार्थवित् ॥ वाचस्पतिरुपादानं योगित्वात्तमवाश्रयः ॥ २ ॥
अनेकक्रतुयाजित्वादीयसोपि निवारकः ॥ अन्यत्र गमनस्यासौ श्रीअनन्ताभिधः स्वराट् ॥ ३ ॥
सुखेशबोधनात्संश्चि [त्सचि] दानंदोमृत एव यः ॥ सोनुगतार्थनामा मे गरीयान्केशवामृतः ॥ ४ ॥
अंत्यं जन्मेदं येषां येनैतेनुभवामृताः ॥ अथवान्वीश्वरं ते स्युर्ज्ञानाद्वानुभवामृताः ॥ ५ ॥
इति श्रीसम्राट्स्थपतिमहायाज्ञिकश्रीश्रीअनंतकृते कात्ययनसूत्रभाष्ये चतुर्विंशोध्यायः ॥

३७ कात्यायनश्रौतसूत्रभाष्यम्-कर्कः ।

आ.–प्रणतसुरासुरभासुरकिरीटकोटिप्रमृष्टचरणाय ॥ गजवदनाय नमस्ते सिद्धेःसदनाय विघ्नकदनाय ॥ १ ॥
यस्य लीलावशेनेदं जन्मस्थितिलयं व्रजेत् ॥ आनंदैकरसं वंदे तमुमासहितं शिवम् ॥ २ ॥
ऊर्जितानंदगहनां सर्वदेवस्वरूपिणीम् ॥ परां वाग्रूपिणीं वंदे महानीलसरस्वतीम् ॥ ३ ॥
अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया ॥ चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ४ ॥
भाष्याणि सम्यगालोच्य विचार्य च पुनःपुनः ॥ क्रियते बालबोधार्थं सूत्रभाष्यमतिस्फुटम् ॥ ५ ॥.........

३८ कात्यायनसूत्रस्य भाष्यम्-गर्गाचार्यः ।

आ.–अथ पूर्वां पौर्णमासीं पूर्वां पंचदशीमुत्तरां प्रतिपदं अग्न्याधानं करोतीति शेषः ॥
च.–एतदुक्तमंतिमं सूत्रं नारायणपुरुषस्य नारायणपुरुषसूत्रमित्येतस्य संज्ञम् ॥
इति कात्यायनसूत्रस्य संक्षिप्तभाष्ये चतुर्विंशोऽध्यायः समाप्तः ॥

३९ पारस्करगृह्यसूत्रं सभाष्यम्-भा० जयरामः ।

आ.–श्रीमत्केशववाग्गणाधिपपदद्वंद्वप्रभाभासुरस्वान्तोत्साहविजृम्भितामलमतिग्राह्ये च गृह्ये कृतेः ॥
दृष्ट्वा कर्कमुखैः कृतानि बहुशो भाष्याणि गुह्यानि तद्देशार्थं स्वमतेरिदं जयपरो रामो लिखत्यादरात् ॥ १ ॥
कृतिसूनुपदाम्भोजपरागोद्धूसरालकः ॥ जयरामश्च मेवाटो भारद्वाजसगोत्रकः ॥ २ ॥
श्रीमन्मान्तिकमाधवश्रुतिसुधासिंधोर्विगाहामृतद्वेद्यस्तत्कृपयाभवद्द्विजवरः श्रीकेशवस्तादृशः ॥
तत्पादद्वयकस्पृशा कृतमिदं कातीयगृह्यस्य सद्भाष्यं सज्जनवल्लभं च जयरामेण प्रसादाद्गुरोः ॥ ३ ॥
आचार्यापरनामधेय इति यो दामोदरोभूद्द्विजो भारद्वाजसगोत्र आत्मरतिरस्याप्यात्मजस्तादृशः ॥
नाम्ना श्रीबलभद्र आत्मसुयशास्तस्सूनुनैतत्कृतं भाष्यं सज्जनवल्लभं जययुजा रामेण मत्याप्तये ॥ ४ ॥
पाठे योभूद्विसंवादो गृह्यसूत्रे समंत्रके ॥ उपेक्षितः स विदुषां मनसाज्ञापि युक्तितः ॥ ५ ॥
प्रयुक्ता अन्यथा मंत्रा न भवन्त्यर्थसाधकाः ॥ संसाधयन्ति सर्वार्थान्यथावत्पठिता यदि ॥ ६ ॥
नानाशाखीयमंत्राणां पाठशुद्धौ स्वपाठकाः ॥ व्याख्यातारः प्रमाणं स्युरित्येतच्छिष्टनिश्चयः ॥ ७ ॥
अतस्तत्तत्स्वशाखीयमंत्राणामग्र्यपाठकान् ॥ पृष्ट्वा सुबोधं गृह्यस्य भाष्यं वै लिख्यते स्फुटम् ॥ ८ ॥
तत्क्षंतव्यं सुनिपुणैः स्वबाले चापलं यथा ॥ मया च स्वीयबोधाय क्रियते तनु तद्विदाम् ॥ ९ ॥
च.–श्रीमान्मान्तिकमाधवश्रुतिसुधासिंधोर्विगाहामृतद्वेद्यस्तत्कृपयाभवद्द्विजवरः श्रीकेशवस्तादृशः ।
तस्यांघ्रिद्वयकस्पृशा कृतमिदं कातीयसूत्रस्य सद्भाष्यं सज्जनवल्लभं सुविदुषां प्रेष्ठं शिवप्रीतये ॥

कर्कादिद्विजवर्याणां दृष्ट्वा भाष्याणि भूरिशः ॥ उपचेतुं तदुच्छिष्टं जयरामोऽलिखत्स्फुटम् ॥ ५ ॥
शशीन्दुरसचन्द्रेब्दे मासीषे प्रथमे दले ॥ त्रयोदश्यामिन्दुयुति [जि] प्रालेखीदं सतां प्रियम् ॥ ६ ॥
इति श्रीमत्कातीयगृह्यसूत्रभाष्ये सज्जनवल्लभाख्ये जयरामकृतौ तृतीयकांडविवरणं समाप्तम् ॥ संवत् १९१० ॥

४० पारस्करसूत्रभाष्यम्–भास्करः ।

च.–इति राघवेंद्रारण्यश्रीचरणचरणाब्जचंचरीकैर्भास्करभट्टै रचिते अर्थभास्कराभिधे पारस्करसूत्रभाष्ये तृतीयः कांडः समाप्तः ॥

४१ पारस्करमन्त्रभाष्यम्–मुरारिमिश्रः ।

आ.–प्रणम्य पूर्वं पुरुषं पुराणं तथैव कात्यायनपादपद्मम् ॥ तनोमि पारस्करमंत्रभाष्यं मुरारिमिश्रः पृतगृह्यभाष्यात् ॥ १ ॥
गृह्यप्रकाशाभिधभाष्यगर्भाच्छ्रीवेदमिश्रैर्विधिवत्प्रणितात् ॥
आकृष्यबन्धुं विविधानि मंत्रे [विदधाति मन्त्रै] मुरारि मिश्रः श्रुतितो विविच्य ॥ २ ॥ त्वन्नो अग्न इत्यादि ॥
च.–इति श्रीवेदमिश्रप्रणीतगृह्यप्रकाशभाष्यादाकृष्य मंत्रभाष्यं पृथक्कृत्य तृतीयकाण्डस्य मुरारिमिश्रः समाप्तिमगमत् ॥

४२ पारस्करगृह्यसूत्रव्याख्या–विश्वनाथः ।

आ.–गर्गसिद्धान्तपद्मानां प्रकाशोदयहेतवे ॥ मार्त्तण्डाय नृसिंहाय पित्रे श्रीगुरवे नमः ॥ १ ॥
गङ्गादेवीमहं वन्दे ज्ञानदां मातृरूपिणीम् ॥ जातं यस्याः पयःपानात्सरस्वत्यवगाहनम् ॥ २ ॥
पारं शास्त्रसमुद्रस्य तच्चैतल्लिख्यते यतः ॥ स्वकल्पितत्वशङ्कात्र न कार्या विबुधैरतः ॥ ३ ॥
तर्कशास्त्रं च मीमांसा यद्रक्षायै प्रयोजिते ॥ तातैस्तमपि वन्देऽत्र गर्गं वेदार्थवित्तमम् ॥ ४ ॥
अधीत्य सकलं शास्त्रं श्रीनृसिंहाज्जगद्गुरोः ॥ तन्यते विश्वनाथेन गृह्यसूत्रप्रकाशिका ॥ ५ ॥
अथैतद्भाष्यं नारब्धव्यं विषयाभावात् तथाहि तत्किं सूत्रार्थप्रकाशकं वा सूत्रादनधिगतार्थबोधकंवा
च.–तत्र शरीरदोषं त्यक्त्वा मुखादिमत्रातः [मात्रतः] परिपठितुं ममास्त्वित्याशीः [शिः] प्रार्थनम् । एतत्सर्वम्ममास्त्विति मन्त्रार्थः तिष्ठत्विति वीप्सा काण्डसमाप्तिज्ञापनार्थम् ।
अभून्तंद [नंदपु] रे मुञ्जो नागरो गोत्रकाश्यपे ॥ लक्ष्मीधरोऽभवत्तस्मात्सूर्य्यदत्तस्तु तत्सुतः ॥ १ ॥
तस्मादाशाधरो जातो नारसिंहाभिधस्ततः ॥ तत्सुतेन कृतं भाष्यं विश्वनाथेन धीमता ॥ २ ॥
पारस्करस्य गृह्यस्य पञ्चखण्डावशिष्टकम् ॥ गरिष्ठं सर्वभाष्येषु बह्वर्थनिर्णयान्वितम् ॥ ३ ॥
महादेवजगन्नाथपुत्रपौत्रप्रपौत्रकैः ॥ गोपनीयं निरीक्ष्यं च पठितव्यं समाहितैः ॥ ४ ॥ – – – – – – –
नारसिंहाग्रतोऽ [जोऽ] नन्तस्तस्य यो वै प्रपौत्रकः ॥ ५ ॥
लक्ष्मीधराऽभिधस्तंभतीर्थात्काश्यां समागतः ॥ उपहासं पुरस्कृत्य ह्रियङ्कृत्वा तु पृष्ठतः ॥ ६ ॥

भाष्याण्यन्यानि वालोक्य पञ्चखण्डान्यलीलिखत् ॥ तेनै वात्रास्य भाष्यस्य पूर्त्तिर्ज्जाता यथा तथा ॥ ७ ॥
संवन्नेत्रग्रहकला १६९२ मितेऽब्दे चोत्तरायणे ॥ समाप्तिमगमद्भाष्यं माघे भूते सिते कुजे ॥ ८ ॥
इति श्रीमत्सर्वविद्याविशारदपण्डितश्रीनारसिंहसुतपण्डितश्रीविश्वनाथकृते पारस्करगृह्यसूत्रव्याख्याने तृतीयं काण्डं समाप्तम् ॥

४३ पारस्करगृह्यसूत्रव्याख्या-हरिहरः ।

आ.-इष्टापूर्त्तिक्रियासिद्धिहेतुं यज्ञभुजाम्मुखम् ॥ अग्नित्रयीं वचःसारं वन्दे वागधिदैवतम् ॥ १ ॥
पारस्करकृते गृह्यसूत्रे व्याख्यानपूर्विकाम् ॥ प्रयोगपद्धतिङ्कुर्वे वासुदेवादिसम्मताम् ॥ २ ॥
अथातो गृह्यस्थालीपाकानां कर्म्म ॥ अथ श्रौतकर्म्मविधानानन्तरम्
च.-सर्वं मे मनसि तिष्ठतु स्थिरीभवतु अत्र वीप्सा अर्थभूयस्त्वप्रतिपादनार्था ग्रन्थसमाप्तिज्ञापनार्था वा इतिसूत्रार्थः ॥
इति अग्निहोत्रिहरिहराणां कृतिरियम् ॥
इत्यग्निहोत्रिहरिहरविरचितायाम्पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ तृतीयः काण्डः समाप्तः ॥

४४ नवकण्डिकाभाष्यम् ।

आ०-ब्रह्मधर्मप्रकाशार्था यत्सामा वेदराशयः ॥ षड्भिरंगैर्युताः श्वासा ब्रह्म तच्छ्रेयसे स्तुमः ॥ १ ॥
गजाननस्यादिविसर्गकाले स्तोत्रं विधात्रा विहितं निशम्य ॥ हर्षात्प्रवृत्तानि शुभावहानि निघ्नंतु विघ्नं मम बृंहितानि ॥ २ ॥
कात्यायनेन मुनिना यदगादि सहा [महा] र्थवत् ॥ श्राद्धसूत्रमतिस्पष्टैर्विवृणोमि पदैरहम् ॥ ३ ॥
तस्य तावदिदमादिसूत्रम्-अपरपक्षे श्राद्धं कुर्वीत ॥
च.-आसीदसीमवसुधामरमुख्यभूतः सत्कर्मणां प्रवरपात्रतया प्रसिद्धः ॥
संकर्षणेतिविदितः प्रथितोरुकीर्त्तिमुद्योतयन्सुकृतिनां प्रथमावतारः ॥
तस्यात्मजः सकलशास्त्रपरायणोपि यः पक्षपातमधिकं कृतवान्कृतीन्द्रः ॥
आन्वीक्षिकीरहसि तेन विनिर्मितायामांस्तां [निर्मितोऽयमास्तां] तमोपनयने पितृकर्मदीपः ॥ — — — — —
श्राद्धदीपः कृतीन्द्राणां तनोतु मुदमुत्तमाम् ॥ १ ॥ इति नवकंडिकाभाष्यं समाप्तम् ॥ संवत् ॥ १८११ ॥

४५ प्रतिज्ञासूत्रवृत्तिः-केशवाचार्यः ।

आ.-श्रीमत्कात्यायनं वन्दे मुनिश्रेष्ठं च याजुषम् ॥ यस्तेने कल्पशास्त्रन्तं याज्ञवल्क्यसुतं गुरुम् ॥ १ ॥
अथ प्रातिशाख्यसूत्रकथनानन्तरं प्रतिज्ञा विधास्यते इति शेषः ॥ प्रतिज्ञायते शेषसंस्कारो यया सा प्रतिज्ञा ॥
च.-इति केशवाचार्यविरचितप्रतिज्ञासूत्रवृत्तौ तृतीयकंडिका समाप्ता ॥

४६ मौनसूत्रम्-देवभद्रः ।

आ.–अथ यजुर्वेदाम्नाये वाजसनेयके माध्यन्दिनीयेन्येन मौनेन हस्तेनास्मदीयेनाधी भाना स [यमानानांसं]
हितामंत्राणामवगमं गौतमो देवभद्रपाठकोहं ब्रवीमि धर्मार्थकाममोक्षाख्यानि चत्वारि यद्रत्पात्राणि विकसितानि तानि
तेषु प्रत्येकं चन्द्रादितिथ्यन्ता अ (व) बोध्या (:) संज्ञास्ता यदुपदेशेन च सुधीः परहद्रताः कंडिका विजानातु ॥
चंद्र इषे त्वाग्रावग्निर्यज्ञो देवानां द्वे जुषाणो बर्हि

च.–सविता वरुणो हिरण्मयेन पात्रेणोम् खं ब्रह्माष्टाविंशतिरष्टपंचाशन्मोक्षपात्रे पंचशती चतुर्दश पंचविंशत्यूना द्विसाहस्त्रो
पंचविंशत्यूना द्विसाहस्त्री ॥ १६ ॥
ढुंढिराजप्रसादेन सूत्रं चेदं मया कृतम् ॥ वैदिकास्तेन तुष्यन्तु विप्रा माध्यंदिनीयकाः ॥
अध्येतव्यमिदं सूत्रं विप्रैर्माध्यंदिनीयकैः ॥ मौनेनाधीतमंत्राणां क्षिप्रं ज्ञानाभिलाषिभिः ॥
मुहुर्मुहुः प्रार्थयेहं दुर्जनान्दुष्टमानसान् ॥ मत्कृतं सूत्रमेतत्तु न नष्टव्यं कदाचन ॥
एषा मत्सूत्रगा विद्या गोप्यैव फलदा भवेत् ॥ अन्यथा विफलैव स्यादिति मद्वचनं कुरु ॥
शिष्यं मित्रं छलं दुष्टं प्रभुं बालं न बोधयेत् ॥ सच्छिष्यं शिक्षयेद्वाथ स्वगृह्यानेव बोधयेत् ॥
यश्च श्रमः समुत्पन्नः सूत्रस्यास्य कृतौ मयि ॥ गजाननविभुस्तेन प्रीयतां मम दैवतम् ॥
इति श्रीमन्महायाज्ञिकनागरज्ञातीयपाठकश्रीरामचंद्रसूनुमहायाज्ञिकगंगाधरपाठकवंशसंभूतपाठकश्रीबलभद्रात्मज-
देवभद्रविरचिते माध्यंदिनीसंहिताया मौनमंत्रसूत्रे चतुर्थोध्यायः ॥ सूत्रं च समाप्तम् ॥

४७ कात्यायनशुल्वसूत्रभाष्यम्-गंगाधरः ।

जयत्येको जगत्यां श्रीहरिशंकरदीक्षितः ॥ त्रयीसारविवेक्तृश्रीरामचंद्रगुरोर्गुरुः ॥ १ ॥
रामचंद्रगुरुन्नत्वा गर्गकर्कादियाज्ञिकान् ॥ श्रीकात्यायनशुल्वस्य कुर्वे भाष्यमिदं स्फुटम् ॥ २ ॥ रज्जुसमास वक्ष्यामः

च.–इति शुल्वभाष्ये सप्तमी कंडिका ॥
रामचंद्रतनूजेन श्रीगंगाधरशर्मभिः ॥ पितृचरणैः सूत्रेऽस्मिन् कातीये शुल्वसंज्ञके ॥ १ ॥
विवृतं यत्ततः शिष्टं तदिह विवृतं मया ॥ गंगाधरतनूजेन रामकृष्णेन धीमता ॥ २ ॥
नागरज्ञातिसंज्ञेन काशीपुरनिवासिना ॥ याज्ञिकास्तेन तुष्यंतु प्रीयतां यज्ञभुग्विभुः ॥ ३ ॥
यदत्रसौष्टवं किंचित्तद्गुरोरेव केवलम् ॥ यदत्रासौष्टवं किंचित्तन्ममैव गुरोर्नहि ॥ ४ ॥
इति श्रीमन्महायाज्ञिकपाठकश्रीरामचंद्रसूरिसूनुमहायाज्ञिकपाठकश्रीगंगाधरकृतं कात्यायनशुल्वसूत्रभाष्य समाप्तम् ॥

४८ कर्मप्रदीपिका-रामचन्द्रः ।

आ.–साम्राजोग्निचितो नत्वा विद्याकरगुरोः पदे ॥ रामः पद्धतिमाधत्ते सोमे कर्मप्रदीपिकाम् ॥ १ ॥

च.–इति सम्राट्स्थपतिरीग्नीचत्सूर्यदासात्मजस्य विशालाक्षीसूनो रामचंद्रस्य कृतौ कर्मदीपिकायां पद्धतावग्निष्टोमः समाप्तः ॥

४९ अग्निष्टोमः श्रौतमार्तण्डीयः-मार्तण्डसोमयाजी ।

आ.–प्रणम्य शारदां साम्बं स्वप्रकाशगुरूनपि । मार्तण्डसोमयाजी तु कुर्वे सोमादिपद्धतिम् ॥ १ ॥

अथ विच्छिन्नसोमपीथदौर्ब्राह्मण्यनिरासार्थमैन्द्राग्नं पशुमादौ

च.–मण्डपमध्वर्यवे तुभ्यमहं सम्प्रददे ॥ इति मार्तण्डसोमयाजिकृतश्रौतमार्तण्डाग्निष्टोमप्रयोगः समाप्तः ॥

५० अश्वमेधयज्ञपद्धतिः-पाठकमहानन्दः ।

आ.- अश्वमेधमखस्येह पद्धतिः सर्वसम्मता ॥ वीरभद्रात्मजेनेयं महानन्देन तन्यते ॥ १ ॥

अथ सम्भाराः कुङ्कुम शेर १ फोफल शेर ।०५।..........(एवंसम्भारसंग्रहविषयकपत्रदशकम्)

अथ कात्यायनसूत्रानुसारेणाश्वमेधः–राजयज्ञोऽश्वमेधः सर्वकामस्य अभिषेकादिगुणवान् क्षत्रियो राजेत्युच्यते ।

च.–याज्ञिकानां मते निरूढवत्पशुवर्धेनूनामन्यतरदक्षिणाः ।

श्रौतानुष्ठानगीर्वाणगुरुभिर्गुरुभिर्भुवि ॥ पाठकश्रीमहानन्दैः स्मार्तेतिनिपुणैरयम् ॥

अश्वमेधाख्ययज्ञस्य प्रयोगस्त्वतिनिर्मलः ॥ निरमायि सतां तुष्ट्यै नितरां स जयत्वलम् ॥

इति श्रीमन्महायाज्ञिकधुरन्धरपाठककुलप्रदीपपाठकश्रीवीरभद्रात्मजपाठकश्रीमहानन्दविरचितोऽश्वमेधप्रयोगो विद्व-द्वराणां श्रौतस्मार्तकर्मनिपुणानां सन्तोषाय चिरं भूयादितिशिवम् ॥ संवत् १८६१ वर्षे ॥ श्रीमन्नागरज्ञातीय पण्डितोपनामकचन्द्रदेवात्मजपंडितोपनामककाह्नदेव – – – –

५१ इष्टकापूरणभाष्यम्-याज्ञिकदेवः ।

आ.–द्वैमातुरन्नमस्कृत्य सर्वाभीप्सितदायकम् ॥ इष्टकापूरणस्याहं कुर्वे विवृतिमुज्ज्वलाम् ॥ १ ॥

अथातः सुपर्णचित्यस्याग्ने × कातीयसूत्रशेषमृजुपक्षस्यानुव्याख्यास्यामः

च.–इति श्रीसम्राट्स्थपतिः अग्निचिदेकोनत्रिंशत्क्रतुकृत्महायाज्ञिकप्रजापतिसूनुना याज्ञिकदेवेन कृतं पूरणभाष्यं समाप्तम् ॥

५२ कातीययजुर्वेदमञ्जरी-कालनाथः ।

आ.–यः शिवो नामरूपाभ्यां या देवी सर्वमंगला ॥ तयोः संस्मरणात्पुंसां सर्वत्र जयमंगले ॥

– – – – दवनौ वनिपकानां सुरशाखी सुकृती ततः क्षितिशात् ॥

सहदेवनराधिपो यदोजःप्रतिबिंबा ननु भानवा उवा [इवा] द्याः ॥ १ ॥

असीदमुष्मात्प्रबलप्रतापः श्रीहंसपालः प्रतिपक्षपालः ॥ वांछाधिकं दानमुदीक्ष्य यस्य पंचत्वमापुः किमु कल्पवृक्षाः ॥२॥

ततोजनि श्रीमहसां निदानं सन्मंगलो मंगलभूमिपालः ॥ पदत्रयं येन हरेः पवित्रं कीर्तिप्रसूनैरमहि प्रगल्भैः ॥ ३ ॥

तस्मादितरसारकलाविलासः श्रीवीरवालो जगदेकपालः ॥ आसीदनासीददधो मघोनःसंस्पर्द्धमानः क्रतुभिः शतेन ॥ ४ ॥

गुणालवाले धनसत्त्वबीजान्निरंतरं दानजलावसेकैः ॥ उदीयमाना निजवंशमुच्चैरालंब्य यत्कीर्तिलता जजृंभे ॥ ५ ॥

तस्मादभूदरिविभूतिविभूतलक्ष्मीरक्षीणपुण्यविभवो जसपालदेवः ॥
निर्वैरि यः क्षितितलं प्रविधाय शांतो रामाश्रयात्परशुराम इवाभिरेमे ॥ ६ ॥
नीहारहारहरहासविकासिकाशनीकाशनिर्भरमनोहरकीर्तिवल्लपः ॥
दिग्दंतिदंतवलनक्रमतो वितानाः पुष्यंति तारकमिषादधुनापि यस्य ॥ ७ ॥
लक्ष्मीपतिप्रणयकेलिगृहादमुष्माद्दुग्धांबुधेरमृतभानुरिवोदयासीत् ॥
भूभृत्किरीटनिवहेषु पदं दधानः – – कलाभिरमलो मरुराजदेवः ॥ ८ ॥
यस्य प्रतापतपने समुदीयमाने वैरिक्षितीशकमलावलयो निमीलाम् ॥
स्वैरं प्रयान्त्यपि च बान्धवकैरवाली पद्माश्रयां मुदमुपैति विचित्रमेतत् ॥ ९ ॥
निर्दूषणा प्रियतमापि गृहादनेन लक्ष्मीविनोदनवशंवदमानसेन ॥
निष्कासितास्ति कुरुकं स्विति किं प्रवक्तुं कीर्तिः परिभ्रमति दिग्वलयं यदीया ॥ १० ॥
दानैर्निवृत्तिपदवीं नयतोर्थिनश्च प्रत्यर्थिनं च न श्वरं [शिरः] प्रणयं दधानः ॥
यः संसदि स्फुरति चाद्भुतमंत्रशक्तिविस्मापितामरगुरुर्गुणरत्नभूमिः ॥ ११ ॥
यो निश्चिनोति विदुषामपि संशयेषु धर्मे श्रुतिस्मृतिगतानभिधेयभावान् ॥
यश्चातनोति निखिलासु कलास्वभिज्ञो यज्ञान [न्] यज्ञमहितानहितापकारी ॥ १२ ॥
स यजुर्मंजरीं रम्यां करोति कतिनाम्मुदे ॥ नानाविधफलव्यूहप्रसवोल्लासितश्रियम् ॥ १३ ॥
विविच्य भाष्यं विविधांश्चकल्पानेतस्य तोषाय मुदा व्यतानीत् ॥
भट्टस्वयंभूतनयोत्र विद्वाञ्श्रीकालनाथः सहकारिभावम् ॥ १४ ॥

च.–इति रणदीक्षाप्रकारः चतुर्थः ॥

५३ कात्यायनीयस्नानसूत्रपद्धतिः-हरिहरः ।

आ.–प्रणतोस्मि हरेरंघ्रिसरसीरुहमादरात् ॥ यज्जगत्पावनं पाथः प्रासोष्टामरसैंधवम् ॥ १ ॥
कात्यायनकृतस्नानविधेर्व्याख्यापुरःसरम् ॥ विधास्ये पद्धतिं विद्वत्सदाचारद्विजप्रियाम् ॥ २ ॥

च.–महालयविधौ तीर्थे तथा तर्पणे ॥
इति श्रीमिश्राग्निहोत्रिहरिहरकृतौ कात्यायनोक्तस्नानविधिसूत्रव्याख्यानपूर्विका स्नानपद्धतिः समाप्ता ॥

५४ गृह्यपद्धतिः-भास्करदीक्षितः ।

आ.–अथ यजुःशाखीयगृह्यपद्धतिर्लिख्यते तत्रादौ स्वस्तिवाचनम् ॐस्वस्ति

च.–ततः परस्पराङ्के बालकौ दत्त्वा अभिषेकतिलकमन्त्रपाठाद्यमाशिर्ग्रहणं विधाय पुनः स्वस्वबालकं गृहीत्वा स्वस्वावासं व्रजेतामिति शान्त्या शुभं स्यात् ॥

५५ गृह्याग्निसागरः-नारायणभट्टः ।

आ.—नत्वा कृष्णपदांभोजं गणेशं शंकरं शिवम् ॥ लक्ष्मीधरं च पितरं भट्टं नारायणं तथा ॥
यथाज्ञानं विचार्याथ पक्षं शिष्टैरनुष्ठितम् ॥ त्रीणि सूत्राणि तद्ग्रंथानालोच्यान्यांश्च भूरिशः ॥
आरडेत्युपनामा वै भट्टनारायणः सुधीः ॥ गृह्याग्निसागरं चैव कुरुते शिष्टतुष्टये ॥

च.—बौधायनमताद्दृह्यविकल्पः ॥ इति श्रीमदारडोपनामकलक्ष्मीधरभट्टसूरि (सूनु) नारायणभट्टकृते गृह्याग्निसागरे स्थालीपाकादिप्रायश्चित्तविषयनिरूपणं समाप्तम् ॥

५६ चयनपद्धतिः-रामवाजपेयी ।

आ.—सम्राजोग्निचितो नत्वा विद्याकरगुरोः पदे ॥ रामः पद्धतिमाधत्ते चयने कर्म्मदीपिकाम् ॥ १ ॥

च.—इति श्रीरामवाजपेयिकृतायां कर्मदीपिकायां चयनपद्धतिः समाप्ता ॥

५७ चातुर्मास्ययागपद्धतिः ।

आ.—वन्दे विनायकं रामं श्रीपतिं च सरस्वतीम् ॥ तेजस्विनीं गुरुं चैव सर्वाभीष्टार्थसिद्धये ॥ १ ॥
रामं सीतामुखाब्जे करधृतकमलं साम्यमालोकयन्तं प्रोद्यत्सूर्यैर्नृसिंहं नखदशनमितैर्विभ्रदैत्यं दहन्तम् ॥
शम्भुं दिव्यैः सुनृत्यैः स्मितशुचिवदनैः पार्वतीं नन्दयन्तं ब्रह्माणं वेदकर्मण्यवधृतमनसं नौमि संविन्मुदेहम् ॥ २ ॥
मुख्यानां कालसङ्कोचवृत्तीनां गुणिनां तथा ॥ चातुर्मास्याख्ययज्ञानां पद्धतिः क्रियते मया ॥ ३ ॥
इह तावद्धविःसंस्थासु गणितानि चातुर्मास्यानि । ततः संस्थानां नित्य

च.—हृदयशूलोपस्थानान्तं कर्म्म ॥ इति पाशुकानि चातुर्मास्यानि समाप्तानि ॥ छ ॥ संवत् १६३०

५८ पिष्टपशुतिरस्करणी-रामेश्वरः ।

आ.—परारूपेण तिष्ठन्तीं पश्यन्त्यादिप्रभेदतः ॥ प्रकटां नौमि वाग्देवीं वीणापुस्तकधारिणीम् ॥ १ ॥
साध्याक्षरगर्भितां पंचनवाक्षरान्वितां भवतीम् ॥ अनुदिनमनुचिन्तयतां वाचो निर्यान्त्ययत्नतो वदनात् ॥ २ ॥
अवैदिकैर्दूषितमानसानां शङ्कानिवृत्त्यै श्रुतिवर्त्मगामिनाम् ॥ रामेश्वरः पिष्टपशुप्रयोगं प्रमाणकूटैः परिहर्तुमुद्यतः ॥ ३ ॥

च.—वेदबाह्यैरतत्त्वज्ञैर्दूषिता वेदपद्धतिः ॥ रामेश्वरेण कृतिना शोधिता विदुषां मुदे ॥ १ ॥
सेयं विश्वेश्वरो देवो यो मामत्र न्ययोजयत् ॥ तस्यैव चरणे न्यस्ता तेन प्रीणातु शङ्करः ॥ २ ॥
इति श्रीश्रुतिस्मृत्येकशरणकृष्णाकूलनिवासिरामेश्वररचिता पिष्टपशुतिरस्करणी समाप्ता ॥

५९ कात्यायनसूत्रप्रयोगसारः-देवभद्रः ।

आ.—श्रीविघ्नेशं याज्ञवल्क्यं मुनिं कात्यायनं गुरुम् ॥ अस्मद्वृद्धजनानां सद्गुरुञ्च हरिशङ्करम् ॥ १ ॥
गङ्गाधरम्पाठकञ्च यागकालविवेचकम् ॥ भागीरथीं मातरञ्च पितरं बलभद्रकम् ॥ २ ॥
पितृमूर्तिं भर्तृयज्ञं वासुदेवञ्च शङ्करम् ॥ गर्गङ्कर्कमनन्तंच श्रीहरिस्वामिमाधवौ ॥ ३ ॥

सम्प्रदायप्रणेतॄंश्च रामं शुल्वप्रकाशकम् ॥ यज्ञविद्याप्रणेतारं परमं देवयाज्ञिकम् ॥ ४ ॥
दीक्षितश्रीधरं रेणुं पद्मनाभं गदाधरम् ॥ महादेवं हरिहरमित्यादीन्पूर्वयाज्ञिकान् ॥ ५ ॥
प्रणम्य मनसा वाचा कर्म्मणापि च भक्तितः ॥ सूत्रं कातीयं तद्भाष्यं कार्कं दैवं सपद्धतिम् ॥ ६ ॥
श्री अनन्तकृतां रामपद्धतिं याज्ञिकप्रियाम् ॥ अन्धयष्टिं पद्मनाभिं सम्प्रदायाख्यपद्धतिम् ॥ ७ ॥
ग्रन्थानेतांस्तु सङ्गृह्य निजबुद्ध्या विमृश्य च ॥ ततोपि याज्ञिकानाञ्च सम्प्रदायो यथाऽधुना ॥ ८ ॥
तथा कर्कानुसारेण ज्योतिष्टोमक्रतोरृजुः ॥ प्रयोगसारनामासौ प्रयोगो रच्यते यतः ॥ ९ ॥
सूत्रवाक्यं समुल्लिख्य प्रयोगलेखनं नहि ॥ कृतम्पूर्वैरतस्तस्य लेखनं क्रियते मया ॥ १० ॥
दर्शपूर्णमासाभ्यामिष्ट्वाऽन्येन यजेतेति श्रुतेः

च.—प्राञ्चो नव्याश्चाहुरिति शिवम् ॥ इति कात्यायनसूत्रप्रयोगसारे ज्योतिष्टोमप्रयोगे सुत्याख्यपञ्चमदिनकृत्यम् ॥
विघ्नेशचरणद्वन्द्वमाधाय हृदि मङ्गलम् ॥ बलभद्रतनूजेन देवभद्रेण धीमता ॥ १ ॥
मया विरचितश्चायं प्रयोगः कर्कसम्मतः ॥ कर्कानुक्तं तदन्येभ्यः स्वीकृतञ्चाविरोधतः ॥ २ ॥
कर्कानुसारिणीनाञ्च पद्धतीनाम्परस्परम् ॥ विरोधे प्रौढभाष्यादिग्रन्थेभ्योङ्गीकृतं वरम् ॥ ३ ॥
क्वचित्कुत्रापि दृष्टं न दृष्टं वृद्धस्य टिप्पणे ॥ न्याय्यं भाष्यार्थतत्त्वं यत्तदप्यङ्गीकृतं तथा ॥ ४ ॥
क्वचिद्भाष्यविरोधोपि याज्ञिकानाम्मतेस्ति च ॥ तत्र सत्सम्प्रदायस्याऽविरोधस्स्वीकृतः पुनः ॥ ५ ॥
ज्ञानादज्ञानतो वापि यच्चेह लिखितम्मया ॥ क्षन्तव्यं तच्च संशोध्यं याज्ञिया अयमञ्जलिः ॥ ६ ॥
न मदीया कृतिर्यस्मादेषा यज्ञस्य वै कृतिः ॥ यथा प्रेरितवान्यज्ञस्तथा लिखितवानहम् ॥ ७ ॥
याज्ञिकानामपत्यानां नव्यानाञ्च हिताय तु ॥ कृतोऽयं सरलस्तेन सञ्चरन्तु सुखेन ते ॥ ८ ॥
अब्दे धृतिशते काश्यां दुग्धविघ्नेशसन्निधौ ॥ पित्रोर्गेहे वसन्नेव ग्रन्थोयं रचितस्ततः ॥ ९ ॥
ज्येष्ठभ्रातुः पृथग्भूत्वा स्वहर्म्ये भैरवापणे ॥ गजाभ्रवसुभूवर्षे सिते सहसि शीतगौ ॥ १० ॥
चतुर्थ्यां संस्थितिं कृत्वा ग्रन्थोयं सुपरिष्कृतः । ततो मे यः श्रमस्तेन प्रीयतां यज्ञभुग्विभुः ॥ ११ ॥
सोमप्रयोगसारेऽस्मिन्देवभद्रकृते वरे ॥ पञ्चत्रिंशच्छती ग्रन्थसंख्येयं समुदीरिता ॥ १२ ॥
अपरिष्कृतमेतस्य पुस्तकं याम्यदिग्गतम् ॥ अस्त्यतोऽनेन साकन्तच्छोध्यमेष ममाञ्जलिः ॥ १३ ॥
इति श्रीमन्महायाज्ञिकनागरजातीयपाठकश्रीरामचन्द्रसूनुमहायाज्ञिकश्रीगङ्गाधरपाठकवंशसम्भूतपाठकश्रीबलभद्रात्मजदेवभद्रेण रचिते कात्यायनसूत्रप्रयोगसारेऽग्निष्टोमसंस्थाज्योतिष्टोमप्रयोगस्समाप्तिमगमत् ॥

६० यूपस्थापनम् ।

अ.—अथ यूपस्थापनविधिः । सविताप्रसवेति यूपवृक्षं समागत्य ॥
आयुष्यं वर्चस्वं मन्त्रेण छेदनम् । यूपवृस्केतियूपस्थाने आसनं नयेत् ।
अतः परं प्रवक्ष्यामि यूपानामेव लक्षणम् ॥ प्रशस्तदेशसमुत्पन्ने अरणीशुभदर्शनम् ॥ १ ॥
ब्राह्मणस्य तु पालाशो [श] आश्वत्थो बैल्व एव च । वैकङ्कतमयः प्रोक्तः प्रमाणं केशसम्मितम् ॥ २ ॥
च.—पश्चात्सपत्नीसहितं स्नानं कर्तव्यं नवाम्बरं वस्त्रपरिधानम् ॥ ॥ इति यूपस्थापनं परिपूर्णमस्तु समाप्तिमगात् ॥

६१ श्रौतपद्धतिः-दीक्षितमहादेवः ।

आ.—विद्यानां विभवं शिवं शिवकरं नत्वा गणेशं गिरं ज्ञात्वा वेदवचांसि कर्कविवृतिं सत्संप्रदायान्विताम् ॥
श्रौतस्मारणकर्मपद्धतिमिमामृज्वीं महार्थामहं वक्ष्ये याज्ञिकवल्लभां गुरुपदांभोजप्रसादोज्ज्वलः ॥ १ ॥
श्रीमच्छ्रीमालनामप्रथितगुणगुणं सत्पुरं भाति भूमौ सारं त्वादाय नूनं विबुधनिलयतो निर्मितं पापतापम् ॥
सत्तीर्थादित्यवृन्दैर्मुनिजननिवहैर्भूषितं भूमिभूषं वेदेज्यादानचंचुद्विजगणशमिताशेषदोषं सतोषम् ॥ २ ॥
श्रीमाले संबभूव द्विजवरतिलकः कान्तकीर्तिः क्रियावान्सूर्यदेवो नाम तस्मादजनि गुणनिधिर्दीक्षितो देवशूरः ॥
नानासच्छास्त्रवेदी श्रुतिविमलमतिर्दानशौंडप्रकांडं तज्जोऽभूत्तेल्लदेवो द्विजगुणविमलः सत्यसंधः सुवंद्यः ॥ ३ ॥
तस्माद्गंगाधरोभूद्बहुसवनचणश्चिंतितार्थप्रदायी सोयं प्रासूत पुत्रावबनिसुवलयालंकृती एतयोस्तु ॥
ज्यायान्धन्यो वदान्यो नृपतिशतशिरोरत्नवद्भासुराद्रिर्वेदाध्यायी विनीतो दमशमनिरतः कर्मशीलः सुशीलः ॥ ४ ॥
तस्यायं योनुजन्मा श्रुतविमलमतिः श्रीमहादेवनामा साग्निः सत्यार्थनामा द्विजवरतिलको वेदवेदांतवेदी ॥
साचारः सत्यशीलो यमनियमरतो धर्मशास्त्रेष्वधीतिर्दाता धर्म्मावतारो भुवि विजययुतो यज्ञविद्यावदातः ॥ ५ ॥
अंतर्मेदिनि मेदिनीपतिसभे मान्यो वदान्योग्रणीरंतर्वाणिचरो विचारविदुरो वेदार्थविद्विश्रुतः ॥
तर्के कर्कशगीः स्मृतौ विमलधीर्जज्ञे ततो याज्ञिको जातौ तेन सुतौ महर्षिरुदयो विद्याविनीतावुभौ ॥ ६ ॥
तस्यानुजो धर्मसुधानिधानं लक्ष्मीधरो लक्षगुणैर्वलक्षः ॥ धरामरेज्यः श्रुतवेदवेदी श्रीवासुदेवांघ्रिसरोजभृंगः ॥ ७ ॥
इति कुलवर्णनम् ॥

च.—अनुक्तं प्रागुक्तं द्रष्टव्यम् ॥ इति दीक्षितमहादेवकृतौ श्रौतपद्धतावतिरात्रः समाप्तः ॥

६२ श्रौताधानपद्धतिः-गणपतिः ।

आ.—साम्बं शिवं प्रणम्याथ पितरं हरिशंकरम् । करोमि सुखबोधाय श्रौताधानस्य पद्धतिम् ॥ १ ॥
शतपथकल्पभाष्यवाचः सुमतमथो जयतां विचिंत्य ॥ प्रवदति हरिशंकरात्मजन्मा गणपतिरन्विता नवाह्नसिद्धिम् ॥ २ ॥
अथ श्रौताधानस्य पद्धतिः ॥

च.—हग्वेदशैलेन्दुमिते शकाब्दे श्रीविक्रमस्यासित ऊर्जमासे ॥ आरंभणीयं च विधिं वितेने श्रीरावलाख्यो गणपत्यभिज्ञः ॥ १ ॥
इति श्रीमदग्निहोत्रिचातुर्मास्ययाजिसमासादितसकलपुरुषार्थश्रीहरिशंकररावलसूरिसूनु गणपतिविरचिता सकलवैकल्पिकपदार्थान्वारंभणीयसहिता श्रौताधानपद्धतिः समाप्ता ॥

६३ संस्थापद्धतिः-वैद्यनाथः ।

आ.—अथावसथ्याधानं तत्साध्यानि कर्माणि च कात्यायनानुसारेण लिख्यंते । तत्रांगहीनस्यासमर्थत्वात् अश्रौत्रियस्यावैदिकत्वात्

च.—इति पाकयज्ञसंस्था ॥ इति श्रीयजुराम्नायचरणमिश्रश्रीकेशवसूनुश्रौतस्मार्त्तप्रचंडरश्मिमिश्रश्रीरत्नेश्वरतनूजनियाज्ञिकभूवृंदारकवृंदवंदनीयमिश्रश्रीवैद्यनाथप्रकाशिते श्रीसंस्थावैद्यनाथे चतुर्थं मानम् ॥

६४ सुपर्णचितिदीपिका–उपेन्द्रः ।

आ.–श्रीमातृचरणयुगलं गुरुपदयुग्मं विभाव्य नत्वाहम् ॥ कातीयसूत्रशेषं कुतुकात्किमपि स्फुटीकुर्वे ॥ १ ॥
नत्वा कात्यायनाचार्य्यं कल्पसूत्रन्तदीरितम् ॥ दृष्ट्वोपेन्द्रः प्रतनुते सुपर्णचितिदीपिकाम् ॥ २ ॥
आपस्तम्बीयसूत्रीयो भरद्वाजान्वयोद्भवः ॥ कर्णाटकः काशिकायान्निवासी याजुषस्सुधीः ॥ ३ ॥
अथातः सुपर्णचित्यस्याग्नेः कातीयसूत्रशेषमृजुपक्षस्यानुव्याख्यास्यामः

च.–एतावत्यो यथा स्युस्तथा करणानि रचयेदित्यर्थः ॥
इति श्रीव्यंकुशास्त्रिशिष्येण रामभट्टसुतेन हि ॥ कृतोपेन्द्रेण बोधाय सुपर्णचितिदीपिका ॥ १ ॥
नागेशदीक्षिताख्येन काण्वद्विजवरेण वै ॥ प्रार्थितोऽहं सतां तुष्ट्यै ग्रन्थारम्भन्तदाकरम् ॥ २ ॥
अक्षयाद्बे माघशुक्लपञ्चम्यां सौम्यवासरे ॥ सप्तख्यार्थे [त्यारये] जनपदे ग्रन्थोयं पूर्णतामगात् ॥ ३ ॥
इति श्रीकात्यायनीयसुपर्णचितिदीपिकायामुपेन्द्ररचितायाम्पूर्णश्लोकाः ॥

६५ क्रतुमुक्तावली ।

आ.–यशोदानन्दनं वन्दे कृष्णं कमललोचनम् ॥ गोपिकाहृदयानन्ददायिनं परमाद्भुतम् ॥
अथ सौत्रामणिप्रयोगो लिख्यते ॥

च.–कर्कानुसारणी शुभ्रा क्रतुमुक्तावली मया ॥ गुंफिता शोधनीया सा विद्वद्भिर्वेदपारगैः ॥
सौत्रामणिपद्धतिः समाप्ता ॥

६६ आरण्यविवरणम्–शोभाकरः ।

आ. टी.–आरण्यकाभिधे षष्ठोध्यायो व्याख्यायतेधुना ॥.......... आर्षं छन्दो दैवतं च तत्र तत्राभिदध्महे: ॥..........
इति महानाम्नः प्रकृतितस्तिस्रो विकृतितो नवसंख्याका ऋचः। ...... यथामति व्याख्यातानि ॥ इति महानाम्नीसमाप्ता ॥
वेदाख्यज्ञानं [वेयाख्यगान] व्याख्यानं सम्यगेतत्कृतं मया ॥
आरण्यगानव्याख्यातिं तथैवाप्यविभाष्यते [वैषा विभाव्यते] ॥ १ ॥

च.–तथाग्नींद्रादित्याः सहचारिणः सदेवा एवपालमती [यन्ती] त्यर्थः ॥
इति श्रीभट्टशोभाकरकृत आरण्यविवरणे षष्ठप्रपाठकः समाप्तः ॥

६७ ताण्ड्यब्राह्मणभाष्यम्–जयस्वामी ।

आ.–अभीष्टसम्यक्प्रवणो विधाता निसर्गचेष्टाप्रशमक्रमेण ॥ यः स्वास्थ्य – – – नारायणं तं प्रणतः प्रपद्ये ॥ १ ॥

मातेव या चित्रफलप्रदानैर्नीचात्मसांमुख्यमथान्यपूर्वम् ॥
त्रयीप्रपञ्चोपशमं प्रधानं नारायणं तं प्रणतः प्रपद्ये ॥ २ ॥
राणायनीयकाचार्य्यौ त्र्यनुष्ठानतत्परौ ॥ वन्दे पितृपितृव्यौ च तौ हरिस्वामिसुन्दरौ ॥ ३ ॥
जयन्ति गुरवो वन्द्या – – – – – सुप्रसिद्धान्तशब्दन्यायप्रभाकराः ॥ ४ ॥
पञ्चात्र पञ्चिका पूर्वब्राह्मणे पञ्चविंशके ॥ कृता कृतधियामर्थे सर्वार्थो – – – – ॥ ५ ॥
– – – पण्डितधियां ताण्डकार्थप्रकाशिकाम् ॥ मन्त्रब्राह्मणरूपोयं पुरुषार्थावबोधकः ॥
गुरुपर्वक्रमायातो नित्यो वेदः प्रतिष्ठितः ॥

च.—पञ्चदशः प्रपाठकः समाप्तः ॥
पञ्चविंशार्थमालेयं या जयस्वामिना कृता ॥ हरिस्वामिसुतेनास्यां दशाहः परिसंस्थितः ॥
पंचभिः शतैः सार्द्धैर्व्याख्यातोयं पंचदशः ॥

६८ सामविधानभाष्यम्-भरतस्वामी ।

आ.—अथातः सामविधानं भाष्योक्तपंचस्वाध्यायासं (ग) तत्साध्यफलप्रसाधकमिति विवक्षुराह ॥ ब्रह्म हवा इद—
च.—अथावासिन आह उपाध्यायाय ग्रामवरं सहस्रश्वेतं चाश्वं प्रदायानुज्ञातो वा यं कामं कामयते तमाप्नोति तमाप्नोति ॥
इति सामविधाने आचार्यभरतस्वामिकृतौ पदार्थमात्रविकृतौ तृतीयोऽगात्प्रपाठक इति सामविधानभाष्यं समाप्तम् ॥

६९ मंत्रानुक्रमणिका ।

आ.—अथोपनिषत्स यजुपर्वणऋषिच्छंदोदेवताविनियोगब्राह्मणानि सलक्षणानि च
च.—यत्रासेर्द्वयोर्मधुपर्को मुंच गां बृहती माता रुद्राणां त्रिष्टुप्गौर्द्वयोर्द्वयोः
इति मंत्रानुक्रमणिकायां द्वितीयप्रपाठकः समाप्तः ॥

ग्रन्थानुक्रमणिका ।

वेयश्चारण्यकश्चैव ऊह ऊह्यस्तथैव च ॥ महानाम्नी पंचमं च छंदस्यारण्यमेव च ॥ १ ॥
महानाम्न्युत्तरा चैव पदस्तोभविशेषतः ॥ तांड्यष्षड्विंशब्राह्मणं सामविधानमार्षकम् ॥ २ ॥
अग्निवंशसंहितस्य मंत्रोपनिषदमेव च ॥ पुष्पलाख्यायनसूत्रौ च [नैसूत्रे] गोभिलपुत्रस्तथा क्रमम् ॥ ३ ॥
नारदी लोमशी गौतमी एतेषु च शिक्षकाः ॥ व्याकरणं ऋक्सामतंत्रो [त्रे] निरुक्तं बह्वृचा [च] स्तथा ॥ ४ ॥
छंदज्योतिषौ स्थाने ग्रंथानुक्रम उदीरितः ॥ अथ परिशेषं क्रमे चैव उपअंगं [चैवोपांगं] विभाव्यते ॥ ५ ॥
कर्मप्रदीपगाभिलीगृह्यासंग्रहपुत्रकम् ॥ श्राद्धकल्पश्चानुसूत्रं पंचविध्यमनुत्तमम् ॥ ६ ॥

मात्रागायत्रसंहारममृताहरणमेव च । श्रावणं महानाम्न्यश्च हितवाक्यं सोम कथ्यते [उच्यते] ॥ ७ ॥
कार्त्तिक्यं प्रौष्टपदं च स्नानसूत्रं तथैव च ॥ नैगेया धातुसंन्या [ज्ञा] या मंत्रानुक्रममेव च ॥ ८ ॥
चर्णव्यूहश्चतुःशाखा परिशेषानुक्रमाः स्मृताः ॥ ग्रंथानुक्रमः कौथुमानां द्विपंचाश उदाहृतः ॥ ९ ॥
इति ग्रंथानुक्रमणिका समाप्ता ॥ संवत् १८०७

७० सर्वानुक्रमणिका ।

आ.—प्रणम्य तातं विश्रामं विघ्नेशं जगदम्बिकाम् ॥ ब्रह्मयज्ञादिसिध्यर्थमृष्यादीनुच्यते क्रमात् ॥ १ ॥
च.—इति षष्ठः प्रपाठकः क्षुद्रपर्व समाप्तम् ॥

७१ लाट्यायनभाष्यम्—रामकृष्णः

आ.—श्रीनृसिंहं गणाध्यक्षं नत्वा दामोदरं गुरुम् ॥ लाट्यायनार्थं व्याचष्टे नानाभाई द्विनामकः ॥ १ ॥
अथ ज्योतिष्टोमादिसहस्रसंवत्सरानामेकाहाहीनसत्राणां विधानं करिष्यन्सूत्रकारः प्रथमं तावत्परिभाषां करोति
अथ विध्यव्यपदेशे सर्वत्र क्रत्वधिकारः
च.—अत्र संवत्सरशब्दोसंभवाद्गौण्या वृत्त्याऽहर्लक्षकः कात्यायनेनोक्तः अह्नां वाक्यत्वादिति ॥
इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नानाभाईद्वितीयनाम्ना कृते लाट्यायनसूत्रभाष्ये दशमाध्यायस्य विंशतिखण्डः समाप्तः ॥

७२ पञ्चविधिसूत्रम् ।

आ.—प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनानि भक्तयः
च.—निधनं प्रत्यंगमितरेषां यथोक्तं यथोक्तम् ॥ ७ ॥ इति पञ्चविधिसूत्रे द्वितीयः प्रपाठकः ॥ समाप्तोयं ग्रंथः ॥

७३ अमृताहरणम् ।

आ.—यस्यांडस्फोटशब्दाद्दशदिशोभवन्कंपिताः
च.—अभयन्नो अस्तु अमृतातरेमा ॥ २९ ॥ अमृताहरणे द्वितीयोध्यायः प्रपाठकः समाप्तः ॥

७४ वृषोत्सर्गस्नानविधिः ।

आ.—यत्तीर्थं पावकानः सरस्वतीतिपादावारभ्य मृद्भिर्गात्राणि प्रक्षाल्य ॥
च.—शांत्यर्थंशांत्यर्थम् । प्रौष्ठपदः सप्तमः ॥

७५ सामगानां छन्दः ।

आ.—अथातः छन्दसां विचयं व्याख्यास्यामो गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तिस्त्रिष्टुब्जगतीति सप्तार्षाण्येकाक्षरपदादीनि

च.—छन्दोविद्देव विप्रस्तु धर्मतस्तद्गुणाश्रितः ॥ छन्दसामेति सालोक्यममृतत्वञ्च गच्छतीत्याह भगवान् गार्ग्यो गार्ग्यः ॥

इति सामगानां छन्दः समाप्तम् ॥

७६ सामगानां ऋक्तन्त्रव्याकरणम् ।

आ.—अथ वाचो वृत्तिं व्याख्यास्यामो वायुं प्रकृतिमाचार्य्या वायुमूर्छे (मु) च्छ्वासी भवति श्वासो नादर इति शाकटायनो वायुरस्मिन्काये मूर्च्छत्यटतीत्येषोऽर्थः

च.—द्विवतिपरे षाद्‌त्यः स्वरोनन्त्य इति चतुर्थः प्रपाठकः । सामगानां ऋक्तन्त्रव्याकरणं समाप्तम् ॥

७७ सामतन्त्रम् ।

आ.—स्वरोनन्त्यः । नोचान्तानां । उपांत्यं । उपान्त्ये । त्रिषु । आदिः । उपांत्यं चाद्वितीयम्

च.—ग्राम इह विपरीतं विश्वो रोहतु १० अनृगाद्यक्षरम् ॥ इति सा० तन्त्रे त्रयोदशप्रपा०

७८ उद्गात्रादिच्छन्दोप्र० अग्निष्टोमः ।

आ.—अथ विध्यव्यपदेशे सर्वकत्त्वधिकारः तत्रादौ मातृपूजावृद्धिश्राद्धमेकश्रुतिविधानान्मन्त्रान्कर्माणि चोद्गातैव कुर्य्यादनादेशे सर्वेषां यज्ञोपवीतोदकाचमने नित्ये कर्मोपयतमव्ययो व्यावृत्तिश्चयज्ञाङ्गे करणे प्राङ्मुखकरणम्

च.—सप्तदशानि पृष्ठानि सप्तदश आभव एकविंशोग्निष्टोमः समाप्तः ॥

७९ अश्वमेधपद्धतिः ।

आ.—अथाश्वमेधस्त्रिरात्रः । तत्रारंभकालदीक्षोपसद्विचारदक्षिणादि सर्वं राजाश्वमेधेन यजेतेत्यादिसूत्रेणोक्तम्

च.—इति सर्वस्तोमोतिरात्रस्तृतीयमहः समाप्तः ॥

८० अप्तोर्यामसंस्थापद्धतिः ।

आ.—लाट्यायनं नमस्कृत्य मुनीन्द्रानपि भक्तितः ॥ उद्गात्रे सोम ॥ अथ यज्ञविधिं व्याख्यास्यामः ॥

च.—सर्वाणि कृतास ॰ स्थासुपद्धतिः ॥ इत्यप्तोर्यामस ॰ स्थापद्धतिः समाप्ता ॥

८१ सामशाखीयब्रह्मत्वपद्धतिः ।

आ.—अथ ब्रह्मत्वमुच्यते ॥ तत्रादौ एकाग्निसाध्यपाठकयज्ञाअष्टकायार्वण्यदयोगृह्योक्ता: ॥
च.—उत्तरेषामेवमादिः ऊहः ॥ इति सामशाखीयब्रह्मत्वपद्धतिः समाप्ता ॥

८२ कुशाण्डिका ।

आ.—पूर्णपात्रादिदानं च स्वाशिषो ब्रह्ममोचनम्
च.—अपवर्गे वामदेव्य गानठँ शांत्यर्थं शांत्यर्थम् ॥
इति कुशाण्डिका ॥

८३ चयनपद्धतिः-रामकृष्णः ।

आ.—अथाग्निष्टोमसंस्थस्य ज्योतिष्टोमस्य प्रयोग उच्यते ॥
ऋत्विगार्षो योनूचान इत्यादि लक्षणवान् ऋत्विग्भवति ॥ असौ ज्योतिष्टोमेन यक्ष्यते तत्रौद्गात्रं भवता कर्त्तव्यमिति सोमप्रवाकेण प्रार्थित उद्गाता यद्यार्त्विज्यं न चिकीर्षति तदा नमः सोमाय राज्ञ इत्युक्त्वा ॥
च.—तत्प्रदेशे गानमिति विशेषः । अन्यत्सर्वमग्निष्टोमेन समानम् ॥
इति श्रीत्रिपाठिदामोदरसूनुना रामकृष्णेन नानाभाईद्वितीयनामधेयेन कृता चयनपद्धतिः समाप्ता ॥

८४ अग्निहोत्रे प्रायश्चित्तपद्धतिः-रामकृष्णः ।

आ.—अथ क्रतुप्रायश्चित्तमुच्यते ॥ तत्र प्रथमं तावदवच्छेदप्रायश्चित्तं प्रारभ्योच्यते—तांड्यब्राह्मणे एवमुक्तं । यदि प्रस्तोता
च.—अग्निहोत्रे हौम्यशेषं हुतावशिष्टं हविरेव दक्षिणा नान्यदित्यर्थः ॥
इति श्रीदामोदरसूनुना रामकृष्णेन नानाभाईद्वितीयनामधेयेन कृताग्निहोत्रे प्रायश्चित्तपद्धतिः समाप्ता ॥

८५ ज्योतिष्टोमपद्धतिः ।

आ.—अथ शिक्षणीयेष्टौ प्रस्तोता पूर्वमवृतश्चेदिदानीं वृतः
च.—इति ज्योतिष्टोमपद्धतौ तृतीयसवनम् ॥

८६ छन्दोगप्रायश्चित्तम् ।

आ.—गणेशं शारदां नत्वा कल्पकारं ततः परम् ॥ प्रायश्चित्तानि वक्ष्येहं क्रतुवैगुण्यशांतये ॥
च.—शेषं प्रकृतिवत्कर्म त्रिषु सवनेषु चोच्यते ॥ इति छंदोगप्रायश्चित्तं समाप्तम् ॥

८७ पंचमहायज्ञविधिः ।

आ.–अथ तर्प्पणं लिख्यते उँ नमो ब्राह्मणेभ्यो नमः
च.–श्रीमहायज्ञपुरुषाय नमः ॥ सामवेदोक्तशाकल्यवैश्वदेवः समाप्तः ॥

८८ पौण्डरीकप्रयोगः-सदारामः ।

आ.–अभ्यासंगः षडहस्त्रयः छंदोमाश्वतुष्टोमोग्निष्टोमो विश्वजिदतिरात्र इत्यक्तः तस्य द्वादशोपसत्कपक्षे द्वादशाहे
च.–वरदराज इति शिवम्

इति श्रीमत्रिपाठिसूरजिततनूजत्रिपाठिदेवेश्वरात्मजसदारामकृतः पौंडरीकप्रयोगः। समाप्तोयं पौंडरीक एकादशरात्रः ॥

८९ सामवेदीयरुद्री ।

आ.–उँकारस्य ब्रह्मा ऋषिः देवीगायत्री छंदः परमात्मा देवता शिखान्यासे विनियोगः ॥ उँमंत्रमंत्रादौ प्रणवः कार्यः
च.–अतो देवा अवंतुतो [नो] यतो विष्णुर्विचक्रमे । पृथिव्या अविसानवि० ॥ इति दिक्पालः ॥

९० रुद्रजपः ।

आ.–भ्राजा । २ । भ्राजा ३१ उवा २ अग्न आयुँषि पवसे आसुरवो–
च.–उँस्वस्ति नो बृहस्पतिर्दधातु ॥ १५ ॥ इति रुद्रजपः संपूर्णः ॥

९१ वाजपेयस्तोमप्रयोगः ।

आ.–अग्नेरतेजसेंद्रस्येंद्रियेण सूर्य्यस्य वर्चसा बृहस्पतिरत्वा युनक्तु
च.–पर्यायादिषु हिंकारेण स्तुवीरन्स्तुतस्य वाजपेयस्य स्तोमप्रयोगः समाप्तः ॥

९२ संख्याकल्पः ।

आ.–नवशतँसहस्रैकं त्रिँशत्सप्ताधिकं तथा कौथुमायामृचाँ सम्यक् संख्यामाहुर्मनीषिणः ॥
च.–इति संख्याकल्पः समाप्तः ॥

१३ सदस्यपद्धतिः-दीक्षितरामकृष्णः ।

आ.—सदस्यपद्धतिरुच्यते तत्र सूत्रम् । तस्य दधिभक्षान्तं कर्म्म ॥
च.—इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नानाभाईद्वितीयनाम्ना कृता सदस्यपद्धतिः समाप्ता ॥

१४ सर्वतोमुखपद्धतिः-दीक्षितरामकृष्णः ।

आ.—सर्वतोमुखस्य त्रिवृत्सोमस्य स्तोत्राण्युच्यन्ते ॥ तत्र महन्मेवोच इत्यादिसमिदाधानांतो विधिर्ज्योतिष्टोमवद्भवति ॥
च.—अत्र वैराजस्याभावे इन्द्रजुषस्वेति स्वरा न भवंति ॥ तथाच निदानसूत्रम् ॥
विराजामन्वयोयस्वराजो अयेषुरिति ॥ इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नाह्नाईतिद्वितीयनाम्ना कृता ॥
सर्वतोमुखस्य पद्धतिः समाप्ता ॥

१५ सर्वविष्टुतीनां प्रयोगः ।

च.—शस्यपथ्ययैव कुर्य्यात् ॥ इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नानाभाईद्वितीयनाम्ना कृतः सर्वविष्टुतीनां प्रयोगः समाप्तः ॥

१६ अथर्वसर्वानुक्रमणिका ।

आ—ॐ ब्रह्मदेवं नमस्कृत्य दुर्गां विघ्नेश्वरं गुरुम् ॥ नृसिंहं दक्षिणामूर्तिमथर्वाणमभेदत: ॥ १ ॥
आविःकुर्वे ब्रह्मवेदमंत्रानुक्रमणीं यथा ॥ ऋषिदैवतच्छंदोभिर्युक्ता पाठफलाप्तये ॥ २ ॥
अथाथर्वणगणमंत्राणामृषिदैवतच्छंदांसि ॥
च.—इति ब्रह्मवेदोक्तमंत्राणां बृहत्सर्वानुक्रमणिकायां दशमः पटलः समाप्तः ॥ ११४ ॥

१७ अथर्वप्रातिशाख्यभाष्यम् ।

आ.—अथातो न्यायाध्ययनस्य पार्षदं वर्त्तयिष्यामः पदानां संहितां
च.—आत्मने भाषा परस्मै भाषा अपियंत्यपियंति. ४—अथर्ववेदे प्रातिशाख्ये तृतीयः प्रपाठकः समाप्तः ॥

१८ संहिताविधिविवरणम् ।

आ.—अथर्ववेदस्य संहिताविधिविवरणं क्रियते तत्र अथर्ववेदस्य नव भेदा भवंति तत्र चतमृषु शाखासु शौनकादिषु कौशिकोयं
संहिताविधिः स च गोपथब्राह्मणादथर्व — — — — — यथोपयोगं टीका
क्रियते संहिताविधेः तत्राह सूत्रं कौशिकः । अथ विधिं वक्ष्यामः ।

च.–समाप्तं शांत्युदकं कर्म नवमी कंडिका तत्र भद्रश्लोकः
प्रमाणपार्वणे चैव प्रकृतत्वात्परीक्षते। परिभाषा च सर्वार्था प्रथमे संहिता विधौ ॥

९९ द्वासप्ततिपरिशिष्टानि ।

आ.–उँ नमो ब्रह्मवेदाय ॥ उँ अथर्ववेदस्य द्वासप्ततिः परिशिष्टानि भवंति। कौशिकोक्तानि कृत्तिका रोहणी प्रथमं राष्ट्रसंवर्गाः राजप्रथमाभिषेकः पुरोहितकर्माणि पुष्पाभिषेकः॥ पिष्टरात्र्याः कल्पः आरात्रिकं घृतावेक्षणं तिलधेनुः भूमिदानं तुलापुरुषः आदित्यमंडकः हिरण्यगर्भः हस्तिरथः अश्वरथः गोसहस्रदानं हस्तिदीक्षा अश्वदीक्षा वृषोत्सर्गः इंद्रोत्सवः ब्रह्मयागः स्कंदयागः संभावलक्षणं अरणिलक्षणं यज्ञपात्रलक्षणं वेदिलक्षणं कुंडलक्षणं समिल्लक्षणं स्रुवलक्षणं हस्तलक्षणं ज्वालालक्षणं लक्षहोमः बृहल्लक्षहोमः कोटिहोमः गणमाला घृतकंबलः अनुलोमकल्पः आसुरीकल्पः उच्छुष्मकल्पः समुच्चयप्रायश्चित्तानि ब्रह्मकूर्चविधिः तडागविधिः पाशुपतव्रतविधिः संध्योपासनविधिः स्नानविधिः तर्पणविधिः श्राद्धविधिः अग्निहोत्रविधिः उत्तमपटलं निघंटु चरणव्यूहं चंद्रप्रादिपदिकं ग्रहयुद्धं ग्रहसंग्रहः राहुचारः केतुचारः ऋतुकेतुलक्षणं कूर्मविभागः मंडलानि दिग्दाहलक्षणं उल्कालक्षणं विद्युल्लक्षणं निर्घातलक्षणं परिभाषालक्षणं भूमिकंपलक्षणं नक्षत्रग्रहो न्यायलक्षणं उत्पातलक्षणं सद्योवृष्टिलक्षणं गोशांतिः अद्भुतशांतिः स्वप्नाध्यायः अथर्वहृदयं भार्गवीयगार्ग्यबार्हस्पत्त्यउशनसाद्भुतानि महाद्भुतानि लघुसर्वानुक्रमणी चेति ९२
इति परिशिष्टानुक्रमणिका समाप्ता ॥

च.–गणेन रौद्रेण घृतं च हुत्वा तथा महात्मा शिवमस्य कुर्यात्तथा महात्मा शिवमस्य कुर्यादिति ॥
इति महाद्भुतानि समाप्तानि ॥ द्वासप्ततिपरिशिष्टानां पर्यायाः समाप्ताः ॥

१०० अष्टकाकर्मपद्धतिः ।

आ.–मार्गशीर्षाद्यपरपक्षेषु तिस्रोष्टकाः ॥
च.–कोशादिति ब्रह्मोत्थापनं शांतिः ॥ अष्टकर्मपद्धतिः समाप्ता ॥

१०१ आभ्युदयिकादिपद्धतिः ।

आ.–आभ्युदयिकादिक्रियमाणपद्धतिर्लिख्यते
वृद्धावादौव्यये चांते मध्ये जुहृति पार्वणे ॥ एकोद्दिष्टे तथा चांते वैश्वदेवो विधीयत इतिवचनात् ॥
आदौ नित्यवैश्वदेवं विधाय पश्चात्प्राङ्मुख उपविश्य आचमनप्राणायामत्रयं कृत्वा पुनराचम्य ॥

च.–तंडुलेन गणपतिं स्थापयामि ॥
गौरीं पद्मां शचीं मेधां सावित्रीं विजयां जयां देवसेनां स्वधां श्री० ॥ इति ॥

१०२ कौशिकगृह्यपद्धतिः-केशवः ।

आ.–यथावितानं यज्ञवास्त्वध्यवसेत् । संभारलक्षणे उक्तं यथा वितानं च मंडपं कारयेत्
च.–अष्टकायां क्रियत एतेषु फालिमाठरौ ॥ द्वितीयाकंडिका ॥
इत्यथर्ववेदे कौशिकगृह्यसूत्रस्य चरमचतुर्दशाध्यायस्य कैशवी पद्धतिः ॥

१०३ दर्शपौर्णमासेष्टिपद्धतिः-रामकृष्णः ।

च.–यजमानः शान्तिगणं जपित्वा चतुर्भिश्चेति नमस्कारं करोति ॥
इति श्रीअथर्ववेदश्रौतकर्मणि पंचपदार्थी दर्शपौर्णमासेष्टिः समाप्ता ॥
[सहस्र] निगमाध्यायिविप्राणामुपकारकः ॥ अकरोद्रामकृष्णोयं दर्शपूर्णेष्टिपद्धतिम् ॥

१०४ लक्षहोमपद्धतिः-गोविन्दः ।

आ.–गणेश्वरं गुरुं नत्वा गिरं गीर्वाणवन्दिताम् ॥ आतन्मोथर्ववेदोक्तलक्षहोमस्य पद्धतिम् ॥
ब्राह्मणो वा राजा वा वैश्यो वा ग्रामो वा जानपदो वा श्रीकामादिप्रशस्ते स्वानुकूले शुभलग्नादौ सुस्नातः प्रक्षालित-पाणिपाद आचान्तो यजमानः ॥
च.–सर्वपापक्षयश्च भवति शान्त्यादिषु कुर्वन्सर्वकामसमृद्धिर्भवति ॥
पद्धतिर्लक्षहोमस्य पुरुषोत्तमसूनुना गोविन्देन कृताथर्वपरिशिष्टानुसारिणी ॥

१०५ शान्तिकम् ।

आ.–प्रणिपत्य गुरून्सर्वान्सर्वशास्त्रविशारदान् ॥ महाशान्तिक्रमं वक्ष्ये सर्वलोकहिताय वै ॥ अथ कस्य शान्त्यधिकारः ॥
च.–इति वचनात् बार्हस्पत्यप्रोक्तं शान्तिकं एकचरुविधानम् ॥ इति शान्तिकं समाप्तम् ॥

१०६ शान्तिकाध्यायः ।

आ.–इह जापकपठनीयः शान्तिकाध्यायो लिख्यते ॥ शन्न इन्द्राग्नी भवता ॥
इत्यथर्ववेदीयशौनकशाखीयशान्तिकाध्यायः ॥

१०७ स्मार्त्ताधानपद्धतिः ।

आ.–शौनकीयशाखोक्तविधिना पिण्डपितृयज्ञो लिख्यते ॥ अथ उपहारः शूर्पं एकपवित्रं व्रीहिः तंदुल उलूखलमुसलम् ॥

च.—इत्यथर्ववेदोक्तस्मार्त्ताधानस्य पिंडपितृयज्ञपक्षादि सायंप्रातर्होमं वैश्वदेव आग्रयणिकर्म्म नवान्न प्राक्सनकर्म आगमनकर्म समाप्तम् ॥

१०८ शास्त्रदीपिका सटीका-मू० पार्थसारथिमिश्रः टी० वैद्यनाथः ।

मू० आ.—आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ।
अथातो धर्मजिज्ञासेत्यत्र प्रमाण स्वरूपसाधनफलैस्साभासैर्द्धर्म्मो जिज्ञास्यत्वेन प्रतिज्ञातस्तत्रास्मिन्नध्याये प्रमाणं निरूप्यते किं प्रमाणं को धर्म इति

टी० आ.—सौजन्यसीमाहृतरामभुद्रमगाधगांभीर्यनमत्समुद्रम् ॥
सदा सदाचारनिरस्ततंद्रं श्रीरामचंद्रं पितरं नमामि ॥ १ ॥
श्रीमन्महागणपतेश्चरणारविंदमानम्य भक्तजनसिद्धिदमादरेण ॥
श्रीवैद्यनाथकविरद्भुतभाट्टतंत्रसिद्धांततत्त्वममलं विशदीकरोति ॥ २ ॥
अधीत्य सकलं शास्त्रं परिशील्य यथामति ॥ सद्गुरूणां प्रसादेन व्याख्यास्ये शास्त्रदीपिकाम् ॥ ३ ॥
आम्नायस्य तत्र तावत् विषयः संशयश्चैव पूर्वपक्षस्तथोत्तरम् ॥ प्रयोजनं च पंचांगं शास्त्रेधिकरणं मतम् ॥
इत्युक्तलक्षणोदाहरणसंशयपूर्वपक्षसिद्धांतप्रयोजनरूपं पंचांगविचारात्मकाधिकरणघटिताध्यायस्तोमरूपेस्मिन्शास्त्रे प्रत्यधिकरणं चतुर्धा संगतिमाहुः शास्त्रसंगतिरध्यायसंगतिः प्रकृतसंगतिरनंतरसंगतिरिति⋯⋯
इति श्रीमत्पदवाक्यप्रमाणाभिज्ञतरसद्रामचंद्रात्मजवैद्यनाथकृतायां शास्त्रदीपिकायां टीकायां प्रथमोध्यायः समाप्तः ॥

च.—इति⋯⋯श्रीमतत्सत्कुलजलधिचंद्रधर्मशास्त्रपारावारीणश्रीरामचंद्रसूरिवरात्मज⋯⋯॥ १२ ॥

१०९ तस्याष्टीका-शंकरः ।

आ.—वाक्यात्मसूक्तं विध्यर्थवादमंत्रस्मृति ॥ प्रामाण्यनामसु पदात्मसु ब्रूतेधुना त्विह ॥ १ ॥
उक्तसमाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात् अत्र भाष्यकारः उद्भिदा यजेत पशुकामः एवं बलभिदं । अभिजिता विश्वजिता यजेतेत्युदाहृत्य किमुद्भिदान्यः शब्दा गणविधयः कर्मनामधेयानि वेति विचारमुपक्रम्य उक्तसमाम्नायैदमर्थ्यमित्यादि⋯⋯अथातो धर्म—

च.—त्रयाणामिति ॥ इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशंकरकृते शास्त्रदीपिकाप्रकाशे द्वादशस्याध्यायस्य चतुर्थः पादः ॥ अध्यायश्च समाप्तः ॥

११० तस्याष्टीका-सोमनाथः ।

आ.—आविष्करोतु विबुधैरभिवंदनीयां वाचं स कोपि मम बलवसार्वभौमः ॥
वंशोपि यत्परिगृहीततया बिभर्ति वाचालतां त्रिभुवनैकविमोहयित्रीम् ॥ १ ॥

अधिगत्य कलामखिलामग्रभवाद्व्येंकटाद्रियज्वगुरोः ॥ वचनैरनतिप्रचुरैर्व्याकुर्वे शास्त्रदीपिकां विशदम् ॥ २ ॥
विबुधाः प्रणम्य मूर्ध्ना बहुधा वः प्रार्थये कृतावस्याम् । अर्पयत दृशं सूक्ष्मां निंदत परतोभिनंदत वा ॥ ३ ॥
परिलिखतः किंचिदपि प्रकृतिर्भवति प्रमाद इति ॥ अन्विष्य गुणकणानप्यभिनंदत वीतमत्सरा विबुधाः ॥ ४ ॥
आम्नायस्य
इति श्रीनिटिलकुलतिलकसूरुभट्टमहोपाध्यायतनुभवस्य व्येंकटाद्रियज्वगुरुचरणानुजस्य सोमनाथसर्वतोमुखयाजिनः कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकाख्यायां तृतीयस्याध्यायस्याष्टमः पादः ॥ समाप्तश्चाध्यायः संवत् १८६८

१११ तस्याष्टीका-कमलाकरः ।

आ.—श्रीरामकृष्णपितरं नत्वोमाख्यां च मातरम् ॥ श्रीरामं च शिवं नत्वा व्याख्यास्ये शास्त्रदीपिकाम् ॥ १ ॥
यस्तु राणकचौर्येण स्वपांडित्यं प्रकाशयन् ॥ निनिंद बहुभाषित्वात्तस्य शिक्षेह तन्यते ॥ २ ॥
मूर्खान्प्रतारयद्बालान्यः सिद्धांतमनीनशत् । विन्यस्य तस्य शिरसि दशार्धं कमलाकरः ॥ ३ ॥
आम्नायस्य द्वितियपादे करिष्यमाणस्यार्थवादादिप्रा माण्यविचारस्य शास्त्रसंगतिमध्यायसंगतिं प्रकृतसंगतिं च वक्तुं कृतमनुकीर्तयति । अथात इति

च.— इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टरामकृष्णभट्टात्मजकमलाकरभट्टकृते शास्त्रादीपिकालोके एकादशोध्यायः.........इति श्रीजगद्गुरुनारायणभट्टसूरिसूनुरामकृष्णभट्टात्मज महामहोपाध्यायकमलाकर......

११२ तस्याष्टीका-रामकृष्णभट्टः ।

मू० आ.—लक्ष्मीकौस्तुभवक्षसं मुररिपुं शंखासिकौमोदकीहस्तं..........
न्यायाभासतमश्छन्नशास्त्रतत्त्वार्थदर्शनीम् ॥ कुमारिलमतेनाहं करिष्ये शास्त्रदीपिकाम् ॥ २ ॥

टी० आ.—आनंदांचितवदनं सदनं रघुनंदनं दयामुक्त्योः ॥ सीतालक्ष्मणसहितं वंदे गिरिशादिवंद्यांघ्रिम् ॥ १ ॥
विधिस्तुतिस्मृतिद्वारमद्वारं योगिनामपि ॥ वांछितार्थप्रदं धर्मप्रमाणं राममाश्रये ॥ २ ॥
वाचं वंदे गिरिशतनयं गोत्रदेवीं च भक्त्या वेदव्यासं मुनिवरमथो जैमिनिं सूत्रकारम् ॥
व्याख्यातारं गहनवचनं भाष्यकारं च पूज्यं भट्टाचार्य्यं शिखिगतितनुं तन्मतज्ञान्गुरूंश्च ॥ ३ ॥
अस्त्यत्र रेवोत्तरतीरवर्त्ती देशः प्रसिद्धो भुवि मालवाख्यः ॥
उंकारमाहिष्मतिकाविशालतीर्थाद्यधिष्ठानकृतात्यभिष्यः (त्यभिख्यः) ॥ ४ ॥
वसिष्ठपाराशरवात्सकौत्सशांडिल्यसद्भार्गवगौतमाद्याः ॥ वंशाः प्रसिद्धा भुवि मालवानां पूर्वक्षितीशेंद्रसमर्थितानाम् ॥ ५ ॥
वंशो विद्याविनयविमलस्तेषु कश्चित्प्रसिद्धः कर्मब्रह्मप्रवणमतयः सर्वे एव द्विजेंद्राः ॥
गोत्रं शक्तिप्रवरसहितं यत्र पाराशराख्यं भक्तिर्विष्णौ भुवनजननी देवताशापुरेति ॥ ६ ॥
शिवदासाभिधस्तत्र वंशे पाराशराह्वये ॥ वेदशास्त्रार्थसम्पन्नः सदाचारपरोभवत् ॥ ७ ॥

तत्पुत्रोभून्मित्रशर्मा द्विजेंद्रो मित्रः साक्षाद्ब्राह्मतेजोविशेषैः ॥
विद्वद्वृंदैः पूजितः सर्वशास्त्रव्याख्याशिक्षोद्गीतकीर्त्तिः पृथिव्याम् ॥ ८ ॥
जनार्दनस्तस्य सुतो मनीषी जनार्दनार्चानिरतो बभूव ॥
वेदेषु शास्त्रेषु च गीतकीर्तिर्महीयतींद्रार्चितरम्यमूर्त्तिः ॥ ९ ॥
तस्माज्जातो वेदशास्त्रेष्वधीती गंगादेव्यां भैरवाख्यो द्विजेंद्रः ॥
कीर्त्तिर्येनोपार्जिता विश्ववंद्या वृत्तिश्चाग्र्या भूपतेः शेषवंश्यात् ॥ १० ॥
समुत्पन्नस्तस्मादतिविमलकीर्तिर्द्विजवरः कृती पूतादेव्यां दिशि (दिशि) च नारायण इति ॥
प्रसिद्धः शास्त्रेषु क्षितिपतिसमूहार्चितपदः परब्रह्मानंदामृतरससमास्वादनपटुः ॥ ११ ॥
तस्मादभूद्धर्मतत्–धार्य्यां श्रीमाधवः पुण्यचरित्रकीर्तिः ॥ वेदांतविन्त्यक्तभवप्रवृत्तिः श्रीरामचंद्रार्पितचित्तवृत्तिः ॥ १२ ॥
स्वदेशादागतः काश्यां शास्त्राध्ययनसिद्धये ॥ सकलत्रः कृती भाग्यात्स्थितिं तत्र चकार ह ॥ १३ ॥
तस्माज्जातः प्रभावत्यां रामकृष्णाभिधः सुधीः ॥ पितृभक्तिपरः काश्यां सर्वशास्त्रविशारदः ॥ १४ ॥
तत्तद्ग्रंथविनिर्माणात्स्वविद्या प्रकटीकृता ॥ कीर्तिश्च येन विपुला पूर्वापरसमुद्रयोः ॥ १५ ॥
राजराजाभिधश्रीमद्गोपीनाथद्विजोत्तमात् ॥ विद्वन्नागरवृंदेषु प्राप्तं भट्टपदं स्थिरम् ॥ १६ ॥
गजपतिसदसि प्राप्ता पदवी बलभद्रराजगुरोः ॥ पंडितशिरोमणिरिति प्रतापमार्तंडनिर्माणात् ॥ १७ ॥
स तु शास्त्रप्रसादेन व्याचष्टे शास्त्रदीपिकाम् ॥ निमित्तमात्रमत्रैष व्याख्याता रघुनंदनः ॥ १८ ॥
न शास्त्रदीपिकाटीका कृता केनापि सूरिणा ॥ तदपूर्वाध्वसंचारी नोपहास्यः स्खलन्नपि ॥ १९ ॥

ग्रंथकारो ग्रंथारंभे तत्समाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिप्राप्तं विशिष्टेष्टदेवताप्रणतिरूपं मंगलमाचरति । लक्ष्मीकौस्तुभमिति । अध्येतॄणांलक्ष्मीसौभाग्यादिप्राप्तिसूचनार्थं जगदीश्वरस्यैतद्विशेषणं प्रस्तरशष्कुलीन्यायेन विघ्नविघातकत्वसामर्थ्यप्रदर्शनार्थं द्वितीयं विशेषणांतराणि तु भक्तानुग्रहार्थस्वीकृतशरीरध्यानौपयिकानि । मतांतरप्रसिद्धप्रधाने तान्यथासिद्धिवारणार्थं प्रधानात्परमित्युक्तम् । नचैवं देवताधिकरणविरोधः उद्देश्याया एव तद्विषयत्वात् । उक्तं च नास्माकं शब्द एव देवता नाकसदामिंद्रादीनां देवतात्वांगीकारादिति । अत एव वार्त्तिककारैर्विशुद्धज्ञानदेहायेत्यादिना ग्रंथादौ महादेवो नमस्कृतः । उक्तं च भट्टेनैव । ग्रंथारंभेभिमतदेवतानमस्कारं करोति वार्तिककार इति । अथवा देवतास्तु तैरेव प्रधानकर्मण एतत्फलं न देवतायाः तस्या गुणत्वांगीकारात् । केचित्पुनरेतत्कर्मपरत्वेन व्याचक्षते । तथाहि । अनेकपद्धत्यादिभिर्विशुद्धं यज्ज्ञानं तद्रम्यं स्वरूपं यस्य वेदत्रयसमाहाररूपं चक्षुर्ज्ञापकं प्रमाणं यस्य तस्मै स्वर्गादिफलप्राप्तिहेतवे सोमस्यार्द्धं रसरूपं त्याज्यतया यो धारयति तस्मै नम इति । तेषामीश्वरद्रोहिणां प्रतीयमानार्थपरित्यागेनार्थांतरं कल्पयतामनुपादेयमेव तद्व्याख्यानमिदानीं सप्रयोजनं कर्त्तव्यं प्रतिजानीते । न्यायाभासेति । अत्र पूर्वार्द्धेन प्रभाकराद्युद्भावितन्यायाभासतमोनिराकरणेन शास्त्रतत्त्वार्थप्रदर्शनं ग्रंथस्य प्रयोजनमुक्तम् । शास्त्रदीपिकां करिष्य इति कर्त्तव्यप्रतिज्ञा कुमारिलमतेनेति मतांतरनिराकरणं ध्वनितम् ॥ कर्त्तव्यं प्रतिज्ञाय ग्रंथस्य मीमांसाशास्त्रविषयत्वं द्योतयितुं तदाद्यसूत्रं लिखति ॥ अथातो धर्मजिज्ञासेति ॥ एतच्चधर्मविचाररूपं मीमांसाशास्त्रं लक्षणानि चास्य द्वादशप्रमाणभेदशेषप्रयुक्तिक्रमाधिकारसामान्यातिदेशविशेषातिदेशोहबाधतंत्रप्रसंगाख्यानि प्रमाणादयः प्रसंगांता द्वादश पदार्थाः क्रमात् द्वादशानामध्यायानां विषयाः । तत्र प्रथमाध्याये चतुर्भिः पादैः क्रमेण विध्यर्थवादस्मृतिनामधेयानि

विचारितानि । द्वितीये तूपोद्घातकर्मभेदतदपवादप्रयोगभेदा: । तृतीये श्रुतिलिंगवाक्यादीनि त्रिभि: पादैर्विचारितानि चतुर्थे निवीतादिश्रुत्यादिबलाबलविचार: । पंचमे प्रतिपत्तिकर्म्म । षष्ठे न– – – – – –। सप्तमे बहुप्रधानोपकारकप्रयाजादीनि । अष्टमे याजमानानि प्रधानस्य प्रयोक्तृत्वमप्रधानाप्रयोक्तृता फलचिंता जघन्यांगचिंतेत्येते चतुर्थगा: । पंचमस्याद्ये श्रुत्यादिभि: क्रमो निरूपित: । द्वितीये क्रमविशेष: । तृतीये प्रयाजादिविवृद्धि: । चतुर्थे श्रुत्यादिबलाबलविचार: ॥ अधिकारी तस्य धर्मा: प्रतिनिध्यर्थलोपने दीक्षासत्रं देयवह्नि:षष्ठपादेष्वमी स्थिता: ॥ सप्तमाद्ये प्रत्यक्षवचनातिदेश: । द्वितीये तस्यैवशेष: । तृतीये नामातिदेश: । चतुर्थे निर्वापौषधलिंगेन प्राकृतधर्मातिदेश: । स्पष्टाल्लिंगादथास्पष्टात्प्रबलादयवादत: ॥ अतिदेशविशेषा: स्युरष्टमाध्यायपादगा: । ऊहारंभोथ सामाहो मंत्रोहस्तत्प्रसंगज: ॥ नवमाध्यायपादेषु चतुर्ष्वेते प्रकीर्तिता: ॥ द्वारलोपोस्य विस्तार: कर्यैकत्वं समुच्चय: । ग्रहसामप्रकीर्णानि नवर्थश्चाष्टपादगा: ॥ उपोद्घातस्तथातंत्रावापौ तंत्रस्य विस्मृति: । आवापविसृतिश्चैकादशाध्यायस्य पादगा: ॥ प्रसंगस्तंत्रनिर्णीति: समुच्चयविकल्पने । द्वादशाध्यायपदार्था इति पदार्थसंग्रह: । संगतिस्वरूपं चात्र ग्रंथांतरादवगंतव्यम् सूत्रतात्पर्यं दर्शयति । अनेनेति प्रयोजनपरत्वेन सकलशास्त्रशेषत्वमस्यध्वन्यते । किमर्थं प्रयोजनकथनमित्यपेक्षायामाह ॥ श्रोत्रिति ·········

११३ वेदप्रकाश: सटीक:-मू० कृष्णानंदतीर्थपाद: । टी० सत्यज्ञानानन्दतीर्थपाद: ।

आ.–सत्यज्ञानानंदतीर्थं प्राप्तोहं यत्प्रसादत: ॥ तं गुरुं सच्चिदानंदं वंदे वेदं विधिं विभुम् ॥ १ ॥

वेदस्यैव सर्वार्थप्रकाशकत्वेन सर्वपुरुषार्थसंपादकत्वात्तदध्ययनादौ द्विजातीनां प्रवृत्त्यर्थं स्वाभीष्टसिद्धये च तमेव नमस्कारव्याजेन आचार्यमूर्तिस्थं स्तौति । सत्यज्ञानेत्यादिना । यस्य प्रसादादहं मंदोपि सत्यज्ञानादिपदघटित परमार्थप्रकाशकमन्वर्थं नामधेयं प्राप्तोस्मि तं गुरुं नत्वोपदेष्टारं वंदे । सर्वावस्थास्वभिवादयइत्यर्थ: गुर्वादिपूज्याभिवादनशीलस्य सदा विजय इत्यभिप्राय: किं लक्षणं वेदयति प्रकाशयति स्थावरजंगमात्मकं सर्वमिति वेद: सर्वज्ञ: सर्वशक्तिस्तं वेदमत एव विधिं सर्वप्रवर्त्तकं सर्वांतर्यामिणमत एव विभुं व्यापकं सर्वात्मकमिति यावत् । अत एव सच्चिदानंदं अनृतजडदु:खविलक्षणमित्यर्थ: । पुनरपि सरस्वत्यात्मानं तं स्तौति ॥

सुस्फोटवर्णपदवाक्यविभक्तिकायां ब्रह्मादिदेवमुनिवंदितपादपद्माम् ॥
गांगेंदुकुंदधवलां करमंजुवीणां वाणीं परां भगवतीं प्रणमामि नित्याम् ॥ २ ॥

स्फुटत्यस्मादर्थ इति स्फोट: सर्वार्थप्रकाशका: वर्णा: लौकिका वैदिकाश्च त्रिषष्टिश्चतु:षष्टिर्वा । तत्र लौकिका गौरश्व: पुरुषो हस्तीत्यादय: । वैदिकास्तु अग्निमीळे पुरोहितं ईषेत्वोर्ज्जेत्वा अग्न आयाहि वीतये शन्नो देवीरभीष्टय इत्यादय: । पदानि वर्णघटितानि सुप्तिङंतानि तद्धितान्यपि च तु नेत्यादीनि तद्घटितानि वाक्यानि पदसमूहात्मकानि । विभक्तय: सु औ जसित्यादय: अथवा विभक्तयो विभागा: शक्तय: शब्दनिष्ठतत्तदर्थप्रकाशनसामर्थ्यानि औत्पत्तिकान्यचिंत्यानि कार्यैकलिंगगम्यानि शोभना उक्तय: स्फोटादयस्तैरुपलक्षित: कायो यस्यास्तां वाणीं प्रकृष्टया भक्त्या नमामि शेषं सुलभम् ॥ २ ॥

अथ तमेव पुनर्ब्रह्मात्मना स्तुवन्प्रणमति ॥

दुर्बोधमतिगंभीरमगाह्यमकृतात्मनाम् ॥ अनंतशक्तिसंपन्नं शब्दब्रह्म नमाम्यहम् ॥ ३ ॥

येषां सतां सुपदवीमनुनीय नूनं नानानिबंधकरणे कुशलोहमस्मि ॥
तानानमामि न तु नौमि हरं हरिं मां काशीं शिवां शिवसुतं द्युमणिं च गंगाम् ॥ ४ ॥
नत्वा श्रीजैमिनिं भट्टान् शबरस्वामिनं मुनिम् ॥ वेदप्रकाशं कुर्वेहं स्वशिष्यमतिशुद्धये ॥ ५ ॥
शास्त्रार्थसंग्रहं चादौ द्वितीये विधिभेदनम् ॥ द्विविधां भावनां वक्ष्ये तृतीये विशदां सतीम् ॥ ६ ॥
क्व दुग्धसागरो वेदः क्वाहमल्पवलो लघुः ॥ हास्यास्पदं गमिष्यामि धूर्तानां न महात्मनाम् ॥ ७ ॥
अथाप्यस्य गमिष्यामि पारं मारुतसूनुवत् ॥ रामभक्ति तरीं कृत्वा भवार्णवविलंघनीम् ॥ ८ ॥
इह खलु स्वाध्यायोध्येतव्य इति नित्याध्ययनविधिना विधिवदधीतसांगस्वाध्यायं निष्पापं द्विजातिं आपाततोधिगत-वेदार्थं निःसंदिग्धतया वेदबोधितधर्मानुष्ठानार्थं तं जिज्ञासुमुपलभमानो भगवान् जैमिनिराचार्यः सर्वशास्त्रोपोद्घात-रूपं बह्वर्थमतिगंभीरमिदं सूत्रमादौ स्फुटमुच्चारयामास । अथातो धर्मजिज्ञासेति ॥

च.—वेदः स स्मृतिकोषमूलममलं धर्मैकसारं विदुः स्कंधैर्द्वादशभिस्ततश्च सकलाः षष्टिः सुशाखाश्छदैः ॥
सूत्रैर्गुच्छसहस्रयुक्तिकुसुमः श्रेयोर्थिपक्ष्याश्रितो जैमिन्यालय उत्तमः सुरतरुः सोयं जयत्यध्वगः ॥
अधीत्य वेदं विधिवत्प्रभक्त्या यथोक्तवृक्षं सफलं भजंति ॥ द्विजातयस्ते सुखिनो भवंति विधूतपापाः परमं व्रजं (ति)
स्मृतिकृतपरिखातं वेदशालोपगूढं मुनिजनपरिरक्षं युक्तिमार्गं विशालम् ।
अनभिभवसमर्थं धर्मदुर्गं प्रविश्य स्थित इति भयशून्यः सर्वदैवाहमस्मि ॥
धर्मस्तुतिपरो वाचो व्यापारोयं सुशोभनः ॥ श्रद्धालोर्वेदनिष्ठस्य नायं वाच्यः कदाचन ॥
निर्दोषत्वैकवाक्यत्वं लोकेस्मिन् नैवदृश्यते ॥ सापवादा यतः केचिन्मोक्षस्वर्गावपि प्रति ॥
तस्मान्नात्र प्रकर्तव्यं दोषदृष्टिपरं मनः । दोषो ह्यविद्यमानोपि तच्चित्तानां प्रकाशते ॥
यदत्र लिखितं किंचिन्मया चाज्ञेन भक्तितः ॥ तेन प्रीणातु भगवान् धर्मो नारायणः प्रभुः ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामकृष्णानंदतीर्थपादकिंकरशिष्यश्रसिग्रज्ञानानंदतीर्थयतिविरचिते वेदप्रकाशे सर्वशास्त्रार्थसंग्रहाख्यं प्रथमं प्रकरणं समाप्तम् ॥

११४ मीमांसान्यायसंग्रहः-महादेवः ।

आ.—रामं स्मृत्वा गुरुं नत्वा रचयामि समासतः ॥ शीघ्रोपस्थितये सम्यङ्मीमांसान्यायसंग्रहम् ॥
विलोक्य मत्कृतिं सर्वे पूर्वतंत्रपरायणाः ॥ पूर्वतंत्रस्य सामस्त्येनार्थं गृह्णंतु सत्वराः ॥ २ ॥
अथायं धर्मो न विचार्यः अध्ययनविधेः स्वर्गार्थाध्ययनविधायकत्वेन विचाराप्रयोजकत्वात्

च.—होमार्थत्वेन तस्मिन्नपि संस्काराः स्युः ॥ न अरणिमंथनादीनामशक्य— — — — — —

११५ लघुचिन्तनम्-राघवदेवः ।

पत्रे ६.—भवतु अदृष्टार्थ इति सिद्धांतः ॥ इति राघवदेवविरचिते लघुचिंतने प्रथमे द्वितीयश्चरणः

च.—आर्त्विज्यं ब्राह्मणस्यैव याजनमिति नियमस्तु पुरुषार्थः । तेन नियमातिक्रमे पुरुषस्यैव प्रत्यवायः न क्रतोर्वैगुण्यमिति प्राप्ते आर्त्विज्यनियमस्य स्वर्थत्वेनापि स्मरणात् क्षत्रिययाजकयज्ञानिंदाश्रुतेश्च ब्राह्मणानामेवार्त्विज्यमिति सिद्धांतः ॥

एवं धर्मप्रमितये यत्कृतं लघुचिंतनम् प्रथामेति तदनेन प्रीयतां सर्वगो हरिः ॥ १ ॥
इति श्रीमदनन्तदेवविरचिते लघुचिन्तने द्वादशे चतुर्थः पादः ॥ अध्यायः समाप्तः ॥

११६ विधिरसायनः-मू० टी० अप्यदीक्षितः ।

आ. टी.—उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः ॥
यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुंदः ॥ १ ॥
जन्मस्थेमलयं समस्तजगतां यस्यैव लिलायितं यन्नाम्ना यतते भवास्थिरमहापाशक्षयः प्राणिनाम् ॥
तद्ब्रह्मादिभिरप्यगम्यविभवं विश्वादिकं शाश्वतं सांबं ब्रह्म रसालमूलरसिकं पश्येयमंतर्दृशा ॥ २ ॥
यत्कुमारिलमतानुसारिणा निर्मितं विधिरसायनं मया ॥ पद्यरूपमनतिस्फुटाशयं तत्सुखावगतये विविच्यते ॥ ३ ॥
प्रारिप्सितप्रकरणाविघ्नपरिसमाप्तये सूत्रकारस्य महर्षेरनुस्मरणरूपं मंगलमाचरन्नेव प्रकरणारंभं तावदाक्षिप्य समाधत्ते ।
विख्याता मुनिवर्यसूक्तिषु विधास्तिस्रो विधिस्रोतसामाचार्यैर्विशदं विविक्तविषयास्ताश्च व्यवस्थापिताः ॥
किं तत्रास्ति विचार्यमार्यमथिते मार्गे निसर्गोज्ज्वले नानोदाहरणैस्तु ताः प्रविशदीकर्तुं प्रवर्तामहे ॥ १ ॥
मुनिवर्यस्य भगवतो जैमिनेः सूत्रेषु विधिर्वा स्यादपूर्वत्वान्नियमार्थो वा पुनः श्रुतिरुच्यते । परिसंख्येत्येवमादिषु त्रयो विधिप्रकाराः प्रसिद्धाः अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति ते च भट्टपादैः परस्परासंकीर्णविषयतया स्पष्टमेवोपपादिताः तत्र स्वत एव निरवद्ये ग्रंथकारैश्च बहुभिर्निष्कर्षं प्रापितेऽपूर्वविध्यादिविभागे नूतनं किंचिद्विचारणीयं नास्त्येव यद्यप्येवं तथाप्यपूर्वविध्यादीनां द्वादशस्वध्यायेषु विप्रकीर्णैरिहापूर्वविध्यादिलक्षणविचारव्याजेन तत्र तत्र प्रदर्शनीयैरुदाहरणविशेषैस्तमेवार्थमतिस्पष्टीकर्तुं प्रकरणमिदमारभ्यत इत्यर्थः
च.—तान्येवाह समाप्तोयं ग्रंथः इति विधिरसायनग्रंथः समाप्तः ॥ इति श्रीमदद्वैतविद्याचार्यश्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमद्विश्वजिद्याजिश्रीरंगराजाध्वरिवरसूनोरप्यदीक्षितस्य कृतौ विधिरसायनसुखयोजिन्यामपूर्वविधिलक्षणाक्षेपः ॥

११७ शिवार्कोदयः-गागाभट्टः ।

आ.—धरित्रीपुत्रीदृग्विहरणपवित्रीकरणकरकटाक्षाणां पात्री मुनिमखविधात्री सपदि सा ॥
भवित्री मच्चेतोभवनमलहंत्री दिविषदामभीतेर्दात्रीयं दशवदनहंत्री प्रतिकृतिः ॥ १ ॥
श्रीमद्भोसलवंशभूषणमणिक्षोणीशशाहात्मजच्छत्राधीशशिवक्षितिशियशसः स्तंभो निखातोपरः ॥
गागाभट्टमनीषिणाधिधरणि ग्रंथः शिवार्कोदयो येनाबद्धयशोध्वजेन सकलैवाश्वेति लोकत्रयी ॥ २ ॥
च.—पूर्वोक्तयुक्त्या च निषेधतोपि सत्रा तथान्यार्थनिदर्शनाच्च ॥
आर्त्विज्यमिष्टं खलु विप्रनिष्टं भवेन्न वर्णत्रयगं कदाचित् ॥
श्रीभट्टनारायणवंशजंबूद्वीपोत्थगागाभिधभट्टमेरोः ॥
स्फुटे शिवार्कोदयनामभाज्यभूद्द्वादशाध्यायचतुर्थपादः ॥
प्रारंभयल इह यः खलु कारिकाभि रद्धाप्रतिभ — — — मविदुषणाय [रद्धा प्रतिप्रतिभधामविदूषणाय] ॥
दुःखं सतां तदसमाप्तिकृतं शिवेन छत्राधिपेन सुविचिंत्य समापितः सः ॥

यत्तर्कपादे बऊ [पदैर्बहु] नाग्रहेण श्लोकैः कृतं वार्तिकमार्यवर्यैः ॥
गागाभिधेनायमपूरि शेषः तस्याग्य [ज्ञ] या छत्रपतेः शिवस्य ॥ २ ॥
तस्यानुरोधादिह वादिवर्णाधिक्ये चतुर्याभ्र [श्रम] भंगदोषः ॥
गुणोस्तु विद्वत्कविकंठमाप्तो दुष्टोपि पुण्योश्रि [श्वि] गत (प्र) वाहः ॥ ३ ॥
इति श्रीमन्नारायणभट्टसूरिसूनुश्रीमद्रामकृष्णात्मजभट्टदिनकरसुतगागाभट्टकृतः शिवार्कोदयः समाप्तः ॥

११८ न्यायरत्नमाला–पार्थसारथिमिश्रः ।

आ.–आनन्दममृतं ज्ञानमजं साक्षिणमीश्वरम् ॥ ब्रह्म सर्वमसर्वं च वन्दे देवं हरिं विभुम् ॥ १ ॥
मीमांसार्णवसंभूतैः कुमारस्वामिनोद्धृतैः ॥ न्यायरत्नैरिमां मालां संगृह्णामि मनोरमाम् ॥ २ ॥
तत्र स्वाध्यायविध्यर्थः प्रथमं तावदुच्यते ॥ आचार्यदृष्टिमाश्रित्य परपक्षनिरासतः ॥ ३ ॥
तत्र तावदिमं केचित्पूर्वपक्षं प्रचक्षते ॥ आचार्यकनियोगार्थः स्वाध्यायस्तत्प्रयुक्तितः ॥ ४ ॥..........
आचार्यमतमाश्रित्य श्रीमद्यज्ञात्मसूनुना ॥ पार्थसारथिमिश्रेण प्रयुक्तितिलकः कृतः ॥..........
पार्थसारथिमिश्रेण स्वतः प्रामाण्यनिर्णयः ॥ व्याख्याविवादसंजातमोहव्यावृत्तये कृतः ॥..........
न्यायागमानुसारेण श्रीमद्यज्ञात्मसूनुना ॥ पार्थसारथिमिश्रेण कृतोयं विधिनिर्णयः ॥..........
पार्थसारथिमिश्रेण वार्तिकोक्त्यनुसारतः ॥ यथाप्रतीति निर्णीतो नियमः सप्रमाणकः ॥..........
पदान्येव पदार्थान्तरान्वितं स्वार्थमभिदधतीति टीकाकारपादाः ॥..........
पार्थसारथिमिश्रेण निर्णयोभिहितान्वये ॥ यथागमं यथाप्रज्ञं वार्तिकोक्तः प्रदर्शितः ॥..........
पार्थसारथिना सम्यग्विशेषे नित्यकाम्ययोः ॥ आचार्यमतमाश्रित्य न्यायलेशः प्रदर्शितः ॥..........

च.–एतत्सर्वं वाक्यार्थसंग्रहरूपेण वार्तिकेन भगव– – – – वजां स्मारयति–लोकवदित्यादिना ॥
तस्मात्प्रक्रान्तरूपोपि विधिस्तावत्प्रतीक्षते ॥ यावद्योग्यत्वमापन्ना भावनान्यानपेक्षिणी ॥..........
भुवनत्रयविख्यातश्रीमद्यज्ञात्मनन्दनः ॥ तत एव श्रुतं प्राप्य विश्रुतः पार्थसारथिः ॥ १ ॥
मीमांसाब्धिं व्याकुलं नोद्यनक्रैर्मन्दप्रज्ञैर्दुर्विगाह्यं विगाह्य ॥ प्रत्याचार्यैराहृतैर्न्यायरत्नैर्मालामेनां कल्पयामास धीरः ॥२॥
नमो जैमिनय – – – – नोथ भ – हीमिपिः ॥ – न्यदीयैः समुत्तीर्णे ज्वलद्भिरिव भास्वते ॥ ३ ॥
इति श्रीमद्यज्ञात्माचार्यसूनोः पार्थसारथिमिश्रस्य कृतौ न्यायरत्नमालायामङ्गनिर्णयः समाप्तः ॥ संवत् १६८३ वर्षे कार्तिकवदि १४ ॥

११९ न्यायरक्षामणिः-अप्पदीक्षितः ।

आ.–उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः ॥
यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥ १ ॥
यस्याहुरागमविदः परिपूर्णशक्तेरंशे कियत्यपि निविष्टममुं प्रपञ्चम् ॥
तस्मै तमालरुचिभासुरकंधराय नारायणीसहचराय नमः शिवाय ॥ २ ॥
अथातो ब्रह्मजिज्ञासा ॥ अत्र शास्त्रारम्भोपयोगिब्रह्मात्मैक्य–

च.—युक्तं ब्रह्मण उपलक्षणम् ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ शारीरिकन्यायरक्षामणौ प्रथमाध्यायस्य तुरीयः पादः ॥ अध्यायश्च समाप्तः ॥

१२० अद्वैतसुधाकलापः-लक्ष्मणपण्डितः ।

आ.—पराऽपरपदद्वंद्वानुशासनविशारदम् ॥ नमस्यामि गुरुं द्वैतमद्वैतसमवस्थितम् ॥ १ ॥

आत्रेयकौंडिन्यकुलतिलकायितमूर्तिकौ ॥ गोजांऽबिकादत्तबुधौ पितरा (वंतरा) श्रये ॥ २ ॥

काशीवाससमुल्लासिसद्विद्याशीलसंपदौ ॥ गणेशरघुनाथाख्यसंख्यावन्तौ भजेऽग्रजौ ॥ ३ ॥

विश्वविख्यातनागेशनारायणसदाह्वयौ ॥ मत्याऽवमतनासत्यावतुलौ नौमि मातुलौ ॥ ४ ॥

तज्जयत्युत्तमश्लोकपादांबुजरजोंजनम् ॥ येन सत्त्वमयं चक्षुर्मम तत्त्वमवेक्षते ॥ ५ ॥

अन्तः सन्तमसध्वंसे यस्य गावो विकस्वराः ॥ श्रीरामाश्रममश्रान्तं भास्वन्तं तमुपाश्रये ॥ ६ ॥

विन्यस्य [स्त] भूरिभारस्य श्लाघ्यसद्गुरुमातरि ॥ स्थाने मम समेधन्तेनेकधास्त्वादिसंपदः ॥ ७ ॥

सत्कथापरमार्थाल्पा [भ्या] मनुरंजयतो जनान् ॥ आशयं कालिदासस्य विवरीतुं यतामहे ॥ ८ ॥

उत्तमश्लोकपादेषु यद्वस्त्वधिगतम्मया । वैदिकं वस्तु वाग्देव्याः कथयामि हितं (पु) रः ॥

कः पश्येदुत्तमश्लोककृपालोकविवर्जितः ॥ ९ ॥ — — — — — — — —

यत्संगतोऽद्वैतसुधासमुद्रे संविश्य यद्भाविकतामिताः स्मः ॥ नरस्वभापहरः सुहृन्नो नारायणः सर्वगुरुः स जीयात् ॥ ११ ॥

कृपाविपाकः पदवाक्यमानसन्मानभाजामुदितो गुरूणाम् ॥ मज्जन्महाऽद्वैतसुधासमुद्रे मंदोपि यन्मंदरतामुपैमि ॥ १२ ॥

सुश्लिष्टसारस्वतसूत्रजातस्फुरत्सदानन्दसुवर्णपूर्णम् ॥ विशुद्धमद्वैतपटं वसाना भूमानमन्तः समुपागताः स्मः ॥ १३ ॥

कुतर्कितप्रान्तरसंप्रचारपरिश्रमान्मंक्षु मुमुक्षमाणाः ॥ अद्वैतवीथीपथिकत्वमेत्य सारस्वतोद्यानमनुश्रयन्तु ॥ १४ ॥

यस्मिन्गुरुज्ञप्तिसुधासमुद्रचिदंबुदश्रीवुधलक्ष्मणस्य ॥ स्वानन्दपीयूषतुषारधाराः संसारमारादतिनिर्हरन्ति ॥ १५ ॥

स्तो [सौ] मोऽमृतत्वाय सुधादुधानां [मुधाबुधानां] सारस्वताद्वैतसुधामधासीत् ॥

सारस्वताद्वैतसुधा ममेयं पीता कणेह न्यरुणद्धि मृत्युम् ॥ १६ ॥

शोषं विभाश [व्य] विदुषाऽविदुषामशेषं शोषं च दुर्विषयतो विदुषामशेषम् ॥

शस्ता सदद्वयसुधाम्रसदापिधातुमुद्धृत्तमन्धतमसं स्वसदापि धातुम् ॥ १७ ॥

आरातितः [आसक्तितः] कवितभावमुदस्य सद्यः शुद्धामृतस्रवणतः श्रवणे नियुक्ताः ॥

विध्वस्य — — [तस्य] दुरवापमहोपतापं निर्वापयन्ति हृदयं मम सूक्तिमुक्ताः ॥ १८ ॥

तीर्णो व्याकरणार्णवः स्फुरदुरुद्वैतप्रबंधा अपि श्रीमच्छंकरसूनृतैकरसिका ये केपि लोकोत्तराः ॥

तेषामप्युपले निपत्य विलसंत्याम्नायगेयोत्तमश्लोकश्रीचरणोदिताऽमृतसरिद्भूयादियं भूतये ॥ १९ ॥

काशीगंगा टीकास्वेका । नद्या सूक्तिर्भव्यालोका ॥ २० ॥

स्थालीपुलाकनयनोखिलवाङ्मयस्य ब्रह्माऽद्वयैकपरतामवधार्य धीराः ॥

विकृत्य दृश्यमनवद्यसुखस्वरूपप्रत्यंचमीशमनिशं परिशीलयंतु ॥

वीतत्वगिक्षुशकलानि विनीय पर्वाण्यग्रे कथं दशनहीनजनस्य कुर्याम् ॥
इत्युद्गतो मम दुराधिरपि व्यपेयादद्वैतसाररसिका यदि हन्त सन्तः ॥
सच्चिदानन्दमद्वैतमात्मतत्त्वमविद्यया ॥ जीवभावमिवापद्य दुःस्वप्नेनेव बध्यते ॥
सत्कर्मशुद्धचित्तं तत्त्वमस्यादिवेदतः ॥ गुरूपदिष्टमात्मानमवबुध्य विमुच्यते ॥
इत्येतच्छ्रुतिसर्वस्वमभिसंधाय सत्कविः ॥ कालिदासः प्रववृते कथामुपदिशन्निह ॥
एकः कारणतस्तां तामवस्थां प्रतिपद्यसे ॥ नानात्वं रागसंयोगात्स्फटिकस्येव ते स्मृतम् ॥
एकैवमूर्तिर्बिभिदे त्रिधाऽसामान्यत्वमेषां प्रथमावरत्वम्। विष्णोर्हरस्तस्यहरिः कदाचिद्वेधास्तयोस्तावपि धातुराद्यौ ॥
रसांतराण्येकरसं यथा दिव्यं पयोऽश्नुते ॥ देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥ २५ ॥
बहुधाप्यागमैर्भिन्नाः पंथानः सिद्धिहेतवः ॥ त्वय्येव निपतंत्योघा जाह्नवीया इवार्णवे ॥ २६ ॥
इति प्रसादयामासुस्ते सुरास्तमधोक्षजम् ॥ भूतार्था व्याहृतिः सा हि न स्तुतिः परमेष्ठिनः ॥ २७ ॥
इत्यद्वैतामृतोद्गारः साक्षादेवाऽस्य दृश्यते ॥ एकैवमूर्त्तिर्या सृष्टिर्वेदान्तेष्वेवमित्यपि ॥ २८ ॥
शुचिः कविः परं ब्रह्म कवीनामेवमादिषु ॥ प्रशस्यमानतामीषामात्मवित्त्वे हि युज्यते ॥ २९ ॥
अतिसारश्च मार्जारः सुरतादिविदो यदि ॥ अतः स्तो[स्तौ]तीत्यभिमतमद्भुतं किमतः परम् ॥ ३० ॥
अतो वादकथारूपे प्रबंधेत्र महाकविः ॥ वदन्वेदार्थमन्वाह: [ह] वेदमातरि मंगलम् ॥ ३१ ॥
त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् ॥ तदित्यृचोस्याः सावित्र्याः परमेष्ठीति वै मनुः ॥ ३२ ॥
परिहायापि वेदांस्त्रीन्कर्माणि विहितानि च ॥ गायत्रीमात्रमाश्रित्य द्विजो भवति निर्भयः ॥ ३३ ॥
इत्यादिशास्त्रशस्या या देवता श्रीसदाशिवः ॥ यद्धि शुद्धं परं ब्रह्मेत्यर्थोस्या मंगलं परम् ॥ ३४ ॥
प्रमादादपरिज्ञातं हिरण्यनिधिवद्द्विजैः ॥ ब्रह्मैवोपास्यते सर्वैरित्यथादावुदीर्यते ॥ ३५ ॥
ब्रह्मैकपरता व्यक्ता गायत्र्यास्तैत्तिरीयके ॥ ब्रह्मवादिन इत्युक्ता तज्जलोत्क्षेपदर्शनात् ॥ ३६ ॥
श्रूयते हि तदुह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः संध्यायां गायत्र्यभिमंत्रिता आप ऊर्ध्वं विक्षिपंतीति ।
विशुद्धज्ञानदेहादिः शास्त्रारंभे नमस्कृतः ॥ ग्रहाधिकरणे भट्टैर्गायत्र्योपास्य ईरितः ॥ ३७ ॥
तथा व्योमशरीरोपि परमात्मा श्रुतौ श्रुतः ॥ इज्यते वारिणा नित्यं यः स्वं ब्रह्मेति तद्वचः ॥ ३८ ॥
परब्रह्माभिधायिन्या गायत्र्या वारिणेज्यते ॥ सावित्रमंडलेऽधीश इति सोमेश्वरोब्रवीत् ॥ ३९ ॥

गायत्र्याश्चायमर्थः यो नः अस्माकं धियः धर्मादिविषया बुद्धीः प्रचोदयात् प्रकर्षेण तत्त्वावबोधे प्रेरयेत् प्रेरयति वा। लिङर्थे बाहुलकाल्लडऽर्थे वा लेट् लेटोऽडाटाविस्याट् तस्य देवस्य जगत्सृष्ट्यादिलीलाभिः क्रीडतो द्योतमानस्य च सवितुः सुवति सूयते च सविता तस्य सर्वान्तर्यामितया प्रेरकस्य षूञ् प्रेरणे तुदादिः षूङ् प्राणिप्रसवे दिवादिश्च त्रियते इति वरेण्यं उपास्यतया ज्ञेयतया च सर्वैर्वरणीयं संभजनीयं वृञ एण्यः भर्गः अविद्या तत्कार्यभर्जकं भृजी भर्जने अंच्यंजियुजिभृजिभ्यः कुश्चेत्यसुन् कवर्गश्चांतादेशः भ्रस्ज पाके असुन् भ्रस्जोरोपधयो रमन्यतरस्यामिति रोपधयोर्लोपः रमागमः न्यंक्वादि- पाठात्कुत्वमिति तु बहूचतृतीयाष्टके वेदभाष्यं तत् सच्चिदानंदात्मकं रूपं धीमहि ध्यायेम । ध्यायतेर्लिङि बहुलं छंदसीति संप्रसारणं । व्यत्ययेनात्मनेपदं यो देवः सविताऽस्माकं धियो धर्मादिगोचराः प्रेरयेत्तस्य भर्गस्तद्वरेण्यं समुपास्महे। ४० । इत्याशयेनाह ॥ वागर्थाविव संपृक्तौ.........

च.—इत्युत्तमश्लोकपदारविंदप्रसादमासाद्य कृतार्थसार्थः ॥ आविर्भवद्भूमसुखाभिरामं मामद्य वाचंयमताभ्युपैति ॥ १ ॥

यय कथापथमपार्थकमभ्युपेत्य तत्त्वं श्रुतिस्मृतिपुराणसदागमानाम् ॥
आविश्चकार रघुवंशकृदाशयत्वं सा नः सदा गुरुपदांबुजरेणुरव्यात् ॥ २ ॥

इत्थं निरंतरगुरुस्मरणोपपन्नसच्चित्सुखामृतमहोदधिमग्नमूर्तेः ॥
श्रीलक्ष्मणामृतकरस्य तु षष्ठ एष सारस्वतोपनिषदो विवृतेः कलापः ॥ ३ ॥

समुद्धृतद्वैतदुरंतशंकोरेकोत्तमश्लोकमुनेर्विनेयः ॥ श्रीलक्ष्मणो दत्तकृतिप्रसूतिर्मुक्तिं परां ब्रह्मविदोभ्यधत्त ॥ ४ ॥

अस्ति प्रशस्तविभयो भुवि भूरिविद्यो विद्योतमानगुणधामसमानतश्रीः ॥
ब्रह्मज्ञवंशजलधिर्वसुधासुधांसुस्तस्मिन्नभूदतिमतिर्बुधविश्वनाथः ॥ ५ ॥

सांगोपांगत्वंगदाम्नायमूर्तेः कौंडिन्यान्तस्तैत्तिरीयस्य तस्य ॥
पुत्रोन्वर्थः श्रौतानिष्ठावसिष्ठः प्रादुर्भूतो दत्तनामा वरिष्ठः ॥ ६ ॥

हरिहरदृढभक्तिः प्रस्फुरद्वेदपंक्तिः प्रथिततरविरक्तिः स्पष्टशिष्टानुरक्तिः ॥
परिचितपरमार्थन्यस्तबद्धादिसार्थः कथमिव कथनीयो दत्तनामा गुरुर्नः ॥ ७ ॥

श्रीमद्गणेशरघुनाथबुधानुजन्मा गोजात्मजोस्य तनुजोनुजविठ्ठलो यः ॥
देवालयावसथमातुलनागनाथनारायणाधिगतवैद्यकशास्त्रसारः ॥ ८ ॥

महांधकारापहरं परं यदादु [त्याहु] र्महावेदशिरोगिरोत्र ॥
यदीयपुण्यैरुदियाय काश्यां तदुत्तमश्लोकपतीशमूर्त्या ॥ ९ ॥

स लक्ष्मणो दक्षिणदिश्यपास्य श्रियः सदानंदममेदमिच्छन् ॥
काश्यामुदासीनमतिः शरीरे विश्वेशसेवी समयाकरोति ॥ १० ॥

यः शुक्लदीक्षितविनेयगणे गणेयः श्रीमाधवाख्यविबुधाधिगतोरुतर्कः ॥
वेदे पितुः श्रुतसुधाजलधेरधीती साहित्यमन्यजमपि ध्रुवमध्यगीष्ट ॥ ११ ॥

तेनोत्तमश्लोकवपुर्वृषांककृपाकटाक्षैकनिरीक्षितेन ॥ निर्मथ्य सारस्वतसूक्तिसिंधुमध्येयमद्वैतसुधा व्यधायि ॥ १२ ॥

भास्वद्ब्रह्मज्ञानिवंशावतंसश्रीमद्गोजादत्तसूरिप्रसूतेः ॥ हृद्यो विद्वल्लक्ष्मणस्य प्रयासो विश्वेशस्य प्रीतये शश्वदस्तु ॥ १३ ॥

समुद्धृता वाङ्मयदेवतायाः समुल्लसत्सूनृतदुग्धसिंधोः ॥ अध्येयमद्वैतसुधा धिनोतु पूर्णानपर्णाशितिकंठपादान् ॥ १४ ॥

पीडासमुच्छेददृढाभिसंधेर्व्रीडामुपेतस्य कथानुबंधे ॥ क्रीडामयोद्यद्गुरुपादरेणोर्नीडानुगं मार्गमपावृणोति ॥ १५ ॥

तीर्णव्याकरणार्णवाः स्फुरदुरुद्वैतिप्रबंधा अपि श्रीमच्छंकरसूनृतैकरसिका ये केपि लोकोत्तराः ॥
तेषामप्युपले निपत्य विलसन्नाम्ना य [च] गेयोत्तमश्लोकश्रीचरणोदितामृतसरिद्धयदियं भूतये ॥ १६ ॥

इति श्रीमत्पदवाक्यप्रमाणपरमहंसपरिव्राजकाचार्यश्रीमदुत्तमश्लोकतीर्थमहामुनिकृपाकटाक्षैकवीक्षितब्रह्मज्ञानिवंशावतंसदत्तसूरिसुतलक्ष्मणपंडितविरचितायां रघुवंशापरपर्यायसारस्वतोपनिषद्व्याख्यायामद्वैतसुधासमाख्यायां विदेहकैवल्यसमर्थनो नाम षष्ठः कलापः । समाप्तश्चायं फलपरिच्छेदश्चतुर्थो ग्रन्थः ॥

१२१ अध्यात्मकारिका सटीका-श्रीपुरुषोत्तमः टीकानाम अध्यात्मसुधातरङ्गिणी ।

मू. आ.—श्रीमुकुंदं जगद्योनिं निर्दोषं सद्गुणार्णवम् ।

मू. च.—संसाराब्धिनिमग्नानां प्रसादं कुरु केशव ॥ ४ ॥

इति श्रीअध्यात्मकारिकावलीसप्तमस्तरंगः ॥ ७ ॥ समाप्तोयं ग्रंथः ॥

आ. टी.—श्रीधर्मदेवपादाब्जं स्वभूवंशाब्धिसंभवम् ॥ संसारतापशांत्यर्थं बुद्धौ संधारयेनिशम् ॥ १ ॥

अथ सकलब्रह्मरुद्रादिवंदितपादपीठार्चित्यानंतस्वरूपगुणशक्तिश्रीवासुदेवाज्ञप्तो जगदुद्दिधीर्षुर्भगवाञ्छ्रीसुदर्शनानियमानंदसमाख्ययावनितलावतीर्णः सर्ववेदान्तशास्त्रार्थमनेकप्रबंधैर्वाक्यार्थरूपेण संजग्राह ॥ तांश्च प्रबंधान् शंखावतारस्तच्छिष्यप्रवरो भगवांच्छ्रीश्रीनिवासाभिधो निगदं बभाषे श्रीपुरुषोत्तमाचार्य्यादयश्च विवर्णयामासुः । तेषां शब्दतोर्थतश्चापारत्वेनातिगंभीराशयत्वेन चाल्पबुद्धीनां तज्जिज्ञासूनां तत्र प्रवृत्त्यनर्हतामवगम्य तेभ्यस्तदर्थजिग्राहयिषया सुकरोपायस्य पूर्वाचार्यप्रणीतशास्त्रार्थसंग्रहरूपस्याध्यात्मसुधातरंगिण्याख्यग्रंथस्यारंभः श्रीश्रीनिवासानुग्रहैककामेन मया क्रियते तस्यार्थसंग्रहश्लोकाश्च ॥

अत्र सप्त तरंगाः स्युः प्रथमे प्रत्यगात्मनः ॥ द्वितीये निर्णयो ज्ञेयोऽचित्स्वरूपस्य संग्रहः ॥ १ ॥
तृतीये भण्यते तत्त्वं परेशस्य यथागमम् ॥ संप्रदायानुसारेण सिद्धांतश्च समासतः ॥ २ ॥
चतुर्थे तदुपायस्य पंचमे सहकारिणः ॥ षष्ठे विरोधिनो रूपं चरमे फलनिर्णयः ॥ ३ ॥
एतावान्सर्वशास्त्रार्थः पूर्वाचार्यैर्निरूपितः ॥ सनंदनपदद्वंद्वानुगैर्ज्ञेयो हि वैष्णवैः ॥ ४ ॥
अध्यात्माख्यसुधानद्यां वैष्णवैर्यत्नतोनिशम् ॥ संसारतापशांत्यर्थं प्लवनीयंमुमुक्षुभिः ॥ ५ ॥

स च पदार्थमात्रेण निर्णीयते विशेषविस्तरस्तु तत्र तत्र पूर्वैः कृतत्वादेव । अथ ग्रंथारंभे सदाचारप्राप्तं ग्रंथनिर्विघ्नसमाप्त्यर्थं स्वेष्टदेवताश्रयणरूपमंगलमाचरति

टी. च.—इति श्रीअध्यात्मसुधातरंगिण्यां फलनिर्णयो नाम सप्तमस्तरंगः ॥

१२२ अनुमितिनिरूपणं सटीकम्—मू० टी० रामनारायणः ।

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदान्प्रहिणोति तस्मै । तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ १ ॥
श्रीरामसिंहाख्यगुरुं प्रणम्य सदासुखं श्रीहरिनाथदेवम् । सावित्रिदं चैव भवानिदासं सुचेतरामाख्यनृपं स्वतातम् ॥ २ ॥
क्षमाद्रौं मातरं नत्वा तद्राज्ञीं विष्णुतत्पराम् । ग्रन्थानुमितिसद्व्याख्यां कुर्वे कृष्णप्रणोदितः ॥ ३ ॥
गणेशं च गिरं वन्दे ह्यजं शम्भुं शिवां सुरान् । वन्दे ब्रह्मविदो विप्रान् वैष्णवान् तद्व्रतान् सतः ॥ ४ ॥
सर्वात्मकं हरिं वन्दे विश्वं चैव तदात्मकम् । तत्कृपामाश्रितः कुर्वे सद्व्याख्यां बुधमोददाम् ॥ ५ ॥
मूलग्रन्थेपि जगन्मङ्गलमङ्गलबोधिका श्रीगोपालतापनीयश्रुतिरेव मङ्गलत्वेनानुसंधीयते—

आ. मू.—सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्मणे । नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥ १ ॥
रामसिंहगुरुं नत्वा हरिनाथं सदासुखम् । वर्णदं पितरं बालबोधायानुमितिं ब्रुवे ॥ २ ॥
अनुमितिकरणमनुमानम् । परामर्शजन्यं ज्ञानमनुमितिः ॥

च. मू.—यथा सर्वाणि ब्रह्मात्मभेदबोधकानि द्वैतसत्यत्वबोधकानि अनुमानानि भासानि [भाषितानि] 'अयमात्मा ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि तत्त्वमेव, त्वमेव तत्, आत्मैव नृसिंहो देवो ब्रह्म भवति, नान्योतो द्रष्टा, अतोन्यदार्त्तम्, नेह नानास्ति किंचन', इत्यादिश्रुतिभिः 'अहमात्मा गुडाकेश.
कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् । अयं प्रपञ्चो मिथ्यैव सत्यं ब्रह्माहमद्वयम् ॥
अत्र प्रमाणं वेदान्तो गुरुः स्वानुभवस्तथा । इत्यादिस्मृतिभिश्च बाधितानि ॥
इति श्रीविष्णुसख्यापन्नश्रीरामनारायणविरचितमनुमितिनिरूपणं संपूर्णम् ॥

च. टी.—पञ्चरात्रे वैष्णवतन्त्रे—अयं प्रपञ्च इत्यादि—नच 'वह्निरनुष्णो द्रव्यत्वात् इत्यत्रानुष्णत्वं साध्यं तदभावोनुष्णत्वम् स्पर्शनप्रत्यक्षेन गृह्यते इति बाधितत्वम् । आकरजे वह्नौ स्वर्णादौ वह्नेरनुष्णत्वनिर्धारणात् ॥ द्रव्यमात्रे क्वाप्युष्णत्वानिश्चयात् । वायुजलादौ स्पर्शेन प्रत्यक्षेणोष्णत्वग्रहेपि भवद्भिस्तन्निमितान्तरकल्पनेनास्वीकारात् । प्रत्यक्षस्य च नभोनीलिमादिप्रत्यक्षवदाभासत्वसंशयस्यावश्यंबाधकत्वासंभवाच ॥
नत्वा गुरून्हरिं भक्त्या व्याख्यां हि बुधमोददाम् । तत्कृपालेशतः कृत्वा तत्पादाब्जे समर्पये ॥ १ ॥
इति श्रीविष्णुसख्यापन्नश्रीरामनारायणविरचिता स्वकृतानुमितिनिरूपणव्याख्या बुधमोददा समाप्ता ॥

१२३ खण्डनटीका-पद्मनाभः ।

आ.—वन्दे तमखिलाधारं भालेन्दुभयविह्वला । काकोलूकपटाद्गूढा यत्कंठकुहरे कुहूः ॥ १ ॥
बलभद्रमिश्रकृतिनश्चरणसरोजे समाराध्य । श्रीपद्मनाभसुकृती खंडनटीकामिमां तनुते ॥ २ ॥
श्रीपद्मनाभकृतिनो वचसां विलासैः श्रीहर्षनिर्मितिमिमामधिगम्य सम्यक् ॥
धीरा यशोनिचयपूरितदिग्विभागा लोकेषु खण्डनपराक्रममातनुध्वम् ॥ ३ ॥
विघ्नध्वंसनकामनया कृतं मंगलं शिष्यशिक्षायै निग्नाति । अविकल्पेति ॥

च.—तथापीति निर्वक्तुमशक्यतया कोपि साक्षी आह तस्येति ॥
श्रीपद्मनाभकृतिना कृतिनां गरिष्ठमानम्य लोकविदितं बलभद्रमिश्रम् ॥
एतावता य (दु)पदिष्टमदुष्टवर्त्म तुष्टोस्तु तेन स कृती सुकृतिप्रगल्भः ॥

१२४ खण्डनटीका ।

आ.—यो विश्वोंकारवाच्यः सकलविषयभुग्भ्रांतितरकारणाभ्यां— — — —
अबोधपंकाविलबोधनीरे यदीयवाचः कतकायमानाः ।
वंदे मुनींद्रान्मुनिवृंदवंद्यान्श्रीमद्गुरूञ्श्वेतगिरीन्गरिष्ठान् ॥ ६ ॥
वंदे संबुद्धतत्त्वं मुनिनिकरकराराधितश्रीपदाब्जं विद्यालक्ष्म्याश्रितांगं वियति कृतगतिं स्वात्मदृष्टप्रपंचम् ॥
वेदांतोद्बोधजन्मप्रकटनसुभगं शेषभोगात्तदेहमानंदारण्यमीशं कृतभजनजगत्पालनोद्योगशीलम् ॥ ७ ॥
कथाख्यभूमिप्रबलप्रचंडवादीभकुंभप्रविभेदतोत्रम् ॥ रसावसिक्तं [कंत] बुधमंडनं यत्तत्खंडनं व्याकरवाणि रीत्या ॥८॥

ग्रंथारंभे शिष्टाचारपरंपराप्राप्तकर्तव्यभावं परदेवतास्तुतिनमस्कारलक्षणं मंगलं विधातुमधिकारिप्रयोजनसंबंधाभिधेयप्रतिपादनाय चाह । अविकल्पेति

च.—तच्चेति विचारमुपसंहरन् तस्मादिति । अतो द्वितीयः पक्षः परिशिष्यत इत्याहात इति । सोपि न घटत इत्याह तत्रेति। अन्योन्याभावस्यैकत्वे स्यादिदं तदुक्तं तन्न किं तु प्रत्यक्षाभासादिप्रतियोगिकान्योन्यास्वकालात्ययापदिष्टत्वाप्रतियोगि कत्वा प्रत्यक्षाभासादि लक्षितान्योन्याभावस्य प्रतियोगि ——————————————————

१२५ चुलिकार्थसंग्रहः-वरदाचार्यः ।

आ.—श्रीमत्रय्यंतसिद्धांतगुरुपुत्रेण वर्ण्यते । सत्त्वोत्तरप्रसादार्थं तत्त्वत्रयनिरूपणम् ॥ १ ॥
यतिपतिमतनिष्ठान्यामुनार्यप्रबंधैरविगतपरमार्थान्भूरितर्कान्प्रणेष्यन् ॥
चिदचिदधिपतीनां चिंतनाय प्रबंधं व्यतनुत वरदार्यः सर्वतंत्रस्वतंत्रः ॥ २ ॥

च.—इदं सर्वमप्यर्थजातं द्रविडदेशवासिनां विशदप्रबोधार्थमाचार्यैस्तद्भाषया प्रणीते तत्त्वत्रयचुलिके संग्रहेणाभिहितं सकलदेशवासिनामपि विदुषामवगमायास्माभिः संस्कृतभाषया सम्यगुपपादितम् ॥ इदं हि आचार्यैरभिहितं श्लोकद्वयं तस्मिन्नेव प्रबंधांते ।
इतीरितो देशिकदत्तचक्षुषा यथाश्रुतं व्येंकटनाथसूरिणा ॥ अपक्षपातैर्निपुणैर्निषेव्यतामनात्मजीवेश्वरचिंतनक्रमः ॥
तरलदुरवगाहात्तत्त्वदुग्धांबुराशेर्यदमृतमुदहार्षीद्व्येंकटेशो यथावत् ॥
तदिह चुलकमात्रं साधुभिः सावधानैरपुनरुपनिषेव्यं तत्त्वमास्वादनीयम् ॥
परिणतगुरुभक्तिः पद्मनाभांघ्रिपद्मं शरणमुपगतो यः शांतसिद्धांतवेदी ॥
स हि भवति मुनीनां मुक्तिसौधस्थितानामपि परिषदि मान्यो भाग्यसौभाग्यशाली ॥
चिदचिदीश्वरतत्त्वनिरूपणं वरदनायकसूरिनिगुंफितम् ॥ परमपूरुषभक्तिपरायणाः प्रतिपदं परिपश्यतु[त] सूरयः ॥
समाप्तोयं ग्रंथः तत्त्वत्रयचुलिकार्थसंग्रहः ॥ संवत् १९१० ॥

१२६ तत्वसंबोधः सटीकः-मू० टी० रामनारायणः ।

आ. टी.—सच्चिदानंदरूपाय कृष्णायाक्लिष्टकर्मणे ....हरिं स्वेष्टदेवं गुरुं तद्रूपब्रह्मात्मनिष्ठाप्रदं रामसिंहं हरिमंत्रदीक्षाप्रदं हरिनाथं सच्छास्त्राध्यापकं श्रीसदासुखं वर्णदं सावित्र्युपदेशेन द्विजत्वापादकं भवानीदासाख्यं नत्वा

आ. मू.—हरिं गुरुं रामसिंहं हरिनाथं सदासुखम् । मुमुक्षोस्तत्त्वसंबोधं कुर्वे नत्वाथ वर्णदम् ॥ १ ॥

च. मू.—तत्त्वसंबोधतो द्वैतं बाधित्वोपशमं व्रजेत् ॥ ५२ ॥
इति श्रीविष्णुसख्यापन्नश्रीरामनारायणविरचितः तत्त्वसंबोधः संपूर्णः ॥

१२७ ब्रह्मवादः-व्रजनाथः ।

आ.—विशेषैः प्राकृतैः शून्यमप्राकृतविशेषवत् ॥

च.—वांछितप्रदानेन ते मुदे प्रीतयेस्त्वित्याशिर्वचनम् ॥
इति श्रीव्रजनाथजीविरचितो ब्रह्मवादः ।

१२८ तत्त्वप्रकाशावरणभङ्गः-पीताम्बरः ।

वंदे श्रीवल्लभाचार्यानपारकरुणान्वितान् ॥ स्वीयानां तत्त्वदीपेन स्वांतध्वांतनिवारकान् ॥ १ ॥
नंदसूनुपदसौख्यदं नवं दुःखसंघदलनातिवैभवम् ॥ (श्री)मदग्निपदपंकजासवं भावयामि सततं नमामि च ॥ २ ॥
श्रीमद्वल्लभनंदनपदपाथोजन्मरेणवस्ते मे ॥ संत[तु]कृपामधुभरिता दंतुरमंत (:) क्षमादक्षाः ॥ ३ ॥
श्रीपरिवृढपदपंकजरेणवमेणीदृशा जुष्टम् ॥ कुंकुमपंकमनारतमाप्तुमहं कामये दास्ये ॥ ४ ॥
श्रीकृष्णसंवीतसुवर्णवर्णांबराभिधानोस्य कृपां दधानः ॥ विवेचयन्नाशयमत्र तत्त्वदीपप्रकाशावरणं भनज्मि ॥ ५ ॥
अथ श्रीमद्वल्लभाचार्यचरणाः सात्त्विकानुद्दिधीर्षवः प्रेक्षावतां प्रवृत्तिसिद्ध्यर्थं ग्रंथस्य फलसंबंधं सोपोद्घातं निरूपयंतः तत्त्वदीपविवरणं प्रतिजानते ॥ सर्वोद्धारैरित्यादिभिस्त्रिभिः

च.–इति हरिपदकुंकुमतो भावितवसनस्य वल्लभीयस्य ॥ श्रीमन्निबंधविवृतौ शास्त्रार्थे विषमपदविवृतेः[तिः] ॥ १ ॥
सुरनरकजराजेक्लिष्टदेवेशराजव्यसनकषणराजद्राजलीलासमाजः ॥
यदुपुरपुरुहूतो वामदेवाजनूतो निजपुरमिव पायादंतरापादपायात् [अंतरायादपायात्] ॥ २ ॥
प्रलयजलदवृष्टेर्गोकुलस्यावनाय स्वमृदुकरनखाग्रन्यस्तगोवर्द्धनाद्रेः ॥
भगवत इह शक्त्या तत्त्वदीपप्रकाशावरणभरविभंगे प्रक्रियाद्या समाप्नोत् ॥ ३ ॥
इति श्रीमद्वल्लभाचार्यचरणनखचंद्रचंद्रिका – – – स्हार्द्दतमसस्तद्दासदासस्य यदुपतिसुतस्य पीतांबरस्य कृतौ तत्त्वदीपप्रकाशावरणभंगे शास्त्रार्थप्रकरणं संपूर्णम् ॥

१२९ मिथ्यात्ववादरहस्यम्

आ.–रज्जुसर्पवदनाद्यविद्यया यत्र कल्पितमतात्त्विकं जगत् ।
च.–प्रयत्नवत्त्वं तात्पर्यमिति निष्कर्षः ॥ इति मिथ्यात्ववादरहस्यं समाप्तम् ॥

१३० मुकुन्दमहिमस्तवः-महिमदासः ।

आ.–श्रीमुकुंदं जगद्योनिं गोपीकांतं रमापतिम् ॥ ब्रह्मेशानादिभिर्ध्येयं शास्त्रयोनिं नमाम्यहम् ॥ १ ॥
च.–श्रीमन्मुकुंदमहिमस्तवमेतमर्थ्यं यः कृष्णपादयुगले यदि रागमिच्छन् ।
नित्यं पठेत्प्रयतमानस आदरेण श्रीमन्मुकुंदकरुणासहि [महि] भाजनं भवेत् [स्यात्] ॥ १ ॥
इति श्रीभगवदाचार्यनियमानंदसंतत्याश्रयेण श्रीस्वभूदेववंशाऽनुगेन श्रीभगवन्महिमदासेन विरचितः श्रीमुकुंदमहिमस्तवोयं समाप्तः । श्रीमद्गोपालमहिमस्तोत्रं समाप्तिमगमत् ॥

१३१ लघुस्तवराजस्तोत्रम्-श्रीनिवासाचार्यः ।

आ.–जय जयेंगितज्ञाता नियमानंद आत्मवान् ॥ नियमेन वशो कुर्वन्भगवन्मार्गदर्शकः ॥ १ ॥

च.–भक्तिं देहि पदांबुजे ॥ १ ॥

इति श्रीवैष्णवाचार्यश्रीश्रीनिवासाचार्यविरचितं लघुस्तवराजस्तोत्रं संपूर्णम्

१३२ लौकिकन्यायसंग्रहः-रघुनाथः ।

आ.–यत्कीर्तिप्रभया सुशुक्लभवने मायाप्रभावैः प्रभोर्नीलादेर्जनिता प्रतीतिरचला द्यौः संवृता शोभते ॥
यच्छिष्योडुगणैः स मे गुरुरहो हार्दान्धकारापहः श्रीमद्रामदयालुरिन्दुरमलो मोदाय भूयात्सदा ॥ १ ॥
नत्वा शंभुं हरिं गौरीं विधिं ढुण्ढिं च भारतीम् ॥ क्रियते रघुनाथेन लौकिकन्यायसंग्रहः ॥ २ ॥
लौकिकन्यायरत्नानामाकरे यत्प्रदर्शितम् ॥ तस्य संक्षेप एवेह शीघ्रबोधाय दर्श्यते ॥ ३ ॥
न्यायार्थं विषयं चैवोदाहृतं च यथामति ॥ वदिष्यामोत्र संक्षेपाद्विस्तरादपि च क्वचित् ॥ ४ ॥
प्रसङ्गादागतानां तु न्यायानां तत्र विस्तृतेः ॥ अर्थमात्रं वदिष्यामः क्वचिदन्यामुदाहृतिम् ॥ ५ ॥

च.–व्याख्यातं न्यायवृन्दं निजमतिमनतिक्रम्य यावन्मयायं पारं प्राप्नोतु शक्तो नहि भवति गुरुः कः पुनर्मादृशो ना ॥
सर्वः सर्वं न वेत्ति प्रथितमिदमतो नास्ति मे त्रास एष शिष्टा ज्ञेया स्वयं वै सुविमलमतिभिः सम्यगाराधितार्थैः ॥ १ ॥
अत्र प्रथमपादे 'यावत्तैलं तावद्व्याख्यानम्' इति न्यायविषयत्वं बोध्यम् । १५३ । २३३ 'यावत्स्नाता तावत्पुण्यम्' इति न्यायोपीह बोध्यः । १५४ । २२४ । द्वितीये 'अनवबुद्धार्थे प्रवृत्तिर्बिलवर्त्तिगोधाविभजनन्यायेनाशक्येति ध्वनितम् । १५५ । २३५ यत्रअधिकार्थालाभेऽल्पार्थे प्रवृत्तिर्नदोष' इति विवक्षा, तत्रालाभे मत्तकाशिन्या दृष्टा-तिर्य(क्षु)कामिते(ति) न्यायः । मत्तकाशिनी स्त्रीविशेषा १५६ । २३६ । तृतीये 'नहि सर्वः सर्वं जानाति' इति न्यायोर्थतः पठितः । १५७१ । २३७ । 'नहि सर्वत्रानीशशक्तिः' इति न्यायः । १५८ । २३८ । 'सर्वसाध्यान्निवृ-त्तिर्नापवादाय' इति न्यायश्चात्र ध्वनितः १५९ । २३९ । पूर्वार्धन्यायाः १६४ । २४० । मिलिताः
वेदाभ्राम्नायसंख्याकलौकिकन्यायसंग्रहः ॥ शिवयोः प्रीतयेऽयं स्यात्पित्रोर्बालस्य गीरिव ॥ १ ॥
गङ्गांभोमिलितस्य वीथिपयसः सत्सेव्यतां वीक्ष्य मे चेतो याति मुदं ध्रुवं मम वचो मिश्रं वचोभिः सताम् ॥
श्रुत्वादेर्वचनैश्च लब्धमिलनं याता सतां सेव्यतां साफल्यं भविता ततो मम कृतेः स्वाभीष्टसंप्रापणात् ॥ ३ ॥
यो ब्रह्मा यश्च विष्णुर्वसुतनुरपि यो यश्च गौर्यादिमूर्त्तिर्यश्चात्मा सर्वजन्तोः श्रुतिशिखरगिरां यश्च तात्पर्यभूमिः ॥
यस्याबोधात्समुत्थो व्रजति च विलयं यस्य बोधात्प्रपञ्चस्तं शुद्धं संप्रपद्ये शिवममरमजं शंभुमीशानमाद्यम् ॥ ४ ॥
इति श्रीसाधुवृन्दवन्दितपादारविन्दवैराग्यादिरत्नाकरविद्वद्वरश्रीरामदयालुशिष्येण सोमवंशीयगोविन्दरायकुलोत्तंस-भगवत्परायणश्रीसेवीदेव्याश्रितपादारविन्दश्रीगुलाबरायवर्मात्मजेनोदासीनावस्थेन रघुनाथवर्मणा विरचितो लौकिक-न्यायसंग्रहः समाप्तः ॥

१३३ वेदान्तरत्नमञ्जूषा-पुरुषोत्तमाचार्यः ।

आ.–यो ब्रह्मेशसुरर्षिवन्दितपदो वेदान्तवेद्यो हरिस्तं वन्दे मनसा गिरा च शिरसा श्रीश्रीनिवासं गुरुम् ॥
कण्ठे यस्य चकास्ति कौस्तुभमणिर्वेदान्ततत्त्वात्मको भक्तेः[क्तिः] श्रीहृदये शरण्यमगतेः कारुण्यसिन्धुम[न्धुः स]दा ॥१॥
इह सकलब्रह्मरुद्रादिकिरीटकोटिवन्दितपादपीठेनाऽनन्ताचिन्त्यस्वाभाविकस्वरूपशक्तिवैभवेन ज्ञानबलैश्वर्य्यवीर्य्य-

कारुण्यवात्सल्यदयातिती[ति]क्षाद्यनन्तकल्याणगुणार्णवेण[न] जगज्जन्मादिहेतुना सर्वश्रुतिशिरोरत्नवेदान्तवेद्यचरणेन रमानिवासेन भगवता श्रीवासुदेवेन विष्णुना आत्मस्थापितवेदमार्गसंरक्षणाय नियुक्तो निरतिशयात्मप्रिय आत्मशक्त्युपबृंहितानन्तशक्तिः स्वहस्ताधारको निजायुधः कोटिसूर्यसमप्रकाशो भगवान् सुदर्शन [नो] ऽवनितलावतीर्णस्तैलङ्गद्विजवरात्मना तस्मिन्नेव देशे नियमानन्दाभिधो भगवदीयां सनातनीं कलौ नष्टां वेदान्तसन्ततिं प्रवर्तयिष्यन् शारीरकमीमांसावाक्यार्थरूपवेदान्तपारिजातसौरभ्याख्यादिग्रन्थरचनाव्याजेन सर्ववेदान्तार्थं सङ्ग्रहेण संदर्शयामास। तस्य च विधिप्राप्तोपनयनादिसंस्कृताधीतषडङ्गश्रुतिजिज्ञासितधर्ममीमांसानिरस्तकर्मफलादिविषयसन्देहकतत्फलनिर्विज्ञा[ण्ण] भगवद्दिदृक्षालम्पटगुरुभक्तिसम्पन्नमुमुक्ष्वधिकारिकत्वेनानन्ताचिन्त्यापरिमितस्वरूपगुणशक्तिवैभवपरब्रह्मभूतश्रीवासुदेवविषयकत्वेन श्रीभगवद्भावापत्तिलक्षणमोक्षप्रयोजनकत्वेनाचिन्त्यापारातिगम्भीराशयत्वमाकलय्य मन्दमतीनां सर्वशास्त्रार्थजिज्ञासूनां शिथिलप्रयत्नानां शास्त्रार्थविचारासमर्थानां मुमुक्षूणामुपकारार्थं वेदान्तरत्नभूतां शास्त्रार्थकामधेनुं दशश्लोकीमपि निर्ममे। तथाच तथैवोक्तं स्वयमेव अथाधीतषडङ्गवेदेन कर्मफलक्षयाक्षयत्वविषयकविवेकप्रकारवाक्यार्थजन्यसंशयाविष्टेन तत एव जिज्ञासितधर्ममीमांसाविवेकानिश्चितकर्म्मतत्प्रकारतत्फलविषयकज्ञानवता कर्मब्रह्मज्ञानफलयोः सान्तत्वानन्तत्वसातिशयत्वनिरतिशयत्वविषयकव्यवसायजातनिर्वेदेन भगवत्प्रसादेप्सुना तद्दर्शनेक्षालम्पटेनाऽऽचार्यैकदेवेन गुरुभक्तयेकहार्देन मुमुक्षुणा अनन्ताचिन्त्यस्वाभाविकस्वरूपगुणशक्त्यादिभिर्बृहत्तमो यो रमाकान्तः पुरुषो ब्रह्मशब्दाभिधेयस्तद्विषये का जिज्ञासा सततं सम्पादनीयेति वाक्येन। तथाच शास्त्रम्। स्वाध्यायोऽध्येतव्यः। स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्। यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते। परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन जुष्टं यदा पश्यति अन्यमीशं यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥

तमक्रतुं पश्यति वीतशोकः। धातुः प्रसादान्महिमानमात्मनः॥

यमेवैष वृणुते तेन लभ्यः। सर्वे वेदा यत्पदमामनन्ति।

तं त्वौपनिषदं पुरुषं पृच्छामः। नामानि सर्वाणि यमाविशन्ति।

शास्त्रयोनित्वात्

वेदैश्च सर्वैरहमेव वेद्यः। निरञ्जनं परमं साम्यमुपैति। तन्महिमानमेति वीतशोकः।

बहवो ज्ञानतपसा पूता मद्भावमागताः। मम साधर्म्यमागताः। तन्निष्ठस्य मोक्षव्यपदेशात्।

तत्तु समन्वयात्। नमामः सर्ववचसां प्रतिष्ठा यत्र शाश्वतीत्यादिभाषितं चेदं वाच्यम्।शङ्खावतारैः श्रीश्रीनिवासाचार्यचरणैः।

उक्तं च विश्वाचार्यचरणैः। शङ्खावतारः पुरुषोत्तमस्य यस्य ध्वनिः शास्त्रमचिन्त्यशक्तिः।

यत्स्पर्शमात्राद्ध्रुव आप्तकामस्तं श्रीनिवासं शरणं प्रपद्ये इति॥

तस्याश्च मिताक्षरैः कोष्ठचतुष्टयात्मिका वेदान्तरत्नमञ्जूषाख्या मितव्याख्या यथामति विधीयते। तत्र प्रथमे पदार्थसङ्ग्रहः। द्वितीये सम्प्रदायनिर्णयपूर्वकतत्प्राप्तवाक्यार्थरत्नसङ्ग्रहः। तृतीये साधनरत्नकदम्बसङ्ग्रहः। चतुर्थे पूर्वोक्तशास्त्रार्थस्मरणपूर्वकफलरत्नसङ्ग्रह इति विवेकः। तत्र प्रथमे निरूपणीयपदार्थेषु त्वंपदार्थं तावन्निरूपयति ज्ञानेति॥ ॥ –

च.—मंदानामुपकाराय तुष्टये तत्त्वदर्शिनाम् ॥ श्रीकृष्णप्रीतयेयं मे कृतो वेदांतसंग्रहः ॥ १ ॥
प्रसीदतु रमाकांतो गोपीजनमनोहरः ॥ करोतु जगतां श्रेयो मंगलायतनो हरिः ॥ २ ॥
यः श्रीनिवासोखिलवेदवेद्यो न यत्स्वरूपं प्रविशंति तर्काः ॥
योध्यानयोगेत्र विशुद्धतत्त्वैर्दृष्टो मुकुंदो ह्युपयामि तं गुरुम् ॥ ३ ॥
इति श्रीभगवत्पुरुषोत्तमाचार्यविरचितायां वेदांतरत्नमंजूषायां सिद्धान्तरत्नविवृतौ फलादिरत्नसंग्रहो नाम तुरीयः कोष्टः।
समाप्तोयं वेदांतरत्नमंजूषाख्यो ग्रंथः ॥ संवत् १९०९ ॥

१३४ वेदान्तविभावना-सटीका-नारायणतीर्थः ।

आ. टी.—श्री रामगोविंदसुतीर्थपादकृपाविशेषादुपलभ्य बोधम् ॥
श्रीवासुदेवादधिगम्य सर्वशास्त्राणि वक्तुं किमपि स्पृहा नः ॥ १ ॥
प्रेक्षावत्प्रवृत्तये विषयप्रयोजने निर्दिशन् शिष्टाचारपरंपराप्राप्तं निर्विघ्नपरिसमाप्तये कृतं मगलं शिष्यान्शिक्षयितु-मुपगीत्या ग्रंथादौ निबध्नाति यदविद्येति

मू. आ.—यदविद्योत्थविलासो भूतमथो भौतिकं दृश्यम्

च. मू.—नत्वा श्रीपुरुषोत्तमाख्यचरणौ दामोदरस्वामिनां तौ गोविंदकृपानिधेश्च चरणौ श्रीरामपूर्वस्य च ॥
विद्याकारणवासुदेवयतिनां तौ पूर्णतामागता सद्वेदांतविभावना हरिरयं प्रीणातु तेन स्वयम् ॥ २२२ ॥
श्री कृष्ण.........प्रीत्यै सतामपि ॥ २२३ ॥ इति वेदांतविभावना समाप्ता ॥

च. टी.—हरिचरणयोजनेन सार्थयति श्रीकृष्णेति ॥ २२३ ॥ इति श्रीमत्.........श्रीरामगोविन्दतीर्थशिष्यनारायणतीर्थ-विरचिता वेदांतविभावना टीका समाप्ता ॥

१३५ वेदान्तसिद्धान्तमुक्तावल्याष्टीका ।

आ.—विश्वेशं ढुंढिराजं जगदुदयकृतं शारदां सूत्रकारं व्यासं चाचार्यवर्यं त्रिभुवनविदितं शंकरं भाष्यकारम् ॥
आनंदांतःप्रकाशानुभवपदपदं सद्गुरुं श्रीनृसिंहं वंदे विद्यानिधानं शमदमनिरतं राघवेंद्रं यतीन्द्रम् ॥ १ ॥
यच्छिष्यशिष्यसंदोहव्याप्ता भारतभूमयः ॥ वंदे तं यतिभिर्वंद्यं प्रकाशानंदमीश्वरम् ॥ २ ॥
सिद्धांतमौक्तिकश्रेणीप्रकाशाय प्रदीपिका ॥ क्रियते परपक्षौघध्वांतध्वंसप्रवर्तिनी ॥ ३ ॥..........

१३६ वेदान्तसिद्धान्तरत्नावली–वनमाली ।

आ.—निखिलनिगमवाच्यं श्रीहयास्यं प्रपद्येऽगणितगुणनिकेतं हेयशून्यं मुकुंदम् ॥
विधिशिवसुरराजैः सेव्यमानांघ्रिपद्मं रमयितुमितमाद्यं मां चिदानंददेहम् ॥ १ ॥
कृतनिगमविभागं योगिभिः सेवितांघ्रिं धृतमुनिवरवेषं वासुदेवांशमीड्यम् ॥

यतिगुरुमरुदे [दं] शं श्रीमदानंदतीर्थं मतिनिधिजयतीर्थं व्यासतीर्थं च वंदे ॥ २ ॥
संग्रहो ब्रह्मवाक्यानां सत्तर्काः परिखीकृताः ॥ यत्राभिधीयते दुर्गाः प्रागुक्तीर्वनमालिना ॥ ३ ॥
प्राचीनोक्तिगुणान्विता श्रुतिशिखासिद्धान्तरत्नावली वाजिग्रीवभुजांतरेब्धितनयाक्रीडास्पदे चार्पिता ॥
नित्यानंदगुणालयस्य दनुजा भूतीर्न मर्षंति ये तेषां चेतसि सा दधातु दहनं चित्ते सतां मोदनम् ॥ ४ ॥
च.–श्रीविष्णोः सदनंतभूतिनिचयं वेदांतगीर्भिर्नुतं योऽकांडे प्रलयत्यतथ्यमिति शिष्यः सौगतस्याधमः ॥
वैरं संदधदासुरोखिलसमे वक्तुं च तस्योत्तरं को विद्वाननुरौति किं मृगपतिः फेरो रुतं क्वापि च ॥ १ ॥
वंदे श्रीहयकंधरं श्रुतिशिखाभिर्गीतकीर्त्तिं हरिं योगींद्रैः परिभावितं मनसि नित्यानंददेहं समम् ॥
हेषाभिः परिकंपयंतमसुरांश्चानंदयंतं सुरान्स्वांघ्री चिंतयते गिरोऽमलतरा विश्राणयंतं मुदा ॥ २ ॥
श्रीव्यासं मरुदंशं चाक्षोभ्यजयमुखान्मुनीन् ॥ व्यासतीर्थांश्च विष्णूंस्तु विद्यागुरून्नतोस्मि तान् ॥ ३ ॥
भगवतोंघ्रिकंजस्य श्रीगोपालस्य रेणवः ॥ क्रियासुर्वैभवं वाचामघराशेश्च शोधनम् ॥ ४ ॥
भुक्त्वा श्यामाकमुष्टिं विपदमदमयद्दीनबंधुर्द्विजातेर्दत्त्वा भूतीः पराः स्वा धृतकर इति मा देहि मां पद्मजापः ॥
द्रौपद्याः शाकलेशात्त्रिभुवनमपुषद्यज्वनां दुष्प्रसाद्यः स्थित्वांतः कारिताद्धि मम (तु) यदुवरः संग्रहात्प्रीयतां सः ॥ ५ ॥
श्रीगोविंदविहारभूषितभुवो वृंदावनात्प्राग्दिशि – – – – – संपूर्णः श्रुतिसंग्रहे ननु परिच्छेदोंतिमस्तत्कृतेः ॥ ६ ॥
इति श्रीवेदांतसिद्धांतरत्नावल्यां वनमालिलिखितायां चतुर्थपरिच्छेदः समाप्तः ॥

१३७ शास्त्रदर्पणः–अमलानन्दः ।

आ.–विद्यारत्नं मया [या] वाप्तं पदत्रया [यत्कृपा] पारवारिधेः ॥ तं वंदेनुभवानंदं गुणरत्नाकरं गुरुम् ॥ १ ॥
हरिहरलीलावपुषं परेश्वरं व्यासशंकरौ नत्वा ॥ वाचस्पतिमतवि (दि) तमादर्शं प्रारभे विमलम् ॥ २ ॥
अथातो ब्रह्मजिज्ञासा । ब्रह्म विचार्यं न वेति संदेहः
च.–तावदेव तेषां न सर्वेश्वरवन्निरंकुशमिति सिद्धम् ॥
इति श्रीपरमहंसपरिव्राजकानुभावानंदपूज्यपादशिष्यस्य भगवदमलानंदस्य कृतौ शास्त्रदर्पणे चतुर्थाध्यायस्य चतुर्थः पादः ॥ समाप्तं च शास्त्रम् ॥

१३८ शास्त्रसिद्धान्तलेशसंग्रहः सटीकः–टी०–अच्युतकृष्णानन्दतीर्थः ।

टी. आ.–वेदवेद्यमुमाकांतं कुमाराभ्यामलंकृतम् ॥ नंदीशप्रमुखैः सेव्यं प्रणमामीष्टसिद्धये ॥ १ ॥
शंकरं शंकराचार्यं व्यासं नारायणात्मकम् ॥ सरस्वतीं च ब्रह्माणं प्रणमामि पुनः पुनः ॥ २ ॥
आपन्ना यं समाश्रित्य रक्षां प्राप सुदुर्लभाम् ॥ कृष्णा कृष्णस्य महिषी तं कृष्णं संश्रयेन्वहम् ॥ ३ ॥
गोविंदेति समाक्रंद्य रक्षां प्राप भयातुरः ॥ यं गजः करुणामूर्तिं तं गोविंदं भजे त्वहम् ॥ ४ ॥
प्रकाशितब्रह्मतत्त्वं प्रकृष्टगुणशालिनम् ॥ प्रणवस्योपदेष्टारं प्रण (मा) म्यनिशं गुरुम् ॥ ५ ॥
यो मे विश्वेश्वरक्षेत्रं विश्वेश्वरसमो गुरुः ॥ समध्यास्ते स्वयंज्योतिर्वाणीसंज्ञो भजामि तम् ॥ ६ ॥
तस्य शिष्यप्रशिष्याद्यैर्व्याप्तेयं सांप्रतं मही ॥ सर्वज्ञस्य गुरोस्तस्य चरणौ संश्रये तदा ॥ ७ ॥

गुरोरपि गरीयान्मे यः कलाभिरलंकृतः ॥ अद्वैतानंदवाण्याख्यस्तं वंदे शमवारिधिम् ॥ ८ ॥
ओतप्रोतमिदं सर्वं यस्मिन्सच्चित्सुखात्मके ॥ पर्यवस्यंति वेदांता यत्र चाहं तदक्षरम् ॥ ९ ॥
श्रीकृष्णचरणद्वंद्वं प्रणिपत्य निबंधनम् ॥ व्याकुर्वे शास्त्रसिद्धांतलेशसंग्रहसंज्ञितम् ॥ १० ॥
आचार्यचरणद्वंद्वस्मृतिले [लें] खकरूपिणम् ॥ मां कृत्वा कुरुते व्याख्यां नाहमत्र प्रभुर्यतः ॥ ११ ॥
कुमाराभ्यां विघ्नेश्वरसुब्रह्मण्याभ्यां शंकरं शंकरस्य शिवस्यावताररूपं शंकराचार्यं भगवत्पादं तथा च शिवपुराणवचनं व्याकुर्वन् व्याससूत्रार्थं श्रुतेरर्थं यथोचितवान् [तम्] श्रुतेर्न्याय्यः स एवार्थः शंकरः सवितानन इत्यादि व्यासं सूत्रकृतं बादरायणं नारायणात्मकं नारायणस्यावताररूपं तथाच वचनम् द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुनिरिति न ह्यन्यः पुंडरीकाक्षात्महाभारतकृद्भवेदित्यादि च ब्रह्माणं सरस्वतीभर्तारं हिरण्यगर्भम् आपन्ना सभायां वस्त्रापहारनिमित्तामापदं प्राप्ता रक्षां वस्त्रकोटिलाभनिमित्तां कृष्णा द्रौपदी कृष्णस्य अर्जुनस्य प्रकाशितं शिष्येभ्य उपदिष्टं ब्रह्म तत्त्वं येन गुरुणा सता प्रोक्तं स्वयंज्योतिर्वर्णीसंज्ञः स्वयंप्रकाशसरस्वतीसंज्ञः गरीयान् गुरुः इदं सर्वं यस्मिन् सच्चित्सुखात्मके अक्षरे ब्रह्मणि ओतप्रोतमध्यस्तं वेदांताश्च यथाक्षरे विषये पर्य्यवस्यंति तात्पर्येण बोधहेतवो भवंति तदहमिति संबंधः । अक्षरे सर्वस्योतप्रोतोक्त्या ब्रह्मणः सर्वाधिष्ठानस्वरूपं तटस्थलक्षणमुक्तं सच्चित्सुखात्मक इत्यनेन सत्यज्ञानानंदस्वरूपात्मकं स्वरूपलक्षणमुक्तं तत्र वेदानां पर्यवसानोक्त्या उक्तरूपे ब्रह्मण्यक्षरे वेदांता एव प्रमाणमित्युक्तं नाहमत्र प्रभुर्यत इत्यत्र अत्र व्याख्याने प्रभुः समर्थ इत्यर्थः ॥ चिकीर्षितस्य ग्रंथस्य निर्विघ्नपरिसमाप्तिप्रचयगमनयोः सिद्धये भगवत्पादीयभाष्यस्तुतिमुखेन भाष्यप्रतिपाद्यब्रह्मत्वानुसंधानलक्षणमंगलानुचरणं करोति अधिगतभिदेति —

टी. च.—व्याख्यातोयं परिच्छेदः श्रीकृष्णपरितुष्टये ॥ २ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसरस्वतीदिव्यचरणारविंदसंलग्नरजोभूतस्याच्युतकृष्णानंदतीर्थस्य कृतौ शास्त्रसिद्धांतलेशग्रंथव्याख्यायां श्रीकृष्णालंकाराख्यायां चतुर्थः समाप्तः ॥ संवत् १९११.

१३९ शिवतत्त्वविवेकः सटीकः अप्पयदीक्षितः ।

टी. आ.—यस्याहुरागमविदः परिपूर्णशक्तेरंशे कियत्यपि निविष्टममुं प्रपंचम् ॥
तस्मै तमालरुचिभासुरकंधराय नारायणीसहचराय नमः शिवाय ॥ १ ॥
आकर्णकृष्टधनुराहितमोहनास्त्रमाराग्निरीक्ष्य मदनं कुपितस्य किंचित् ॥
शंभोः समाधिसमये विकसत्कृशानुज्वालाकलापजटिलं निटिलं स्मरामि ॥ २ ॥
सर्वविद्यालतोपघ्नपारिजातमहीरुहान् ॥ महागुरूंस्नमस्यामि सादरं सर्ववेधसः ॥ ३ ॥
निगमशिरसि निष्ठा नित्यवस्तून्यभीप्सा भवचरणसरोजे भक्तिरव्याजसिद्धा ॥
त्रयमपि हृदि येषां जातु [नात्र] संसारशोकात्सहजमुपगतं ते संतु संतः समृद्धाः ॥ ४ ॥
पद्यैः षष्ट्या पशुपतिमहं देवमस्ताविषं यैरंतःसारैरखिलजगतामंतरात्मानमेकम् ॥
भावं तेषां प्रविशदयितुं भग्नवाचाटवाचां वृत्तिं कुर्वे विषमविवृतिं वृद्धवर्त्मानुगानाम् ॥ ५ ॥
इह यद्यपि निष्कलं········मंगलमिति हृदयेनादौ कृतं ध्यानं श्लोकेन निबध्नन् प्रारिप्सितस्तोत्रव्यवस्थापनीयमर्थं सूचयति ॥

मू. आ.—श्रीकांतद्रुहिणोपमन्युतपनस्कंदेंद्रनंद्यादयः प्राचीना गुरवोपि यस्य करुणालेशाद्गता गौरवम् ॥
तं सर्वादिगुरुं मनोज्ञवपुषं मंदस्मितालंकृतं चिन्मुद्राकृतमुद्रपाणिनलिनं चित्ते शिवं कुर्महे ॥ १ ॥

मू. च.—इति विरचिता पद्यैः षष्ट्या पदांबुरुहद्वये तव शिखरिणीमालालीला किरातसमर्पिता ॥
अनुदिनमिमामित्थं संचित्य यः पठति प्रभोस्तव स लभतां साकं कुल्यैः कटाक्षकृपामृतम् ॥ ६० ॥
अथैवं स्तोत्ररचनायां मंदमतेर्श्रीरयादिकृतस्य तत्त्वार्थमा (ला) स्खलितस्यावर्जनीयत्वात् अपचारः प्राप्त इति भीतिस्तदपनयनार्थमाह ।
क्वाहं मूढः क्व तव महिमा निर्जरैरप्यमेयः स्तोत्रव्याजादयमपि महान् केवलं मेपचारः ॥
किं तु स्वामिन् सदसदपि वा भक्तिपूर्वं कृतं यद्भक्तिग्राह्यस्तदखिलमपि क्षाम्यसीति भ्रमोयम् ॥ ६१ ॥
वेदाहमेतमिति यन्महिमावबोधं नारायणः स भगवानवदत्स्ववाचा ॥
स्वस्यातिगौरवकरं तमशेषमूलं कोन्यः परं शिवमिहार्हति नाम बोध्यम् ॥ ६२ ॥
इति श्रीशिखरिणीमालाव्याख्याने शिवतत्त्वविवेकाख्याने श्रीमत्सदाशिवस्य विश्वसेव्यव्यवस्थापनपरिच्छेदः समाप्तः।

टी. च.—हरविष्णुविरंचीनां गुरोश्चैव प्रसादतः ॥ शिवतत्त्वविवेकस्य पुस्तकं लिखितं मया ॥ १ ॥
सदाशिवपदांभोजसक्तधीरप्यदीक्षितः ॥ संग्रहीतुं समस्तानां सारमित्थं त्रयीगिराम् ॥ २ ॥
विभक्तार्थं विश्वेश्वरमहिमपारायणमिदं गभीरैर्मीमांसाद्वयनयनिबद्धैः सुघटितम् ॥
धिया किंचित्पूर्वापरगतिविचारावहितया विचिन्वंतः संतः सुचिरमनुगृह्णंतु विबुधाः ॥ ३ ॥

१४० शिवाद्वैतनिर्णयः—अप्पयदीक्षितः ।

आ.—श्रीकंठशिवाचार्याः सिद्धांतं निजगदुः शिवाद्वैतं तत्किं विशिष्टं अभिमतमविशिष्टं

च.—तस्य सर्वस्यापि यथावद्विशिष्टप्रतिपादकं श्रीकंठाचार्याणामेव भाष्यमुपादेयमिति सर्वं समंजसम् ॥
इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिरंगराजाध्वरिवरसूनोराप्यदीक्षितस्य कृतिः शिवाद्वैतनिर्णयः समाप्तः ॥

१४१ षट्पदी सटीका-टी, रामभद्रमिश्रः ।

टी. आ.—विषयाः स्रक्चंदनादयस्ते च ते रसाश्च

मू. आ.—अविनयमपनय विष्णो दमय मनः शमय विषयरसतृष्णाम् ॥ भूतदयां विस्तारय तारय संसारसागरतः ॥ १ ॥

मू. च.—नारायण करुणामय शरणं करवाणि तावकौ चरणौ ॥ इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥ ७ ॥

च. टी.—इति श्रीसर्वविद्यापारदृश्वना काशीवासिना श्रीरामभद्रमिश्रेण विरचितं षट्पदीविवरणं समाप्तम् । संवत् १९०९

१४२ सिद्धान्तचूडामणिः—नारायणभट्टः ।

आ.—रिंगमानमतिलोलमंगने गोपराजपितृसंनिधौ हरिम् ।...........
द्वैते प्रमाणं सर्वोपि वेदः सांगः स्मृतिस्तथा

च.—चैतन्यघनदेहप्राप्तिप्रमाणं सूचितमिति ॥

इति श्रीनारायणभट्टविरचिते वैष्णवसिद्धांतचूडामणौ भक्तिभक्तप्रकरणं कथितम् ॥ संवत् १७३१

१४३ सिद्धान्तदर्पणः सटीकः-मू० विद्याभूषणः टी.-नन्दमिश्रः ।

टी. आ.—श्यामोपि यः श्रुतिसरो [धरो] बहुबोधरक्तः

मू. आ.—पिता पराशरो यस्य शुकदेवस्य यः पिता

मू. च.—सद्युक्तिभूषणव्रातैर्विद्याभूषणनिर्मिते ॥ सिद्धांतदर्पणे वांछा सतामस्तु मुदर्पणे ॥ ४ ॥

इति सिद्धांतदर्पणो ग्रंथः समाप्तः ॥

टी. च.—मुदर्पणे हर्षप्रापके ॥ ४ ॥

१४४ विन्दुसंदीपनः-पुरुषोत्तमसरस्वती ।

आ.—श्रीरामं बहुधानम्य वक्ति श्रीपुरुषोत्तमः ॥ सिद्धांतबिंदौ तत्वार्थसाधकं किमपि स्फुटम् ॥— — — — — — —

श्रीधरं श्रीगुरुं नत्वा नौमि श्रीपादमादरात् । विद्यागुरुं गुरुमिव सुराणां मधुसूदनम् ॥

विघ्नविघातार्थं मंगलं कुर्वन्नारभ्यमाणग्रंथस्य प्रयोजनमाह । श्रीशंकराचार्य्येति । विश्वेश्वरनामानं गुरु प्रणम्ये-त्यन्वयः तं किंभूतं विश्वगुरुं विश्वेषां हितोपदेष्टारं श्रीशब्द उत्कर्षवाचकः श्रीशंकराचार्य्याणां भाष्यकृतामभिन-वावतारं यद्वा विश्वेश्वरं सगुणं ब्रह्म प्रणम्य श्रीरित्युपलक्षणं वाणीभवान्योः शं कल्याणं करोतीति व्युत्पत्त्या ब्रह्मा विष्णुः शंभुश्च आचार्या उपदेष्टारो व्यासवैयासकिजैमिनिशंकराचार्य्यप्रभृतयः एते एव नवीना उत्कृष्टा आधुनिका-श्चावातराः यस्य ते शेषं पूर्ववत् । प्रयोजनमाह वेदांतेति कर्मप्रवचनीयं । ननु कमपि प्रयत्नं कुर्व्वीत्वीति प्रतिज्ञातं तस्य च विषयः स्वतंत्रो ग्रंथः कस्यचिद्व्याख्यानं वा तत्र द्वितीयमभिप्रेत्याह इहेति इह अद्वैतविचारे शारीरकविचारे वा खलु वाक्यालंकारे असंभावनाविपरीतभावनारहितानुत्तमाधिकारिणः अभिप्रेत्याह साक्षादिति

च.—बलभद्रो भट्टाचार्य्यः कश्चन सम्यग्भक्तशिष्यः परमवेदांतशास्त्रनिष्णातः॥

तत [तातं] स्तौमि विधिं यदीयजलधावध्यस्तदेहं क्वचिन्मूर्तिं ब्रह्म कदाचिदेव विबुधैर्लब्धं न वा लभ्यते ॥

तं वंदे मधुसूदनं यदुदिते बिंदौ चिदानंदितं ब्रह्म स्थायि सदा मुदैव विबुधैर्नूनं समालभ्यते ॥

बालार्थं विहितास्तथापि च गुरोः संदर्भगर्भा गिरो बुद्ध्यन्ते किल कैश्चिदेव सुचिराद्वृद्धैः समृद्धैरपि ॥

तस्मादत्र निगूढमर्थग्रहणं [गहनं] प्रश्लिष्टभावं चिरं भूयः श्रीपुरुषोत्तमप्रणयिनी वाणी समुज्जृंभते ॥

सद्व्याख्याननिरस्तदोषमचिरादुल्लंघ्यमानं बुधैर्यः सिद्धांतदुरंतसिंधुमकरोदाहृत्य बिन्दूपमम् ॥

सम्यग्लब्धसदुर्शनाय [तदुत्सवाय] विलसद्वाणीप्रणीतश्रिये निर्व्याजं मधुसूदनया गुरवे तस्मै परस्मै नमः ॥

अलमन्यांबुधिभ्रांतैर्गृह्यतां विबुधैरिह ॥ बिंदुसंदीपनाभ्यासे युक्तिमौक्तिकषङ्याः [पङ्क्तयः] ॥

इति श्रीमधुसूदनसरस्वतीश्रीश्रीधरसरस्वतीपूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य्यश्रीपुरुषोत्तमसरस्वतीश्रीपादविरचि-तो बिंदुसंदीपनाख्यो ग्रंथः समाप्तः ॥

१४५ सिद्धान्तसुधाकरः–आनन्दगिरिः ।

आ.–वंदे महेश्वरं विष्णुं गौर्या लक्ष्म्या समन्वितम् ॥ जगज्जन्मादिकं यस्मात्सच्चिदानन्दलक्षणात् ॥ १ ॥
सिद्धिनाथं गणेशानं वागधीशां सरस्वतीम् ॥ गुरून्तत्वोपदेष्टारं प्रणमामि पुनः पुनः ॥ २ ॥
वाक्यार्थे च पदार्थे च वादिविप्रतिपत्तयः ॥ महावाक्येषु वार्यन्ते तदर्थे दृढबुद्धये ॥ ३ ॥
तत्र तावद्धर्मार्थकाममोक्षाश्चत्वारः पुरुषार्थाः

च.–उद्धर्तुं च जगद्यदेव कृपया द्वैपायनोभून्मुनिः– – – –
तत्सूत्रार्थविनिर्णयाय च तथा श्रीशङ्करोभूद्यतिः ॥ तं वंदे गुरुमूर्तिकं च सततं श्रीनीलकण्ठं हरिम् ॥ ४ ॥
या देवी सुरशत्रुनाशनिपुणा यासीत्पुरास्मात्सती या श्रीशङ्करविष्णुधातृमुखकैर्देवैः सदा वन्दिता ॥
या चिच्छक्तिरशेषलोकजननी सोमा सरस्वत्यभूत्तां वंदे श्रुतिरूपिणीं श्रुतिशिरोगम्यां च वाग्देवताम् ॥ ५ ॥
अहमेव हरोस्म्यहमेव हरिरहमेव जगत्रयकृच्च विधिः ॥ चिति सत्यसुखाद्वय एव सदा विनिवृत्तजगत्परमात्मवपुः ॥ ६ ॥
अर्पयामि महेशाय नीलकंठाय शंभवे ॥ सुधाकरमहं भक्त्या ॐ तत्सद्ब्रह्मणे नमः ॥ १ ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभगवत्स्वरूपानन्दगिरिपादशिष्यश्रीसदानंदगिरिविरचिते सिद्धान्तसुधाकरे मोक्षनिरूपणं नाम चतुर्थः परिच्छेदः ॥ संवत् १९०९

१४६ किरणावलीवर्धमानप्रकाशः–रुचिदत्तः ।

आ.–गण्डाभोगविलोलषट्पदघटासंचारणव्याजतः शुण्डादण्डविघट्टनेन परितो विघ्नं विनिघ्नन्निव ॥
निर्गच्छन्मदवारिपिच्छिलतरे मार्गे मुहुः प्रस्खलन्नारब्धे मम जायतामिह करालम्बाय लम्बोदरः ॥ १ ॥
जयदेवगुरोः सम्यगधीत्य मतमुत्तमम् ॥ द्रव्यप्रकाशविवृतौ रुचिदत्तः प्रवर्तते ॥ २ ॥

च.–शरीरसंयोगेनार्थान्तरवारणाय क्षेत्रज्ञान्येति शरीरान्येत्यर्थः । केचित्तु क्षेत्रं शरीरम् जानातीति ज्ञ आत्मा तदुभयान्यस्मिन् यो मूर्तसंयोग इति योज्यम् । तेन शरीरात्मसंयोगेनार्थान्तरवारणाय तदिति ॥
इति श्रीमहामहोपाध्यायश्रीरुचिदत्तविरचिते द्रव्यकिरणावलीवर्धमानप्रकाशः संवत् १६१६ ॥

१४७ प्रशस्तपादभाष्यस्य–टीका पद्मनाभः–टीकानाम सेतुः ।

स्मृतिपथमुपनीय श्रीमतस्तातवक्त्रादुचितमुपचितार्थं वाक्यमत्यादरेण ॥
जयति विरचितोसौ पद्मनाभेन यत्नादुदयनकृतिपारप्राप्तये सेतुरुच्चैः ॥ १ ॥
उदयनकृतिचन्द्रिकया वृद्धो भाष्यांबुधिः परितः ॥ बालानामपि सुगमस्तत्र मया रच्यते सेतुः ॥ २ ॥
बलवशीकृतदुर्दमभूपतिर्निजभुजार्जितलोकसमुन्नतिः ॥
अगतिकार्थिजनस्य परा गतिर्जयति वीरवरः पृथिवीपतिः ॥ ३ ॥
शिष्यशिक्षायै मंगलं निबध्नाति । प्रणम्येति । मया पदार्थधर्मसंग्रहः प्रवक्ष्यते । कथंभूतो महोदयः किं कृत्वा ईश्वरं प्रणम्य..........
प० १३६ भाष्यांभोनिधिसेतौ वीरवरीये यशोहितो [यशोहितौ] ॥ रचितो द्वितीयभागो विदुषा श्रीपद्मनाभेन ॥

श्रीपद्मनाभविदुषा पित्रुपदिष्टात्समाहृत्य ॥ विशदीकृत: प्रयत्नात्कृतिषु विनोदाय गूढोर्थ: ॥

च.—इतिशब्दश्शास्त्रार्थपूर्णतायामियतैव गुणादिनिरूपणस्याप्यर्थत: प्राप्तेरग्रे प्रपञ्चमात्रार्थत्वादिति दिक् ।

भाग्याम्भोनिधिसेतौ वीरवरीये यशेहितौ [यशोहेतौ] ॥ चरमो लक्षणभागो रचित: श्रीपद्मनाभेन ॥ १ ॥

अमुनानृणीकृता वयमन्यवदान्याद्विशिष्टेन ॥ प्रत्युपकारधियायं रचितो ग्रंथस्ततोस्माभि: ॥ २ ॥

१४८ प्रशस्तपादभाष्यव्याख्या–जगदीशः ।

आ.—कणभक्षमुने: पक्षरक्षाविन्यस्तवासनाम् ॥ सूक्तिं श्रीजगदीशस्य चिन्तयन्तु विचक्षणा: ॥ १ ॥

ग्रन्थारम्भे विघ्नविघाताय कृतस्येश्वरप्रणामस्य शिष्याणां शिक्षार्थमादौ निबन्धपूर्वकं प्रवृत्त्यङ्गमभिधेयं दर्शयति प्रशस्तपादाचार्य:—प्रणम्येति ॥

च.—तस्याशुसंचारित्वे हेतुमाह— प्रयत्नेति । क्वचिदात्मन: प्रयत्नेन क्वचिददृष्टेन परिगृहीतत्वादाशुसंचारितेत्यर्थ: ॥ इति द्रव्यभाष्यटीका समाप्ता ॥

१४९ प्रशस्तपादभाष्यापरपर्याय: पदार्थधर्मसंग्रहः ।

आ.—उँ अनादिनिधनं देवं जगत्कारणमीश्वरम् ॥ प्रपद्ये सत्यसंकल्पं नित्यविज्ञानविग्रहम् ॥ १ ॥

ध्यानैकतानमनसो विगतप्रचारा: पश्यन्ति यं कमपि निर्मलमद्वितीयम् ॥

ज्ञानात्मने विघटिताखिलबन्धनाय तस्मै नमो भगवते पुरुषोत्तमाय ॥ २ ॥

ग्रन्थारम्भेभिमतां देवतां शास्त्रस्य प्रणेतारं गुरुं च श्लोकस्य पूर्वार्धेन नमस्यति—प्रणम्येति ॥

च.—तदयुक्तम् आत्माभावे कार्यकारणभावस्यानिश्चयात् कारणविज्ञानकाले कार्यज्ञानमनागतं तत्काले च कारणमतीतम् । नच ताभ्यामन्य: कश्चिदेको द्र — — — — — — — —

१५० न्यायवाचस्पत्यस्य व्याख्या ।

"वात्स्यायनकृतभाष्यस्य वार्तिकाख्या व्याख्या तस्या वाचस्पतिकृता टीका तस्याष्टीकेयम्"

आ.—उँ नम: [न्म:] सरस्वति पुन: पुनरेष नत्वा बद्धाञ्जलि: किमपि विज्ञपयाम्यवेहि ।

वाक्चेतसोर्मम तथा भव सावधाना वाचस्पतेर्वचसि न स्खलतो यथैते ॥ १ ॥

विश्वाराध्य इत्यत्र विश्वपदेन संसारचेतनवर्गो विवक्षित: तस्यैव तदाराधकत्वात्

१५१ आत्मतत्त्वविवेकव्याख्या–गुणानन्दः ।

आ.—नमो दैत्यकुलाक्रान्तभुवो भारं जिहीर्षवे ॥ वृष्णिवंशावतीर्णाय चतुर्व्यूहाय विष्णवे ॥ १ ॥

आत्मतत्त्वविवेकस्य भावोद्भावकमादरात् ॥ विविच्यते प्रयत्नेन गुणानन्देन धीमता ॥ २ ॥

प्रारिप्सितविघ्नापनुत्तये ऽनुष्ठितमोंकारोच्चारणपूर्वकं भगवन्नमस्कारस्वरूपं मङ्गलं निबध्नाति—उँ नम इत्यादि । व्याख्यातमिदमनुमानदीधितिविवेकेऽस्माभि: ॥

१५२ शद्बार्थमञ्जरी-भवानन्दः ।

आ.—नत्वा कृष्णपदद्वन्द्वं कारकाद्यर्थनिर्णयः ॥ श्रीभवानन्दसिद्धान्तवागीशेन वितन्यते ॥ १ ॥
तत्र क्रियानिमित्तत्वं कारकत्वमिति न सामान्यलक्षणम् ॥

च.—इति व्याख्यानं तु शाब्दिकाभिप्रायिकम् ॥ इति शब्दार्थमञ्जर्यां भवानन्दसिद्धान्ततर्कवागीशविरचितं षट्कारकविवेचनं समाप्तम् ॥

१५३ नञ्वादविवेकः-रामकृष्णः ।

आ.—कृत्वा हरिहरचरणे शरणे श्रीरामकृष्णेन ॥ अथ नञ्विचारभावो दीधितिकर्तुः प्रकाश्यते कोपि ॥ १ ॥
नायं घटो नेह घट इत्यादिषु

च.—नञोसामर्थ्यमित्यर्थ इति दिक् ॥
इति श्रीमहामहोपाध्यायभट्टाचार्यचक्रवर्तिश्रीरामकृष्णरचितो नञ्वादविवेकः समाप्तः ॥

१५४ निपातार्थनिर्णयः-हरिकृष्णः ।

आ.—नीहारहारसदृशं विश्वेशं शर्मदायकम् ॥ नत्वा गुरोः पदाम्भोजं निपातार्थो वितन्यते ॥ १ ॥
निपातानां वाचकत्वमुपसर्गाणां द्योतकत्वमिति नैयायिकसिद्धान्तस्थितिः ॥

च.—तस्मादिवादीनां वाचकत्वमेवेति कृतमतिशयविस्तरेण ॥ इति श्रीमत्पण्डितधुरंधरमणिरामात्मजतार्किकचक्रवर्तिचूडामणिकिरणशोभितचरणमहादेवपण्डितान्तेवासिकूर्माचलस्थपन्थोपनामकहरिकृष्णविरचितोपसर्गनिपातद्योतकतावाचकत्वविचारः समाप्तः ॥

१५५ प्रतिवन्धताविचारः-नारायणः ।

आ.—श्रीगणेशाय नमः ॥ समाने विषये लौकिकप्रत्यक्षानुमि-

च.—तादृशचाक्षुषविशिष्टचाक्षुषसामग्र्यभावस्य निवेश्यत्वान्नैतद्युक्तमित्यपरे इति संक्षेपः ॥ इति श्रीनारायणसार्वभौम विरचित सामग्रीप्रतिबन्धकताविचारः संपूर्णः ॥

१५६ मुक्तिरहस्यम् ।

आ.—श्रीगणेशाय नमः ॥ अथ कस्तावदपवर्गः ।

च.—लिङ्गशरीरं चैकादशेन्द्रियाणि पञ्च महाभूतानि सूक्ष्ममात्रया संभूयावस्थितानि जीवात्मनि दुःखावच्छेदकानि इति त्रिदण्डिनः इति मुक्तिरहस्यम् ॥

१५७ रत्नकोशविचारः–हरिरामः ।

आ.–श्रीगणेशाय नमः ॥ परोक्षज्ञानं निश्चयात्मकमेवेति सिद्धान्तः । रत्नकोशकारस्तु सत्प्रतिपक्षसंवलनदशायां संशयात्मकानुमितिमङ्गीकरोति ।

च.– न कथंचिदप्यनुमितेः संशयापत्तिरिति कृतं पल्लवितेन ॥ इति श्रीहरिरामतर्कालंकारविरचितो रत्नकोशविचारः ॥

१५८ विशेषलक्षणम्–व्येङ्कटसूरिः ।

आ.–श्रीगणेशाय नमः ॥ नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ताः एतल्लक्षणं तु

च.–प्रतियोगितावच्छेदकसंबन्धान्तरनिवेशेन च न क्षतिरित्यलं विस्तरेण ।

मारवेल्लयां चयाम्भोधेर्मे [ल्ल्यन्वयाम्भोधेर्भू] रया व्येंकटसूरिणा ॥ प्रकाशितं विशेषाणां लक्षणं विदुषां मुदे ॥ १ ॥

१५९ वादसंचयः ।

तत्र.

१ आत्मत्वजातिविचारः–महादेवः

२ नञ्वादटिप्पणी – रघुदेवः

३ निर्विकल्पकवादः ....

४ त्वङ्मनोयोगहेतुता.................

५ विधिवादः...............................

६ विशिष्टवैशिष्ट्यबोधः – रघुदेवः

७ विषयतावादः – गदाधरः

तत्र.

८ पक्षताविचारः ....

९ प्रतियोगिकारणता ....

१० आख्यातवादटिप्पणी – रघुदेवः

११ नवीनमतविचारः – हरिरामः

१२ बाधबुद्धिप्रतिबंधकता – हरिरामः

१३ सामग्रीप्रतिबंधकता – हरिरामः

१६० वादसुधाकरः–कृष्णाचार्यः ।

आ.–शाब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ इति वात्सल्यवान्विभ्रत्तद्रूपं पातु माधवः ॥ १ ॥

कोलाहलोत्र कुधियां न प्रत्यूहो विवेकिनाम् ॥ कलिदोषो रमानाथदीप्तमीष्टे न वीक्षितम् [तुम्] ॥ २ ॥

आख्यातस्य कृतौ शक्तिर्न तु कर्तरि–

च.–अन्ये त्वाहुः बोधकतारूपा शक्तिरपभ्रंशेष्वपि दुर्वारैवेति ॥

इति श्रीदेवीदत्तात्मजरामसेवकतनूद्भवकृष्णाचार्यकृतो वादसुधाकरः समाप्तः ॥

१६१ कपिलसांख्यसूत्रवृत्तिः-नागोजीभट्टः ।

टी. आ.—नत्वा सांबशिवं सांख्यसूत्रवृत्तिं लिखाम्यहम् ॥ यथामति विचार्यार्यैरात्मानात्मविवेकिनीम् ॥ १ ॥

यद्यपि पद्मपुराणे पार्वतीश्वरसंवादे—

शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम् ॥ येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि ॥ २ ॥
प्रथमं हि मयैवोक्तं शैवं पाशुपतादिकम् ॥ मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि ततः परम् ॥ ३ ॥
कणादेन तु संप्रोक्तं शास्त्रं वैशेषिकं महत् ॥ गौतमेन तथा न्यायं सांख्यं तु कपिलेन वै ॥ ४ ॥
द्विजन्म (ना) जैमिनिना पूर्ववेदप्रकाशकम् ॥ निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम् ॥ ५ ॥
विशेषेण तथा प्रोक्तं चार्वाकमतिगर्हितम् ॥ दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा ॥ ६ ॥
वेदार्थवन्महाशास्त्रं मायावादमवैदिकम् ॥ मयैव कथितं देवि जगतां नाशकारणात् ॥ ७ ॥

इत्युक्तम् । तथापि पापिनां ज्ञानप्रतिबंधार्थमास्तिकदर्शनेष्वपि अंशतः श्रुतिविरुद्धार्थव्यवस्थापनसत्त्वेन तेष्वंशेष्वप्रामाण्यसत्त्वेन तदभिप्रायकत्वेन निदोंष [दोंषा] पत्तिर्बोध्या । यथा न्यायवैशेषिकाभ्यां सुखदुःखादिहेतुभिर्देहादिमात्रविवेकेनात्मानुमापितः प्रथममेव परमसूक्ष्मे प्रवेशासंभवात् तज्जन्यज्ञानमपि देहाद्यात्मतानिरासेन व्यावहारिकं तत्त्वज्ञानमेव देहादिवैराग्यद्वारा परंपरया मोक्षसाधनं च आत्मनि सुखादिमत्त्वमात्मानेकत्वं च श्रुतिशिरोविरुद्धं तत्रोक्तं तत इदमंतरंगं निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः दुःखाज्ञानमया धर्माः प्रकृतेस्ते तु नात्मन इत्याद्युक्तेः । अत्र शास्त्रे चेश्वरप्रतिषेधांशे निंद्यत्वं विवेकांशे तु प्रमाण्यमनिंद्यत्वं व्यावहारिकजीवेतरविवेकज्ञानस्याप्यल्पपरंपरया मोक्षसाधनत्वात् नानापुरुषकथनमप्यत्र व्यावहारिकपुरुषाभिप्रायेणैव । तत्त्वं तु ब्रह्ममीमांसोक्तमेव । सांख्यत्वं चास्य ।
संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ॥ तत्त्वानि च चतुर्विंशत्तेन सांख्याः प्रकीर्तिताः ॥

इत्यादिना भारते उक्तं । संख्यां सम्यग्विवेकेनात्मकथनमित्यर्थः । तदिदं शास्त्रं चतुर्व्यूहं । हेयं १ हानं २ हेयहेतुः ३ हानोपायश्चेति ४ मुमुक्षुजिज्ञासितत्वात् । तत्र त्रिविधं दुःखं हेयं । तदत्यंतनिवृत्तिर्हानं । निवृत्तावात्यंतिकत्वं च पुनर्दुःखजातानामनुत्पत्तिवैशिष्ट्यं । प्रकृतिपुरुषयोरविवेको हेयहेतुः । विवेकस्तु हानोपायः । दुःखशब्देनात्र सुखमपि तत्र फलत्वेन हानं तत्प्रतियोगिविधया हेयं च प्रतिपादयन् कपिलमुनिः शिष्यावधानाय प्रतिजानीते ।
अथ त्रिविधदुःखात्यंतनिवृत्तिरत्यंतपुरुषार्थः ॥ १ ॥

अथशब्दः स्वरूपेण मंगलं । अर्थश्चास्याधिकारः । स चारंभ एव..............

पंचशिखाचार्यैरुक्तं । सत्त्वं नाम प्रसादलाघवाभिष्वंगप्रीतितितिक्षासंतोषादिरूपानंतभेदं समासतः सुखात्मकं । रजःशोकादिनानाभेदं समासतो दुःखात्मकं । तमो निद्रादिनानाभेदं समासतो मोहात्मकमिति..............

वामदेवादिमुक्तौ नाद्वैतं ॥ १५६ ॥ वामदेवादेर्मुक्तत्वेपि इदानींतनैः स्वस्मिन्बंधानुभवात् अतो नाखंडाद्वैतमित्यर्थः ।

च.—अग्न्याख्यशक्त्यावेशादग्निरिति रूपकं तस्यैवेति परे ॥

इति लघुसांख्यवृत्तिः शिवभट्टसुतसतीगर्भजनागोजीभट्टपर्यालोचिता भिक्षुभाष्यसारसंग्रहरूपा समाप्तिमगमत् ॥
इति षष्ठोध्यायः ॥

१६२ पातञ्जलसूत्रवृत्तिः-भाष्यच्छायाख्या-नागोजीभट्टः ।

आ.—नत्वा पतंजलिं देवं योगे वृत्तिं लिखाम्यहम् ॥ छायया व्यासभाष्यस्य तद्गूढार्थप्रकाशिकाम् ॥ १ ॥
ननु एतेन योगः प्रत्युक्त इति व्याससूत्रेणास्य शास्त्रस्य प्रत्याख्यानात्किमेतच्छास्त्रविचारेणेति चेन्न सांख्यज्ञानेन योगमार्गेण वा निश्रेयसमधिगम्यत इति तद्भाष्यमुपादायोपनिषद्बोध्यस्य तत्त्वज्ञानस्य योगापेक्षास्त्येव

च.—पातंजलाब्धौ रचितः सेतुर्विज्ञानभिक्षुणा ॥ महापंगुर्मूढतमो येन तं तीर्णवानहम् ॥ १ ॥
इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतायां पातंजलसूत्रवृत्तौ भाष्यच्छायाख्यायां चतुर्थः कैवल्यपादः ॥ श्रीरस्तु ॥
पातंजलेषु सूत्रेषु वृत्तिर्या लिखिता मया ॥ प्रीयतां तु तया सांबः शिवो मे स पतंजलिः ॥ १ ॥
संवत् १८५७ प्रजापतिनामाब्देआश्विनकृष्णदशम्यां श्रीकाश्यां दुर्गाघट्टे ब्रह्मोपनामकखंडभट्टसूरिसूनुना गोविंदेन लिखितमिदं पठितं च ॥
विश्वेशं माधवं ढुंढिं दंडपाणिं च भैरवम् ॥ वंदे काशीं गुहां गंगां भवानीं मणिकर्णिकाम् ॥ १ ॥

१६३ पातञ्जलसूत्रविवरणम्-मिश्रगोपालः ।

चंडीश्वरं गुरुमनंतगुणं प्रणम्य स्मृत्वा च तातमनघं हृदि ढं [ढुं] ढिराजम् ॥
वंद्यां प्रणम्य जननीं कमलां च पुण्यां सूत्रं पतंजलिकृतं विवृणोमि युक्त्या ॥ १ ॥
यो योगिभिः सकलवृत्तिनिरोधपूर्वमाहूत एव नियतं प्रणवेन नाम्ना ॥
व्यक्तं प्रकाशयति योगमयोगहेतुं श्रेयः करोतु सततं सदयं स देवः ॥ २ ॥
परमकारुणिकः पतंजलिमुनिर्योगशास्त्रमारिप्समाणः शिष्याणामवधानाय निरूपणीयं प्रतिजानीते ॥ अथ योगानुशासनं । अथ शब्दोऽधिकारार्थः अन्यार्थनीयमानोदककुंभवन्मंगलार्थोपि बोध्यः । अथातो धर्मजिज्ञासेत्यादिवन्नानंतर्यार्थः ॥

च.—भाष्यवृत्तिर्न यस्यास्ति तस्य वृत्तिरियं स्थिरा ॥ सूत्रवृत्तिर्यथा पंचतया वृत्तिरुपेक्षिता ॥
सूत्रेणैव तु मालेयं कृत्वा कृष्णपदे धृता ॥ तत्कुर्वंतु स्वयं संतः सौमनस्येन गूहनम् ॥
इति महामहोपाध्यायश्रीमन्मिश्रगोपालविरचिते पातंजलसूत्रविवरणे कैवल्यपादः संपूर्णः ॥

१६४ कल्किपुराणम् ।

आ.—सेन्द्रा देवगणा मुनीश्वरजना लोकाः सपालाः सदा स्वं स्वं कर्मसुसिद्धये प्रतिदिनं भक्त्या भजंत्युत्तमाः ॥
तं विघ्नेशमनंतमच्युतमजं सर्वज्ञसेवाश्रयं वंदे वैदिकतांत्रिकादिविविधैः शास्त्रैः पुरो वंदितम् ॥ १ ॥

च.—वेदे रामायणे चैव पुराणे भारते तथा ॥ आदौ चांते च मध्ये च हरिः सर्वत्र गीयते ॥
सजलजलददेहो वीतवेषादिवाहः करधृतकरमूलः सर्वलोकैकपालः ॥

कलिकुलविनिहंता सत्वधर्मप्रणेता कलयति कुशलं वः कल्किनामा मुरारिः ॥
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये पंचत्रिंशोऽध्यायः ॥

१६५ कृष्णसंहिता ।

आ.—एकदा नारदो योगी परानुग्रहवाञ्छया ॥ पर्य्यटन्विविधाल्लोकान्मिथिलानगरं ययौ ॥
तं दृष्ट्वा सहसोत्थाय बहुलाश्वो नृपेश्वरः ॥ पूजयामास पाद्यार्घ्यैरुपचारैर्विधानतः ॥
च.—कृष्णमंत्रोपासकाय द्विजाय सुकुटुंबिने ॥ ससागरा मही तेन दत्ता नैवात्र संशयः ॥
बहुनोक्तेन किमिह तेन दत्तः स्वयं हरिः । सू० उ० इत्येतत्कृष्णदेवस्य संहितायाः सुपुण्यदम् ॥
माहात्म्यं वर्णितं विप्राः सर्वपापप्रणाशनम् ॥
इति श्रीकृष्णसंहितायां नारदबहुलाश्वसंवादे कृष्णसंहितायां माहात्म्यकथनं नाम — —

१६६ पाराशरं पुराणम् ।

आ.—सौरमंडलमध्यस्थं सर्वसंसारभेषजम् ॥ नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥
मेरुशृंगे समासीनं संसारोदधितारकम् ॥ शुकं प्रणम्य सर्वज्ञं श्रीपराशरमादरात् ॥
च.—प्रधानपुरुषेशाय जगत्सर्गादिहेतवे ॥ या विभाति सदा साक्षिस्वरूपेण स्वभावतः ॥
तां नमाम्यादरेणैव शिवामानंददायिनीम् ॥ अष्टोत्तरसहस्रेण श्लोकेनैव विनिर्मितम् ॥
इत्युपपुराणे पाराशरेऽष्टादशोऽध्यायः ॥

१६७ बृहद्ब्रह्मसंहिता ।

आ.—ज्ञानानंदस्वरूपाय कल्याणगुणराशये ॥ प्रपन्नपारिजाताय सिंधुजापतये नमः ॥
एकदा मंदरद्रोण्यामासीनः कमलासनः ॥ द्वयमावर्त्तयन्मौनी वैष्णवं रूपमुद्वहन् ॥
च.—योतित्यभीभिष्टो[योऽभीष्टो]जगतामभीष्टगतिदो गीतोऽपि नीतो भवत्यग्रे व्यग्रकरःकरींद्रकरुणारावे वि[रावैर्वि]राजं विना ।
आयात्युन्मदभीमराजमथने यः सापरावे जने नत्यैवाभिमुखः प्रयच्छतु रतिं लक्ष्मीधरो वल्लभः ॥
इति श्रीबृहद्ब्रह्मसंहितायां चतुर्थपादे रुद्रगीता समाप्ता ॥ समाप्तश्च चतुर्थः पादः ॥

१६८ भागवतदशमस्कन्धटीका-शुकपक्षी सुदर्शनः ।

आ.—अमरंजयैर्देवानपि जेतुं समर्थैः वत्सपदं कृत्वा गोष्पदतुल्यं कृत्वा यत्प्लवा इति बहुव्रीहिः यच्छब्दो भगवद्विषयः पुरुषकालरूपैः क्षेत्रज्ञकालाख्यरूपैर्विशिष्टस्याक्षेत्रज्ञानां कालावयवानां बाहुल्याद्बहुवचनम् अंतः पुरुषरूपेणामृतं प्रयच्छन् शरीरविनाशहेतुरित्यर्थः मायामनुष्यस्य आश्चर्य्यभूतमनुष्यस्य संकल्परूपज्ञानेन मनुष्यस्य वा प्रच्छन्नमनुष्यस्य वा देहोऽवताररूप इति त्यक्तोदमंबुपानरहितम् पौरुषीं परमपुरुषीं परमपुरुषसंबंधिनीं गां गिरं धराभरं भूभारं

धराज्वर इतिपाठे क्लेशः पुंसः पुरुषस्यावतारात्पूर्वमेवेत्यर्थः कला अंशः अनंतः शेषः अग्रतः काले ॥
इति श्रीशुकपक्षे दशमस्कंधे प्रथमोऽध्यायः ॥ ॥

च.—ग्रंथांतरवैलक्षण्यमाह कालेति इतरत्र राजसादिपुराणेषु संयमात्मशक्ति संयमहेतुभूतात्मशक्ति नवशक्तय इत्युक्ताः उपलब्धिमात्रधाम्ने जातस्य प्रसंगरहितज्ञानात्मकहेतुस्वरूपाय स्वमुखमात्मानुसंधानमुखं तेनानुकूलं चेताः तेन व्युदस्तान्यभावः भगवद्व्यतिरिक्तसंगः अपि समुच्चये यद्वा सुलभसमाधितया साक्षात्कृतस्वरूपो ऽपि भगवल्लीला-भिराकृष्टचित्त इत्यर्थः तत्त्वदीपं तत्त्वप्रकाशं द्वादशे द्वादशोऽध्यायः ॥ इति हरितकुलतिलकवाग्विजयिसूनुना श्रीरंगराजदिव्याज्ञालब्धवेदव्यासापरनामधेये श्रीसुदर्शनसूरिणाभिहिते श्रीमद्भागवतमहापुराणव्याख्याने श्रीशुकपक्षे द्वादशस्कंधः संपूर्णः ॥

१६९ भागवतदशमस्कन्धस्य टीका वैष्णवतोषणी ।

आ.—श्रीमन्मदनगोपालं वृन्दावनपुरंदरम् ॥ श्रीगोविंदं प्रपद्येऽहं दीनानुग्रहकातरम् ॥
वंदे श्रीकृष्णचैतन्यं भगवन्तं कृपार्णवम् ॥ प्रेमभक्तिवितानार्थं गौडेष्ववततार यः ॥
श्रीमाधवपुरीं वंदे यतींद्रं शिष्यसंयुतम् ॥ लोकेष्वंकुरितो येन कृष्णभक्तिसुरांघ्रिपः ॥
श्रीभागवतनिध्यर्था टीकादृष्टिरदायि यैः ॥ श्रीधरस्वामिपादांस्तान्वंदे भक्त्येकरक्षकान् ॥
भट्टाचार्यं सार्वभौमं विद्यावाचस्पतीन् गुरून् ॥ वंदे विद्याभूषणं च गौडदेशविभूषणम् ॥
वंदे श्रीपरमानंदं भट्टाचार्य्यं रसप्रियम् ॥ रामभद्रं तथा (का) शीविलासं चोपदेशकम् ॥
नमामि श्रीमदद्वैताचार्यं श्रीवासपंडितम् ॥ नित्यानंदावधूतं च श्रीमच्चैतन्यवल्लभम् ॥
दामोदरस्वरापादान्वन्दे चैतन्यपार्षदान् ॥ येषां पादरजःस्पर्शादधमोप्युत्तमो भवेत् ॥
वृन्दावनप्रियान्वंदे श्रीगोविंदपदाश्रितान् ॥ श्रीमत्काशीश्वरं लोकनाथं श्रीकृष्णदासकम् ॥
स्वामिपादैर्न यद्व्यक्तं यद्व्यक्तं चास्फुटं क्वचित् ॥ टिप्पणी दशमे तत्र सेयं वैष्णवतोषणी ॥
वैष्णवापरितोषं (षः) स्यात् यत्र यत्र ततस्ततः ॥ तत्र यद्यपि सामान्याकारेणाश्रयलक्षणम् ॥
तथापि कृष्ण एव स्यात्तस्य पर्य्यवसायिता ॥ ब्रह्मणो हि प्रतिष्ठाहमिति तद्गीः सतां मता ॥
आत्मारामाश्च मुनय इत्यादिसचिवा च सा ॥ परिभाषा च तत्र स्यादेते चांशेतिसूतगीः ॥
तदेतद्विवृतं भावि ब्रह्मस्तवमनु स्वयम् । अथात्र परिभाषेयं ज्ञातव्या यद्यपेक्षते ॥
मूलं सटीका [क] मंकाद्यैः परिच्छेद्यं म [स] हानया ॥ त्र्यंका वाक्यांतरा वात्र देयाः पद्यांततो ननु ॥
बहुपद्यैकवाक्यत्वे गर्भांका बिंदुमस्तकाः ॥ यस्मिन्वाक्ये नास्ति टीका तदप्यंकेन योजयेत् ॥
टीका तदंकशून्या वा तदंकांतयुतापि वा ॥ तद्युतत्वं तु पूर्वांकसन्निधौ पृथगाचरेत् ॥
विधिरेवं गौडकारयोर्गुर्जरादौ यथामति ॥ एके पद्यान्यवाक्यत्वे संख्याशब्दास्तु कातकाः ॥
यथार्थकं युग्मकं च त्रिकमित्याद्युदाहृतिरिति ॥

च.—इति— — — —
शाके पट्रसतिमनौ पूर्णेयं टिप्पणी शुभा ॥ संक्षिप्ता युगशून्याग्रपंचैकगणिते तथा ॥

लेख्यं वैष्णवसिद्धांतदाक्षिण्येनैव किंचन ॥ श्रीमद्भागवतस्तुत्यभक्त्येकपुरुषार्थिनाम् ॥
नाभेदवाद इत्येष प्रालेखि क्षम्यतामिदम् ॥ पूर्वपूर्वात्र च व्याख्या पूर्वपक्षतया मिता ॥
सर्वांते या तु विज्ञेया सुसिद्धान्ततया मता ॥ येषां प्रोत्साहनेनास्मि प्रवृत्तोऽत्यंतसाहसे ॥
ते दीनानुग्रहव्यग्राः शरणं मम वैष्णवाः ॥

राधाप्रियप्रेमविशेषपुष्टो गोपालभट्टो रघुनाथदासः ॥ स्यातामुभौ यत्र सकृत्सहायौ को नाम सोर्थो न भवेत्स सिद्धः ॥
श्रीमच्चैतन्यरूपस्य प्रीत्यै गुणवतोखिलम् ॥ भूयादिदं यदादेशबलेनैव विलिख्यते ॥
स्वयं विलिखितं किंचित्किंचिद्योग्यैर्विलेखितम् ॥ छिद्रं यदस्ति तच्चात्र शोध्यं वैष्णवपंडितैः ॥
श्रीचैतन्यकृपाव्यक्तश्रीकृष्णप्रेमलिप्सुभिः ॥ समग्रं ज्ञापितुं शक्या सेयं वैष्णवतोषणी ॥
श्रीमद्भागवतं यद्धि स्वादु स्वादु पदे पदे ॥ तस्य प्रतिपदव्याख्या कार्य्या तत्प्रातिपत्तये ॥
आद्यः पाठोऽत्र गौडीयो द्वितीयोलेखि काशिकः ॥ नानादेशीयमूलाश्रीटीकानामनुवादतः ॥
पुरा महापुराणस्य दश प्रोक्तानि यानि हि ॥ लक्षणान्यखिलस्कंधे तानि संति तरोरिव ॥
तत्र प्राधान्यतः स्कंधे दशमेऽत्र निरूप्यते ॥ आश्रयो भगवान्कृष्णः स्वपूर्णत्वप्रकाशकः ॥

१७० भागवतटीका-पदरत्नावली-विजयध्वजः ।

आ.–यतो जन्माद्यस्य श्रुतिनयनमानैकविषयः स्वतंत्रस्तंत्रज्ञो गुरुरपि गुरोर्यश्च जगताम् ॥
विमूढा यत्तत्त्वं प्रकटमिह वेत्तुं सुमनसो मुकुंदं ध्यायामो निहतकुहकं तं स्वमहसा ॥ १ ॥
त्रिसर्गो यत्रायं लसति चिदचिद्विष्णुविषयो नली मोनानेयं [न लीना नानेयं] विकृतिरिव तेजोजलमृदाम् ॥
विशुद्धं चैतन्यं प्रकृतिविलयं यच्च विततं परं ब्रह्मात्मानं स्मर हृदय सत्यं गुरुतमम् ॥ २ ॥
यदीयकृतिरंजसा सुमनसां सुमानं सतां सती सकलसत्रता सकलवेदवाणीनिधिः ॥
स चित्सुरपयोनिधिः सरसिजेक्षणः श्रीपतिः पराशरशरीरजः शरणमस्तु मे संततम् ॥ ३ ॥
मम वचसि मंगलदेवता प्रणमति सन्निधात्त्वियम् ॥ विलसदुरसव [विलसदुरुरसा] मुरद्विषः कमलवन इवान्वहम् ॥ ४ ॥
जयति जनकः शंभोरंभोजनामसुताग्रणीः– – – – परमविषये सम्यक्प्रेक्षावतां न मृषा क्वचित् ॥ ५ ॥
– – – – – – – – – – – – – – मह्यं महेंद्रयतीश्वरः ॥ ६ ॥
क्व शब्दः क्वाभ्यासं श्रुतिरपि गुरोः क्वाप्रसरणे (:) समीक्षा पौराणी क्व खलु विबुधा मत्सरधियः ॥
तथापि व्यामोहाद्गुरुगुरुकटाक्षैकशरणो मनाक्व्याकुर्वे भागवत (सु) पुराणं प्रगहनम् ॥
आचार्यैरपरैरपि प्रविवृता [ते] मा गाज्जनः खेदतां खद्योतस्तपनप्रकाशितपदे किं तत्र [तन्न] कुर्यादिति ॥
तन्मार्गावगमेन वाक्तनुमनःशुद्धिक्रियायै मनः श्रीमद्भागवतं पुराणमतुलं व्याकर्तुकामयते [कामायते] ॥
तदस्यां पद्यायां झटिति तुटपात्रे मयि कृपां महान्तः कुर्वन्तु – – – – – –
निरस्ता – – – – – – अहो प्रह्वग्रीवाः विपुलक (रु)णाः सर्वसुहृदः ॥
आनंदतीर्थविजयतीर्थौ – – – – – तयोः कृतिं स्फुटमुपजीव्य प्रवच्मि भागवतं पुराणम् ॥

१७१ भागवतदशमस्कन्धटीका-सुबोधिनी-वल्लभाचार्यः पूर्वार्द्धस्य

आ.–नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम् ॥ लीलासहस्रलीलाभिः सेव्यमानं कलानिधिम् ॥ १ ॥

च.–दशमस्कंधविवृतिः पूर्वार्द्धे सुनिरूपिता ॥ कृष्णपादांबुजे न्यस्ता श्रीपुष्पांजलिरुज्वला ॥ १ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कंधविवरणे षट्चत्वारिंशाध्याय-विवरणं समाप्तम् संवत् १८६९

उत्तरार्द्धस्य सैव स एव

आ.–उत्तरार्धे हरेर्लीला स्वतः सर्वात्मना कृता ॥ यदर्थमवतीर्णोऽसौ सा निरूप्या विभागशः ॥ १ ॥

च.–तदीयानां तदर्थार्थं तदेकशरणार्थिना ॥ व्यासवल्लभशिष्येण व्यासरागेन लेखिता ॥

श्रीकृष्णो मम हृदयं प्रविश्य चक्रे — — — देऽमगुणानुवर्णितायाम् । — — — — — — स्कंधेऽस्मिन् दशम इति प्रसन्न कृष्णः ॥ इति — — — — —

१७२ वेणुगीतसुबोधिन्या योजना-बालकृष्णः ।

आ.–अष्टादशेध्याये कारिकासु तद्गुणेषु प्रसक्तता । हीति नन्वत्राष्टादशेऽध्याये गोपीनामासक्तिरित्युक्तम् तत्कथं संभवत्यासक्तेः स्फुटमकथनादित्याशंक्य गुणासक्तिरूपकार्येण भगवदासक्तिरनुमीयते इत्याहुः तद्गुणेषु प्रसक्त्याहीति । हि यतः तस्मिन् भगवति ये आसक्तास्त एव गुणासक्ता भवंत्यतः गुणासक्त्या भगवदासक्तिर्ज्ञाप्यते इति भावः । नन्वासक्ते-रुद्बोधस्तु कोकिलकूजनादिना भवति तत्स्वयं भगवता किमर्थं कृत इत्याशंक्य नात्रोद्बोधमात्रं भगवता कृतमपि तु सर्वापि सामग्री केवलं प्रभुणा कृतेत्यासक्त्युद्बोधोपि हरिणा कृत इत्याहुः ॥

च.–पानीयसूयवसकंदरकंदमूलैरित्यस्य व्याख्याने तत्राप्यवांतरभेदा बहव इति बहुवचनमिति कंदमूलेष्ववांतरभेदानां बाहुल्यात् तेषां सर्वेषामेव भागवते निवेदनात्तेषां संग्रहार्थं कंदमूलपदयोः कंदानि मूलानि चेति बहुवचनेन विग्रहः कार्य इति भावः तथा च नात्र समस्तपदगतकंदमूलैरिति बहुवचनाभिप्राय उक्तः किंतु लौकिकविग्रहे कंदमूल-पदयोर्बहुवचनांतत्वेन विवक्षितार्थसिद्धिरिति बोधितम् । तथा च नानाप्रकारककंदमूलानां समर्पणं हरिदासवर्य्येण क्रियत इति सिद्धम् । इति श्रीमद्गोवर्द्धनधरश्रीवल्लभाचार्यवरश्रीविठ्ठलेश्वरचरणानुचरसेवकेन लालूभट्टोपनामदीक्षित-बालकृष्णेन विरचिताष्टादशाध्यायसुबोधिनीयोजना संपूर्णा ॥

१७३ भागवतगीतावली ।

आ.–प्रथमं नंदोत्सवादि भैरवरागेण

पुत्रमुदारमसूत यशोदा समजनि वल्लभततिरनुमोदा।ध्रु० कोऽप्युपनयाति विविधमुपहारं नृत्यति कोपि जनो वद[बहु]वारम्॥ कोऽपि मधुरमुपगायाति गीतं विकिरति कोऽपि सदधि नवनीतम् ॥

च.–धातुरचितचित्रवीथिरंभसि परिलीना मालाप्यतिशिथिलवृत्तिरजनि भृंगहनिा ॥
श्रीसनातनसुमणिरत्नमंशुभिरपि चंडं भेजे प्रतिबिंबभावदंभी[भा]त्तव गंडम् ॥ इति गीतावली सं०

१७४ क्रोडपत्रराजः-केशवरामः ।

आ.–श्रीदुर्गाशंकरं धीरं श्रीरामस्नेहिनं तथा ॥ मायेश्वरावहं वंदे हेतू विश्वस्य भावनौ ॥
अष्टादशपुराणस्थं श्रीमद्भागवतं तथा ॥ देवीभागवतं चेति विचिकित्सा मनीषिणाम् ॥
आस्तिकः केशवः कोऽपि तत्राह सुधियां मुदे ॥ राद्धान्तं विदुषां बुद्ध्वा जगत्कारणनोदितः ॥
असह्य पित्रोर्जगतोऽन्यतरस्यापि दीनताम् ॥ सोढुमर्हन्तु तत्संतः साहसं मेऽल्पदृङ्मतेः ॥
च.–केशवप्रेरितेनाशु केशवेन कुयोगिना ॥ वारणस्याऽसीति [वाराणस्यामसितीर्थे] गंगापुष्करसंनिधौ ।
मननायात्मनः पुण्यः सेव्यो भागवतैः सदा इति ॥

१७५ भागवतविचारः धरणीधरः ।

आ.–यैर्न श्रुतं भागवतं पुराणं नाराधितो यैः पुरुषः पुराणः ॥ प्राप्तं न तत्त्वं गुरुवक्त्रतो यैस्तेषां वृथा जन्म गतं नराणाम् ॥
च.–कुतस्ताहृशवचनबलेन सात्त्विकोपासनं बाध्येत किंच सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजेत्यनेन तदितरसर्वधर्माणां त्याज्यत्वोपदेशात् येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः॥ तेपि मामेव कौंतेय परं त्वविधिपूर्वकमित्यनेन तादितरवि-धीनामप्रसक्तत्वावगमात् परं त्वविधिपूर्वकमित्युक्तेरप्राशस्त्यमवगम्यमानं दुर्निवारमिति संक्षेपः ॥ इति भागवतविचारो धरणीधरपंथकूर्माचलीयकृतः ॥

१७६ भागवतसिद्धान्तविजयवादः-रामकृष्णभट्टः ।

आ.–श्रीमद्गिरिधराशीश[धीश]पादांबुजरजःकणाः ॥ प्रसीदंतु सदा भक्तस्वांतानंतसुखाब्धयः ॥ १ ॥
च.–श्रीमद्भागवतोत्कर्षो यथार्थोयं निरूपितः ॥ तेन प्रसीदतां श्रीमत्कृष्णः सत्यार्थरक्षकः ॥ इति०

१७७ भार्गवीयं पुराणम् ।

आ.–यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् । विघ्नान्निघ्नंति भजतां विष्वक्सेनं तमाश्रये ॥
श्रीशौनकादयः । सर्वधर्मार्थतत्त्वज्ञ सर्वशास्त्रविशारद ॥ तत्त्वार्थविदुषां श्रेष्ठ सूत द्वैपायनप्रिय ॥
च.–इत्येतदाख्यानमनुत्तमं शुभं योगीश्वराणां महतां मनोहरम्॥भक्त्या नरो यः शृणुयात्पठेद्वा सौभाग्यवान्गच्छति तत्परं पदम्॥
इति श्रीमद्भार्गवे उपपुराणे उत्तरखंडे नरनारायणसंवादे महायोगिमाहात्म्ये चत्वारिंशोऽध्यायः ।

१७८ वाशिष्ठं लैंगपुराणम् ।

आ.–श्रीमत्कैलासमागम्य वशिष्ठो वेदविन्मुनिः ॥ तपश्चचार सत्कर्मनिरतो नियतेंद्रियः ॥
दिव्यं वर्षसहस्रं तु वायुभक्षोऽग्निमध्यगः ॥ श्रीमत्पंचाक्षरं साक्षाच्छतरुद्रि[द्रीय]मध्यगम् ॥

च.—यत्प्रसादेन विज्ञानं यथावज्जायते नृणाम् ॥ तं वंदे षण्मुखं देवं ज्ञानशक्तिधरं परम् ॥
यस्य प्रसादलेशस्य लवलाभबलेन तु ॥ सर्वसिद्धिप्रयत्नेन तं नमामि विनायकम् ॥
इति श्रीउपपुराणे वाशिष्ठलैंगे द्वादशोऽध्यायः ।

१७९ विष्णुपुराणसारसंग्रहः सटीकः-टी० श्रीधरः ।

आ.—पराशरं मुनिवरं कृतपूर्वाह्णिकक्रियम् । मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ॥
त्वत्तो हि वेदाध्ययनमधीतमखिलं गुरो ॥ धर्म्मशास्त्राणि सर्वाणि वेदांगानि यथाक्रमम् ॥
टी.—श्रीबिंदुमाधवं वंदे परमानंदविग्रहम् ॥ वाचं विश्वेश्वरं गंगां पराशरमुखान्मुनीन् ॥
श्रीमच्चिन्मुखयोगिमुख्यरचितव्याख्या निरीक्ष्य स्फुटं तन्मार्गेण सुबोधसंग्रहवतीमात्मप्रकाशाभिधाम् ॥
श्रीमद्विष्णुपुराणसारविवृतिं कर्त्ता यतिः श्रीधरस्वामी सद्गुरुपादपद्ममधुपः साध्वः [साधुः] स्वधीशुद्धये ॥

१८० सांबपुराणम् ।

आ.—नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ॥ त्रयीमयाय त्रिगुणात्मधारिणे विरंचिनारायणशंकरात्मने ॥
च.—भास्करेण हि यत्प्रोक्तं सांबाय लवणांभसि ॥ बृहद्बलाय विश्वासैस्तत्सर्वं कथयामि ते ॥
श्रवणकलितसाम्बो भानुदेवप्रसादाद्भवति विजितकामः कामिनीकेलिपालः ॥
करुणविमलमूर्त्तिर्धूर्तपापप्रचंडो वलितसकलभोगो याति लोकं च विष्णोः ॥
इति श्रीसाम्बपुराणं समाप्तम् ॥

१८१ कर्णसुधा-वा-मधुरिपुचरितम् ।

आ.—शेषे शेषशिरीषमार्दवमुषि श्रीरर्पयित्वा करौ निद्रालोर्नवविद्रुमाधरसुधास्वादानुबद्धस्पृहा ॥
शैथिल्यात्करयोर्वपुर्मुररिपोः संप्राप्य सापत्रपा दोर्भिः स्वैः परिरभ्य कौस्तुभधृता पीताधरा पातु वः ॥ १ ॥
च.—कविशवते [शतविदिते] प्रणमति विरते हरिपदनवसारसे ॥ मधुरिपुचरितं मधुरिमभरितं विलसतु कविमानसे ॥
इति कर्णसुधा ॥ कृतं न सुकृतं — — — —

१८२ गीतगोविन्दं सटीकम्-टीकानाम-रसकदम्बकल्लोलिनी मू० जयदेवः टी०-भगवद्दासः ।

टी. च.—श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य ॥
पराप्सरादिप्रियबन्धुकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ॥ ९२ ॥
प्रफुल्लभगवज्जनं रसकदम्बकल्लोलिनी प्रफुल्लयतु मोहने भजनतानसंवर्धिनी ॥

समस्तपदचातुरीवलितगीतगोविन्दतः प्रशस्तरसदीपिका मधुरपुञ्जमञ्जूषिका ॥ १ ॥
गीतगोविन्दतः षष्ठयन्तं पदं सार्वविभाक्तिकतसिविधानात् । इति श्रीमद्वृन्दावनेश्वरीप्रियकुचरणपङ्केरुहमकरंदास्वाद-नपटुचंचरीकसंभाषणमध्वानन्दोद्दोलचलद्धृदयेन श्रीमद्भगवद्दासेन भगवज्जनपरितोषाय विरचितेयं रसकदम्बकल्लोलिनी श्रीमद्रसवेदिभिर्भगवत्प्रियैरानन्दसंदोहसद्दीपिपरमोज्ज्वलरसावगाहिमनसाहर्निशं विचारणीया ॥
इति श्रीगीतगोविन्दस्य रसकदम्बकल्लोलिनी टीका समाप्ता ॥

१८३ गीतगोविन्दव्याख्या शशिलेखा-कृष्णदत्तः ।

आ.—प्रीतिं वः परमेश्वरः परहितः प्रीतिप्रसन्नः परामाधत्तां घनसारसुन्दरतरश्रीकस्य सा राधिका ॥
गौरी भूषणभूषणीयपदतामन्योन्यशोभार्पणाद्धैमीव प्रतिमासिताश्मजटिता प्राप्नोति यस्याङ्गगा ॥ १ ॥
विशदितशिवपक्षां गीतगोविन्दटीकां रचयति शशिलेखां मैथिलः कृष्णदत्तः ॥
इह न विविधटीकाव्यञ्जितः कृष्णपक्षो विवृत उभयपक्षैकाभिधेयं पदं वा ॥ २ ॥
दोषान्वितापि कुटिलापि विमार्गगापि शुद्ध्यास्पदं शिवपदं कथमप्यवाप्ता ॥
केषां विशेषविदुषामपि मोदमेषामाधास्यति स्फुटपदा भुवि चन्द्रलेखा ॥ ३ ॥
शैवं नाद्रियते सुधीरपि मतं प्रायोधुना वैष्णवः शैवो नैव च वैष्णवं निजनिजासद्वासनावासितः ॥
मत्त्वेत्थं मधुसूदनोपि मुरजित्पक्षे महिम्नः स्तुतिं व्याचख्यौ जयदेवसूक्तिमपि तां शैवे नयाम्यध्वनि ॥ ४ ॥
च.—कृष्णा कालिका तदेकतानो महेशः तस्मिन्नात्मा मनो यस्य शिवभक्तस्येत्यर्थः ॥ ८८ ॥
जिह्वा व्याली मुखबिलतलादुल्लसन्ती दुरुक्तक्ष्वेडं यस्योद्वमति पिशुनस्यार्थनाभिः किमस्य ॥
जिह्वा यस्य प्रथयति गुणानेव वक्त्रेन्दुवासात्पीयूषार्द्रा जगति सुजनस्यार्थनाभिः किमस्य ॥ १ ॥
इति श्रीमैथिलकृष्णदत्तविरचितायां श्रीगीतगोविन्दस्य श्रीशिवपक्षव्याख्यायां द्वादशः सर्गः ॥

१८४ गीतगोविन्दटीका साहित्यरत्नमाला-कमलाकरः ।

आ.—तव करकमलस्थां स्फाटिकीमक्षमालां नखकिरणविभिन्नां दाडिमीबीजबुद्ध्या ॥
अनुकलमनुकर्षन्येन कीरो निषिद्धः स भवतु मम भूत्यै वाणि ते मन्दहासः ॥ १ ॥.........
पदवाक्यप्रमाणेषु प्रतिवादिविभेदनम् ॥ पितरं रङ्गनाथार्यं प्लालाम्बां च नमाम्यहम् ॥ ५ ॥
श्रीगीतगोविन्दसमुद्रजानि सद्भावरत्नानि रसैकसूत्रे ॥ ग्रथ्नाति शेषः कमलाकरोयं परीक्ष्यतां तानि विदग्धराज्या ॥ ६ ॥
च.—यन्नित्यैर्वचनैर्विरिञ्चिगिरिजाप्राणेशमुख्यैर्मुहुर्नानाकारविचारसारचतुरैर्नाद्यापि निश्चीयते ॥
यद्धानैर्जयदेवकाव्यघटितैर्मत्सूक्तिसंशोधितैराद्यं वस्तु चकास्ति चेतसि परं सारस्य सीमाजुषाम् ॥ १ ॥
मतिप्रसूता गहनार्थशास्त्रैः संवर्धिता सूक्तिकुमारिकेयम् ॥
औचित्यतारुण्यभरोल्लसन्ती कान्तं पतिं प्राप्य यशः प्रसूतम् [ते] ॥ २ ॥
इति श्रीशेषकमलाकरविरचितायां गीतगोविन्दव्याख्यायां साहित्यरत्नमालायां द्वादशः सर्गः ॥ समाप्तोयं ग्रन्थः ॥

१८५ गीतगोविन्दटीका रसमञ्जरी-शंकरमिश्रः ।

टी. आ.—श्रीगणेशाय नमः ॥ इह खलु निर्विघ्नप्रारिप्सितसमाप्त्यर्थमेतत्काव्यप्रतिपाद्यराधामाधवकेलिस्मरणरूपं मङ्गलमादावाचरति—मेघैरित्यादि ॥

च.—एकतानोनन्यवृत्तिः । एकाग्रैकायनावपीत्यमरः ॥

एतत्काव्यविवेचनप्रणयिनी य [णयनाद्य] त्संशयोन्मूलनात्पुण्यं यच्च हरिस्मृतेः प्रतिपदव्याख्यासु मे संचितम् ॥ तेन प्रीतमनास्तनोतु सततं श्रेयो मम श्रीपतिः शश्वद्विद्वदशोच्यताप्रतिभवः [भुवः] श्रीशालिनाथस्य च ॥ १ ॥

इति श्रीमहामहोपाध्यायश्रीमद्भवनेश्वरमिश्रात्मजमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां श्रीशालिनाथकारितायां गीतगोविन्दटीकायां रसमञ्जरीनामधेयायां द्वादशः सर्गः ॥

१८६ गोवर्द्धनसप्तशतीसंक्षिप्तव्याख्या-गङ्गारामभट्टः ।

आ.—श्रीमद्गजाननं नत्वा कार्यसिद्धिकृतं [करं] नृणाम् ॥ गोवर्धनकृतार्याणां टीकां कुर्वे यथामति ॥ १ ॥

विघ्नविघाताय कृतं मंगलं शिक्षार्थमुपनिबध्नाति । पाणिग्रह इति ॥

च.—अमलपदमिति सर्वमवदातम् ॥ ५४ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणतारोपनामगंगारामभट्टविरचिता गोवर्द्धनसप्तशतीसंक्षिप्तव्याख्या समाप्ता ॥

१८७ गोविन्दलीलामृतम्–रघुनाथभट्टः ।

आ.—श्रीगोविन्दं व्रजानन्दसंदोहामन्दमन्दिरम् ॥ वन्दे वृन्दावनानन्दं श्रीराधासङ्गनन्दितम् ॥ १ ॥

योऽज्ञानमत्तं भुवनं कृपालुरुल्लाघयन्नप्यकरोत्प्रमत्तम् ॥ स्वप्रेमसंपत्सुधयाऽद्भुतेहं श्रीकृष्णचैतन्यममुं प्रपद्ये ॥ २ ॥

श्रीराधाप्राणबन्धोश्चरणकमलयोः केशशेषाद्यगम्या या साध्या प्रेमसेवा व्रजचरितपरैर्गाढलौल्यैकलभ्या ॥

सा स्यात्प्राप्ता यया तां प्रथयितुमधुना मानसीमस्य सेवां भव्यां रागाध्वपान्थैर्व्रजमनुचरितं नैत्यिकं तस्य नौमि ॥ ३ ॥

कुञ्जं गोष्ठं निशान्ते प्रविशति कुरुते दोहनान्नाशनाद्यां प्रातः सायं च लीलां विहरति सखिभिः संगवे चारयन्गाः ॥

मध्याह्ने चाथ नक्तं विलसति विपिने राधयाद्धापराह्णे गोष्ठं याति प्रदोषे रमयति सुहृदो यः स कृष्णोऽवतान्नः ॥ ४ ॥

संसारामयहार्यपि प्रणयजोन्मादान्ध्यमोहादिकृच्छश्वच्चर्वितमप्यनल्परसदं देहादिहृत्पुष्टिदम् ॥

यत्पीतं श्रुतिवाङ्मनोभिरनिशं तृष्णाप्रदं चाद्भुतं तज्जीयादमृतस्पृहाहरमिदं गोविन्दलीलामृतम् ॥ ५ ॥

च.—श्रीरूपदर्शितदिशा लिखिताष्टकाल्या श्रीराधिकेशकृतकेलिततिर्मयेयम् ॥

सेवास्य योग्यवपुषा निशमन्नचास्या रागाध्वसाधकजनैर्मनसा विधेया ॥ ९४ ॥

पादारविन्दभृङ्गेण श्रीरूपरघुनाथयोः ॥ कृष्णदासेन गोविन्दलीलामृतमिदं चितम् ॥ ९५ ॥

यैरेतत्परिपीयते हृदि लसत्तृष्णातिरेकान्मुहुर्ब्रह्माद्यैरपि दुर्गमं व्रजविधोर्लीलामृतं राधया ॥

वृन्दारण्यविलासिनीकुमुदिनीवृन्दस्य बन्धुर्व्रजे कारुण्यादचिरेण वाञ्छिततमं तेषां तनोतु स्वयम् ॥ ९६ ॥

श्रीचैतन्यपदारविन्दमधुपश्रीरूपसेवाफले दिष्टे श्रीरघुनाथदासकृतिना श्रीजीवसङ्गोद्गते ॥

काव्ये श्रीरघुनाथभट्टवरजे गोविन्दलीलामृते सर्गोयं रजनीविलासवलितः पूर्णस्त्रयोविंशकः ॥ १ ॥

१८८ गौरिशंकरकीर्तिः-अमरकविः ।

आ.—श्रीः सौख्यं कीर्तिरायुः किल भवति नृणां यत्कृपालोकलेशात्

च.—श्रीगौरीशंकरप्रीत्यै कृतो ग्रंथः सुशोभनः ॥ अमरेणेह कविना गौडविप्रवरेण वै ॥ २४ ॥
जयसिंहपुरस्थेन माधवेंद्रादिसेविना ॥ नववेदवसुक्ष्माभिर्मिते संवत्सरे शुभे ॥ २५ ॥.........
२७ इत्यमरकविकृतौ श्रीगौरीशंकरकीर्तिनामकाव्ये एकादशः सर्गः ॥

१८९ दशकुमारशेषः-चक्रपाणिदीक्षितः ।

आ.—भजे भवनिषेवितं भवनमेकमुच्चैः श्रियामपारकरुणामयं परमधामरामाश्रितम् ॥
अनन्तचरणं हृदां परिविभाव्य रामायणं तनोति सुखमक्षयं जगति यस्य पारायणम् ॥ १ ॥
देवीमिडे शांभवीं वाङ्मयीं तां वाच्यातीता शब्दचित्रार्थचित्रा ॥
नव्यानव्या यातिभव्या कवीनामाविर्भूता संमदानादधाति ॥ २ ॥
व्याकुर्वाणेऽशेषशेषप्रबंधानास्येनाहुर्यत्र शेषाद्विशेषम् ॥ कांत्या कीर्त्या प्रज्ञया चंद्रमौलिजातं वंदे दीक्षितं चंद्रमौलिम् ॥ ३ ॥
कुशला मतिः किमीया निर्माणे दशकुमारशेषस्य ॥ अन्तेवासिभिरनिशं प्रेरितबुद्धेर्ममात्र निर्मित्सा ॥ ४ ॥
अथानंदपूर्णमानसोऽमानसोमकांतिः सुश्रुतविश्रुतचरित्रोमित्रोदय

च.—सुखान्यनुभवन्सुचिरमाननंद ॥
इति श्रीदीक्षितचक्रपाणिविरचिते दशकुमारशेषे पंचम उच्छ्वासः ॥ ५ ॥

१९० नलोदयदीपिका-गोविन्दभट्टः ।

आ.—अपारविद्योदधिपारमेतुं सेतुं सुरेन्द्रादिशुभैकहेतुम् ॥ हेरम्बहेतोभि[हेतौ धि]षणाभिलाषं हेरम्बसेवां समुपाश्रयन्तु ॥ १ ॥
प्रायो नलोदयमिदं निपुणैकगम्यं नानारसैकनिलयं यमकातिरम्यम् ॥
व्याख्यां विना न सुखबोधविधाय काव्यं धारः [विधायि काव्यं धीरः] पयस्तरतु कश्चरणेन नाव्यम् ॥ २ ॥
अस्यानवद्यतरपद्यमनोहरस्य व्याख्याकृतेऽहमधिकं प्रयते वरस्य ॥
विश्वस्य मार्गमुपदर्शयतो नरस्य शंभुः स्मृतिं न किमु दर्शयिता नरस्य ॥ ३ ॥
ग्रन्थारम्भे श्रीकृष्णस्मरणरूपमङ्गलमाचरति चतुर्भिः —हृदयेति ॥

च.—ब्राह्मस्यैकगृहं बभूव भगवत्पादारविन्दद्वयोरालम्बेत्रिकुले सुभाषितयु (जु) षां मान्यः स पीताम्बरः ॥
तस्मा—व्यतिभानि भव्यभवताचानुर्यनव्यस्फुर— — — — — — — — — द्बुद्धिरनल्पतपसां श्रीनागनाथाभिधः ॥ १ ॥
— — — — — — — — — प्रथितबहुविद्यापरिचयो महादेवो देवत्रिपुररिपुमाराध्य विधिवत् ॥
फलं लेभे लीलाविलसितकवित्वौ तनुजनी तयोर्गोविन्दाख्यो व्यरचयदिमां श्रेष्ठपदभाक् ॥ २ ॥
इति श्रीगोविन्दभट्टविरचितायां कालिदासविरचितनलोदयदीपिकायां चतुर्थ आश्वासः ॥

१९१ फाल्गुनशतकम्-रामचंद्राज्ञो वैद्यः ।

आ.—नमामि लिंगं भगमध्यदेशे विराजमानं मुसलप्रमाणम् ॥ आंदोलितं यस्य सहस्रवारं यातं पुनर्यश्च भगस्य पारम् ॥ १ ॥
जंघाद्वयाभ्यंतरमध्यदेशे विराजमानं भगमप्रमाणम् ॥ उलूखलाकारगभीरदेशं सर्वंसहातुल्यमभूरिकेशम् ॥ २ ॥

च.—ये शृण्वंति पठंति वैद्यरचितं श्रीरामचंद्राज्ञया न्यायाकारविचारचारुकरणैः कामप्रदं नित्यशः ॥
सर्वानंदकरं मनोहरतरं गद्यैः सुपद्यैस्तथा शृंगारस्य रसेन पूरिततरैस्ते चाप्नुवंति श्रियम् ॥ १०४ ॥
इति श्रीवैद्यविरचितं फाल्गुनशतकं संपूर्णम् ॥

१९२ भगवत्प्रसादचरितम्-दामोदरः ।

आ.—श्रीकृष्णनाथ करुणाकर दीनबन्धो भ्रातः पितः प्रसु विधेहि दयामुपेहि ॥
श्रुत्वेति कौरवसभागतयाज्ञसेनीशब्दं क्षणागतमशेषपतिं भजामः ॥ १ ॥..........
इति सकलमुदन्तं भूपकल्याणरूपं विविधनृपतिदूताः स्वामिनश्चानुहस्तैः ॥
झटिति समभिनिन्युः सोपि कर्तव्यमानी गजरथहयसंघैर्नागसाख्यं प्रतस्थे ॥ ५४ ॥
यन्माता यमुनाधरीकृतसतीव्राता चरित्रैः पिता सत्कीर्तिर्द्विजदेवपूजनपरः श्रीविश्वनाथस्तथा ॥
तेन श्रीनरसिंहचिन्तनफले दामोदरेणोदिते काव्ये श्रीभगवत्प्रसादचरिते सर्गोयमादिर्गतः ॥ १ ॥..........“
द्वितीयसर्गश्लोकाः ७२ तृ० ९९ च० ८१ पं० ५२ ष० ५२ स० ११७ अ० ४६ न० १०६ द० ८२
इति श्रीचतुरुदधिपरिखामण्डलमण्डितभूमण्डलमण्डनविद्वन्मुकुटमाणिक्यकविवरश्रीदवडघायोपनाम्नो दादाजीविश्वनाथ—(सुतदामोदर) स्य कृतौ श्रीभगवत्प्रसादचरिते महाकाव्ये कल्याणाङ्के दशमः सर्गः ॥ ए० ११३ द्वा० १०५ त्र० ८२ च० ४४ पं० ४४ षो० ३९ स० ४९ अ० ४० एकोन० ६९”

च.—ते तीर्त्वेति दुरोदराब्धिमटवीवासादिकं बाहुभिः क्रूरग्राहगतैरनच्छमतलस्पर्शं परं भेजिरे ॥
कल्याणं विनिपात्य शत्रुनिचयं शस्त्रैः स्वराज्यं तदा किं वा श्रीभगवत्प्रसादचरिते सिद्धेनवाप्यं नृणाम् ॥ ९३ ॥
यन्माता— — — काव्ये श्रीभगवत्प्रसादचरिते सर्गस्तु विंशो गतः ॥ २० ॥

१९३ मनोवलंबिका-मुकुंददासः ।

आ.—श्रीरूपवाणीमाधुर्यवृंदा [श्रीरूप हे श्री] वृंदा वनांतरे..........

च.—श्रीरूहे श्री रघुनाथदास श्रीकर्णपूराभिध कृष्णदास ॥ युष्मन्मुखांभोजविनिःसृतानि पद्यानि मे हृद्यनिश स्फुरंतु ॥
युष्मत्पदांभोजरजोनुवर्तिना मुकुंददासेन मनोवलंबिका ॥ गोविंदलीलामृतदर्शितक्रमात्पद्यानि संगृह्य मया विनिर्मिता ॥
इति मनोवलंबिकायां निशीथविलासो नामोऽष्टमो विषयः ॥

१९४ मृगाङ्कशतकम्-कंकणः ।

आ.—जेतुं त्रिभुवनमखिलं स्फटिकगणेशं तुषारकराबिम्बम् ॥ बिल्वदलैरर्चितवांस्तादिह कलङ्कं विशङ्कन्ते ॥ १ ॥

च.—विधुदधितण्डुलपिण्डं लाञ्छनवदलं विविर्वहाति ॥ अहह चिरादिह सूते कमपि कुमारं स्मरं रजनी ॥ १ ॥

इति कविकङ्कणभणितं शतकं तनुतां मृगाङ्कस्य ॥ रुचिमचिरादिव ककुभामुदयो मृगाङ्कस्य ॥
इति श्रीकविकङ्कणभणितं मृगाङ्कशतकं समाप्तम् ॥

१९५ मेघदूतटीका बालप्रबोधिनी-स्थिरदेवः ।

आ.—कल्याणपूर्णैः करुणाकटाक्षैः काशीपुरे कामपि कामवल्लीम् ॥ सीमानमुच्चैः सुतवत्सलानां समाद्रिये मातरमद्रिकन्याम् ॥१॥
काशीविश्वेशचरणौ प्रणम्याभीष्टसिद्धये ॥ क्रियते मेघदूतस्य टीका बालप्रबोधिनी ॥
तत्रादौ चिकीर्षितस्य काव्यस्य
च.—उद्भासिताखिलपदानिह [पदामिह] मेघदूतकाव्ये प्रबुद्धरसबन्धुरभावभाजि ॥
सञ्जीभवद्गुणकथां स्थिरदेवनामा टीकामिमामकृत कीर्तिमिव प्रसन्नाम् ॥ १ ॥
इति श्रीसरस्वतीशृङ्गारहारोपाख्याने महाकाव्ये कविराजकालिदासकृतौ स्थिरदेवकृतिरियं टीका संपूर्णा ॥

१९६ युधिष्ठिरविजयकाव्यटीका पदबोधिनी-रघुरामः ।

आ.—जयति सिद्धिकरः कमलापतिः सकललोकहिताय धुरंधरः ॥
नम तमेव मनः प्रथमं प्रभुं यदि तवास्ति पिपावयिषा [यियावयिषा] त्मनि ॥ १ ॥
नत्वा शिवं गणेशं च वाग्देवीं च गुरूनपि ॥ क्रियते रघुरामेण बालार्थं पदबोधिनी ॥

१९७ लक्ष्मीसरस्वतीविवादः-रामानन्दः ।

आ.—ब्रह्मेन्द्रोपेन्द्रमुख्यत्रिदशपरिवृढश्रेणिभास्वत्सुधर्मा सिन्धोरावर्तसान्द्रध्वनिरिव विलसद्गद्यपद्यप्रवाहः ॥
नानालंकारछन्दोगुणगरिमगुणग्रामविश्रामबन्धुः श्रीभारत्योर्विवादः कलयतु सततं शर्म निर्मत्सराणाम् ॥ १ ॥
च.—अब्दे खश्रुतिसागरेन्दु (१७४०) कलिते पक्षे वलक्षेतरे सन्मास्याश्विनके हरेः शुभतिथौ श्रीमद्गुरोर्वासरे ॥
श्रीवाण्योरिह तीर्थराजनगरे सद्वादमत्यद्भुतं रामानन्दसुधीश्चकार विदुषां निर्मत्सराणां मुदे ॥
एतस्मिन्मम गद्यपद्यरचनामाधुर्यमोदप्रदे श्रीवाण्योरितरेतरोक्तिगहने वादे मदीयं बुधाः ॥
स्यादेवानवधानतः खलु यथा स्वेनाध्वना गच्छतां तद्वन्मे स्खलनं तदत्र कतिभिः क्षन्तव्यमित्यञ्जलिः ॥
इति श्रीमत्सरयूपारीणपण्डितधुरीणमहाकुलीनश्रीमत्त्रिपाठिमधुकरसत्संतानात्त्रिपाठिरामानन्दशर्मविनिर्मितो लक्ष्मीसरस्वत्योर्विवादः समाप्तः ॥

१९८ वखतेशरहस्यकाव्यम्-माणिक्यमैथिलः ।

आ.—स जयति वखतेशभूमिपालो हरिरिव संप्रति पुंडरीकनेत्रः ।
च.—संप्रति राजते ॥ ३७ ॥ इति श्रीमाणिक्यमैथिलकृते श्रीवखतेशरहस्ये गृहागमनं नाम सप्तमः सर्गः ॥

१९९ वाराणसीदर्पणः-सुन्दरः ।

आ.—नत्वा श्रीगुरुपादपद्मयुगलं स्मृत्वा परं श्यामलं

च.—श्रीमद्राघवसूनुसुंदरकृते वाराणसीदर्पणे श्रीमच्छंकरशंकरीपदयुगप्रत्यक्षभावोदधौ ॥

श्रीमद्रुद्रसुसंख्ययाभिगणितः कालेशकंठच्छविर्विश्वेशोत्तमनाम सर्वचरमः काव्ये प्रसादः शिवः ॥ २६ ॥

विश्वेशोत्तममूर्त्तिदेविमहिता[तं] दिव्यैरहोभिर्मुदा सत्यं श्रीरसविश्वनाथगणिते चाब्दे गुरौ वासरे ॥

आषाढोत्तममासशुद्धसरसे पक्षे तिथिः पंचमी तस्यां राघवसूनुना कृतमिदं वाराणसीदर्पणम् ॥

२०० विनयसिंहकीर्त्तिरथः-गार्गादीनः ।

आ.—सदरविंदरविं शशिभूषणं गुरुनिदेशबुधं कृतमंगलम् ॥ कविरमंदमुदे प्रतिवासरं द्रुतविलंबितविश्वसृजं भजे ॥ १ ॥

च.—जनयतु चेतसि संमदं कवीनाम् ॥ ३१ ॥

इति श्रीगार्गादीनविरचिते श्रीरावराजविनयसिंहकीर्त्तिरथे काव्ये पंचमः सर्गः ॥

२०१ व्रजविलासस्तवः ।

आ.—प्रतिष्ठारज्जुभिर्बद्धं कामाद्यैर्वर्त्मघातिभिः ॥ छित्वा ताः संहरंतस्तानघोरैः पांतु मां भटाः ॥ १ ॥

च.—मुहुः कुतुकसंभृताः परिपठंति ये वल्गु तत्समं परिकैर्द्दृढं मिथुनमत्र पश्यन्ति ते १०७

इति श्रीव्रजविलासस्तवः समाप्तः

२०२ शंभुमतिविलासः-शंभुमिश्रः ।

आ.—कश्चिद्द्विजो भरतवर्षमिमं भ्रमित्वा

च.—संवत्सरैकनिगमेभशशांकसंख्ये शाकेब्धिचंद्रहयभूमियुते च ज्येष्ठे ॥

कृष्णां रवावमृतभूवनसंनिकर्षे काव्यं हयास्यकृपया परिपूर्त्तिमागात् ॥ १०६ ॥

इति श्रीमन्नारायणचरणनलिनद्विरेफश्रीनिवासाचार्यशिष्यमिश्रशंभुविरचिते शंभुमतिविलासाख्ये महाकाव्ये चार्वाकादिनिराकरणविप्रमथुराप्रवेशादिवर्णनं नाम चतुर्थः सर्गः ॥ ४ ॥

२०३ शालिवाहनसप्तशत्याष्टीका-गोविन्दशर्मा ।

आ.—आसीन्मनस्वी पलिचोभवंशे वागीश्वरः श्रोत्रियमंडलीनाम् ॥

मान्यस्त वृजो [नूजो] भवदस्य धन्यो गोविंदशर्मा बहुपुण्यकर्मा ॥ १ ॥

इतोभवदयं महीवलयकामदेवः श्रियां मनोहरमहोदयो निखिलदानदेवद्रुमः ॥

करोति च चतुर्थिकां मुनिशतीयटीकामिमां नियुज्य हरिता (त) जं विविधविद्यपीतांबरम् ॥

२०४ संगीतरघुनन्दनं सटीकम्-विश्वनाथसिंहः ।

टी. आ.—वन्दे तत्पदकमलं यस्य मरन्दः पुनाति जगदखिलम् ॥ उपलं परागलेशश्चेतनतां शीघ्रमानयति ॥ १ ॥
राजेन्द्रनन्दनविलोचनचञ्चरीकसंसेव्यमानवदनाम्बुरुहां सखीभिः ॥
स्वीयप्रभाजितरमा [मां] रुचिभिः परीतां रासेश्वरीं हृदि भजे निमिराजपुत्रीम् ॥ २ ॥.........
सीतारामरहस्यं मां बोधयन्ति हृदम्बुजे ॥ स्थितास्तान्हरिरूपाञ्छ्रीप्रियादासगुरून्भजे ॥ ६ ॥
नत्वा गौरीशपादाब्जं टीका व्यङ्ग्यार्थचन्द्रिका ॥ श्रीरामरसरसिकविनोदाय विधीयते ॥ ७ ॥

मू. आ.—रामप्रेमपयोधिवर्धनविधुः शृङ्गाररसारास्पदं संसारार्णवदासतारणतरिर्मायातमोदीपिका ॥
विद्युद्दासुखवृन्दवर्षणकरी कादम्बिनी काप्यसौ मद्धृत्कंजनिवासिनी विजयतां श्रीजानकी सर्वदा ॥ १ ॥.........
विन्ध्ये रिपुगजसिंहो जयसिंहो राजसिंहोस्ति ॥ तनुते तस्य तनूजो ग्रन्थं संगीतरघुनन्दनाख्यम् ॥ ८ ॥

२०५ सभ्याभरणम् सटीकम्-भट्टरामचन्द्रः ।

आ.—स्मरामो रामचंद्रस्य पदपंकजमंजसा ॥ यद्रजोरंजिता लेभे शिलापि गिरमुज्वलाम् ॥ १ ॥
यत्कपालवलीलाया सखी वाग्देवता स्वयम् ॥ तस्मै श्रीविश्वनाथाय ताताय गुरवे नमः ॥ २ ॥
आख्यातुमिव यः स्वस्माचतुर्दशजगज्जनिम् ॥ तावंति मुनये सूत्राण्युक्तवांस्तं नुमः शिवम् ॥ ३ ॥
प्रथमं विदिताम्नायः संज्ञारूपाण्यनेकधा ॥ व्यधत्त वेधा इव यस्तस्मै पाणिनये नमः ॥ ४ ॥
यः पाणिनीयार्थमणीनुक्तचिंतादिघर्षणैः ॥ संस्कृतानर्थिसाचक्रे तं वार्त्तिककृतं भजे ॥ ५ ॥
कृपयाऽकृत सुकृतिं यः स्वादिवदर्थेत्रयव्यक्तिम् ॥ भुजगपतेरवतारं प्रणतोस्मि पतंजलिं तमहम् ॥ ६ ॥
पाणिनीयार्थकनकैः कलितश्लेषमौक्तिकैः ॥ तन्यते रामचंद्रेण सभ्याभरणमुत्तमम् ॥ ७ ॥
काव्यस्य गुणदोषौ तु नात्र शंक्यौ बुधा यतः ॥ सूक्तिव्याजेन शास्त्रार्थस्मृतयेऽयमुपक्रमः ॥ ८ ॥
रक्षोहानिमिषाविष्कृतकृतधर्मस्थितिर्जगति ॥ व्याकरणागमरहितोऽवतार इव सप्तमो जयति ॥ ९ ॥

च.—अष्टाध्याय्यंतिमं सूत्रं तद्विचारणाय स्वरूपं प्राप्यते तथा वस्तुतो ब्रह्मैवसन्ननिर्वाच्यानाद्यविद्याविलासेन जीवतां गतः कोविदः पंडितो मनो यदि संवृतं विषयाभिलाषशून्यं जातं तदा तत्त्वमसीत्यादिवेदांतवाक्यविचारणाय पुनः स्वरूपमखंडानंदमधिगम्य निर्वृतो वीतशोकः को न स्यादित्यर्थः ॥ ४ ॥ इति श्री(क)मलाकरभट्टविश्वनाथसूनुभट्टरामचंद्रकृते सभ्याभरणे रामचंद्रपंडितकृततट्टीकायां च प्रकीर्णकनामा नवम उल्लासः ॥ स० ॥

२०६ हरचरितचिन्तामणिः-राजानकजयरथः ।

आ.—दृप्यद्वेदभुजंगदूषितहरिब्रह्मादि......कृत्यस्वात्मनि पावके मम परा दृष्टिः स्फुरत्वैश्वरी ॥ १ ॥
च.—वनाश्रयणमात्रेण जन्म विच्छिद्यते यदि ॥ तर्हि लोकैः प्रशंस्यन्ते ग्रामपक्षिमृगादयः ॥

२०७ हंसदूतं सटीकम्-मू० टी० श्रीरूपगोस्वामी ।

मू. आ.—दुकूलं बिभ्राणो दलितहरितालद्युतिहरं जपापुष्पश्रेणीरुचिरुचिरपादाम्बुजतलः ॥
तमालश्यामाङ्गो दरहसितलीलाञ्चितमुखः परानन्दाभोगः स्फुरतु हृदि मे कोपि पुरुषः ॥ १ ॥

टी. आ.—दलितः खण्डितो हरितालस्य द्युतिभरः कान्त्यतिशयो येन ।

च. मू.—रसानामाधारैरपरिचितदोषः सुहृदयैर्मुरारातिक्रीडावलिनिविडरूपार्पितगुणाः ॥
प्रबन्धोयं बन्धोरखिलजगतां तस्य सहसा प्रभोरन्तः सान्द्रां प्रमद— — — —पल्लवयितुम् ॥ १४२ ॥
इति श्रीमद्रूपगोस्वामिना विरचितं हंसदूताख्यं महाकाव्यं समाप्तम् ॥

२०८ हरिविलासकाव्यम्-लोलिम्बराजः ।

आ.—रचयति सहसा यच्चित्रमेतं प्रपञ्चं प्रशमयति च तद्वत्केनचित्कौतुकेन ॥
अविदितमपरैस्तच्चण्डमुण्डादिनानादनुजदलनदक्षं शर्वसर्वस्वमव्यात् ॥ १ ॥

च.—नानागुणैरवनिमण्डलमण्डनस्य श्रीसूर्यसूनुहरिभूमिभुजो नियोगात् ॥
त्रैलोक्यकौतुककरं क्रियते स्म काव्यं लोलिम्बराजकविना कविनायकेन ॥ ५६ ॥
इति श्रीमत्सूर्यपण्डितकुलालंकारश्रीहरिहरमहाराजाधिराजोद्द्योतितलोलिम्बराजविरचिते हरिविलासे महाकाव्ये कंसवधोनाम पञ्चमः सर्गः ॥

२०९ आनन्दवृन्दावनचम्पूः सटीका मू० टी० कर्णपूरकविः ।

टी. आ.—वत्सास्वाद्य मुहुः स्वया रसनया प्रापय्य सत्काव्यतां देयं भक्तजनेषु भाविषु सुरैर्दुष्प्राप्यमेतत्त्वया ॥
इत्याज्ञापयतेव येन निदधे श्रीकर्णपूरानने बाल्ये स्वांघ्रिदलामृतं गतिरसौ चैतन्यचंद्रोस्तु नः ॥
नितांतनैसर्गिककृष्णसारलीलाढ्यमुच्चैः पदमात्मनीनम् ॥ श्रीरूपसंमत्यनुकूलमेव पर्वैः श्रितं संश्रयते सुमेधाः ॥
नंदोत्सवादिरासांतां होलादोलादिकाधिकाम् ॥ श्रीकृष्णलीलां जग्रंथ कर्णपूरो महाकविः ॥
एकेन स्तबकेनाहं वृंदारण्यं तदास्पदम् ॥ बाल्यलीलां ततः षड्भिः प्रादुर्भावमुखां हरेः ॥
ततस्तु पंचदशभिर्लीलां कैशोरवर्त्तिनीम् ॥ एवं द्व्यधिकया चम्पूर्विंशत्या स्तबकैः कृता ॥
अथ सोयं कविमुकुटमणिरास्वादितचरणसौरस्यं पुनरपि मनोमधुपराजेनोपभुज्यमानापूर्वं नवनवमाधुर्यसंपत्तिश्रीभगवच्चरणकमलमानंदाविशेन वंदमान एव तन्निदेशपरममंगलसुधापरंपरयानिर्णीयमाने प्रत्यूहतापानुद्गमगमकेपि प्रबंधे सदाचारसंमाननार्थमवश्यं कर्तव्यं मंगलाचरणमप्यनुसंजयाति ॥ वंदे इति

मू. आ.—वंदे कृष्णपदारविंदयुगलं यस्मिन्कुरंगीदृशां

मू. च.—चैतन्यकृष्णकरुणोदितवाग्विभूतिस्तन्मात्रजीवनधनस्य जनस्य पुत्रः ॥
श्रीनाथपादकमलस्मृतिशुद्धबुद्धिश्चंपमिमां रचितवान्कविकर्णपूरः ॥ ६१ ॥
इत्यानंदवृंदावने कैशोरलीलालताविस्तारे दोलोत्सवो नाम द्वाविंशतिः स्तबकः ॥ समाप्तश्चायमानंदवृंदावनाभिधोग्रंथः॥

टी. च.—तन्मात्रजीवनधनस्य श्रीशिवानंदसेनस्य ॥ ६१ ॥ इत्यानंदवृंदावनटीकायां सुखवर्तिन्यां द्वाविंशतिः स्तबकसंगमनम् ।
संतः संत शतमे [संतः संतु शतंसमा] हितहितप्रारंभसंभाविताः सर्वेषामपि किं पुनर्मम नमच्छीर्ष्णः स्वधृष्णाग्धियः ।
तेनैषां क्षणमीक्षणक्षणमियं टीका न किं लप्स्यते शुद्धिं बुद्धिमतां मतामथ ततः प्राथैव राजिष्यते ॥

२१० कृष्णलीलाशृङ्गारः-वैद्यनाथः ।

आ.—विविधभूमिकया विबुधोत्सवं समतनोद्य इहाद्भुतलीलया॥ कलितपीतपटः कुतुकी नटः स सुखमातनुतां भवतां हरिः ॥१॥
च.—आतन्वाना प्रमोदं सहृदयहृदये सा समुल्लासहेतुः ॥ इति निष्क्रान्ताः सर्वे चतुर्थोंकः ॥ ४ ॥ संपूर्णा चेयम् ॥
तत्सदुपाख्यवैद्यनाथकृता श्रीकृष्णालीलानाम शृंगारनाटकम् ॥

२११ मुक्ताचरितनाटकम्-कृष्णकविः ।

आ.—कंदर्पकोटिरम्याय स्फुरदिंदीवरत्विषे ॥ जगन्मोहनलीलाय नमो गोपेंद्रसूनवे ॥ १ ॥
च.—आददानस्तृणं दंतैरिदं याचे पुनः पुनः ॥ श्रीमद्रूपपदांभोजधूलिर्भूयां भवे भवे ॥
यस्याज्ञा सुधया प्रबोधितधिया मुक्ताचरित्रैर्मया गुछ [च्छैः] पुष्पभरैर्व्यधायि य इह श्रीरूपसंशिक्षया ॥
जीवाख्यस्य मदेकजीविततनोस्तस्यैव हृक्षट्पदीघ्राणैस्तं परिभूषितं तु तनुतां तत्केलिशीधूत्कधीः ॥
मुक्ताचरितपुष्पौघैर्गुच्छं गुंफितमद्भुतम् ॥ वसंतयतु सत्स्नेहाच्छ्रीमद्रूपगणो रहः ॥
यस्य संगलवतोद्भुता मया मौक्तिकोत्तमकथा प्रचारिता ॥ तस्य कृष्णकविभूपतेर्व्रजे संगतिर्भवतु मे भवे भवे ॥
इति मक्ताचरितं समाप्तम् ॥

२१२ राधामाधवनाटकम् ।

आ.—राकाकैरवबंधुबंधुरमुखो बन्धूकवर्णाद्दर—
च.—सतृष्णः श्रीकृष्णो विषयमृगतृष्णां हरतु वः ॥
इति श्रीराधामाधवनामधेयनाटके सानन्दगोविन्दो नाम सप्तमोंकः ॥ समाप्तश्चायं ग्रन्थसंदर्भः ।

२१३ रामाभ्युदयनाटकम्-रामदेवः ।

आ.—विश्वोल्लासिनिशाविसारितिमिरं दूरं निरस्यादरात्— — — — — —
तदद्य देव श्रीत्रिपुरुषायतनमनुकौमुदीमहोत्सवमिलितं यात्रिकजनमभिनवरूपकाभिनयेन विनोदयितुमिच्छामि ॥
परिक्रम्य नेपथ्याभिमुखमवलोक्य आर्ये इतस्तावत् ॥ प्रवश्य । नटी० ॥
एसह्मि आणवेदु अज्ज्हो को णिओओ अणुचिठ्ठिअदु त्ति ॥
सूत्र० आर्ये विदितमेव तावद्भवत्या ।
अस्ति ध्वस्तसमस्तवैरिविपिनप्रोद्यत्प्रतापानलज्वालालीविमलीकतत्रिभुवनः श्रीरामदेवात्मजः ।
आयुष्मानवनीवनीपकमनःसंकल्पकल्पद्रुमो मेरुः स्मेरयशःप्रसूनपटलप्रोल्लासितोर्वीतलः ॥ ३ ॥
अपि च । रणक्षोणीरंगप्रसृमरविपक्षक्षितिभुजो भुजादंडोदंचत्तरसमरकंडूभरहरः ॥
शरद्राकाकारमणकिरणालीश्रुचि [कारैर्मणिकिरणजालैःसुचि] लसद्यशः श्रीः श्रीमेरुः कथमिव हि वर्ण्यः कविजनैः॥४॥
तेन च प्रबलरिपुकुलजलधिसंशोषणागस्त्येन त्रिविधवीरचूडामणिना महाराजश्रीमेरुदेवेन समादिष्टोस्मि ॥

यथा सरसकविना व्यासश्रीरामदेवेन विरचितमभिनवं रामाभ्युदयं नाम छायानाटकमभिनीयमानं निरूपमानं निरूपयितुमिच्छामः ।

च.—विलसतु विमलः कोपि वाचां विलासः ॥ ३०

इति परिक्रम्य निष्क्रांताः सर्वे ॥ द्वितीयोंकः समाप्तः ॥

२१४ हृदयविनोदाख्यं प्रहसनम्-कविपण्डितः ।

आ.—उद्वेलवारिनिधिमध्यनिमग्नपृथ्वीनिष्कर्षणप्रकटिताद्भुतविक्रमोपि ॥

उन्मानपीठहरणादनुभूतखेदः शर्मानिशं दिशतु मुग्धकुमारमूर्त्तिः ॥ १ ॥

नांद्यंते सूत्रधारः..........

जमदग्निपंक्तिरथशौरिबुदेलप्रभवेषु राम इति नाम समानम् ।

प्रथितास्त्रयोपि जयनीतिबलैस्त्रिभिरेव चान्य इति कश्चन भेदः ॥ ८ ॥

नटी-अज्जउत्त को तस्स राअसूणो गुणरासिणो संकलेदुं सकुणोदि यस्स रामसाही रामसाहित्ति सद्दो दंडाहदक-साणसद्द व्व चिरं णज्जावि विरमदि ।

सूत्र० प्रसह्य संग्रामयतो विविक्षन्संग्रामसाहीति पदेन रूढः ॥ तस्यात्मजः पांडुतनूजकाव्यः (कल्पः) संग्रामनिःशंकमना बभूव ॥ नटी० तदो तदो ॥

सूत्र० पुनरभूद्भारतसिंह इति राजसिंहः

च—नोदुग्रैः कलिकालदोषनिकरैर्विश्वं पराभूयतां काम्यं कर्मफलोदयाय विदुषामस्त्वैहिकामुष्मिकम् ॥

राजानः परिपालयंतु वसुधां काव्येषु सत्प्रीतयः साधूनां प्रणिधानमेतु हृदयं साक्षात्परब्रह्मणि ॥

इति निष्क्रान्ताः सर्वे ॥ द्वितीयोंकः ॥

द्व्यंक्यं प्रहसनमेतद्रचितं कविपंडितेन सत्कविना ॥ आषाढकृष्णपक्षे नवम्यां कुजयतायाम् ॥

इति श्रीहृदयविनोदनाख्यं प्रहसनं समाप्तिमगमत् ॥

२१५ अलंकारकुलप्रदीपः-विश्वनाथः ।

आ.—ॐनमः सकलगोपवधूनां स्वात्मनि प्रवणितप्रणयाय ॥ घर्मवासरगमावसरोद्यद्वारिवाहरुचिराय (चिराय) ॥ १ ॥

विधाय वाचस्पतये धराया लक्ष्मीवरायाभिमतं प्रणामम् ॥ विश्वेश्वरोर्थे विशदं वितन्वन्करोत्यलंकारकुलप्रदीपम् ॥२॥

च.—पुरातनानप्यधुनातनांश्च महानिबंधानवधार्य सम्यक् ॥ अयं कृतोऽलंकरणप्रदीपो विद्व(त्स)मानैर्बहुमाननीयः ॥

श्रीमन्महीमहिततत्तदसीमधर्मिन्मूर्धन्यताकलनसंगतधन्यताकः ॥

लक्ष्मीधरोयमुदसूत मुदं प्रसूतां विश्वेश्वरस्य कृतिरस्य चिरस्य लोके ॥

२१६ अलंकारकौस्तुभः सटीकः-मू० टी० कविकर्णपूरगोस्वामी ।

टी. आ.—अद्वैतप्रकटीकृतो नरहरिप्रेष्ठः स्वरूपप्रियो नित्यानंदसखः सनातनगतिः श्रीरूपहृत्केतनः ॥

लक्ष्मीप्राणपतिर्गदाधररसोल्लासी जगन्नाथभूः सांगोपांगसपार्षदः स जयतां देवः शचीनंदनः ॥

अथ सोयं कविमुकुटमणिः श्रीकविकर्णपूरगोस्वामी स्वकृतश्लोकानां स्वयमेव व्याख्यामाह । ग्रंथारंभ इति ॥ परिभवार्थकजिधातुः सकर्मकः ॥

मू. आ.—ग्रंथारंभे स्वाभीष्टदेवतानामगुणकीर्तनात्मकं मंगलं

मू. च.—इत्यलंकारकौस्तुभे दोषप्रदर्शनो नाम दशमः किरणः ॥

श्रीमतः कर्णपूरस्य चरणावनिशं भजे ॥ निर्मितः कृष्णकंठार्हो येनालंकारकौस्तुभः ॥

टी. च.—यत्तु श्यामामृतं तत्पिबामः ॥ १४०० ॥ समाप्तेयं श्रीअलंकारकौस्तुभस्य टीका ॥

२१७ अलंकारमुक्तावली-विश्वेश्वरः ।

आ.—सन्मूलप्रकृतिः प्रकाशितशतानंदो दधानः क्षमां कृष्णोद्यापि सुमंतुनैकगुरुताशाली न यत्पूज्यताम् ।

सद्वृत्तिं दधदात्मभूतनयतामारुंधते यस्य तामाचार्यः प्रथमो गिरां विजयते विद्वान्स लक्ष्मीधरः ॥ १ ॥

नानापक्षविभावनकुतुकमलंकारकौस्तुभे कृत्वा ॥ सुखबोधाय शिशूनां क्रियते मुक्तावली तेषाम् ॥ २ ॥

च.—शश्वत्सभाजनसभाजनभाजनत्वम् ॥ १ ॥

श्रीमन्महीमहिततत्तदसीमधीमन्मूर्धन्यताकलनसंगतधन्यताकः ।

लक्ष्मीधरोयमुदसूत मुदं प्रसूतां विश्वेश्वरस्य कृतिरस्य चिरस्य लोके ॥ २ ॥

इत्यलंकारमुक्तावली समाप्ता ॥

२१८ काव्यप्रकाशटीका-साहित्यचन्द्रः ।

आ.—पिबतोरपि सुस्मितामृतानि द्रुततृष्णाकुलयोरधिस्रुयु [धृष्णुयू] नोः ।

विलसत्यसितांबुजच्छदाभा तडिदभ्रत्विषयोः कटाक्षवृष्टिः ॥ १ ॥

कुमारसूर्यो यदुवंशपंकजप्रकाशको मुद्रितवैरिकैरवः ॥ सुहृन्मनस्तोमतमांसि नाशयन्व्रजाजिरांतः समुदेतु सर्वदा ॥ २ ॥

सूर्याभिसोभाष्ये [सूर्याभिख्ये] गोकुलाधीशसूनौ स्वेष्टां लीलां भूषणैर्वक्तुकामे ।

जातः क्षित्यां भारतैः सूत्रवृंदैर्द्वेष्टि ध्वांतानेष साहित्यचंद्रः ॥ ३ ॥

प्रारिप्सितस्य शास्त्रस्य निर्विघ्नं परिपूर्तिमिच्छन्भरतः सरस्वतीं प्रणमति ॥ नियतिकृतानियमरहिता

च.—शब्दस्य शक्त्याधिकयाच्छाब्दी व्यंजनेति व्यपदेशः ॥

इति श्रीसाहित्यचंद्रे शब्दनिरूपणं द्वितीयः किरणः ॥

२१९ का[illegible]काश[illegible] साहि[illegible]कौमुदी कृ[illegible]टीकासहिता ।

आ.—प्रणम्य कृष्णं सर्वेशं श्री[illegible]तिसंश्रयात् ॥ [illegible] साहित्यकौमुदी ॥ १ ॥

सद्भिः पद्यैः कारिकाभारतीं यः शुद्धिं [illegible] तुच्छ[illegible] ।

साहित्यांभोजन्मसच्चंचरीकः सोयं विद्याभूषणोऽस्मान्पुनीतात् ॥ २ ॥

काव्यरसास्वादनाय वह्निपुराणादिदृष्टां साहित्यप्रक्रियां भरतः संक्षिप्ताभिः कारकाभिर्निबबंध । ता व्याचिख्यासुर्वार्त्तिक-न्मंगलमाचरति कारुण्यादिति

कारुण्याद्व्रजपतिराशु यस्य भेजे निर्धूताखिलवृजिनः परं प्रमोदम् ॥

चैतन्याकृतिमजितं जितं स्वभक्तैस्तंवंदे मधुरिमसागरं मुरारिम् ॥ १ ॥

सूत्राणां भरतमुनीशवर्णितानां वृत्तीनां मितवपुषां कृतौ ममास्याम् ।

लक्ष्याणां हरिगुणशालिनां च सत्त्वात्कुर्वंतु प्रगुणधियो बतावधानम् ॥ २ ॥

निष्प्रत्यूहप्रारीप्सितपरिसमाप्तिकामो मुनिः समुचितां गीर्देवीं प्राक्प्रणामति ।

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतंत्राम् ॥ नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥

अत्र विधिकृतविलक्षणविश्वविधानाज्जयतीति नतिमाक्षिप्य तां प्रति प्रणतोऽस्मीति व्यनक्ति ३ प्रेक्षावत् प्रवृत्त-ये शास्त्राभिधेयफलं तावदाह ॥

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ॥ सद्यः परानिर्वृतये कांतासम्मिततयोपदेशयुजे ॥

कीर्त्तिर्धनावाप्तिर्देवमनुष्यादिव्यवहारावगतिर्देवतावंदनकृतः क्लेशनाशः सपद्येव रसानुभवसमुद्भूतः परमानंदः सरसतया धर्म्मादिरूपहितोपदेशश्च

काव्यादेव भवतीति सर्व्वथा तत्र प्रयतनीयम् । वेदः खलु शब्दप्राधान्यात् प्रभुसम्मितः पुराणादिश्चार्थप्राधान्यात् सुहृत्सम्मितः शास्ति काव्यं तु शब्दार्थयोर्गुणतयारसांगभूतव्यापारप्राविण्यात्तद्विलक्षणमतः कान्तासम्मितं तदिति ॥ ४ ॥

राधा कुंकुमपीतांगी हरिपीतपटांचिता ॥ धत्ते द्विगुणतां प्रातः पीततां पश्यतालयः ॥

आनंदयति श्यामां रसिकान्नयनानि स्वधामानि च यः ॥ विस्मापकदामोदरलीलोवतु नः स गोविंदः ॥

इति साहित्यकौमुद्यां परिशिष्टालंकारनिरूपणो नामैकादशः परिच्छेदः ॥ ११ ॥

च.—साहित्यकौमुदीव्याख्यां श्रीकृष्णानंदिनीमिमाम् ॥ कलयंतु कृपावंतः संतः कौतूहलाकुलाः

इति साहित्यकौमुदीटीकायां श्रीकृष्णानंदिन्यामेकादशः परिच्छेदः ॥

२२० काव्यकौस्तुभः-अपूर्णम् ।

आ.—कलाभिर्निभृतः श्रीमान्राधया समलंकृतः ॥ दीव्यत्कुवलयः सोयं विधुर्विजयतेतराम् ॥

प्रारीप्सितस्यास्य शास्त्रस्य काव्यांगत्वकाव्यफलमेव फलमिति तावदाह कीर्त्तिः सार्वज्ञ्यमानंदो धनादीनि च काव्यतः ॥

सार्वज्ञ्यं देवमानवादिप्राणिचेष्टावगतिरूपम् आनंदो रसानुभवसमुद्भूतः धनं नृपतिप्रसादलक्ष्या [भ्या] हस्त्यश्वादिसंपत् आदिना धर्मकाममोक्षाः तत्र धर्मो भगवद्वंदनादिः

च.—विप्रोयं सर्पवद्दीप्रो दधिबिंदुनिभो विधुः ॥

अत्र जात्या प्रमाणेन च न्यूनता दीर्घायुर्द्रौणिवत्काको वेणीयं यमुनोपमा अत्र जात्या प्रमाणेन ।— — — —

२२१ नाटकचंद्रिका-रूपगोस्वामी ।

आ.—वीक्ष्य भरतमुनिशास्त्रं रसपूर्वसुधाकरं च रमणीयम् ॥ लक्षणमतिसंक्षेपाद्विलिख्यते नाटकस्येदम् ॥ १ ॥

नातीवरंगत्वाद्भरतमुनेर्मतविरोधाच ॥ सहित्यदर्पणीया न गृहीता प्रक्रिया प्रायः ॥ २ ॥

च.—प्रायो रसेषु सर्वत्र भारती करुणादिषु ॥
इति ध्वनिप्रस्थानपरमाचार्यार्यगुरुश्रीमद्रूपगोस्वामिविरचिता नाटकचंद्रिका समाप्ता ॥

२२२ पद्यामृतसरोवरः-लक्ष्मणः ।

आ.—शृंगारी गिरिजानने सकरुणो रत्यां प्रवीरः स्मरे बीभत्सोऽस्थिभिरुत्फणीति भयकृन्मूर्त्याद्भुतस्तुंगया ॥
रौद्रो दक्षविमर्दनेन हसकृन्नग्नः प्रशांतश्चिरादित्थं सर्वरसाश्रयः पशुपतिर्भूयात्सतां भूतये ॥ १ ॥
च.—श्रीमान्काश्यपगोत्रजो बुधवरः श्रीरामचंद्रो ह्यसौ विख्यातो भुवि वर्णनीयविभवस्तस्यात्मजेनाधुना ॥
श्रीमल्लक्ष्मणशर्म्मणा विरचितं पद्यामृताढ्यं सरः प्रीत्यै सांबसदाशिवस्य भवतु श्रीमाधवस्यानिशम् ॥ ७९ ॥
इति श्रीमत्केसवारोपाह्वरामचंद्रसूनुलक्ष्मणविरचिते पद्यामृतसरोवरे वैराग्यकथनं नाम चतुश्चत्वारिंशत्तरंगः ॥ ४४ ॥

२२३ प्रस्तावचिन्तामणिः-चंद्रचूडः ।

आ.—वर्त्तिं चंद्रकलां शिखां दिनमणिं दीपं सुवर्णाचलं रूपं व्यापकमात्मजस्य सहजं स्यादद्भुतं विस्मयात् ॥
देवक्यानकदुंदुभेरुरुजुषः कृष्णस्य नीराजने चित्रं न्यस्तवदास्थितं दिशतु नः श्रेयांसि कंसे जिते ॥ १ ॥
दोस्तंभस्तंभितेभप्रचालितरदनप्रोच्छलच्छोणितौघप्राच्छिन्नांगोंगरागाचित इव समरश्रीसमालिंगितेन ॥
चाणूरं चूर्णयित्वा सममरपुरीदुंदुभीनां निनादैर्भिंदन्कंसस्य कंठं दिशतु मम मुदं वृष्णिवंशावतंसः ॥ २ ॥
च.—चक्रद्वंद्वसमागमाविघटना रत्नाकरा वर्धिता ध्वस्ताः सर्वतमोगुणाः प्रतिहता नक्षत्रकोटिप्रभा ॥
कीर्त्तिः किं च कुमुद्वती विकसिता जाताः प्रसन्ना दिशः प्रीतिं के प्रतिपेदिरे न विबुधास्तद्बालचंद्रोदये ॥
हरिवंशे कृष्णजन्मनि
ढक्काटंकृतिशंखभांकृतिमिलद्वीणामृदंगध्वनिक्षिप्तक्षुण्णहरिद्रमार्द्रवसनप्रव्यक्तगोपीस्तनम् ॥
नृत्यत्सुंदरिनंदनंदनसमुत्पत्तौ महामंगलो गोपानां दधिकर्द्दमः समभवद्वृन्दावने गोकुले ॥
राजानो रसिका बुधा बहुविधाः शिष्टा विशिष्टा जना भक्ता भागवताः पृथग्जनशतान्यन्येऽपि ये केचन ॥
शिष्टं वेकर (नाम) मौनिकुलजाच्छृण्वंतु कौतूहलं दुर्गानंदनचंद्रचूडविदुषः प्रस्तावचिंतामणिम् ॥
इति श्रीभट्टपुरुषोत्तमात्मजचंद्रचूडकृते प्रस्तावचिन्तामणौ जातिवर्णनं नाम पंचम उच्छ्वासः ॥

२२४ मधुकेलिवल्ली-गोवर्धनभट्टः ।

आ.—गोविंददेवपदसेवनभूरितर्षान्वर्षाकरान्निजगुरून्व्रजभावसिन्धोः ॥
प्रेमार्त्तिदातृकरुणानरुणायमानान्स्वीयाप्रबोधकुहरे मुहुरेव वन्दे ॥ १ ॥
होलाकादिवसेषु मञ्जुलरसेष्वादेशतो गोकुलाधीशस्यातुलवत्सलस्य नियमं सन्त्यज्य गोचारणे ॥
निःशङ्कं कुलकन्यकाभिरभितः कुर्वन्कलिं कौतुकी राधागर्वजितो हरिर्विजयते वृन्दाटवीचन्द्रमाः ॥ २ ॥
चित्ते को वितनोति गोकुलयुवद्वन्द्वस्य लोकत्रये वक्तुं चित्रचरित्रमत्र मतिमांस्तर्काचितः पंडितः ॥

श्रीरूपामलपादपद्मयुगलश्रद्धालवेनोन्मदो मन्दो ऽहं रचयाम्यहो विलसितं वृन्दाटवीनाथयोः ॥ ३ ॥

च.–नित्यानंद सनातनामल नवद्वीपाभिराम प्रभो भक्तोद्दामविशालकीर्त्तनरताद्वैतामितानंदद ॥

राधाभावविभावितांतरतनो श्रीरूपचिन्तामणे लक्ष्मीप्राण गदाधर प्रिय हरे विश्वंभर त्राहि नः ॥

कृष्णचैतन्यकारुण्यपुण्यावनीरूपसंदर्भकल्पद्रुमालंबिनी ॥ वेल्लिता पंचभिः पल्लवैर्वर्द्धितां केलिवल्ली सतामालवाले हृदि ॥

इति श्रीमधुकेलिवल्ल्यां राधागोविंदसमागमो नाम पंचमः पल्लवः ॥ ५ ॥

२२५ रसकल्पद्रुमः-चतुर्भुजः ।

आ.–वंदे तत्किमपि ज्योतिरतिचित्रं चिदाश्रये ॥ यत्स्मृतेरेव भूयांसि तमांसि हरति द्रुतम् ॥ १ ॥

आदर्शप्रतिबिम्बवत्त्रिगुणभागुत्पत्तिमध्यारयं कुर्वन्निर्विकृतिप्रतीतममलैः सत्त्वेन यद्योगिभिः ॥

आस्ते सन्निहितं खवच्छ्रुतिसुधीवाचामगम्यं सदा ज्योतिस्तत्परमं नमामि करणव्यापारपारे स्थितम् ॥ २ ॥

नत्वा गुरून्निष्टदेवान्व्रज्यासारं करोम्यहम् ॥ रसकल्पद्रुमं नाम ग्रन्थं ग्रन्थविदांवरम् ॥ ३ ॥

यद्यपि बुधाः पराभिर्व्रज्याभिर्नामतृप्तिमापन्नाः ॥ आस्वादयन्तु चैनं ग्रन्थं ताम्बूलमिव तथापि ॥ ४ ॥

आद्यः सर्वमहीभुजां प्रतिभटध्वान्तैकधर्म्मद्युती राज्यश्रीनववल्लिवेष्टितभुजस्तम्भद्वयः सद्दयः ॥

अष्टाशाकरिकर्णतालजमरुन्मूर्च्छत्प्रतापानलः क्ष्माभृन्मौलिसुलालिताङ्घ्रिरितमाद्दौलेतिनामाऽभवत् ॥ ५ ॥

त्रिभुवनजनगीतोद्दामचापप्रतापश्चरणकमलनम्रोत्सारितानेकतापः ॥

अजनि करवरोच्चैर्मांसलस्कन्धपीठः सुतनुरसकखानः सूनुरस्मात्क्षतारिः ॥ ६ ॥

यद्दानन्तु जगत्प्रसिद्धमभवद्राज्यानि यद्याचका राजानः सुलतानशाहसदृशा ये चापरे मानिनः ॥

यद्भृत्याश्च नृपा नृपास्त्वनुचरा यस्य प्रतापो रविश्चन्द्रो यस्य यशोऽभ्युदेत्यसक्रखानासीद्गुणैः सोऽद्भुतः ॥ ७ ॥

अस्ति स्वस्तिकरः समस्तजगतीवास्तव्यलोकस्य यो ध्वस्ता त्रस्तसपत्नमस्तकभरो लक्ष्म्यातिवास्तोष्यतिः ॥

शस्तस्तुत्ययशा निरस्ततिमिरस्तोमो मनस्तस्ततः शास्ताखाननृपो विहस्तमतिभृच्छस्त्रास्त्रशास्त्रार्णवे ॥ ८ ॥

जानामि दानाय सुवर्णशैलं स्तवाय तावद्वचनानि वेधाः ॥ शायस्तखानस्य यशःप्रतापसमाय सोमद्युमणी ससर्ज्ज ॥ ९ ॥

तस्यानुरञ्जनायैव ग्रन्थं नवरसात्मकम् ॥ चतुर्भुजो रचयति स्वपद्यैश्च परैरपि ॥ १० ॥

अथाऽनुक्रमणीं कुर्वे रसकल्पद्रुमे बुधैः ॥ आदौ देवस्तुतिर्ज्ञेया शृङ्गारे तदनन्तरम् ॥ ११ ॥

सामान्यके कामनीनां वयःसन्धिषुभाषितुम् [सन्धिसुभाषितम्] ॥ स्त्रियाः सामग्र्यशंसा च प्रत्यङ्गानां निरूपणम् ॥ १२ ॥

ततो वियोगशृङ्गारे प्रियप्रस्थानमन्दिरम् ॥ प्रियं प्रति प्रियावाक्यं विरहिण्याश्च वर्णनम् ॥ १३ ॥

परस्परं पत्रलेखः सखीवाक्यं प्रियं प्रति ॥ नायिकायां सखीवाक्यं दूत्यां कान्तावचस्ततः ॥ १४ ॥

नायिकं प्रति मित्रोक्तिस्ततो विरहवर्णनम् ॥ अथ संयोगसंस्कारे दम्पत्योरवलोकनम् ॥ १५ ॥

ज्ञेयं कतिपयैः श्लोकैः खण्डितावर्णनं ततः ॥ ततस्तु मानकथनं प्रसादस्तदनन्तरम् ॥ १६ ॥

अथाऽभिसारकथनं ततस्सूर्यास्तवर्णनम् ॥ सन्ध्याया वर्णनं तद्वच्चक्राख्यानमतः परम् ॥ १७ ॥

तमसो वर्णनं तद्वच्चन्द्रोदयसुभाषितम् ॥ ततः सुरतशंसा च प्रियवाक्यं प्रियां प्रति ॥ १८ ॥

प्रियं प्रति प्रियावाक्यं विज्ञेयं तदनन्तरम् ॥ नवोढासुरतक्रीडा ततः सुरतवर्णनम् ॥ १९ ॥
विपरीतरतं ज्ञेयं सुरतान्तसुभाषितम् ॥ प्रभातवर्णनमथ शृङ्गारो मिश्रितस्ततः ॥ २० ॥
दम्पत्योः प्रीतिकथनं कुलस्त्रीणां निरूपणम् ॥ असतीवर्णनं ज्ञेयं स्वयंदूती ततः स्मृता ॥ २१ ॥
ऋतूनां वर्णनं ज्ञेयमथ वीररसक्रमः ॥ नृपाणां वर्णनं ज्ञानप्रयाणारिपलायनम् ॥ २२ ॥
हयमन्दिरशंसा च नीतिर्ज्ञेया बुधैस्ततः ॥ अथ हास्यरसः ख्यातो दुर्जनस्य विगर्हणा ॥ २३ ॥
कुकवेरपि निन्दा च ज्ञेयोऽद्भुतरसस्ततः ॥ गुणप्रशंसा तत्रैव सत्कवेः कथनं ततः ॥ २४ ॥
सुभाषितप्रशंसा च ततस्तु करुणारसः ॥ रसो भयानकस्तद्वद्बीभत्सरसवर्णनम् ॥ २५ ॥
तत्र याचकदारिद्र्यकृपणानां विगर्हणा ॥ अथ रौद्ररसो ज्ञेयस्ततश्शान्तरसः स्मृतः ॥ २६ ॥
दैवाख्यानं ततः प्रोक्तं सज्जनानां प्रशंसनम् ॥ अथ संसर्गशंसा च सङ्कीर्णाख्यानकं ततः ॥ २७ ॥
अथाऽन्योक्तिरलङ्कारो बुधैरिह विभाव्यताम् ॥ एवं प्रस्तावसङ्ख्या तु पञ्चषष्टिप्रमाणिका ॥ २८ ॥
श्लोकैः सहस्रसंख्याकैर्जातो ग्रन्थो ह्ययं शुभः ॥ बाणाशर्षिशशांकाङ्के वैशाखे पूर्णिमागुरौ ॥
क्षिप्तो हस्तावलग्नः प्रसभमभिहितोप्याददानोंशुकान्तं गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण ॥
आलिङ्गन्योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥ ३० ॥
च.—यत्नाद्दतस्त्वमलिना मलिनाशयेन किं तेन चम्पक विषादमुरीकरोषि ॥
विश्वाभिरामनवनीरदनीलवेषाः केशाः कुशेशयदृशां कुशलीभवन्तु ॥

तत्रैव प्रायोऽप्रसिद्धकविनामानि तत्पद्यानि च यथा ॥

अचलरुद्रस्य .... पाणौ पद्मधिया
अनिरुद्धस्य .... यूथिययौचित— / कमलिनीवन—
अविलम्बस्य .... ममैव लोचनेव— / यदि प्राणा एव
ईश्वरदासस्य .... वस्त्राकर्षणसं—
उग्रग्राहस्य .... किं कार्यं प्रतिबोधने
कंसनारायणस्य .... अधरेक्षणयोः कांत्या / बाले तवाधरसुधा— / एतदेवं मम पुण्यं
कवीन्द्रस्य .... दृष्टोयं यदि पू—
कुञ्जकुटीरस्य .... श्रीकृष्ण तव / मुनिर्जयति / कस्मै किं कथनीयं
कुलपतेः .... नारब्धं स्तनपरि— / सौमित्रिर्वदति
कृष्णानन्दमिश्रस्य .... द्राक्षारुक्षैव / महिमामहोन्नत—
गदाधरस्य .... चलद्भ्रूलाकादशन—
गौडयादवस्य .... जन्मावधितनु—
जगन्मणे राज्ञः .... वनमाली वियोगेन
ढक्कारावस्य .... देवत्वं पुरुषोत्तम—
दशावधानस्य .... मत्तं मयूरैश्चकितं
धनदेवस्य .... धिक्तस्य मंद—
नवीनकवीन्द्रस्य .... आयासि यासि द—
नाथमिश्रस्य .... लतां पुष्पवतीं / हेमांभोरुहप— / दक्षिणवातकपोत— / सुखयति दोषा— / मध्याह्ने नूनमापोपि / निष्कंपास्तरवो
पञ्चाननस्य .... मध्याह्ने हरितो

परशुरामस्य	सुधारसो धातुः
भारतीकवेः	अंगुल्या कः कपाटं कोयं द्वारि हरिः कस्त्वं शूली मृगय
भूपतिमिश्रस्य	कुचकुंभांतरे काचित्कराभ्यां कु–
मण्डनस्य	एवमेवाक्षि वामाक्षि
मतेः	दक्षिणवातः कपोतः किमयं कालिमा नाधराद्विगलिता पाणिभ्यां चल परिचितरसना
मधुरवल्लेः	रक्ताशोककृशोदरी– दुर्जनविभव– वधिरस्येव शु– दिव्यचक्षुरहं मित्र तत्रभवता निःक्षिप्तं कवरी– कुवलयनयना
महामनुष्यस्य	कारणोत्पन्नकोपे
मोहनमिश्रस्य	यदींदोर्लक्ष्मीस्ते
रघुपतेः	घनतरघन–
रन्तिदेवस्य	कर्पूरमुपहसंती किरणलहरीभिः
रामचन्द्रसरस्वत्याः	पश्चादुपागत्य मया प्रासादे सा दिशि २ भग्नं धनुः पुरभिदो अकस्मादागारे
रामरामस्य	मा कदापि भवनात् मां लक्ष्य दर्शनोत्कंठा काचित्तृषार्ता वनिता न प्रेम मन्ये प्रचुरं हेमकुंभमिव तुंग– मयि प्रभातप्रतिकूल– अलसयति गात्रं
रुचेः	आश्लेषशेषा रतिः सुरतव्यत्ययसमये बालचन्द्ररुचिरं संवरणाय वधूटी
लख्यायाः	अयमहो रजनी–
वसन्तस्य	पुलकितकठोर– न्यस्तानि शंख– गम्भीरनीरस्थित– उत्पन्नो घटचक्र–
वाणीरसालस्य	रूपे मदनसमानो
वाहिनीपतेः	अस्मद्रिपूणामनिला– अस्वाध्यायः पिकानां
विश्वंभरस्य	आयातः शरदाहो
विद्यायाः	अन्यासु तासु
विद्यानिधेः	समुत्कीर्णे तन्व्या
शास्त्राखानस्य	करान्प्रसार्य– वस्तुतः शुद्ध आत्मा गंतव्यान्नाविक– किंशुकव्याजतो नीरादिव जनुः क्षारांबुमधु–
संजयाकविराजस्य	असंमुखालोकन–
सर्वदासस्य	प्रावृड्वधू– अंबरं स्तिमित– शीलादिव संत्रस्तं
स्वस्थानमिश्रस्य	सितं वसनमर्पितं मनस्विनि तपस्विनी मंदं निधेहि चरणौ द्वित्रैः केलिसरोरुहं अनाहूतैवैत्य
हरिपतिभट्टस्य	कविर्वाचस्पतिः
होरीन्द्रस्य	जनसदसि तथाव– अपूर्वं चौर्यमभ्यस्तं इह केन कुले

२२६ रसतरङ्गिण्याष्टीका-सेतुप्रवन्धः-जीवराजः ।

आ.—अखंडानंदांगः कथमपि न निर्वासनधियां परिच्छेद्यो वेद्यः परमुपनिषद्भागनिवहैः ॥
अपि प्रादुर्भावे सति जगति यः स्वात्ममतिकृद्रसोऽयं ब्रह्मात्मा भुवि भवतु भव्याय भवताम् ॥ १ ॥
व्रजराजसूरिजन्माभ्यधिगततन्मात्रचिंतनचिदालिः ॥ कविजीवराजशर्मा निर्माति तरंगिणीसेतुम् ॥ २ ॥
ये शीलयिष्यंति समाहितात्मना सेतुप्रबंधाख्यमदीयटिप्पणम् ॥
ते संतरिष्यंति विनापि च श्रमैः संतरततो भानुतरंगिणीरसात् ॥ ३ ॥
संतः परेषां गुणजालगृध्नवो बद्धास्ततो मोचयितुं निजात्मनः ॥
न शक्नुवंति स्म बलेन यंत्रिता शिचा निषक्ता इव केकिपत्रिणः ॥ ४ ॥
सगुणं प्रतिखंडयंत आरात्प्रयतंते ननु निर्गुणाभिपत्त्यै ॥ सुधियोप्यतथापि तानजस्रं सगुणानिव भजंत्यहो विचित्रम् ॥५॥
गुणिनं भजतश्चिरादुरोजौ गुणिनं चैव तनू नितंवबिंबम् ॥ जघनं च तमेव तेन मन्ये गुरवो वै गुणिनं भजंत्यजस्रम् ॥६॥
ईर्ष्यालवो येन्यदुराग्रहेण न संगृहीष्यंति मदीयसेतुम् ॥ यास्यंत्यमी तत्त्वविवेकवंचनां बुधा महालंकरणैरिव द्विपाः ॥ ७ ॥
ये केपि वै मूढधियो हि मामकं सेतुप्रबंधं विदुषां विनोदनम् ॥
संभावयिष्यंति न जातु किं ततः क्लीबोज्झिता नैति विगीतिमंगना ॥ ८ ॥
सेतुं परित्यज्य विमूढबुद्धयो नौकादिभिः क्षुद्रविसारसाधनैः ॥
ततुं समिच्छंति यतंति चापि ये चक्षुष्मदंधा इति तेपि मे मतिः ॥ ९ ॥
इमां बत तरंगिणीं रसमयीं गभीरांतरां दुरंतविषयाभिधैरथ तिमिंगिलैः संकुलाम् ॥
वृतां विविधसंशयैर्विषधरैर्विना सेतुना कथं बुधमतं राजाः [बुधमतंगजाः] प्रतितरंतु नौकाशतैः ॥ १० ॥

२२७ रसतरङ्गिणीटीका-रसिकरञ्जिनी-वेणीदत्तः ।

आ.—नमो नवतमःस्तोमतोमरोत्तमकांतये ॥
च.—श्रीमन्नारायणातपत्र [श्रीनारायणतातपुत्र] नृहरेर्भक्तो धरामंडले विसमृत्तो [विख्यातो] माहिदासभट्ट इति यस्ततसुज-
न्यात्मज [यस्तस्यायमप्यात्मजः] वेणीदत्तकवींद्रशेखरवरः सत्तर्कवागीश्वरस्तस्येयं कृतिरुज्ज्वला वितनुतां मोदं मतां सर्वदा ॥ ३ ॥
इति श्रीतर्कवागीशभट्टाचार्यवेणीदत्तकृता रसतरंगिणीव्याख्या रसिकरंजिनी समाप्ता ॥

२२८ रसप्रदीपः-प्रभाकरः ।

आ.—स्वबिंबमबाकुचक्रु [मंबाकुचकुं] भबिंबे विलोकमानं प्रतिलोकमानम् ॥
प्रचंड षुं[शुं]डं परितः क्षिपंतं हेरंवमालंबनमाश्र यभृः [यामः] ॥ १ ॥
कलयतु कल्याणचयं रघुकुलतिलकः कुलोपास्यः॥ व्य [य] स्य प्रसादलेशात्कपिभिर कुपर [कूपार] लवनं विहितम् ॥२॥
पुरतः प्रविलोक्य भग्नचापं परतः कामपि कामकार्मुकज्याम् ॥

पुलकांचितपीनबाहुदंडं रघुबालं कलये दशास्यकालम् ॥ ३ ॥
गुरुतरदुरितौघं ह्रप्रये [ध्वंसये] दिदिरेशस्तदनु दरममंदं मंदयेदंधकारिः ॥
तदनु मतिमनल्पां कल्पयेत्कल्पवल्ली भजनपरजनानां सारदा सारदा नः ॥ ४ ॥
अभूत्कुलकनंदनः प्रथितवंशदुग्धांबुधौ सुधाकर इवाकरः किल कला (कला) परय यः ॥
रमारमणभावनो भुवनविंदुवृंदारक वृजृधजृप्रु [वृषध्वज] पुरंदरो विबुधभट्टरामेश्वरः ॥ ५ ॥
तस्मादजायत जगत्रयगीतकीर्तिः श्रीभट्टमाधवबुधो बुधवृंदवंद्यः ॥
सद्यः समुद्यदनवद्यसगद्यविद्याविद्योतमानधिषणो धिषणोपमेयः ॥ ६ ॥
सहस्रेणास्यानां फणिपतिरभूद्येन न समं यदा वक्तुं शक्तस्तदवधि स पातालमभजत् ॥
पराभूतेर्भीतः सरसिजभवस्तिष्ठति ततो निलीनः कंसारेर्गहनतरनाभीसरसिजे ॥ ७ ॥
भाट्टे भट्ट इवापरः कणभुजः शास्त्रे कणादः स्वयं साक्षादक्षपदो मतेक्षचरणः पातंजले प्रांजलः ॥
ख्यातः सांख्यमते चिरं गुरुमते सिद्धांतदीक्षागुरुर्ज्यायांस्तत्तनुजो विभाति भुवने श्रीविश्वनाथः कृतः [ती] ॥ ८ ॥
ततः कनीयान्रघुनाथनामा विद्वत्सु वंद्योस्य सुतश्चकास्ति ॥ ततः कनीयानहमस्मि जातः प्रभाकरो राघवपादसेवः ॥ ९ ॥
विश्वनाथचरणांबुजभक्ति प्रदा [प्राप्त] सन्मतिरुमापतिभक्तः ॥
चापलेन तनेवे [तनुते] रसिकानां प्रीतये किमपि कौतुकमेतत् ॥ १० ॥
श्रीविश्वनाथविबुधास्यसुधांशुभिर्यद्वाणीसुधाभिरभितः सुचिरं प्रसिक्ते ॥
न स्यात्कथं सरसचंद्रकता च चंद्रकांताश्मवन्मम कठोरतरेपि चित्ते ॥ ११ ॥
करवाणि वाणि तवपादपंकजप्रणतिं शिरोनिहितपाणि चारुणि ॥
रुचिरां चिरन्मयि निधेहि देविताममृतप्रवाहमधुरां वचोधुराम् ॥ १२ ॥
प्रवृत्तो उग्रहिं [दुर्ग्राहं] ध्वनिरसविचारार्णवमहं विगाढुं यन्मूढस्तदिह सुमहासाहसविधौ ॥
निराधारस्याराद्भिमतविधौ काल्पलतिका जगन्मातस्तावृन्तचरणचिंते च [तस्तावत्तवचरणचिंतैव] शरणम् ॥ १३ ॥
अश्रुतेपीह साहित्यदर्शने साहसं मम ॥ निर्वाहयंतु निपुणा गुरुपादरजःकणाः ॥ १४ ॥
ग्रंथांतराद्विशेषो यः स्यादस्मिन्नसौ तु गुणगृद्धये ॥ अवधार्यतां रसज्ञैरज्ञैरितरैर्नरैर्मम किम् ॥ १५ ॥

इह तावत्काव्यस्यानेकप्रयोजनप्रयोजकत्वेपि रससंवेदनजन्यं सुखमेव मुख्यं प्रयोजनं तत्र च जातिविशेषः स्वर्गादिवददृश्योंगीकार्यः रससंवित्तिश्च पटुतरश्रवणादिवासनासंस्कृतचेतसां योगिनां परमात्मसंवित्तिरिव तत्तदंगविद्याभ्यासाहितवासनासंस्कृतमनसां सहृदयानामेव भवतीत्यत्रानुभव एव प्रमाणं तत्र तावद्रसः काव्यात्प्रतीयत इति काव्यलक्षणं निरूप्यते । तच्च तददोषौ क्वापीति प्रश [सूत्र] कारेणोक्तं तत्रैतद्विचार्यते ।
अदोषावित्यनेन यत्किंचिद्दोषाभावो विवक्षितः यावद्दोषाभावो वा

च.—विस्तरेण चेयं वृत्तिरस्माभिरलंकाररहस्ये प्रसाधितेत्युपरम्यते इति शिवम् ॥
श्रीमत्पुरारिपुरभेदनवासपूतश्रीरामचंद्रपदसारसचंचरीकः ॥
श्रीविश्वनाथविबुधप्रतिपन्नविद्यः श्रीमान्प्रभाकर इमं व्यतनोत्प्रबंधम् ॥ १ ॥
भवतु कृतिरियं विदेहपुत्रीपरिवृढपादपयोजयोर्मदीया ॥

कठिनविपिनभूमिरेणुखेदक्षपणपटुः सरसामृतोर्मिधारा ॥ २ ॥
व्योमाकूपारभूमीशगणिते खरवत्सरे ॥ एकोनविंशवर्षेण प्रबंधोयं कृतो मया ॥ ३ ॥
दोषापहाररुचिरो विमलो रससंचितः कोपि ॥ विलसतु रसप्रदीपो यावत्कल्पं जगत्रितये ॥ ४ ॥
इति श्रीमद्विदुवृंदारकवृंदवंदनीयपादारविंदद्वंद्वभूसुरपुरंदरजगद्गुरुमहामहोपाध्यायभट्टमाधवतनूजनिभट्टभट्टारकोन्नीते रसप्रदीपे व्यंजनानिरूपणं नाम तृतीयालोकः ॥ समाप्तोयं ग्रंथः ॥

२२९ वृत्तिवार्त्तिकम् ।

आ.–विश्वं प्रकाशयंतो व्यापारैर्लक्षणाभिधाध्वनितैः ॥ नयनैरिव हरमूर्त्तिर्विबुधोपास्या सरस्वती जयति ॥ १ ॥
वृत्तयः काव्यसरणावलंकारप्रबंधृभिः ॥ अभिधा लक्षणा व्यक्तिरिति तिस्रो निरूपिताः ॥ २ ॥
तत्र क्वचित्क्वचिद्वृद्धैर्विशेषा न स्फुटीकृताः ॥ नतिष्टं [स्पष्टं] कथितुमस्माभिः क्रियते वृत्तिवार्तिकम् ॥ ३ ॥
तत्र शक्त्या प्रतिपादकत्वमभिधा सा च त्रिधा

च.–क्वचिदपि सारोपलक्षणा न स्यादिति वाच्यम् इष्टापत्तेः ॥
इति वृत्तिवार्तिके लक्षणावृत्तिनिर्णयो नाम द्वितीयः परिच्छेदः ॥ २ ॥

२३० शृंगारमाला-सुखलालमिश्रः ।

आ.–अरुणिमरविनखचंद्रं पावकभौमं बुधमणिभिः ॥ सुरुचिसुमहिमगुरुकविवंद्यं मंदगमवतु पदपंकजं देव्याः ॥ १ ॥

च.–संसारसर्पमुखमर्दनतार्क्ष्यरूपा विज्ञानतापटलपाटितमोहकूपाः ॥
येषां कटाक्षकलिताः फलिता लसंति गंगेशमिश्रगुरवः सततं जयंति ॥ ३३ ॥
अथ कविवंशवर्णनम् ॥ यनीपप्रस्थास्य [वनीपकस्थास्य] रतस्तु मार्गो षट्क्रोशमध्ये हि घटोत्कचस्य ॥
ग्रामो घरौंडेति प्रसिद्धनामा पूर्वे स्थितास्तत्र पुरा मदीयाः ॥ ३४ ॥
श्रीविष्णुदत्तः स्वकुलाब्जभानुर्नारायणस्तत्तनुजो बभूव ॥ कौशल्यगोत्रो यजुषामधीतो माध्यंदिनीयो द्विजगौडजोसी ॥ ३५ ॥
तस्यात्मजोस्मादगमत्तु काश्यां षड्दर्शनी वैरिमपुत्रमंत्री ॥ दामोदरो वैद्यकग्रंथकर्ता श्रीरामकृष्णस्तदपत्यमासीत् ॥ ३६ ॥
तुलसीमाधवगंगारामाख्यास्तत्तनूद्भवाश्चासन् ॥ माधवरामसुपुत्रो हृदयराम इति सुगीयते तनुजैः ॥ ३७ ॥
साहित्ये रसग्रंथकृद्बुधवरस्तस्यांगजातः कविर्बाबूराय इति प्रसिद्धिमगमद्वासी पुरे चार्गले ॥
तत्पुत्रेण मया कृता रसमयी माला रसोपासका जना प्रापयितुं गुणैरपि युता कल्पा रसब्रह्मणि ॥ ३८ ॥
सुखलालेन सुकविना रचिता शृंगारमणिमयी माला ॥ कंठे सा रसिकानां सगुणसुवर्णा विलासमातनुताम् ॥ ३९ ॥
सुधांशुव्योमवर्सिंवदौ वर्षे ज्येष्ठासिते रसे ॥ शुभा शृंगारमालेयं रविपुष्ये सुगुंफिता ॥ ४० ॥
इति श्रीमत्साहित्यशास्त्रानुभवरसिकगौडविप्रवरबाबूरायमिश्रसूनुसुखलालमिश्रेण विरचितायां शृंगारमालायां संकीर्णवर्णनं नाम तृतीयं विरचनम् ॥ ३ ॥

२३१ शृंगारमण्डनम्-विठ्ठलेश्वरः ।

आ.—कथया कथय स्वामिन्यामे कथं [स्वामिन्कथं] वै नवसंगमः—

च.—इति श्रीमद्गोपीजनचरणपंकेरुहयुगान्युगाभिस्त्वप्रेमामृतजलधिमग्नाभिरानशम् ॥
बभूवेदं पूर्णं स्मितजितसुधाभिर्विरचितं निकुंजे शृङ्गाराभिधरसवरे मंडनमिदम् ॥
इति श्रीविठ्ठलेश्वरविरचिते शृङ्गारमंडने दशम उल्लासः ॥

२३२ शृंगारसरसी-भावमिश्रः ।

आ.—गजमुखममरप्रवरं सिद्धिकरं विघ्नहर्तारम् ॥ गुरुमवगमनप्रदमिष्टकरीमिष्टदेवतां वंदे ॥ १ ॥

च.—चंद्रश्चारुमरीचिवीचिनिचयैर्द्यावापृथिव्योस्तमःस्तोमं हंत समस्तमस्तमनयत्तद्रोदसी राजते ॥
मन्ये वारिधरावरोधवियदुन्मुक्तं शरत्पूर्णिमाचंद्रं चुंबितमृक्षमौक्तिकगणैर्वृद्धो हि दुग्धोदधिः ॥
इति श्रीभावमिश्रकविविरचितशृंगारसरसी संपूर्णा ॥

२३३ शृंगारामृतलहरी-सामराजदीक्षितः ।

आ.—सिंधुसुताकुचकुंकुमपाटलवक्षःस्थलं किमपि ॥ उपवीणितं च निगमैः सटाजटालं महः कलये ॥ १ ॥
नरहरिबिंदुपुरंदरजनुषा विदुषाथ सामराजेन ॥ शृंगारामृतलहरी विरच्यते रसिकजीवातुः ॥ २ ॥

च.—अनुभावव्यभिचारिभावाश्च ग्रंथांतरेषूह्याः इह ग्रंथगौरवान्न लिखिताः ॥
इति श्रीकविकुलतिलकनरहरिबिंदुपुरंदरकुलोत्तंसश्रीसामराजदीक्षितविरचिता शृंगारामृतलहरी संपूर्णा ॥

२३४ सरस्वतीकण्ठाभरणविवरणम्-जगद्धरः ।

आ.—इदानीमुभयालंकारविवेचनाय चतुर्थं परिच्छेदमारभते शब्देभ्य इति धातूभयालंक्रियास्त्विवादिभ्यः शब्देभ्यो विशिष्ट उपमादिरूपोऽर्थो ज्ञाप्यते ता उभयालंक्रियाः स्युः

च.—चतुर्विंशतिरिति इत्यनेन प्रकारेण चतुर्विंशतिरेता उपमादयः काव्यालंकृतय उक्ता इत्यन्वयः अजहल्लिंगतात्र । उभयेति शब्दार्थाश्रिता इत्यर्थः ॥
रत्नं रत्नधरोऽजनिष्ट गुणिनामाद्योऽनवद्यः सतां सा शुद्धा दमयंतिकापि सुषुवे नैयायिकं यं सुतम् ॥
तस्य श्रीशजगद्धरस्य कवितुर्वाणीगुणालंकृतेष्टीकायामुभयप्रकाशनपरिच्छेदश्चतुर्थो गतः ॥
इति महामहोपाध्यायधर्म्माधिकरणिकश्रीजगद्धरविरचिते सरस्वतीकंठाभरणविवरणे चतुर्थः परिच्छेदः

२३५ साहित्यसुधासिन्धुः-विश्वनाथः ।

आ.—उत्तालतालस्फुरदंघ्रिपातप्रजातपातालभुजंगकंपम् ॥ अभ्रांतविभ्रांतकपर्दजालविस्तरततालं कलये नटं तम् ॥ १ ॥
उत्तालांघ्रिप्रपातस्फुटितवसुमतीरंध्रनीरंध्रनिर्यत्पातालांभःस्रवंतीस्नपनसिमिसिमाकारिलालाटनेत्रम् ॥

ऊर्ध्वव्याधूतभोगीश्वरवररचितायासनिश्वासरिंगद्गंगाकल्लोलजालं कलयतु विभवं धूर्जटेर्नाट्यलीला ॥ २ ॥
चंद्रचूडप्रियापांगसंदोहानंदनिर्भरः ॥ विदधाति कविः कोपि सुधासिंधुं तरंगितम् ॥ ३ ॥
इह खलु सामाजिकपरीक्षितमेव काव्यं स्वर्गापवर्गादिजनकमिति तत्परीक्षार्थमयमारंभः । अत एवोक्तं काव्यप्रकाशे काव्यं यशसे इति । अत एवान्यत्र अदोषं गुणवत्काव्यमलंकारैरलंकृतम् ॥ रसान्वितं कविः कुर्वन् कीर्तिं स्वर्गं च विंदतीति तत्रादौ काव्यस्य लक्षणमाह ॥ जायते परमानंदो ब्रह्मानंदसहोदरः ॥ यस्य श्रवणमात्रेण तद्वाक्यं काव्यमुच्यते ॥

च.–उत्प्रेक्षायां ध्रुवादय एव शब्दाः संभावनं वक्तुमर्हंति न तु यथाशब्दोपि । तत्र तदुपादानं दोषः ।
उदाहरणं स्वयमवधेयम् । समाप्तमिदं काव्यलक्षणमित्यलं पल्लवितेन ।
यावत्पाटीरपंकद्रवमधुरसुधापूरसेकैस्त्रिलोकीमुच्चैः प्रीणाति विप्रप्रणतिनुतपदः पार्वणः शीतभानुः ॥
वेगादंभोजजृंभावितरणरसिका भानवो भांति यद्वद्भानोस्तावद्विधत्तामयमपि च सुधासिंधुरानंदकंदम् ॥
घूर्णल्लोचनमुच्छलद्विहसितं प्रभ्रष्टसीरं ललल्लालाजालमकालरोषमुदयन्निद्रामनिद्रश्रियम् ॥
जृंभारंभमिलन्मिलिंदपटलीवर्माविचाराकुलं कालिंदीजलकेलिलंपटमहं तालांकमेकं भजे ॥
मौलौ गंगांबुधाराकुवलयपटलीमंडिता शूलपाणेः कौंटीभृंगीकदंबव्यतिकरमधुरा मालिका कंधरायाम् ॥
कर्पूरक्षोदचंचन्मृगमदपटलीपंकसंकाशमूर्तिर्वक्षःपीठे पतंती क्षितिधरतनयानेत्रशोभावताद्वः ॥
आस्ते धारासुराख्यं नगरमतिलसत्केशवोद्दामधामप्रभ्राजत्कीर्तिपूरं विलसति स विधुर्यस्य गोदावरी सा ॥
तत्रत्योऽनंतदेवात्मज इह वसतिं मुक्तिपुर्यां स चक्रे [त्रिमल्लश्चक्रे] तस्यांगजस्योल्लसति कृतिरियं विश्वनाथाभिधस्य ॥
प्रबलकर्कशतर्कविचारणोल्लसितकाव्यसुलक्षणलक्षिता ॥ त्रिमरदेवतनूजविलासिनां मतिमतां वितनोतु मनोमुदम् ॥
इति श्रीत्रिमल्लदेवतनयविश्वनाथविरचिते साहित्यसुधासिंधौ अर्थो — — — — — नामाष्टमस्तरंगः ॥ समाप्तोयं ग्रंथः ॥ कृतिरयं विश्वनाथस्य ॥
कीर्तिशेषं गते तैस्तैर्गुणैर्विक्रमभूभुजि ॥ ग्रहांभोधिरसज्योतिर्मिते संवत्सरक्रमे ॥ १ ॥
एकादश्यां गुरौ स्वीयः सुधासिंधुर्विलेखितः ॥ पत्तने चंद्रचूडस्य विश्वनाथेन धीमता ॥ २ ॥

२३६ काव्यलक्ष्मीप्रकाशः-शिवरामः ।

आ.–यद्भालनेत्रशोभाप्त्यै गोपीचन्दननिर्मितम् ॥ स्त्रीचक्रे तिलकं कृष्णः स मां पातु त्रिलोचनः ॥ १ ॥

च.–काव्यानि पंच नुतयोपि च पंचसंख्याः टीकाश्च सप्तदश चैक उणादिकोशः ॥
भूपालभूषणमथो रसरत्नहारो विद्याविलास इत [ति] पूर्वसरत्कलाद्याः [द्यः–] ॥ २ ॥
ग्रंथान्मया विरचितान्परिशीलयंतु शीलान्विताः सुमनसो [मनसो] मुदे मे ॥
यद्वह्निशोधितमनल्परुचा समेतं जांबूनदं भवति मूल्यविशेषलभ्यम् ॥ २१ ॥
परिश्रमो व्याकरणे काव्यादावपि यः कृतः ॥ सव्या [सा] दिगियं तस्य शिवरामेण दर्शिता ॥ २२ ॥
इति श्रीशिवरामकृतिः काव्यलक्ष्मीप्रकाशः संपूर्णः ॥

२३७ छन्दःकौस्तुभः सभाष्यः-मू०-राधादामोदरः-भा०-विद्याभूषणः ।

मू. आ.–छन्दोभिर्विततागङ्ः कवयो यस्यानुकीर्तयन्ति गुणान् ॥ स जयति गोकुलवनिताजितान्तरः श्यामसुन्दरो भगवान् ॥ १ ॥

भा. आ.–अर्चितनयनानन्दो राधादामोदरो गुरुर्जीयात् ॥ विवृणोमि यस्य कृपया छन्दःकौस्तुभमहं मितवाक् ॥ १ ॥

मू. च.—द्विजकुलतिलकः श्रीमान्राधादामोदरो हरेः प्रेष्ठः ॥ स्वर्णैः सूत्रैर्ग्रथितं छन्दःकौस्तुभमिमं व्यतनोत् ॥ १४ ॥
वेदर्तुपक्षसङ्ख्याताश्छन्दसां वृत्तयोत्र याः ॥ लिखिताः सन्ति ताः सन्तः कलयन्तु कृपाकुलाः ॥ १५ ॥
भा. च.—श्रीराधादामोदरशिष्यो विद्या (दि) भूषणो नाम्ना ॥ छन्दःकौस्तुभशास्त्रे भाष्यमिदं सम्प्रति व्यदधात् ॥ १६ ॥
इति श्रीविद्याभूषणविरचिते छन्दःकौस्तुभभाष्ये मात्राप्रस्तारविवरणं नवमी प्रभा ॥ समाप्तोयं ग्रन्थः ॥ १७ ॥

२३८ छन्दःपीयूषः-जगन्नाथः ।

आ.—न्यायव्याकरणादिशास्त्रमखिलं संक्षुण्णमेवास्ति हि प्रायः प्राक्तननूतनैः सुकृतिभिश्छन्दस्तु नैवेत्यतः ॥
श्रीकण्ठस्मरणादवाप्य सुमतिं प्रीत्यै मया धीमतां त्सू [यत्सू] त्रं गुरु तत्कृतं लघु पुनस्तस्याथ सारं ब्रुवे ॥ १ ॥
सालङ्कारगुणं विदोषमपि यच्छब्दार्थयुग्मं बुधास्तत्काव्यं यश अघ [आद्य] नेकफलकं कार्यंतं [तथा] धीमताम् ॥
छन्दःशास्त्रनिबंधना खलु भवेत्तत्रोपयुक्ता यतिच्छन्दोभङ्गविहीनवाक्यरचनानेकप्रकारप्रथा ॥ २ ॥
सूत्रं संग्रहवाक्यमात्रमिह वै कर्त्तुं न कः शक्नुयात्तस्मिल्लाघवतोनुवृत्तिरचना स्पष्टा परं कौशलम् ॥
मात्सर्यं परिहाय तत्सुमतिभिर्द्रष्टव्यमत्रादरात्तचाप्यन्तरनुप्रविश्य विपुलस्यार्थस्य यद्वर्णनम् ॥ ३ ॥
शुद्धस्वानुभवप्रसिद्धविषयेप्येतन्मुनिर्नाब्रवीदेतद्वै मुनिरब्रवीदिति जडाः शुद्धा निबद्धाग्रहाः ॥
स्युः पञ्च द्विगुणा दशेति कथने किं मुन्यमुन्योर्भिदा यः सद्वस्तु वदेत्तमेव सुमतिं विज्ञा मुनिं मन्वते ॥ ४ ॥
ज्ञाता दानदयादमा निजनिजाभिप्रायसादायकारप्राजापत्यवैर्नरासुरैः [सुरवैः] स्रष्टुर्दमोत्रोक्तितः ॥
तस्मात्स्वाशयपाशवर्त्तिनि जने कस्मै किमाख्यायतां बालक्रीडनतो जगज्जनयिता तुष्येन्मनुष्येषु कः ॥ ५ ॥
पूर्वाचार्यकृतच्छंदःशास्त्रेणापरितुष्यन्मिश्रजगन्नाथस्तत्सूत्राणि प्राणैषीत् । तत्रेदमादिमं शास्त्रारम्भसूत्रं प्रेक्षावतः प्रवर्त्तयितुम् ॥
अथच्छन्दोनुशासनम् ॥
च.—शिष्टप्रयुक्तं यदतिप्रसिद्धं छंदश्च वृत्तं च तदुक्तमत्र ॥ ग्रन्थस्य भीत्या बहुवस्तिरस्य कृतो हि सोन्यत्र तदिच्छुतुष्टये ॥ १ ॥
श्रीरामं तनयं यमिष्टविनयं विद्याधरस्यात्मजाल्लेभे श्रीहरिकृष्णदेवदुहिता साध्वी सुभद्राभिधा ॥
गोपालीदयितेन तेन हि जगन्नाथेन संलोड्वि [ठि] ता— — — — — — — — —

२३९ छन्दोदीपिका-कुमारमणिभट्टः ।

आ.—सुन्दरमरविन्दशुतिवृन्दारकवृन्दवन्द्य सुखकन्दम् ॥ शिरसा मुकुन्द रुर [चरण] द्वन्दं वन्दामहेऽमब्दम् (?) ॥ १ ॥
वाजपेयिजयगोविन्दानुजपुरुषोत्तमस्य चरणौ वन्दे ॥ आचार्यस्य कविचाराडनजस्य यशो बहु विततं धरणौ ॥ २ ॥
माधवपण्डितराजं रुद्रणशिष्टं मनीषिबलभद्रम् ॥ मधुसूदनकविपण्डितमुख्यान्प्रणमामि पूर्वभवान् ॥ ३ ॥
हरिवंशजं चतुर्भुजपौत्रं बुधरुद्रणस्य नप्तारम् ॥ श्रीमत्पितामहमहं — — — — — — नौमि ॥ ४ ॥
कृत्वा पूज्यपितृव्यवेदमणिमत्यग्रप्रणामं ततस्तातश्रीहरिवल्लभस्य चरणौ नत्वा तथान्यान्गुरून् ॥
ग्रन्थांश [च्छ] स्भुहलायुधप्रभृतिभिः श्रीवाजपेय्यादिभिः सृष्टान् वीक्ष्य वदामि वृत्तरचनामाचार्यसूत्रक्रमात् ॥ ५ ॥
च.—श्रीवत्सगोत्रजनिना कुमारमणिना निजेष्टतुष्टा [ष्ट्य] र्थम् ॥ अनुजस्य वासुदेवस्यानुमते सङ्ग्रहोऽग्राहि ॥ १ ॥

नात्र काचन विचारचातुरी नैव कापि रसवस्तुमाधुरी ॥ बालबोधकृतये कृतं मया शोधयन्तु सुधिया [यो] दयामयाः ॥ २ ॥
अब्भ्रेण वेदाङ्गयुतेन युक्ते वर्षे पयोराशिशशाङ्कशक्ते ॥ १७६०
जातं तथा भाद्रवलक्षपक्षे मास्य [भास्व] तिथौ पूर्णमिदं शुभर्त्ते [र्क्षे] ॥ ३ ॥
इति श्रीभिट्टहरिवल्लभात्मजेन भट्टकुमारमणिना प्रकाशितायां छन्दोदिपिकायां गद्यप्रकरणं नामाऽष्टमः प्रकाशः ॥

२४० छन्दोमुक्तावली-शम्भुरामः ।

आ.—ध्यात्वा नागेश्वरेशानं नत्वाचार्य्यपरंपराम् ॥ छंदोमुक्तावलीं कुर्वे विद्वज्जनमनोरमाम् ॥ १ ॥
च.—गोत्रेऽभूत्कश्यपस्य द्विजवरतिलको ज्ञातिसन्नाहमोचः सीतारामोस्य सूनुर्हरिगुरुकरूणामत्रकः शंभुरामः ॥
छंदोमुक्तावलीयं हयवदनगले ख [स्व] र्पिता तेन भक्त्या विद्वन्मोदं वितन्वत्यतति मतिमतां वृत्तबोधं करोतु ॥ १ ॥
यदत्र सौष्ठवं किंचिद्गुरोरेव (च) मे नहि ॥ असौष्टवं चेत्तच्छोध्यं विद्वद्भिर्गतमत्सरैः ॥ २ ॥
कृतांजलिपुटो भूत्वा प्रार्थयामि द्विजानिति ॥ माभूद्व्यर्थः प्रयासो मे युष्माकं कृपयानघाः ॥ ३ ॥
छंदोमुक्तावलीकंठो हयग्रीव(:)प्रसादकृत् ॥ ददातु सुदृढां भक्ति पाठकेभ्यः स्वदायिनीम् ॥ ४ ॥
इति श्रीनिवासार्यशिष्येण शंभुराममिश्रेण विरचिताच्छंदोमुक्तावली समाप्ता ॥

२४१ वाणीभूषणम्-दामोदरः ।

आ.—राजत्कुंजरराजकत्ति विमेलादंचद्दुकूलावृति भास्वद्भोगिफणामाणि प्रविलसन्मुक्तामणिग्रामाणि ॥
पादांभोजभुजंगफूत्कृति रणन्मंजीरमंजुद्युति श्रेयो वः शिवशैलराजसुतयोर्देयादभिन्नं वपुः ॥ १ ॥
सत्तीह [सन्तीह] यद्यपि महाकविसंप्रणीतग्रंथा(स्तथा)पि मम बालिशताविलासः ॥
संपूर्णशारदविधावुदयं प्रपन्ने किन्नाम नाभ्युदयमंचति तारकापि ॥ २ ॥
अलसधियः प्राकृतमधिसुधियः केचिद्भवंतीह [ह] ॥ कृतिरेषा मम तेषामातनुतामीषदपि तोषम् ॥ ३ ॥
दीर्घघोषकुलोद्भूतदामोदर इति श्रुतः ॥ छंदसां लक्षणं तेन सोदाहरणमुच्यते ॥ ४ ॥
च.—मात्रावृत्तमिह प्रोक्तं चत्वारिंशत्त्रयाधिकम् ॥ त्रयोदशाधिकशतंवर्णवृत्तमिदं शुभम् ॥ १ ॥
इति श्रीदामोदरविरचितं वाणीभूषणं समाप्तम् ॥

२४२ वृत्तरत्नाकरः सटिप्पणः-टि० क्षेमहंसः ।

आ.—पब्वेकः पब्वेकनामा द्विजोत्तमः अभूत् ।
च.—छन्दः अभिरामं मनोरमम् ॥ इति वृत्तरत्नकराख्ये छन्दसि वाचनाचार्यक्षेमहंसविरचिते समासत्वाय
टिप्पणके षट्प्रत्ययाध्यायः समाप्तः ॥
वाचनाचार्यश्रीसुखनिधानगणिगजेन्द्राणां पं० सकलकीर्तिना लिपीकृतं झिंझुपुरे भद्रं शुभं भवतु ॥

२४३ वृत्तरत्नाकरः सटीकः-मू० केदारभट्टः टी० जगन्नाथमिश्रः ।

टी. आ.—जयति धाम निकाममनोहरं किमपि बालतमालसमद्युति ॥
वहति काचन काञ्चनवल्लरी यदुपकण्ठमकुण्ठमहाश्रियम् ॥ १ ॥
वृत्तरत्नाकरे व्याख्या भूरिभिः सूरिभिः कृताः ॥ यथामति तथापीह निगूढार्थाय रच्यते ॥ २ ॥
व्यर्थं शास्त्रान्तरार्थोक्तिमुदाहरणविस्तरम् ॥ व्याख्यान्तरनिरासं च हित्वा सिद्धान्त उच्यते ॥ ३ ॥
छन्दःशास्त्रस्य सिद्धान्ताः पूर्वैर्नाधिगता हि ये ॥ तानिह प्रेक्षतां कश्चिद्विपश्चिद्वीतमत्सरः ॥ ४ ॥
अकृतमतिदुष्प्रवेशे प्रत्ययगहने निगूढार्थे ॥ छन्दःशास्त्रसरस्वति सरस्वति त्वत्कृपावलम्बोहम् ॥ ५ ॥
अभिमतार्थसिद्धिसम्भावितप्रतिबन्धकप्रशमाय कृतं तत्क्षमेष्टदेवताकर्मकनतिलक्षणं मङ्गलं शिष्यशिक्षार्थमध्येतृणामनुषङ्गतो मङ्गलसिद्ध्यर्थं चोपनिबध्य ग्रन्थारम्भं प्रतिजानानः प्रेक्षावत्प्रवृत्त्यपेक्षितमनुबन्धचतुष्टयं दर्शयति । सुखेत्यादिना श्लोकत्रयेण ॥

टी. च.—अतिरोहितार्थमन्यदिति ॥
सुभद्रया श्रीहरिकृष्णपुत्र्या रामेण विद्याधरसूनुना च ॥ यो लब्धजन्मा जगदादिनाथः स वृत्तरत्नाकरवार्तिकं व्यधात् ॥१॥
वेदरामवसुभूमिमितासु विक्रमार्कत इतासु शरत्सु ॥ बाहुलस्य बहुलेतरपक्षे धूर्जटेः पुरि विनिर्मितमेतत् ॥ २ ॥
यज्ञा [ज्ञ] आदरतोकारि वाणीभूषणभूषणम् ॥ तज्जवाणिप्रसादस्य फलमेतद्धि वार्तिकम् ॥ ३ ॥
वृत्तरत्नाकरावेशलब्धं वार्त्तिकमौक्तिकम् ॥ तदर्पणेन प्रीतोऽस्तु भगवान्भक्तवत्सलः ॥ ४ ॥
नातिमानितया हेयं बुधा वार्तिकमौक्तिकम् ॥ बहुलोहा नवाप्यर्थसाधकं वो भविष्यति ॥ ५ ॥
वृत्तरत्नाकरान्तःस्थरत्नानामुपलब्धये ॥ पाषाणरचितः सेतुर्हेतुर्नाम कथं भवेत् ॥ ६ ॥
रत्नाकरस्यातितरां विवृद्धेश्चन्द्रोदयो हेतुरिह प्रसिद्धः ॥ नूनं तदन्तःस्थितरत्नलब्ध्वै [ब्ध्यै] न वार्तिकात्कारणमन्यदस्तु ॥७॥
योवेदयद्ब्रह्महिरण्यगर्भं यतः प्रवृत्तिः प्रसृता पुराणी ॥ तेनैव देवेन कृतोस्ति लुप्तश्छन्दःप्रपञ्चस्य पुनः प्रकाशः ॥ ८ ॥
जीवेनानेनात्मनानुप्रविश्य यो वै देवो व्याकरोन्नामरूपे ॥ द्रष्टा दृश्यं दर्शनं चेति मायाविस्तारोयं यस्य तस्मै नमोऽस्तु ॥९॥
यो वै जाग्रत्स्वप्नसुप्त्येकसाक्षी तद्धर्मास्पृक्शुद्धबोधस्तुरीयः ॥
लक्ष्यो नान्तःप्रज्ञ इत्यादिवाचा तस्मै देवायास्तु नित्यं प्रणामः ॥ १० ॥
कृते जगन्नाथ इतिश्रुतेन मिश्रेण रामांघ्रिनिषेवकेण ॥ सद्वृत्तरत्नाकरवार्तिकेसौ समाप्तिमध्याय इयाय षष्ठः ॥ ११ ॥
इति चतुर्थम्प्रकरणम् ॥ इति वृत्तरत्नाकरवार्तिके प्रत्ययनिरूपणं षष्ठोऽध्यायः ॥
इति श्रीमिश्रजगन्नाथकृतवृत्तरत्नाकरव्याख्या वार्तिकाख्या समाप्ता ॥ श्रीः ॥

२४४ वृत्तरत्नाकरः सटीकः मू० केदारभट्टः टी० श्रीकण्ठः ।

टी. आ.—नत्वा गिरीशं गिरिजासमेतं विनायकेनाध्युषितं ततश्च ॥ प्रज्ञानरूपेण निजेन वृत्तरत्नाकराख्यं विवृणोति छन्दः ॥१॥
टी. च.—इदानीं वृत्तिकारो वृत्तिस्वरूपपूर्वकमात्मनो नाम कथयति ॥
विस्पष्टा च पदन्यासैश्श्रोतृसन्देहवल्लभा ॥ वृत्तरत्नाकरव्याख्या कृता श्रीकण्ठसूरिणा ॥ १ ॥

कृत्वा वृत्तिमिमां पुण्यां यदि भावं [पुण्यंयदेवा] वर्जितं मया ॥ तेनोल्लसन्तु लोकानामतीव मतयोऽमलाः ॥ २ ॥
इति श्रीकण्ठपण्डितविरचितायां वृत्तरत्नाकरच्छन्दोवृत्तौ षट्प्रत्ययविधानो नाम षष्ठोध्यायः समाप्तिमगमत् ।

२४५ वृत्तरत्नाकरः सटीकः-मू० केदारभट्टः टी० सोमचन्द्रः ।

टी. आ.—यत्पादाग्रनखांशुराजिररुणा नम्रालिके राजते तत्कालागतसम्पदः पदततिः सद्यावकाङ्काकला [किल] ॥
तं नत्वा जयमङ्गलैकवसतिं सङ्कल्पकल्पद्रुमं श्रीमत्पार्श्वजिनेश्वरं मदगजं मोहांघ्रिपोन्मूलनम् ॥ १ ॥
गुरोः प्रसादादधिगम्य वृत्तरत्नाकरच्छन्दस उद्यमेन ॥ सारं मया किञ्चिदथास्य वृत्तिर्विधीयते मुग्धसुबोधहेतोः ॥ २ ॥
मयात्र शास्त्रान्तरदर्शनेन प्रोद्भूतनव्यार्थविशेषबोधात् ॥ व्याख्यायते केवलमेव सूत्रं पुरातनोदाहरणावली तु ॥ ३ ॥

टी. च.—सद्वृत्तरत्नाकरनामधेयशास्त्रस्य वृत्तांवधिकार एषः ॥ प्रस्तारनष्टादिकवर्णनोऽत्र सोमोदितायामजनिष्ट षष्ठः ॥ १ ॥
वादिश्रीदेवसूरेर्गणगगनविधोर्बिभ्रतः शारदाया नाम प्रत्यक्षपूर्वं सुजयपदभृतो मङ्गलाह्वस्य सूरेः ॥
पादद्वन्द्वारविन्दे बुधमधुपहिते भृङ्गभङ्गिं दधानो वृत्तिं सोमाभिरामामकृत कृतिमतां वृत्तरत्नाकरस्य ॥ २ ॥
प्रमादादौत्सुक्यात्क्वचिदनवबोधेन यदि वा ममैतस्यां वृत्तौ सुहृदयजनाः कोमलमतेः ॥
अवद्यं चेत्किञ्चिद्भवति भवतामञ्जलिरयं प्रसादं कृत्वा तत्प्रणयमतिभिः शोध्यमखिलम् ॥ ३ ॥
यावच्चन्द्रमसश्छलेन विलसद्दीप्तप्रदीपाञ्चिते रम्येऽनुक्षि [क्ष] पमन्तरिक्षफलके बद्धोन्मदं खेलति ॥
तारासारदुरोदरेण निखिलं दिक्कामिनीमण्डलं जीयात्तावदियं मनोहरपदा वृत्तिः प्रसादात्सताम् ॥ ४ ॥
श्रीविक्रमनृपकाले नन्दकरकर्पीटयोनिभूसङ्ख्ये संवत् १३२९ समजनिरजोत्सवदिने वृत्तिरियं मुग्धबोधकरी ॥ ५ ॥
सर्वाग्रं ग्रन्थाङ्के रुद्रमितशतानि नवतियुक्तानि ॥ अत्रानुष्टुब्गणनायोगाज्जातानि किञ्चिदधिकानि ॥ ६ ॥
समाप्तेयं सोमचन्द्रकृता वृत्तरत्नाकरबृहद्वृत्तिः ॥

२४६ गीतगौरीशसंगीतम्-भानुदत्तमिश्रः ।

आ.—संध्यानृत्यविधौ भुजंगमपतेर्गीतामृतं शृण्वतः प्रत्यक्षिस्खलितप्रमोदसलिलस्तोमे तनौ सर्पति ॥
मौलेस्त्पथगा किमु त्रिपथगा जातेति जातागसो देवस्य त्रिपुरांतकस्य चलितं न्यालोकितं पातु नः ॥ १ ॥
भानोर्गीतिः सुधास्फीतिः शंभोर्डमरुडिंडिभिः ॥ विदुषां रसनारंगभूमिर्भाराति नृत्यताम् ॥ २ ॥
च.—इति श्रीमिश्रभानुदत्तविरचिते गीतगौरीशसंगीते महाकाव्ये दशमःसर्गः ॥ १० ॥

२४७ नन्दिकेश्वरकाशिका सटीका मू०-नन्दिकेश्वरः टी०-अभिमन्युः ।

मू. आ.—नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ॥ उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ १ ॥
टी. आ.—नमः शिवाय देवाय सर्वज्ञाय परात्मने ॥ यस्योन्मेषनिमेषाभ्यां व्यक्ताव्यक्तमिदं जगत् ॥ १ ॥
श्रीशं गुरुं कुमारं च शैवतत्त्वविशारदम् ॥ प्रणम्य नन्दिकेशादीञ्शिवभक्तान्मुहुर्मुहुः ॥ २ ॥
काशिकामादिसूत्राणां नन्दिकेशकृतां शुभाम् ॥ लोकोपकारिणीं दिव्यां व्याकरोमि यथामति ॥ ३ ॥

इह खलु सकललोकनायकः परमेश्वरः परमशिवः सनकसनन्दनसनत्कुमारादीञ्छ्रौतृन्नन्दिकेशपतञ्जलिव्याघ्रपादव-शिष्ठादींश्चोद्धर्तुकामो ढक्कानिनादव्याजेन चतुर्दशसूत्र्यात्मकं तत्त्वमुपदिदेश । तदनु सर्वे मुनीन्द्रवर्याश्चिरकालमाश्रि-तानामस्माकं चतुर्दशसूत्र्यात्मकं तत्त्वमुपदिदेशेति मत्वास्य सूत्रजालतत्त्वार्थं नन्दिकेश्वरो जानातीति नन्दिकेश्वरं प्रणिपत्य पृष्टवन्तः । तेषु पृष्टवत्सु स षड्विंशतिकारिकारूपेण तत्त्वं सूत्राणामुपदेष्टुमिच्छन्निदमाचष्ट—नृत्तेति ॥

मू. च.—तत्त्वातीतः परः साक्षी सर्वानुग्रहविग्रहः ॥ अहमात्मा परो हल् स्यादिति शंभुस्तिरोदधे ॥ २६ ॥
इति नन्दिकेश्वरकृतकाशिका ॥

टी. च.—सर्वतत्त्वजनकः स्वयं तत्त्वातीतः इति ज्ञापनार्थमेतत्सूत्रं चकारेत्याह तत्त्वातीत इति ॥ सर्वानुग्रहविग्रहः साक्षी तत्त्वातीतो हल् स्यादिति ढक्कानिनादव्याजेन सर्वेषां मुनिजनानां तत्त्वमुपादिशंस्तिरोदधे इत्यर्थः । हकारः शिववर्णः स्यादिति शैवागमस्थितिरिति शिवम् ॥ इति उपमन्युकृता नन्दिकेश्वरकाशिकायास्तत्त्वविमार्शिनी संपूर्णा ॥

२४८ उणादिटीका ।

आ.—विधाय गुरुपादयोः प्रणतिमार्तदुःखच्छिदोर्यथामति विरच्यते विवरणं ह्यनाद्यकृतिः (ह्युणाद्याकृतेः) ॥
समस्तबुधसद्दृशा प्रथितिमेतदेतु त्वरा परोपकृतिहेतुकं यदि समस्तमोदप्रदम् ॥ १ ॥ कारुरिति ॥

२४९ कातन्त्रमन्त्रप्रकाशः-कर्मधरः ।

आ.—शेषाशेषफणामणिव्यतिकरे कान्ताकृतिं बिम्बितां पश्यन्ती रहसि स्थितापि परिषद्भ्रान्त्या यियासुर्मुहुः ॥
या प्रौढापि नवं समागमरसं भावैः समातन्वती श्लिष्टा गाढमुरःस्थलेन हरिणा लक्ष्मीः श्रिये सास्तु वः ॥ १ ॥
त्रिलोचनख्यातमभिन्नदुर्गं सर्वं नमस्कृत्य विविक्तविद्यम् ॥ कातन्त्रमन्त्रार्थविनिश्चयार्थमयं प्रयत्नः क्रियते शिशूनाम् ॥ २ ॥
दुर्गत्वमुन्नीय सपञ्जिकाया वृत्तेर्विवेके विजयः प्रवृत्तः ॥ विवेचयंस्तद्वचनानि वाग्मी स्वयं पुनर्दुर्गतमो बभूव ॥ ३ ॥
ततस्ततां युक्तिभिरुक्तिमुक्ताविविक्तपङ्क्तिं क्वचिदप्यमुख्यम् ॥ संयोजयिष्ये निजगीर्गुणेन मतां हृदि श्रीमतिसंश्रयाय ॥ ४ ॥
त्रिलोचनाचार्यवचःप्रसादाद्दुर्गस्य वृत्तिः सुगमा यदीयम् ॥ क्वचित्क्वचिन्मे वचसोवकाशः शिलोञ्छवृत्त्या घटते तथापि ॥ ५ ॥
अभूत्किलाम्भोरुहभूप्रसूते कायस्थवंशे धरणीव तारे ॥ विश्वोपकारव्रतरक्षणेन श्रीमेघनामा धृतमेघधामा ॥ ६ ॥
महोपकारोत्र महोदयश्च यशश्च भूवल्लभवल्लभत्त्वम् ॥ इत्याहृतोसौ (बहु) वैद्यविद्यामनेकविद्याधिगमे कृतेपि ॥ ७ ॥
जातस्तत्तनयस्त्रिलोचन इति ख्यातास्त्रिवेदी विदामाधारो (गदनिग्रहात्रि) भुवनप्रख्यातकीर्तिव्रजः ॥
त्रैवर्गी समुपासनामभिदधच्चित्तं त्रिनेत्रे दधद्यः शास्त्रेण वृथा दयादधिकया [दयाधिकतया] स्वं नाम सार्थं व्यधात् ॥ ८ ॥
तस्यात्मजः समभवत्कुलशीलशाली बोधैकविद्यो— — — — — — —
भक्त्या गदाधरपदाधरवर्तिमूर्धा नाम्ना गदाधर इति प्रथितप्रकर्षः ॥ ९ ॥
येनातुरतरदेहादधरयता सपदि विषमगदं जातानि ॥ — — — — —वैद्यसमूहे प्रगीतसद्यशसा ॥ १० ॥
पुत्रस्तस्याजनि — — — — — — — — संप्रदाता—व्याख्या—पृथगपिवहन्भूधरो धीरधैर्यः ॥
योभूत्स्थैर्यव्यथितजनितोल्लाघतासंविधानाद्धर्मोद्रेकादपि च जनयन्न त्वयं नाम विश्वे ॥ ११ ॥
अमुष्मादुद्भूतो मय इव वपुष्मान्नियतिमान्सुधाधामेवाब्धेर्जगति भवनाथस्तुतकथः ॥

पितृभ्यामाराध्य त्रिभुवनगुरू (श्चाप्य) धिगतस्ततस्तस्मादासात्प्रथितपृथुकीर्तिर्दिशि दिशि ॥ १२ ॥
आकतिनाम्नातत्त्व [नाम्नतत्त्वश्च] धन्वन्तरिसमक्रमः ॥ यशोधनो यः सुखिनीश्चक्रे तात्कालिकाः प्रजाः ॥ १३ ॥
विद्यां विश्वजनीनां परम्परीणां वहन्नपि प्रगुणाम् ॥ शब्दागमसदलंकृतिसाहित्यैकाश्रयो योभूत् ॥ १४ ॥
साहिश्रीमहमूत्ततो वसुमतीचक्रैकशक्राद्गुणग्रामैस्तोषितचेतसोधिगतवान्सत्कारपूर्वां श्रियम् ॥
— — — — — — — सुरसरित्कूलेकरे पत्तने भेजे यस्त्रिगणं विभज्य समया भक्त्या सुमित्रान्वितः ॥ १५ ॥
तत्तनयः श्रितविनयो विधृतनयः सुकृतविसंशयस्थिरधीः ॥ अभ्युन्नतनिजवंशप्रदीप इव देवनाथोभूत् ॥ १६ ॥
पुण्यश्रियां तत्फलमाशिषां वा सच्छ्रोत्रियाणां परितोषितानाम्॥श्रीभावनाथेन सु(तस्यलेभेवयोधिकेन द्युतिमत्सुजन्म)॥१७॥
जितेन्द्रियोसौ भविता पदच्युतैर्नृपैरपि स्वस्थितयेऽर्थनीयः॥देवाज्ञया तैरिति निर्मितेन यो देवनाथत्वमियाय नाम्ना ॥१८॥
गुणैरनूनैः स्ववशीकृतस्य हुसेनसाहेः सचिवत्वमेत्य ॥ गवां द्विजानामपि यः शरण्यो भग्नान्प्रतिष्ठापयति स्म राज्ञः॥१९॥
यस्तन्वन्प्रतिघत्वं दिशि दिशि सरसीः शुचीरपः सृजति॥ पथि पथि भक्तिविशेषैः परिपूर्णावध्यपां[र्णावाप्रपा]व्यतनोत्॥२०॥
आरामैरभिरामान्ग्रामान्यः पात्रसात्कृतवान् ॥ सुचिरं सत्रमतानीद्वाराणस्यादितीर्थेषु ॥ २१ ॥
गवां सहस्रं (य) द्दत्तं श्रोत्रियैरुप (भु) ज्यते ॥ दत्त्वा प्रत्याददानस्तु सूर्यास्तं याति किं ह्रिया ॥ २२ ॥
बलिप्रभृतिभिर्दत्ता विष्णवे मृ (न्म) यी मही ॥ सैव स्वर्णमयी रोमप्रश [हेमप्रस्थ] शैलवनान्विता ॥ २३ ॥
ब्रह्माण्डं यो व्यतरदखिलं श्रोत्रियेभ्यो विभज्य स्थायीभावादिव य — — — — तोयद्यशोगण्डमैच्छत् ॥
हैमं शैलं सुरविटपिनं कामधेनुं च दत्त्वा तत्स्वामित्वादिव शतमखं प्रोचुरन्ये प्रतीष्ठम् ॥ २४ ॥
यष्पद्वारोपात्रे[यस्यद्वारोपान्ते]भूपा निजपदविरहगालितगुरुगर्वास्तिष्ठन्तं स्वं राज्यं लब्ध्वा यदुचितविरचितपरिचितहर्षाः॥
जायन्ते किंवान्यद्येन क्वचन वचनमथ न वितथमुक्तं शत्रूणामप्यन्तः कालं मधुरमकटु बहु विनियुक्तम् ॥ २५ ॥
गोमूत्रिकाबन्धोयम्॥ देवनाथो लसत्कीर्त्या स्तृणाति जगतां त्रयम्॥ अवभृथोच्छ्वसन्मूर्त्या प्रीणाति जगतामयम् ॥ २६ ॥
पुत्रा यदीयाः षडमी पवित्रचरित्रचित्रीयितविश्वभागाः॥सौभाग्यभाग्योपचयैरनूनाःसत्कीर्तिमूर्तिस्थितिनीतिभाजः॥२७॥
शिवनाथो रघुनाथो रघुरिव वंशोन्नतेः कर्ता ॥ सोम इवातिद्युतिमान्ख्यातः श्रीसोमनाथश्च ॥ २८ ॥
श्रीवारनाथोपि रणे प्रवीरो धन्यो वदान्यः सुकृती कृती वा॥ श्रीवादिनाथश्च तथादिनाथो वृत्ताद्यनाथस्मृतिचारुचित्तौ ॥२९॥
स देवनाथः स्फुटमेव यस्य यश्चाप्यमी नन्दनकल्पवृक्षाः ।
श्रीराघवाद्य (द्याः) मणिमण्डिताङ्गाः शाखाभृतोभीप्सितमुत्सृजन्ति ॥ ३० ॥
भ्रातुः कनिष्ठस्य पदेभिषिक्तो यद्गोपिनाथोपि परोपशान्त्यै ॥
ततोपि यो व्यञ्जितधीर्मघोनः सख्यं न नाम्ना भुवि कर्मणापि ॥ ३१ ॥
पुत्रपौत्रीणभावेपि योभ्यमित्रीणतां रणे ॥ दधद्विद्यासु पारीणोप्यभूदध्ययनप्रियः ॥ ३२ ॥
कलापके व्याकरणे गभीरे संदेहसंदोहमपोहयिष्यन् ॥ निवश्च[निबन्ध]मेतं बहुयुक्त्युपेतं सोचीकरत्कर्मधरेण तेन ॥ ३३ ॥
यशोधरायणो योसौ लक्ष्मीधरसुतः (कविः) ॥ यः कृती याज्ञरूपेयः श्रोत्रपेयवचोवृतः ॥ ३४ ॥
यशोधरलक्ष्मीधरयोश्च निजकीर्तिपद्यान्यद्यापि श्रूयन्ते —
श्रीरुद्रसिंहस्य निदेशवर्ती यशोधरः शाब्दिकचक्रवर्ती॥ कवित्ववक्तृत्वकलानिवासी जागर्ति भूमौ नवकालिदासः॥ ३५ ॥
द्राक्षादआ (क्षा) नकआ (क्षा) मनुभवितुमलं काकला काकलीनां

कौमल्ये कोकिलानां विधुरुचिररुचिर्द्राङ्मुधाभूत्सुधाण (पि) ॥
वीणा प्रावीण्यहीना मधुरिमधुरया हापि हैयङ्गवीनं यस्या याशोधरी सा जगति विजयते भारती भारतिभ्याम् ॥ ३६ ॥
मधुरिमगुणगर्भैर्वैदर्भसंदर्भसर्वस्वगी: कलितसकलशब्दमर्मागम: शर्ववर्मा न किम् ॥
रसमयमृदुगद्यपद्यानवद्य: स लक्ष्मीधर: प्रभवति वरवैरिवर्गाधिसर्गाग्निसर्गार्चित: ॥ ३७ ॥
वाररुचं परिशिष्टं टीकामपि वार्धमानिकोपेताम् ॥ विद्यानन्दप्रभृतीन्समीक्ष्य चिरमेष यत्नो मे ॥ ३८ ॥
हे धीरा: शृणुतावधाय विदधे नत्वाञ्जलिं मूर्धनि तत्कालस्यमपास्य हास्यमिह संधेयं निबन्धे मन: ॥
किं वा किं विनयोत्करेण यदि व: कातन्त्रमोमुष्णुता तत्सेव्यो भवितायमेव यदि वा स्वार्थोपि[स्वार्थोऽपि]मा लभ्यते॥३९॥
द्वयमेतदसंबद्धं खलता सुमनस्विता ॥ किंतु संभाव्यते क्वापि खलता सुमनस्विता ॥ ४० ॥
तत्र प्रथमं तावच्छिष्टजनमन:परितुष्टयेऽभीष्टतमकर्मनिर्वाहकादृष्टसृष्टये वेष्टदेवतां वाचनिकशास्त्रप्रस्तावाद्वचनेन पूर्वार्धेन नमसित्वापरार्धेन प्रेक्षापूर्वकारिप्रवृत्त्यङ्गभूतं संबन्धं प्रयोजनं वाभिधित्सुर्भगवान् वृत्तिकरोन्यदीयमपि दृष्टानुभावतया पद्यमिदमलेखि—देवदेवमित्यादि ॥
तन्त्रं सूत्रं ईषत् तन्त्रं कातन्त्रमिति ॥ वर्द्धमानमतं तु लक्ष्यते ॥ इति दुर्गपाद: ॥ प्रबोधकारोऽप्याह ॥ विजयानन्देन ॥ इति त्रिलोचना: ॥ व्याख्यानस्य जयादित्यादिकृतकातन्त्रसंबन्धित्वनिराकरणार्थं विशेषणमाह—शार्ववार्मिकमिति ॥ शर्ववर्मणाचार्येणानुवादरूपेण कृतमिति ॥ किंतु व्याख्यानस्य शार्ववार्मिकत्वव्यपदेशार्थमिदम् । तेन 'कातन्त्रम्' 'शार्ववार्मिकम्' कुमारप्रसादात्प्रवृत्तत्वात् 'कौमारम्' तथा वरुणेन कलापेन प्रोक्तं 'कालापम्' इति चतस्रोस्य व्याकरणस्य संज्ञा: अजायन्त ॥ गौडीयास्तु 'कलाप' इति मन्यन्ते । 'यतो' बर्हिबर्हमवष्टभ्याचार्येणास्य नामचिकीर्षया पृष्ट: कुमार: कलापसंज्ञामेवास्मै दिदेश इति किंवदन्ती ॥ यदाह पृथ्वीधर:—कलापेन परम्परासंबन्धात्कलापकं व्याकरणमुच्यते इति ॥ ....

किं नाम संस्कृतत्वमिति चेत्, देवभाषितत्वम् ॥ गाइ—घोडा—हाथि—प्रभृतयश्च न देवशब्दा इति ॥ यदाहुरलंकारकृत:— 'संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभि: ' इति ॥ अत्र किल मिलितनिखिलविद्वज्जनायां मीमांसितसकलशास्त्रार्थतत्त्वायां परिषदि शलिवाहनाभिधानमवनीश्वर बोधयितुं कृतप्रतिज्ञेन शर्ववर्मणाचार्येणाराधित: प्रसादीकृतात्मदर्शनो भगवान्कुमारो निजव्याकरणज्ञानमाविर्भावयितुं श्लोकपादरूपमिदमुद्देशसूत्रमवोचत्—सिद्धो वर्णसमाम्नाय:' इति ॥ परिभाषेयम् वर्णसमाम्नायस्य व्यवस्थापकत्वादिति दामोदरमिश्रा: ॥..........
ईमैश्च वाक्यैश्च शुभैश्च रम्यै: प्रभातकाले नृपमन्दिरस्थ: ॥ श्रीविक्रमादित्यविबोधनाय काम्पिल्लनाग: स्तवनं करोति ॥१॥
यदाह कुलचंन्द्र:—अधिकारो विधि: संज्ञा निषेधो नियमस्तथा ॥ परिभाषा च शास्त्रज्ञा: षड्विधं शास्त्रलक्षणम् ॥ २ ॥
दशधेत्यपि कश्चित्—अतिदेशोनुवादश्च विभाषा च निपातनम् ॥ सार्धमेतैश्चतुर्भिश्च दशधा सूत्रलक्षणम् ॥ भोजदेवोऽपि यदाह ॥..........
इति करकुलालंकरणश्रीदेवनाथसमादिष्टकर्मधरविरचिते कातन्त्रमन्त्रप्रकाशे प्रथम: संधि: समाप्त: ॥..........
चान्द्रकाशिकादौ पठ्यते ॥..........यदाह श्रीपतिदत्त: ॥ तथा च कालिदास:—न मामवति सद्वीपा रत्नसूरपि मेदिनी इति॥
इति करणकुलालंकरणश्रीदेवनाथसमादिष्टपण्डितश्रीकर्मधरविरचिते कातन्त्रमन्त्रप्रकाशे द्वितीय: संधि: समाप्त: ॥

च.—अनूङिति किम्—पङ्गूत्वं पङ्गुता करभोरूत्वं करभोरूता ॥ — — — — — — —

२५० क्रियाकलापः-विजयानन्दः ।

आ.–जयति चतुर्दशभुवनाधिपत्यलक्ष्मीविभूषितोत्सङ्गः ॥ भक्तैकपक्षपाती कृपार्णवः श्रीमहादेवः ॥ १ ॥
अस्खलितखेलगतिना विद्यानन्देन सत्प्रबन्धेषु ॥ धातुप्रयोगकदलीवनमनघं रोप्यते तदिदम् ॥ २ ॥
च.–सामस्त्यादपि धातूनामनन्तं क्व नाम पर्यन्ते ॥ अभिधानशास्त्रदृष्ट्या भेदादेव स्वयं योज्या ॥ ६७ ॥
पूर्वं पूर्वकविप्रणीतविविधग्रन्थेषु दृष्टान्ततो निर्णीता हृदये निरूप्य निपुणं ये धातुपारायणम् ॥
धातूनां तनुधीरपि व्यरचयत्तेषामिमं संग्रहं विद्यानन्दकविर्विशुद्धहृदयः कायस्थवंशोद्भवः ॥ ६८ ॥
व्युत्पत्तिवर्त्मन्यकृतप्रवेशैः शास्त्रे जडैर्नेदमुपेक्षणीयम् ॥ धात्वर्थतन्मात्रनिरूपणेन यतो मतिर्मोहमुपैति तेषाम् ॥६० ॥
इमां प्रत्यक्षपीयूषसमृद्धिमधुरक्रियाम् ॥ समस्ताः सन्तु धीराणामुपयोगादिकक्रियाः ॥ ७० ॥
इति सारस्वतोज्जा [द्गा] रकारकायस्थकुलाचर [ल] विजयानन्दकृतौ क्रियाकलापे चतुर्थोध्यायः ॥

२५१ जैनेन्द्रव्याकरणं सटीकम्-मू० देवनन्द्याचार्यः-टी० गुणनन्दिः ।

आ.–जगत्रितयनाथाय नमो जन्मप्रमाथिने ॥ नयप्रमाणवाग्रश्मिध्वस्तध्वान्ताय शान्तये ॥ १ ॥
प्रत्याहारस्यादाविष्टदेवतास्तुतिवचनं मङ्गलार्थमुपात्तम्–
च.–इति पञ्चवस्तुके (पञ्चमम्) आख्यातवस्तु समाप्तम् ॥
सूत्रस्तम्भसमुद्धृतं प्रविलसन्न्यासोरुरत्नक्षितिश्रीमद्वृत्तिकपाटसंपुटयुतं भाष्यौघशय्यातलम् ॥
टीकामालमिहारुरुक्षुरुचितं जैनेन्द्रशब्दागमप्रासादं पृथुपञ्चवस्तुकमिदं सोपानमारोहतात् ॥ १ ॥
कृतिरियं देवनन्द्याचार्यस्य परवादिमथनस्य ॥
सत्संधिं दधती समासमभितः ख्यातार्थनाम्नी — — — —
सैषा श्रीगुणनन्दितानितवपुः शब्दार्णवं निर्णयं नावत्यश्रमतो विवक्षुमनसां साक्षात्स्वयं प्रक्रिया ॥ २ ॥
इति श्रीमज्जैनेन्द्रशब्दागमाब्धिस — — — — — पञ्चवस्तुकप्रक्रियामणिमाला समाप्ता ॥

२५२ जैनेन्द्रव्याकरणमहावृत्तिः-अभयनन्दिः ।

आ.–देवदेवं जिनं नत्वा सर्वसत्त्वाभयप्रदम् ॥ शब्दशास्त्रस्य सूत्राणां महावृत्तिर्विरच्यते ॥ १ ॥
यच्छब्दलक्षणमसुव्रजपारमन्यैरव्यक्तमुक्तमभिधानविधौ दरिद्रैः ॥
तत्सर्वलोकहृदयप्रियचारुवाक्यैर्व्यक्तीकरोत्यभयनन्दिमुनिः समस्तम् ॥ २ ॥
शिष्टाचारपरिपालनार्थमादाविष्टदेवतानमस्कारलक्षणं मङ्गलमिदमाहाचार्यः–
लक्ष्मीरात्यन्तिकी यस्य निरवद्यावभासते ॥ देवनन्दितपूजेशे नमस्तस्मै स्वयंभुवे ॥ १ ॥
च.–चतुष्टयं समन्तभद्रस्य ॥ १२४ ॥ 'झयो हः' इत्यादि चतुष्टयं समन्तभद्राचार्यस्य मते भवति नान्येषाम् ॥
तथैवोदाहृतम् ॥ इत्यभयनन्दिविरचितायां जैनेन्द्रव्याकरणमहावृत्तौ पञ्चमाध्यायस्य चतुर्थः पादः समाप्तः ॥

२५३ परिभाषेन्दुशेखरव्याख्या-परिभाषार्थमञ्जरी-भीमः ।

आ.—परिभाषारसास्वादबद्धोदारधियामुना ॥ भीमेन रचिता सेयं परिभाषार्थमञ्जरी ॥ १ ॥

च.—इति श्रीमलेकरोपनामकमाधवाचार्यतनयभीमप्रणीता परिभाषार्थमञ्जरी समाप्ता ॥

२५४ परिभाषेन्दुशेखरव्याख्या गदा-वैद्यनाथः ।

आ.—ब्रह्मादयो यस्य न पारमापुयाद्गङ्गाद्भुतं मस्तकदेशगामिनी ॥
वामार्धदेहापि न चण्डिकाप ध्यायामि देवं सनकादिबन्धुकम् ॥ १ ॥
वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ॥ विवृतिं परिभाषेन्दुशेखरे तनुते गदाम् ॥ २ ॥

२५५ परिभाषेन्दुशेखरटीका-चित्प्रभा-ब्रह्मानन्दसरस्वती ।

आ.—विद्याधीशं त्रिनेत्रं विमलमतियुतं जन्मस्थित्यन्तकारि— — — — — — — — — — निखिलजनिमतां यश्च पूज्यः सुरेशैः ॥
आनन्दाब्धिं महेशः सकलकृतिनतो दुर्गमो बोधहीनैः सत्यज्ञानस्वरूपो विगतपरिमितिस्तं नुमो—गिरीशम् ॥ १ ॥
यस्याम्नायोभिधत्ते चकितमतिशयं निष्कलङ्कोऽप्यबाधो यस्य स्मृत्या भवाब्धिं तरति गतिमलः शुद्धसंवित्कृतात्मा ॥
तं श्रीकृष्णं दयेशं निगमनुतिचरं बन्धनं प्राणराशेर्ध्यायंध्यायं नमामश्चरितकलुषहस्त [दोः] स्रग्धरं वेणुमन्तम् ॥ २ ॥
यां शक्तिं समुपासते हि विबुधा देवेन्द्ररुद्रादयो यस्या धीशसहस्रतुण्डफणिभृच्छक्तो न वक्तुं गुणान् ॥
यस्या वेदवचांसि तत्त्वमनलं शक्तानि वक्तुं स्वतरतां ध्यायेन्मुनिशृङ्गशैलनिरतां प्राप्स्यातिभाग्यावलिम् ॥ ३ ॥
चितदुरितसमूहहं गणेशं जितमुनिधीरमुनीशवन्द्यपादम् ॥
जनिनिलयसुसंगसंनिधानाद्विपदमपाकुरुते नुमो हि यस्तम् ॥ ४ ॥
चित्प्रभानामिकाव्याख्यां परिभाषेन्दुशेखरे ॥ बालानामुपकराय कुर्वे भाष्यप्रदर्शिकाम् ॥ ५ ॥

च.—ब्रह्मानन्दं विमलमचलं — — — — परेशं विश्वाधारं विगतजनुषं धूर्वहन्तं धुरीणम् ॥
ध्यानध्येयं विविधमुनिभिर्वैद्यनाथं विनायं व्याख्या त्वेषा स्वकृतवचनैः कारितेयं कुकेतम् ॥ १ ॥
इति श्रीपरमहंसपरिव्राजकाचार्यगोविन्दानन्दभगवत्पादपूज्यशिष्यतारकब्रह्मानन्दसरस्वतीविरचिता चित्प्रभानाम्नी परिभाषेन्दुशेखरव्याख्या समाप्तिमगमत् ॥

२५६ परिभाषेन्दुशेखरदोषोद्धारः-मन्नूदेवः ।

आ.—नत्वा गणपतिं देवं नृसिंहं कमलायुतम् ॥ तातं शंभुं प्रसूं दुर्गां कृष्णदेवं तथाग्रजम् ॥ १ ॥
शास्त्रप्रवर्त्तकाचार्यान्पाणिनिप्रभृतीन्मुनीन् ॥ बालंभट्टाभिधं पायगुण्डोपाख्यं परं गुरुम् ॥ २ ॥
दोषा ये पण्डितंमन्यैः परिभाषेन्दुशेखरे ॥ दत्तास्तान्सम्यगुद्धर्तुं मन्नूदेवेन चिन्त्यते ॥ ३ ॥

च.—बाधकान्येव निपातनानि ॥ इतिश्रीमन्नूदेवेन विरचितः परिभाषेन्दुशेखरदोषोद्धारः समाप्तः ॥

२५७ परिभाषाप्रदीपार्चिः-उदयंकरः ।

आ.—अमन्दहृदयानन्दनिदानं शिवयोश्चिरम् ॥ नमस्करोति हेरम्बं निष्प्रत्यूहफलाप्तये ॥ १ ॥
वल्लकीपुस्तककरां पुण्डरीकासनस्थिताम् ॥ शारदां नीरकुन्देन्दुधवलां भावयेतराम् ॥ २ ॥
कृत्वा पाणिनिसूत्राणामिति वृत्त्यर्थसंग्रहम् ॥ परिभाषाप्रदीपार्चिस्तत्रोपायो निरूप्यते ॥ ३ ॥
तत्र तावत्परिभाषात्वं नाम लिङ्गवत्त्वे सति संदिग्धार्थनियामकत्वम् ॥
परिभाषाप्रदीपार्चिष्युदयंकरदर्शिते ॥ प्रथमो व्याकृतोध्यायः संगतः संमतः सताम् ॥ १ ॥
न तुष्यन्ति मितोक्त्यैके परे मूढा बहूक्तिषु ॥ करवाणि ततो वाणि सकलावर्जनेञ्जलिम् ॥ २ ॥

च.—बृहद्विवरणानुसारिणस्त्वन्तरङ्गपरिभाषाया अनित्यत्वे इदमेवैकं ज्ञापकमङ्गीकृत्येमामकतव्यूहपरिभाषां नाजानान्तर्य-परिभाषामन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधत इत्येतां च परिभाषामकर्तव्यां मन्यन्ते । तत्सर्वमग्रे विवेचयिष्यामः ॥
परिभाषाप्रदीपार्चिष्युदयंकरदर्शिते ॥ द्वितीयो व्याकृतोध्यायः संगतः संमतः सताम् ॥ १ ॥
न तुष्यन्ति मितोक्त्यैके परे मूढा बहूक्तिषु ॥ करवाणि ततो वाणि सकलावर्जनेञ्जलिम् ॥

२५८ परिभाषाभास्करः-भास्करः ।

आ.—आखण्डलादिसुरमण्डलमण्डनं तमुद्दण्डकोकविरहानलदण्डचण्डम् ॥
ईडेहमत्र बहुबोधितपद्मकाण्डं मार्तण्डमन्धतमसं प्रति कालदण्डम् ॥ १ ॥
श्रीगुरून्पितरौ नत्वाग्निहोत्री भास्कराभिधः ॥ भास्करं परिभाषाणां तनुते बालबुद्धये ॥ २ ॥
युक्तायुक्ताभिसंबन्धं भूयो भूयो विद्वद्वृन्दम् ॥ नामं नामं याचे मन्दो मान्द्यं चेदं शोध्यं सम्यक् ॥ ३ ॥
मृद्वी मृद्वीकया तुल्या खरैरिव खलैर्यदि ॥ नादृतेयं कृतिस्तस्मादस्माकं हानिरस्ति किम् ॥ ४ ॥
तत्र तावद् 'भाष व्यक्तायां वाचि' इत्यस्मात् परितो भाष्यत इति व्युत्पत्तेः ॥

च.—न परिभाषावशादनिष्टापादनं सांप्रतमिति सकलेष्टसिद्धिः ॥
परिभाषाकमलिनीर्युक्तिरुग्भिर्विकाशयन् ॥ भास्करः पण्डितालीनां नतंसा [ततान] नन्दमव्ययम् ॥ १ ॥
अम्बिकेश्वरपुरीकृतवासादग्निहोत्रिकुलनीरधिचन्द्रात् ॥ पुण्यपूर्णपुरुषोत्तमभट्टादुद्बभूव सुकृती हरिभट्टः ॥ २ ॥
वेदवाक्यनिचयावचयेन प्रेक्षितो विधिरिवेह बुधौघैः ॥ लोकगीतविमलायतकीर्तिः सोपि सज्जनमणिर्जयति स्म ॥ ३ ॥
तस्मादुद्भूतकीर्तिः कृतसुकृतभरान्मन्त्रतन्त्रस्वतन्त्रः साधूनामग्रगण्योपरदलनविधौ मानवानां शरण्यः ॥
काशीक्षेत्राधिवासी हतकठिनतरारातिषड्वर्गदम्भः श्रीमन्तापाजिभट्टः सुरयजनरतः शुद्धधीराविरासीत् ॥ ४ ॥
तनयहद [इह] तदीयो धीरविद्वास्कराख्यः— — — — — (प्रचूरतरम) तीनामाशयं भावयित्वा ॥
परमितपरिभाषा भास्कराचार्ययत [ऽ] सुरतररविपादे सच्चिदानन्दरूपा ॥ ५ ॥
सोमतीर्थावासुकृतं— — — —वानि किंचन ॥ मन्ये गुरुकृपा कल्पलतिकैवादिकारणम् ॥ ६ ॥
इति श्रीमत्कासियाजि— — — — — न्वयिसंभवाग्निहोत्रिकुलतिलकायमानहरिभट्टसूनुश्रीमदापाजिभट्टसूनुभास्कर-विरचितपरिभाषाभास्करः समाप्तिमगमत् ॥

२५९ प्रयोगविवेकः सटिप्पणः-वररुचिः ।

आ.–प्रयोगमिच्छता ज्ञातुं ज्ञेयं कारकमादितः ॥ संज्ञया षड्विधं भेदास्त्रयोविंशतिधा पुनः ॥ १ ॥
तत्र पञ्चविधः कर्ता कर्म सप्तविधं भवेत् ॥ करणं द्विविधं चैव संप्रदानं त्रिधा मतम् ॥ २ ॥
अपादानं द्विधा चैव तथाधारश्चतुर्विधः ॥ करोति कारकं सर्वं तत्स्वातन्त्र्यविवक्षया ॥ ३ ॥
तत्र कर्तर्यभिहिते प्रथमैव विधीयते ॥ तृतीया वाथवा षष्ठी स्मृतानभिहिते द्विधा ॥ ४ ॥
तथा कर्मण्यभिहिते विभक्तिं विद्धि पूर्विकाम् ॥ अनुक्ते प्रथमां हित्वा पञ्चमीं सप्तमीं तथा ॥ ५ ॥

च.–वर्तमाने तु निर्देशे वर्तेते शतृशानचौ ॥ तव्यसत्संज्ञकाभ्यां च समासो न तु सिध्यति ॥ २५ ॥
ग्रन्थनाशभयाज्जन्तोः श्लोकानां पञ्चविंशतिः ॥ परार्थभावं निर्वोढुं प्रभये [वे] यं भवे भवे ॥ २६ ॥
इति श्रीवररुचिकृते प्रयोगविवेकसंग्रहे कारकचक्रं समाप्तम् ॥

टि. आ.–यो यथाविहितं शब्दप्रयोगं ज्ञातुमिच्छति तेनादितः कारकं ज्ञेयमिति ॥

टि. च.–प्रयोगलाभ [घ] वात्तुर्य्ययशोभिलाषिणां कारुण्यविलसितचेतसां प्रवृत्तिरिति तत्र दर्शनार्थमित्यर्थः ॥
इति श्रीवररुचिविरचिते प्रयोगविवेके संग्रहे तृतीयः पटलः ॥

२६० उपसर्गादिविचारः-रामेश्वरः ।

आ.–सुधाब्धिमध्ये मणिमुख्यमण्डिते द्वीपे शरप्रेतमयेथ मञ्चके ॥ कामेश्वराङ्के निवसद्भिभूत्यै ममास्तु किंचिन्महसां वरिष्ठम् ॥१॥
तातं त्रिभुवनतिलकं नत्वा रामेश्वरः प्रसूं चाथो ॥ उपसर्गादिविचारं कुरुते विदुषां प्रमोदसंसिद्ध्यै ॥ २ ॥
प्रादिगणपठिताः क्रियायोग उपसर्गसंज्ञां लभन्ते–
३ पत्रे गदाधरभट्टाचार्यैरुक्तत्वात् ॥
६ पत्रे तथा त्रिलोचनदासेनापि कातन्त्रवृत्तिपञ्चिकायाम् ॥
७ पत्रे अत एव शब्दकौस्तुभे–भट्टोजिदीक्षितैर्दत्तम् ॥
१६ पत्रे अत एव हरिरामतर्कालंकारभट्टाचार्यैः ॥

च.–अब्राह्मण इत्यत्राभावो बुध्यते नारोप इति सिद्धम् ॥ वस्वङ्गशैलभू १७६८ इति नञर्थः समाप्तः ॥

२६१ उपसर्गार्थदीपिका-हरिदत्तः ।

आ.–कृष्णं वन्दे श्रेयस्कामः ॥ १ ॥
सरस्वतीं नौमि सरस्वतीच्छुः सारस्वते तत्र सरस्वतीह ॥
रसाभिमग्नाः कवयो महान्तो यन्नोतीर्षति [त्तितीर्षति] तदत्र चित्रम् ॥ २ ॥

च.–गम्भीरभावा भान्तीयं भूरिभावुकमानिनी ॥ कृतिर्भूयाद्भगवतोर्भवयोः संमदाय मे ॥ २८८ ॥
परमानन्दसंदोहदायिनी मोहदायिनी ॥ चकास्तु रचना सेयमुपसर्गार्थदीपिका ॥ २८९ ॥
इत्युपसर्गार्थदीपिका ॥
वेदाङ्कभूपतिशक उपसर्गार्थदीपिकाम् ॥ निरमासी दिषदिशि दैवज्ञहरिदत्तभुक् ॥ २९० ॥

२६२ लघूपसर्गदीपिका समूला ।

मू. आ.—प्रपरापसमन्ववनिर्दुरभिव्याधिसूदतिनिप्रतिपर्यपयः ॥ उपआङिति विंशतिरेष सखे उपसर्गगणः कथितः कविभिः ॥ १ ॥

टी. आ.—श्रीगणेशाय नमः ॥ प्रउपसर्गः पञ्चदशस्वर्थेषु ॥ नियोगे प्रयुक्तः । वियोगे प्रोषितः ॥

मू. च.—स्पर्द्धेच्छाप्तिषु बन्धने च निलये वाक्ये समीपग्रहे अन्तर्भावनिवृत्तिविस्मयभयादानोर्ध्वकर्माशिषि ॥

कृच्छ्रे साग्रनिमन्त्रणाभिविधिषु श्लेषाभिमुख्येपि चाङ्निर्देशावधिविक्रियासु शकने स्थानादिकर्मण्यपि ॥ २० ॥

टी. च.—आविष् प्राकट्ये । आविष्करोति ॥ इति लघूपसर्गदीपिका समाप्तेयम् ॥

२६३ अभेदमण्डनम्-कृष्णशास्त्री ।

आ.—श्रीगणेशाय नमः ॥ अथाभेदवादः प्रपञ्च्यते ॥ अत्राहुः—अभेदस्य संबंधत्वविशेषिणो विरोधिनो नव्यवैयाकरणाः ॥

च.—इति विभावयन्तु सदसद्विचारनिपुणा विद्वांसः इत्यलं विस्तरभयाद्विरम्यते ॥

२६४ कारकनिरूपणम्-त्रिलोकनाथः ।

आ.—श्रीगणेशाय नमः ॥ अथ कारकाणि निरूप्यन्ते ।

कर्ता कर्म च करणं संप्रदानं तथैव च ॥ अपादानाधिकरणमित्याहुः कारकाणि षट् ॥ १ ॥

तत्र क्रियानिष्पादकत्वं कर्त्रादीनां षण्णाम् ॥

च.—इत्यादिकमपरमप्यूहनीयमिति दिक् ॥

श्रीमत्रिलोकनाथेन वैद्यनाथाङ्गजन्मना ॥ वादार्थश्रान्तमतिना पूरिता सप्तमी शुभा ॥

इति षट् (कार) कनिरूपणम् ॥

२६५ पूर्वपक्षावली-होरिलः ।

आ.—नमस्कृत्य शिवं साम्बं गणनायकसंयुतम् ॥ लभन्ते यत्प्रसादेन लोकाः सर्वमनोरथम् ॥ १ ॥

पुण्यग्रामसभायां तु व्याकृतौ मम संनिधौ ॥ पूर्वपक्षाः कृता लोकैः पण्डितैर्हि ससाधय [समाधये] ॥ २ ॥

लिख्यन्ते ते मया यत्नैरुपकाराय धीमताम् ॥ छात्राणां सुकृतैः पद्यैः श्रीमद्धोरिलशर्मणा ॥ ३ ॥

यत्तु धातोस्तन्निमित्तस्यैवेति ॥

९ पत्रे शेखरग्रन्थोपि भाष्यविरुद्धः ॥

च.—उपसर्गसंज्ञकानामभ्यासात्प्रागिति नादोषात् ॥

इति श्रीभट्टोजिदीक्षितेन (?) कृता पूर्वपक्षावली समाप्ता ॥

२६६ वाक्यपदीयव्याख्या-पुण्यराजः ।

च.—आचार्यवसुराजेन न्यायमार्गं विचिन्त्य च ॥ प्रणीतो विधिवच्चायं मम व्याकरणागमः ॥

मयापि गुरुनिर्दिष्टाद्भाष्याम्नायवि [याद] लुप्तये ॥ काण्डत्रयक्रमेणायं निवन्धः परिकीर्तितः ॥

ग्रन्थकारेण ग्रन्थेऽस्मिन्स्वस्मिन्गुर्वागमः स्फुटम् ॥ इत्येवं वाक्यकाण्डस्य प्रमेयविषयाः स्मृताः ॥
संगतिः कीर्तिता लघ्वी समासेन निराकुला ॥
विद्वज्जनानां यः खलु सर्वत्र गीयते तत उपसृत्य विरचिता राजानकशूरवर्मनाम्नैव ॥
शशाङ्कशिष्याच्छ्रुत्वैतद्वाक्यकाण्डं समासतः ॥ पुण्यराजेन तस्योक्ता संगतिः कारिकाश्रिता ॥
गुरवे भर्तृहरये शब्दब्रह्मविदे नमः ॥ सर्वसिद्धान्तसंदोहसारामृतमयाय च ॥
इति श्रीपुण्यराजकृता वाक्यपदीयद्वितीयकाण्डटीका समाप्ता ॥

२६७ वादचूडामणिः-मौनिकृष्णः ।

आ.—शब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ इति वात्सल्यवान्बिभ्रत्तद्रूपं पातु माधवः ॥ १ ॥
कोलाहलोत्र कुधियां न प्रत्यूहो विवेकिनाम् ॥ कलिदोषो रमानाथदासमीष्टे न वीक्षितुम् ॥ २ ॥
आख्यातस्य कृतौ शक्तिः ।

च.—आकांक्षाविरहाचेत्यलं प्रपञ्चेन ॥ श्रीः ॥ इति श्रीमन्मौनिकृष्णभट्टकृतौ वादचूडामणिः समाप्तः ॥

२६८ वैयाकरणभूषणसारव्याख्या काशिका-हरिरामः ।

आ.—वन्दे गणपतिचरणौ विघ्नध्वान्तालिवारणोद्योतौ ॥ वन्द्यौ सुरगणसंघैः सर्वाभीष्टफलदातारौ ॥ १ ॥
भैरवीं शङ्करीं नत्वा सिद्धेशां लोकमातरम् ॥ व्याख्यां भूषणसारस्य काशिकां तनुते हरिः ॥ २ ॥
मुनित्रयं सर्वजनोपकारकं प्रणौमि विद्यार्णवपात्रभूतान् ॥ गुरूंश्च तातं विबुधेन्द्रवन्द्यं यशःप्रकाशं जननीं च देवीम् ॥ ३ ॥

च.—केशवाङ्गजविप्रस्य हरिरामस्य निर्मितौ ॥ पूर्णो भूषणटीकायां धात्वाख्यातार्थनिर्णयः ॥ १ ॥
इति श्रीमद्वैयाकरणभूषणटीकायां कालोपनामकहरिरामविरचितायां धात्वाख्यातसामान्यार्थनिरूपणं समाप्तम् ॥
इति श्रीकालोपनामककेशवदीक्षितात्मजहरिरामविरचितायां वैयाकरणभूषणसारव्याख्यायां सुबर्थनिर्णयः ॥

२६९ शब्दबोधाख्यं व्याकरणम्-विरजानन्दः ।

आ.—स्ववनतसुरगणमुकुटजटितबहुनानोच्चावचमणिनिकरैः ॥ चित्रकान्तिमदशेषदुरितभयनाशि देवचरणं वन्दे ॥ १ ॥
कमठवीरवरस्य महीपतेरलवराद्युपलक्षितनीवृताम् ॥ विनयसिंहमहायशसः कृतौ क्रियत एष सुशब्दजबोधकृत् ॥ २ ॥
स्वल्पायासाद्बहूञ्शब्दान्बोधयत्यवलोकनात् ॥ ततो ग्रन्थस्य नामास्य शब्दबोध इतीर्यते ॥ ३ ॥
संकेतो योऽनुभूत्युक्तो यश्च भगवत्पाणिनेः ॥ प्रयोगसिद्धावनयोर्य ऋज्वर्थः स गृह्यते ॥ ४ ॥
न पाठातिशयः प्रायो न चाप्यर्थोतिशय्यते ॥ तस्माद्ध्यानयेत्यादौ धद्वित्वादि ह्युपेक्षते ॥ ५ ॥
ये व्युत्पत्तिं समीहन्ते सावकाशा न विस्तरे ॥ ते पठन्त्विममेवाथानुमोदन्तां च सज्जनाः ॥ ६ ॥
अइउण् । ऋलृक् ।

च.—अनुगितोनेकाचो न । नदीतरा ॥

राज्ञां ख्यातिमतां हि कच्छपतया श्रीर्यत्र संराजते श्रीमानालवरो द्विषां स विजयी शार्दूलविक्रीडितम् ॥

तस्य श्रीविनयेशभूपतिलकस्याज्ञावशादुद्धृतः सारो व्याकरणस्य तेन भगवाञ्छ्रीशंकरः प्रीयताम् ॥ १ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगौरीशंकरशिष्यश्रीविरजानन्दकृतः शब्दबोधो नाम व्याकरणं संक्षेपसंग्रहः ॥

२७० शब्दसारो व्युत्पत्तिचिन्तामणिव्याख्यासहितः-यतीशः ।

टी. आ.—ॐतत्सत् ॥ जयन्ति त्रिजगच्छ्रीमद्यतीशपदरेणवः ॥ सर्वोत्कर्षैकनिष्कर्षवर्षिण्यः कामधेनवः ॥ १ ॥

इह सकललोकानुग्रहविग्रहोऽस्मद्गुरुः श्रीमद्यतीशाभिधानः सर्वशास्त्रविषयझटितिव्युत्पत्तिहेतवे तत्सारमुद्दिधीर्षुरादौ व्याकरणसारमुद्धरन्मङ्गलमाचरति—तामिति ॥

तां भवानीं भवानीतक्लेशनाशविशारदाम् ॥ शारदां शारदाम्भोजसितसिंहासनां नुमः ॥ १ ॥

मू. च.—स्मारकोपपदे धातोर्भूते ऌट् वर्तमानवत् ॥ वर्तमानस्य सामीप्ये भूते वापि भविष्यति ॥ ६६ ॥

टी. च.—भविष्यत्येव लिङ् । न लटि हन्तीति पलायते ॥

इति विद्वच्छिरोमणिश्रीमदन्वर्थयतीशाभिधामिस[धास्म]द्गुरुविनिर्मितशब्दसारटीकायां व्युत्पत्तिचिन्तामणीवाख्यातवृत्तिः सम्पूर्णा ॥

२७१ संस्कृतमञ्जरी-उद्धवदासः ।

आ.—अथ संस्कृतमञ्जरी लिख्यते ॥

आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तम् ॥ योगीन्द्रमीशं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ॥ १ ॥

लक्ष्मीनारायणं नत्वा कुर्वे संस्कृतमञ्जरीम् ॥ गृह्णन्तु पण्डिताः सर्वे बालव्युत्पत्तिसिद्धये ॥ २ ॥

च.—व्याकरणं विनाप्यत्र बालबोधः प्रजायते ॥ तस्मात्क्षाम्यन्तु कवयो मम जाड्यन्तु सर्वदा ॥ १ ॥

वैष्णवोद्धवदासेन कृतां संस्कृतमञ्जरीम् ॥ गृह्णन्तु पण्डिताः सर्वे बालव्युत्पत्तिसिद्धये ॥ २ ॥

इति श्रीश्रीनिवासाचार्यशरणागतश्रीराघवदासशिष्यश्रीउद्धवदासवैष्णवकृता बालसंस्कृतमञ्जरी सम्पूर्णा ॥

२७२ सारस्वतभाष्यम्-काशीनाथः ।

आ.—समस्तविघ्नहर्तारं नमस्कृत्य महेश्वरम् ॥ भाष्यं सारस्वतस्येदं बालबोधोथ क्रियते [बोधाय तन्यते] ॥ १ ॥

च.—सर्वलोकोपकाराय काशीनाथेन भाषितम् ॥ भाष्यं सारस्वतस्येदं पण्डितैः परिसेव्यताम् ॥ १ ॥

इति श्रीकाशीनाथकृतसारस्वतभाष्ये कृत्प्रक्रिया समाप्ता ॥

२७३ सिद्धान्तकौमुदीव्याख्यानं रत्नार्णवः-कृष्णमित्रः ।

आ.—जगतीं दुर्गतिभीतां मार्गापेतां तमोट [मिस्र] तामेताम् ॥ साध्वनुशासनयुक्तां घटयन्पद्मापतिः पायात् ॥ १ ॥

च.—इति श्रीदेवीदत्तात्मजरामसेवकतनूद्भवाचार्यकृष्णमित्रकृते रत्नार्णवे संज्ञाप्रकरणं समाप्तिमगमत्

२७४ सिद्धान्तकौमुदीव्याख्यानं सिद्धान्तरत्नाकराख्यम्-रामकृष्णः ।

आ.—विश्वेशं सच्चिदानन्दं लक्ष्मीकान्तमजं विभुम् ॥ प्रणम्याथ मुनीन्नत्वा पाणिन्यादींस्तथा गुरून् ॥ १ ॥
वेदशास्त्रार्थनिष्णातं तातं तिरुमलाभिधम् ॥ शेषाशेषार्थसिद्धान्तकौमुदीमतिगह्वराम् ॥ २ ॥
व्याचिख्यासुर्विधास्येहं रामकृष्णो यथागमम् ॥ वैयाकरणसिद्धान्तरत्नाकरमिमं सुधीः ॥ ३ ॥
च.—युक्तिमाधुर्ययुक्ते [श्री शोभनीये नवे] तुले ॥ द्विरुक्तप्रक्रिया प्राभूद्वेङ्कटेशप्रसादतः ॥ १ ॥
फणीन्द्रभाष्यादि विभाव्य यत्नतः सिद्धान्तरत्नाकरमर्थविस्तृतम् ॥ श्रीरामकृष्णोरचयद्विपश्चित्तेनेष्ट शंभुह(रिसं)प्रसीदताम् ॥
शेषाशेषार्थसिद्धान्तकौमुदीमतिगह्वराम् ॥ व्याचिख्यासुर्महाशेषं याचेयं यातु विंततान् ॥ ३ ॥
सोयं रत्नाकरं पित्रोस्तिर्मलाख्यान्नपूर्णयोः ॥ भूत्यर्थमतनोद्रामकृष्णो गोविन्दमानसः ॥ ४ ॥
इति श्रीमद्वेङ्कटाद्रिभट्टात्मजतिर्मलभट्टात्मजरामकृष्णभट्टकर्तृके सिद्धान्तकौमुदीव्याख्याने वैयाकरणसिद्धान्तरत्नाकरे पूर्वार्धं समाप्तम् ॥
चन्द्रर्षिभूमीषुयुत्[ता] ख्यवत्सरे कौबेरदिग्भाजि रवौ मधौ सिते ॥
श्रीरामकृष्णः प्रतिपत्तिथौ बुधे रत्नाकरं पूर्णमचीकरद्वरम् ॥ १ ॥

२७५ सिद्धान्तकौमुदीव्याख्यानं सिद्धान्तटिप्पणम्-जयकौरः ।

आ.—प्रणम्य मातरं देवीं श्रीजयकौरसंज्ञया [का] ॥ पाणिनीयं मतं दृष्ट्वा कुर्वे सिद्धान्तटिप्पणम् ॥ १ ॥
च.—यद्यपि तस्येदं तत्र भव इतिसूत्राभ्यां गतार्थता तथापि ठगादीनपवादान्वक्तुमिमावर्थौ — — — — —

२७६ सिद्धान्तचन्द्रिकाव्याख्या-लोकेशकरः ।

आ.—प्रणम्य जगतां नाथं महेशं साम्बमव्ययम् ॥ सिद्धान्तचन्द्रिकाव्याख्या क्रियते तत्त्वदीपिका ॥ १ ॥
च.—लोकेशकरसंज्ञेन श्रीक्षेमकरसूनुना ॥ मुदे भूयादुमाशंभ्वोर्विहिता तत्त्वदीपिका ॥ १ ॥
चन्द्रवेदहयभूमिसंयुते वत्सरे नभसि मासि शोभने ॥ शुक्लपक्षदशमीतिथावियं दीपिका विबुधदीपिका कृता ॥ २ ॥
श्रीचन्द्रि[ण्डि]कायाश्चरणारविन्दप्रसादतो यल्लघुदीपिकाभूत् ॥ ततो मनीषापि भवत्वमुष्या अध्येतुरध्यापनहेतुराशु ॥३॥
इति श्रीमद्रामकरपौत्रश्रीक्षेमंकरसूनुलोकेशकरविरचिता सिद्धान्ताचन्द्रिकाव्याख्या तत्त्वदीपिका ॥

२७७ सिद्धान्तरत्नम्-जिनेन्दुः ।

आ.—श्रीमद्गुरुपदाम्भोजं नत्वा शब्दार्थसिद्धये ॥ सरस्वत्युक्तसूत्राणां कुर्वे सिद्धान्तरत्नकम् ॥ १ ॥
अइउऋऌ समानाः ॥
च.—इति कृत्प्रक्रिया ॥
श्रीसागरेन्दुयरयद[पत्पद्म]प्रसादेन जिनेन्दुना ॥ सम्यक्सिद्धान्तरत्नाख्यं कृतं शब्दानुशासनम् ॥ १ ॥
प्रयुक्ताः प्रायशः प्राज्ञैर्ये च योगार्थबोधकाः ॥ शब्दाश्च संग्रहस्तेषामनन्तः शब्दवारिधिः ॥ २ ॥
इति श्रीसिद्धान्तरत्ने शब्दानुशासने कृदन्तवृत्तिः परिपूर्तिमगात् ॥

२७८ हरिनामामृतम् ।

आ.—कृष्णमुपासितुमस्य स्रजमिव नामावलिं तनवै ॥ त्वरितं वितरेदेषा तत्साहित्यादिजामोदम् ॥ १ ॥
आहतजल्पितजटिनं दृष्ट्वा शब्दानुशासनस्तोमम् ॥ हरिनामावलिवलितं व्याकरणं वैष्णवार्थमाचिन्म: ॥ २ ॥
व्याकरणे मरुणीवृति जीवनलुब्धा: सदाघसंविग्नाः ॥ हरिनामामृतमेत्पिबन्तु सशतधावगाहन्ताम् ॥ ३ ॥
सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ॥ वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥ ४ ॥
नारायणादुद्भूतोयं वर्णक्रमः ॥ अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ—

च.—पूरितास्तद्धिताः ॥ कृष्णव्याकृतमेततस्माद्विफला न चात्र मात्रापि ॥ अपि तु महाफलयुक्ता तल्लीला काव्यवज्जयति ॥ १ ॥
यदत्र व्यक्तमुक्तं न भ्रान्तं वा तदशेषतः ॥ ज्ञेयं शोध्यं च विज्ञेभ्यो विज्ञशास्त्रावलोकतः ॥ २ ॥
हानीयं पाणिनीयं रसवद (र) सवरकाकलापः कलापः सारप्रत्यागिसारस्वतमपहतगीर्विस्तरो विस्तरोपि ॥
चान्द्रं दुःखेन सान्द्रं सकलमविकलं शास्त्रमन्यन्न धन्यं गोविन्दं विन्दमानां भगवति भवतीं वाणि नो चेद्भवाणि ॥ ३ ॥
पाणीयं पाणिनीयं रसमृदु रसवन्मुरकलापः कलापः सारश्रीसारि सारस्वतमधिमधुगीर्विस्तरो विस्तरोपि ॥
चान्द्रं सौख्येन सान्द्रं सकलमविकलं शास्त्रमन्यत्प्रशस्तं गोविन्दं विन्दतीं त्वां यदि भगवति गीर्वाणि वाणि ब्रवाणि ॥ ४ ॥
भगवन्नामवलिता भगवद्भक्तितत्परैः ॥ वृन्दावनस्थजीवस्य कृतिरेषा तु गृह्यताम् ॥ ५ ॥
छन्दसा प्रच (र) द्रूपरूढशद्वान्विना मया ॥ अत्रालेखि तदिच्छा चेद्दृश्योन्यः शास्त्रविग्रहः ॥ ६ ॥
हरिनामामृतसंज्ञं यदर्थमेतत्प्रकाशयामासे ॥ उभयत्र च मम मित्रं स भवतु गोपालदासाख्यः ॥ ७ ॥
इति श्रीहरिनामामृताख्ये वैष्णवव्याकरणे तद्धितप्रकरणं समाप्तम् ॥

२७९ अभिधानचन्द्रिका-भीमसेनमिश्रः ।

आ.—ब्रह्मेशानसुरेन्द्रवन्दितपदं नीलाम्बुदश्यामलं रत्नोद्भासिकिरीटकुण्डलधरं कोदण्डबाणैर्युतम् ॥
भक्तिप्रह्वजनेषु भूरिकृपया स्मेराननाब्जं सदा सीतालक्ष्मणवायुसूनुसहितं श्रीरामचन्द्रं भजे ॥ १ ॥
गुरुचरणयुगं प्रणम्य मूर्ध्ना जडताध्वान्तविनाशने पटीयः ॥ विविधमतिविकाशनैकहेतुं क्रियते खल्वभिधानचन्द्रिकेयम् ॥ २ ॥
द्रुमभेषजपुष्पसंज्ञितैः श्रीखण्डादिसुगन्धिभिस्तथा ॥ कनकादिकधातुभिः पुनर्धान्यप्राणिखरादिनामभिः ॥ ३ ॥
अनेकदेशान्तरभाषितेषु सर्वेष्वथ प्राकृतसंस्कृतेषु ॥ गूढेष्वगूढेषु च नास्ति सङ्ख्याद्रव्याभिधानेषु तथौषधेषु ॥ ४ ॥
नामोक्तमेकस्य यदौषधस्य नामापरस्यापि तदेव चोक्तम् ॥ शास्त्रेषु लोकेषु च यत्प्रसिद्धं न गृह्यतेसौ पुनरुक्तदोषः ॥ ५ ॥
तुल्याभिधानानि तु या निशिष्टैर्द्रव्याणि योगेषु निवेशितानि ॥ अर्थाधिकारागमसम्प्रदायैर्विभज्य तर्केण च तानि युञ्ज्यात् ॥ ६ ॥
किरातगोपादिकतापसाद्या वनेचरास्तत्कुशलास्तथान्ये ॥ विन्दन्ति नानाविधभेषजानां प्रमाणवर्णाकृतिनामजातीः ॥ ७ ॥
तेभ्यः सकाशादुपलभ्य वैद्यः पश्चात्स्वशास्त्रेण विमृश्य बुद्ध्या ॥ विकल्पयेद्द्रव्यरसप्रभावविपाकवीर्याणि तथा प्रयोगान् ॥ ८ ॥
नाम श्रुतं केनचिदेकमेव तेनैव जानाति स भेषजं तु ॥ अन्यस्तदन्येन च वेत्ति नाम्ना तदेव चान्येथ परेण केचित् ॥ ९ ॥
बहून्यतः प्राकृतसंस्कृतेषु नामानि विश्राव्य बहूंश्च दृष्ट्वा ॥ स्पृष्ट्वा च संस्पृश्य च जातिलिङ्गैर्विद्याद्भिषग्भेषजमादरेण ॥ १० ॥
अनामविन्मोहमुपैति वैद्यो न वेत्ति पश्यन्नपि भेषजानि ॥ क्रियाक्रमो भेषजमूल एव तद्भेषजं वापि निघण्टुमूलम् ॥ ११ ॥

सर्वकायेन संसाध्यं तस्यायुःस्थितिकारणम् ॥ आयुर्वेदोपदेशस्तु कस्य न स्यात्सुखावहः ॥ १२ ॥

च.—इति श्रीमदभिधानचन्द्रिकायां मिश्रश्रीभीमसेनसङ्गृहीतायां धरादिवर्गोष्टमः प्रकाशः ॥ पूर्णा चेयमभिधानचन्द्रिका ॥

२८० नानार्थरत्नमाला-भास्करः ।

आ.—श्रुतीनामपि मूर्द्धानो यन्निर्द्धारणभीरवः ॥ तदपास्ततमस्तोमं वस्तु वन्दामहे वयम् ॥ १ ॥

यत्पादाम्बुरुहच्छाया देवचूडामणीयति ॥ यस्य ज्ञानादयोनन्ताः स देव श्रेयसेस्तु नः ॥ २ ॥

ग्रन्थातिरम्यां नानार्थरत्नमालां गुणोज्ज्वलाम् ॥ भास्करः कृतिनां मान्यो नात्यल्पां नातिविस्तराम् ॥ ३ ॥

काण्डैश्चतुर्भिरेकद्वित्रिचतुर्वर्णवर्णितैः ॥ सङ्कीर्णाव्ययकाण्डाभ्यामिति षड्भिरनुक्रमात् ॥ ४ ॥

कथ्यन्ते केपि नानार्थाः शब्दास्तन्त्रान्तराध्वगाः ॥ अमी सलिङ्गनिर्लिङ्गभेदाद्द्वेधा भवन्ति च ॥ ५ ॥

सलिङ्गाः सप्तधा वृत्ताः स्त्रियां पुंसि नपुंसके ॥ स्त्रीपुंसयोः क्लीबपुंसोः स्त्रीनपुंसकयोस्त्रिषु ॥ ६ ॥

शब्दान्पुंसः स्त्रियः क्लीवान्नानालिङ्गांस्त्रिलिङ्गकान् ॥ प्रायः क्रमात्प्रवक्ष्यामः कान्तादीन्द्व्यक्षरादिषु ॥ ७ ॥

रूपभेदात्साहचर्यात्कण्ठोक्त्या च विभावयेत् ॥ लिङ्गान्यथादित्वन्तं वा पदं पूर्वेण नान्वयि ॥ ८ ॥

त्रिष्विति त्रिषु लिङ्गेषु ज्ञेयं द्वन्द्वे द्वयोरिति ॥ लिङ्गान्तरनिषेधोत्र शेषलिङ्गविधायकः ॥ ९ ॥

च.—इति जगदुपकारिण्यां मिरुगदण्डाधिनाथविरचितायाम् अव्ययकाण्डोयं सम्पूर्णो नानार्थरत्नमालायाम् ॥ १ ॥

इति श्रीमिरुगदण्डाधिनाथभास्करसूरिणा कृता नानार्थरत्नमाला समाप्ता ॥

२८१ विचित्रनाममाला-सौभरिः ।

आ.—क्वणितं परमं ब्रह्म धीमहि प्रणताः सदा ॥ ध्यात्वा प्रकाश्यते माला सर्वज्ञानविधायिनी ॥ १ ॥

ब्रह्मविष्णुशिवेन्द्रार्कशशाङ्कप्रमुखान्सुरान् ॥ विचित्रनाममालां तु नत्वा सौभरिरब्रवीत् ॥ २ ॥

ककोऽर्कार्किकुजप्राणार्ताग्निप्रणतवायुषु ॥ कका कुसरमासिद्धिवृद्धिवृद्धिषु संस्मृता ॥ ३ ॥

च.—इति श्रीसौभरिमुनिविरचितायां विचित्रनाममालायां चतुर्थाधिकारः ॥ ग्रन्थः समाप्तः ॥

२८२ शब्दप्रभेदः-महेश्वरकविः ।

च.—इति श्रीप्रभेदनाममालासूत्रम् ।

श्रीसाहसाङ्कचरितप्रमुखात्सुगद्यपद्यप्रबन्धरचनात्सुवितन्वतैव ॥

व्युत्पत्तिमुज्ज्वलतमां परमां च शक्तिमुल्लासिता जगति येन सरस्वतीयम् ॥ १ ॥

निःशेषवैदिकमताम्बुधिपारदृश्वा शब्दागमाम्बुरुहखण्डरविः कवीन्द्रः ॥

यत्नान्महेश्वरकविर्निरमात्प्रकाममालोक्यतां सुकृतिनस्तदसावनर्घः ॥ २ ॥ इति युग्मम्

नामपारायणोणादिनिरुक्तोक्तिविकल्पितैः ॥ शब्दैर्वर्णविधैश्छात्रैः सन्दृश्यो ह्येष साधुभिः ॥ ३ ॥

कर्तुं स्वतश्चमत्कारं सतां हर्तुं विपर्ययम् ॥ संशयं च निराकर्तुमयमस्य परिश्रमः ॥ ४ ॥

छन्दोनुप्रासयमकश्लेषचित्रेषु निर्णयः ॥ एष्वेवास्योपयोगश्च कवेर्जायत एव वा ॥ ५ ॥

२८३ शब्दरत्नप्रदीपः-काशीरामः ।

आ.–तत्सुतो नामदेवस्तु वैद्यो वैद्यगणाग्रणीः ॥ प्रख्यातो भूमिपालस्य गोपालस्य समीपगः ॥ १ ॥
तस्मात्कल्याणदासस्तु प्रादुरासीत्प्रतापवान् ॥ यत्कीर्त्या शौर्य्यदानादिभूतया पूरितं जगत् ॥ २ ॥
यादवस्तुलसीदासः पुत्रो गोपालभूपतेः ॥ बहादुरपुरं तेन निर्मितं तत्र सोऽवसत् ॥ ३ ॥
प्रोत्तुङ्गसौधप्रासादहर्म्यप्राकारगोपुरैः ॥ शोभितं कोकिलैर्भृङ्गैर्वनोपवनकादिभिः ॥ ४ ॥
तत्र यादवराज्ये तु कल्याणः पूजितोऽभवत् ॥ आयुर्वेदाङ्गनिपुणः शस्त्रशास्त्रविशारदः ॥ ५ ॥
तेन सन्तन्यते शब्दरत्नदीपस्तु भाषया ॥ काशीरामेण गुरुणा क्षान्तैर्वर्गैरदादिभिः ॥ ६ ॥

च.–केह्लणो मह्लणश्चैव विप्रौ सारस्वताभिधौ ॥ भारद्वाजीतिजातीयौ जातौ पश्चिममण्डले ॥ १ ॥
तद्वंशे गुरुसादस्तु अर्गलायां वसन्पुरा ॥ तत्सुतो मथुरादासः काशीरामश्च तत्सुतः ॥ २ ॥
विख्यातो मथुरादेशे वैद्यविद्याविशारदः ॥ तेन कल्याणादासस्तु पाठितो यदुमण्डले ॥ ३ ॥
नामदेवसुतः श्रीमान्पौत्रो लक्ष्मीधरस्य तु ॥ तेन वैद्योपकाराय शब्दरत्नप्रदीपकः ॥ ४ ॥
काशीरामेण गुरुणा कारितः सद्भिषक्प्रियः ॥
सौन्दर्य्ये शशितुल्यतामनुगतः सूर्योपमस्तेजसा पाठे वेदपुराणशास्त्रकवितानामेव वाचस्पतिः ॥
शौर्य्ये वासवजामदग्न्यसदृशो गाण्डीवितुल्योथवा जीव्याद्ब्राह्मदिनावधेरपि परं कल्याणदासः क्षितौ ॥ ५ ॥
इति श्रीनामदेवसुतकल्याणदासकारिते काशीरामविरचिते शब्दरत्नप्रदीपे सर्वाक्षरवर्गः समाप्तः ॥ ग्रन्थश्च समाप्तः ॥

२८४ अन्त्यक्रियाविधिः-मणिरामः ।

आ.–धर्म्मराजं नमस्कृत्य जीवसद्गतिहेतवे ॥ मणिरामेण विशदीक्रियतेन्त्यक्रियाविधिः ॥ १ ॥

च.–तस्मादेषां प्रदानेन मम पापं व्यपोहतु ॥ इति वदेत् । इति तिलपात्रदानम् ॥
सर्वप्रायश्चित्तप्रयोगः समाप्तः ॥ पुण्याहेन विशुद्ध्यतीति शुद्धिमयूखे ॥

२८५ अरुणस्मृतिः ।

आ.–अरुण उवाच ॥ प्रतिग्रहधनो विप्रो वदंत्येवं महर्षयः ॥

च.–तस्यांतरायो वै सूते देवेंद्रादधिकं फलम् ॥ १४९ ॥
इति प्रतिग्रहप्रायश्चित्तानि समाप्तानि ॥

२८६ आचारतत्त्वम्-हरिप्रसादः ।

आ.–नत्वा हेरंबमातुः पदकमलयुगं प्रातरुत्थाय पुण्यश्लोकान्स्मृत्वाथ दक्षो दिशि पटपिहितं कं विधायेषुमात्रम् ॥
गत्वा ग्रामादयज्ञैस्तृणदलनिचयैरावृतायामभस्मक्षेत्राम्भःपर्वतायां भुवि विगतवचाः कर्म मैत्रं विदध्यात् ॥ १ ॥

च.–हरिप्रसादेन कृतं तत्पुत्रेणेदमाह्निकम् ॥ आकल्पमाकल्पमिव कण्ठे धार्यं द्विजातिभिः ॥ ६८ ॥
इति हरिप्रसादकृतमाचारतत्त्वं समाप्तम् ॥

२८७ आचाररत्नप्रकरणम् अनूपविलासान्तर्गतम्-दीक्षितमणिरामः ।

आ.—शुण्डादण्डाग्रलग्नामलकफलचलन्मेरुमानादितेयप्रीतिस्तुत्यादिजाताधिकगुरुकरुणावारिधिं द्राग्दधत्यः ॥
ब्रह्मस्वर्गेशमौलिस्थितकुसुमभरव्यक्तडिण्डीरभासः पण्डीकुर्वन्तु चण्डीसुतचरणरजोराजयो विघ्नजालम् ॥ १ ॥
ब्रह्माण्डमण्डली यस्य कुण्डलीयति कर्णयोः ॥ जायतामायतानन्दकारणं वारणाननः ॥ २ ॥
ब्रह्माण्डोद्दण्डभाण्डप्रकटकटुरवक्षोभितक्षोणिचक्रभ्रश्यच्चक्रेभसोमादिककनकगिरिप्राप्तरोमावलम्बः ॥
सद्यो लीनां नखान्ते दनुजपतितनुं मार्जयन्दीर्घदृष्ट्या प्रह्लादाह्लाददायी दलयतु दुरितव्रातमुच्चैर्नृसिंहः ॥ ३ ॥
विघ्नं हरत्वत्र स विघ्नराजो मुकुन्दभाजो मम सन्तु मोदाः॥ संमार्जयत्वर्जितवाक्प्रबन्धे वाणीं भवानीचरणानुबन्धः॥ ४॥
मान्यान्समस्तान्पितरौ च नत्वा दृष्ट्वा निबन्धान्प्रकरोमि यत्नात्॥तेषां सदानुग्रहतो विकाशं यास्यत्ययं ग्रन्थवरश्च सिद्धिम्॥५॥
करोम्यहं श्रीमदनूपसिंहगुणावलीवर्णनसाहसानि ॥ त्वं पूर्वपुण्यैः परिशीलितासि सरस्वति स्वीकुरु कार्यसिद्धिम् ॥ ६ ॥
कृपाच्युतानां परितो नृपाणां संवर्णितैर्वाणि कलङ्कितासि ॥ शुद्धा भव श्रीमदनूपभूपयशोनभःसिन्ध्ववगाहनेन ॥ ७ ॥
मतिर्न मे प्रौढतरा परार्द्धसंख्याधिकश्चाऽस्य गुणो गरीयान्॥तद्वर्णने कर्णसमस्य हास्यं यास्यामि नाहं कृपया मुरारेः ॥८॥
सरस्वतीयं मम ताम्रपर्णी गुणोऽस्य रत्नाकर एव लोके॥कुर्वन्तु सर्वे रसजातवृष्ट्या जातं यशोमौक्तिकमत्र धीराः ॥९॥
मरुप्रदेशे विषमे तु देशे राठौरवंशेऽतिबलो बभूव ॥ वीकेतिनामा खलु राजराजो जातः स लोके सुरराजतुल्यः ॥१०॥
वीकानेरिपुरी येन वासिता भुवि विश्रुता ॥ तद्वंशेऽभूत्सुगुणवान्राजा कल्याणमल्लकः ॥ ११ ॥
कल्याणमल्लः खलु भूपभूपो जातः पृथिव्यां प्रथमैकगण्यः ॥ गुणे गरीयान्विनये लघीयान्दाने वरीयान्समरेऽतिवीरः ॥१२॥
तस्य प्रियानन्दकरस्तनूजो जातः प्रतापी खलु रायसिंहः॥ कलाबलाधिक्यविलासशाली कालीयशत्रुप्रतिमप्रतापः ॥१३॥
तस्यात्मजोभूद्भुवि सूरसिंहो बालोदितार्कप्रतिमप्रतापः॥ यस्याङ्गणे रिङ्गणमाचरन्ती लक्ष्मीर्न सूक्ष्मीभवति द्विजार्थे ॥१४॥
बभूव तस्याद्भुतकीर्तिराशेः सुतो जयन्ताधिकलब्धमोदः॥ कर्णः कृती कान्तयशा विशालधर्मो धरायां प्रथमैकगण्यः ॥१५॥
कीर्तिस्तोमनिरस्तसोमसुषमासम्भारसम्भावना न्यग्भावाहितजामदग्न्यगुरुता गाम्भीर्य्यवारांनिधिः ॥
वैरिप्राप्तमहीध्रदारणबलारातिः कलाकोविदः शीलाढ्योऽजनि कर्णसिंहनृपतिर्यः कर्णतुल्यः क्षितौ ॥ १६ ॥
तस्यात्मजः श्रीमदनूपसिंहः क्षीरार्णवाच्चन्द्र इव प्रसूतः॥ सदा कलापूर्णवपुर्यतोयमतो हि लोके सुखदः सदैव ॥ १७॥
एक एव गुणावासोऽनूपसिंहो महामणिः ॥ यत्कीर्तिकौमुदी लोके कार्तिकीं कुरुते सदा ॥ १८ ॥
देवश्रीमदनूपभूपयशसा श्वेतीकृते सर्वतो जाते गीर्वाणवृन्दे तव शिवसदृशे कौतुकं तत्र जातम् ॥
अन्योन्यं सर्वदेवा नतिततिविनताःश्रीमहादेवबुद्ध्या जाता लक्ष्म्या च कृष्णे पुनरपि च शिवे योजितो दृष्टिपातः ॥१९॥
भूपानूपयशोनद्यां बुद्बुदास्तारकव्रजाः ॥ व्योमगङ्गा मृणालीव फेनखण्डोपमो विधुः ॥ २० ॥
प्रतापोऽनूपसिंहस्य हिमतोऽप्यतिशीतलः ॥ दरीषु कम्बलं बिभ्रत्कम्पन्ते येन शत्रवः ॥ २१ ॥
द्विरूपोऽनूपसिंहस्य प्रतापो भाति भूतले ॥ मित्रे जैवातृकप्रायस्तपनो रिपुमण्डले ॥ २२ ॥
दुर्वारारातिराजीवनदवदहनः कौङ्कुमो दिग्वधूनां सर्वाङ्गीणोङ्गरागस्त्रिभुवनभवनध्वान्तविध्वंसदीपः ॥
यद्दोरुद्दामदर्वीकरमुखहुतभुग्भूतधात्रीपुरन्ध्र्या वासो माञ्जिष्ठमुर्वीरमणकुलमणेर्बोभवीति प्रतापः ॥ २३ ॥
दीपः सन्नयमन्दिरे परचमूरात्रौ तु चण्डद्युतिः शत्रोः सङ्गरसागरे हि भगवान्साक्षात्पुनर्वाडवः ॥

विद्युद्वैरिकुलाचले सुमनसां वृन्दे सुवर्णाचलो राज्ञः श्रीमदनूपभूपतिमणेर्भाति प्रतापानलः ॥ २४ ॥
श्रुत्वा श्रीमदनूपसिंहनृपतेर्दानं च वाचस्पतिः साकूतं स्तवमातनोति कुलकं [कुलिशं] धत्ते शचीवल्लभः ॥
कौबेरी तु विभूतिरञ्चति भयं कल्पद्रुमो लज्जते साशङ्कं मधुसूदनोऽपि कमलापाणौ करं न्यस्यति ॥ २५ ॥
विमुखा नैव गच्छन्ति ब्राह्मणा यस्य वै गृहात् ॥ याचन्ते ये यथा तेभ्यो ददात्येव हि भक्तितः ॥ २६ ॥
एते श्रीमदनूपभूपतिलके मत्तोऽधिका वै गुणा माधुर्य्यं वचने मनोभिलषिताद्दानेधिकत्वं तथा ॥
पात्रे प्रीतिरतीव दुःखविकलः कल्पद्रुमो लज्जया गुच्छे लग्नमलिच्छलेन सहसा हालाहलं खादति ॥ २७ ॥
निःस्वे मादृशि दृङ्मनागपि महाराज त्वया दीयते देव श्रीमदनूपभूपतिलक स्वास्थ्यं न मेरोः क्वचित् ॥
विक्रीतेतिमहानुभावमहसा सर्वंसहा कम्पते किं ब्रूमो हरिरप्युरःस्थितरमाविश्लेषमाशङ्कते ॥ २८ ॥
पाणिः श्रीमदनूपसिंहनृपतेर्मन्ये पटीरद्रुमस्तस्मिन्कोपि भुजङ्गमोस्ति कपटस्तिष्ठत्यहो निश्चितम् ॥
तत्पाणिः कथमन्यथार्थिजनतासन्तापहारी तथा खड्गोपि प्रतिभूमिपालनिवहप्राणापहारी कथम् ॥ २९ ॥
एकः श्रीमदनूपभूपतिलको दानप्रतिज्ञः कथं भूयः कोटिगुणान्हि याचकजनान्पूर्णान्करिष्यत्यसौ ॥
इत्थं चेतसि मूढ मा कुरु यथा चन्द्रश्चकोरान्यथा धेनुः सर्वजनान्हि चक्रनिवहान्सूर्य्यो यथा पूर्य्यते ॥ ३० ॥
यो वेदाखिलवेदबोधितविधीनाचारपारङ्गमो येनाकारि च दानमानविनयैर्विद्वत्सभा भूषिता ॥
यो लक्ष्मीपतिपूजनार्हविलसद्धर्म्मक्रियातत्परः सोयं श्रीमदनूपसिंहनृपतिर्जीयाच्छतं वै समाः ॥ ३१ ॥
वैन्यश्रीशिबिकर्णविक्रममुखप्राचीनभूमीपतेर्विश्लेषातुरया क्रुधा तु धरया जानामि तप्तं तपः ॥
तस्या एव तपस्यया विगुणया जातः क्षितौ तत्पतिर्दिल्लीन्द्रो यवनोतिकोपकठिनो धर्मस्य विद्वेषकः ॥ ३२ ॥
एतादृशोपि लोकानां भाग्यशेषास्स भूपतिः ॥ भूमेर्भारं ददौ भूपेऽनूपसिंहे महामतौ ॥ ३३ ॥
दिल्लीन्द्रोपि बलाद्यस्य जित्वा दक्षिणभूपतीन् ॥ आलमगिर इति प्रख्यां प्राप लोके मनोगताम् ॥ ३४ ॥
तेन श्रीमदनूपभूपकृतिना धर्मप्रचारार्थिना गङ्गारामतनूद्भवः सुनिपुणः काश्यां स्वकीयः कृतः ॥
मिश्रश्रीशिवदत्तसूरिपरिषत्पूज्यस्य पौत्रः कृती योऽसौ श्रीमणिरामनामधरणीदेवप्रथमागतः ॥ ३५ ॥
नानानिबन्धानवलोक्य तेन विभाव्य काश्यां सह पण्डितैश्च ॥
प्रणीयते ग्रन्थवरः स्वकीर्त्यै प्रीत्यै च राज्ञो महतः प्रयत्नात् ॥ ३६ ॥

भूपानूपविलासोऽयं धर्म्मरत्नार्णवो महान् ॥ श्रुतिस्मृतिपुराणीयवाक्यपाथःप्रपूरितः ॥ ३७ ॥
भूपानूपविलासेऽत्र धर्माम्भोधौ विगाहिते ॥ षड्रत्नानि बुधाः सम्यक्प्रतीच्छन्तु यथासुखम् ॥ ३८ ॥
आचाररत्नं प्रथमं समयाख्यं द्वितीयकम् ॥ संस्काराख्यं तृतीयं तु चतुर्थं वत्सराभिधम् ॥ ३९ ॥
पञ्चमं दानसञ्ज्ञं तु षष्ठं शुद्ध्यभिधं तथा ॥ एवमत्र तु विज्ञेयं धर्मार्थं रत्नषट्ककम् ॥ ४० ॥
सुखावगमसिद्ध्यर्थं क्रमस्तेषां निरूप्यते ॥ प्रथमे तत्र रत्ने तु परिभाषा प्रकीर्तिता ॥ ४१ ॥
ततस्तु सर्वकर्माङ्गं मानं द्रव्यस्य चैव हि ॥ आचारशंसनं चैव सुप्रभातं ततः परम् ॥ ४२ ॥
कृतिर्मूत्रपुरीषस्य ततः शौचविधिः स्मृतः ॥ आचान्तिर्दन्तकाष्ठं च केशमार्ष्टिः शिखाविधिः ॥ ४३ ॥
प्रातःस्नानविधानं च सन्ध्योपास्तिरुषस्तनी ॥ देवार्चनं ततः प्रोक्तं षोडशार्चाविधिर्हरेः ॥ ४४ ॥
विधिर्निषेधः पुष्पाणां योगक्षेमविधिस्ततः ॥ स्नानं माध्याह्निकं चैव तिलकं सन्ध्यया सह ॥ ४५ ॥

ब्रह्मयज्ञविधानं च तर्पणं तदनन्तरम् ॥ वैश्वदेवो भूतबलिर्नित्यश्राद्धं ततः परम् ॥ ४६ ॥
अतिथेः पूजनं तद्वद्विमुखे दोषदर्शनम् ॥ भोजनस्य विधिश्चैव भक्ष्याभक्ष्यस्य निर्णयः ॥ ४७ ॥
वाडवादिस्मृतिश्चैव ताम्बूलप्राशने विधिः ॥ सायंसन्ध्या ततः प्रोक्ता भोजनं च ततः पुनः ॥ ४८ ॥
शयनस्य विधिः पश्चादाह्निकोऽयं विधिक्रमः ॥

च.—सद्यः प्राणहराणि षडित्यादि ॥
गङ्गारामात्मजो धीमान्मणिरामो विमुक्तये ॥ भूपानूपमुदे रत्नमाचारं समचीकरत् ॥ १ ॥
इति श्रीमद्राठौरकुलमङ्गलावाससकलविद्याविलासनिजकीर्तितुलितकैलासश्रीमन्महाराजाधिराजमहाराजश्रीमदनूपसिंह-कारिते श्रीमदनूपविलासे धर्माम्भोधावाचाररत्नं समाप्तम् ॥

२८८ आचाररत्नम्-लक्ष्मणभट्टः ।

आ.—सिन्दूरारुणगण्डं देवं विघ्नौघतिमिरमार्तण्डम् ॥ नर्तितशुण्डादण्डं सिद्धीशं गणपतिं वन्दे ॥ १ ॥
सतिमिरजगदुद्योतद्युमणेर्वंशाङ्कुरः श्रीमत् ॥ तज्जयति रामनाम रजनिचराणां विभेदनं धाम ॥ २ ॥
नारायणं राजभिरर्चिताङ्घ्रिं नमामि हंसीव यदीयकीर्तिः ॥ — -- — — — — — — — — ॥ ३ ॥
विद्याप्रद्योतनोद्योतखद्योतीकृतवान्दिनम् [वादिनम्] ॥ पितरं रामकृष्णाख्यं वन्दे स्नेहभरान्वितम् ॥ ४ ॥
स्पर्धामग्निनिवेशादुपयातामुमासमाख्यातिम् ॥ द्युनदीनिर्मलचित्तां मातरमेकां सतीं सदा वन्दे ॥ ५ ॥
येनोद्धृता स्वस्य कुलप्रतिष्ठा महावराहेण महीव तोयात् ॥ गङ्गेव निष्ठाभिससार यस्माद्दिवाकरं नौमि तमग्रजाग्र्यम् ॥६॥
अधीत्य लक्ष्मणाख्येन कमलाकरसोदरात् ॥ आचाररत्नं सुधिया यथामति वितन्यते ॥ ७ ॥

च.—प्राच्यानुदीच्यानथ दाक्षिणात्याञ्ज्ञात्वा प्रतीच्यान्महतो निबन्धान् ॥
आचाररत्नं सुधिया व्यधायि श्रीरामकृष्णात्मजलक्ष्मणेन ॥ १ ॥
निगदितमिह साध्वसाधु वा (यद्) धृतमतिना प्रविचार्य्य लक्ष्मणेन ॥
तदखिलमपहाय दोषदृष्टिं चिरमवलोक्य विशोधयन्तु सन्तः ॥ २ ॥
इति श्रीमन्नारायणभट्टात्मजश्रीमद्रामकृष्णात्मजभट्टलक्ष्मणभट्टकृतावाचाररत्ननामाख्यग्रन्थः समाप्तः ॥

२८९ आशौचचन्द्रिका-वेदाङ्गरायः ।

आ.—नत्वा देवीं गणेशं च ग्रन्थान्मुनिमतान्वितान् ॥ दृष्ट्वा वेदाङ्गरायाख्यो ब्रूते चाशौचचन्द्रिकाम् ॥ १ ॥
आसप्तमाच्च सापिण्ड्यं पुरुषात्सोदकास्ततः ॥ ज्ञेयाश्चतुर्दशान्ताच्च तत्परं गोत्रमुच्यते ॥ २ ॥ अथ गर्भे—

च.—भट्टनारायणस्त्वाह दोषः स्यादात्मघातकः ॥ रत्नभट्टात्मजश्रीमत्तिगलाभट्टसूनुना ॥
वेदरायाङ्गसञ्ज्ञेन रचिताशौचचन्द्रिका ॥ इत्याशौचचन्द्रिका समाप्ता ॥ शुभं भवतु ॥

२९० आह्निकम्-कमलाकरः ।

आ.—नत्वा रामं च पितरौ कमलाकरशर्मणा ॥ रामकृष्णतनूजेन बह्वृचाह्निकमुच्यते ॥

च.—पाराकादिस्वरूपं मत्कृते प्रायश्चित्तरत्ने ज्ञेयम् । मूलं च माधवमिताक्षराशूलपालपाणिमदनरत्ने मदनपारिजातादौ स्पष्टम् अन्यत्रान्वेष्यमिति ॥ इति श्रीमज्जगद्गुरुमीमांसकनारायणभट्टसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृतौ आह्निकत्वोप-प्रायश्चित्तानि ॥

२९१ आह्निकदीपकः-अचलः ।

आ.—ब्रह्माणं विष्णुमीशानं गणेशं च सरस्वतीम् ॥ प्रणम्य मातापितरौ करोम्याह्निकदीपकम् ॥ १ ॥
विप्राणां कर्ममार्गेण ब्रह्मव्याप्तिप्रदीपकम् ॥ नित्याचारमहं वक्ष्ये मुदानन्दपुरे वसन् ॥ २ ॥
मध्याह्नकालेऽतिथिभोजनार्थं कासारकल्लोवलदेव [कल्लोलवदेव] लोलाः ॥
प्राप्तेऽतिथावाप्तमनोभिलाषा विद्वज्जनालङ्कृतयो मडोडाः ॥ ३ ॥
तत्र धारिङ्गदेवोभून्मडोडानां च पूर्वजः ॥ पुत्रास्तस्य तु चत्वारोऽनन्तनामा च यः सुतः ॥ ४ ॥
लक्ष्मीधरश्च तत्सूनुर्गोविन्दस्तु तदङ्गजः ॥ गोविन्दाद्वत्सराजोभूदचलो वत्सराजजः ॥ ५ ॥
द्विजानां सद्विवेकायाचलेन क्रियते त्विदम् ॥

च.—अन्तःकटुरपि तिक्तरसद्वृत्तं यः पुमान्न सन्त्यजति ॥ स भवति सद्यो वन्द्यः सर्षप इव सर्वलोकस्य ॥ १ ॥
अहन्यहनि विप्राणां कर्म्म नित्यमिहोदितम् ॥ अह्ना निर्वर्त्यते यस्मादाह्निकं तद्विदुर्बुधाः ॥ इति मङ्गलम् ॥
श्रीमन्मडोडाभिजने प्रसूतो वृद्धाभिधाने नगरे वसन्यः ॥ ऋग्वेदहेतोरचलद्विवेदी निर्मितवान्दीपकमाह्निकस्य ॥ १ ॥
श्रीविक्रमार्कात्समयादतीते शून्यद्वये पञ्चदशात्परे च ॥
नौकाभिषेके — — —जनिष्टपूर्णो मधामाह्निकदीपकोयम् ॥ आह्निकं समाप्तम् ॥

२९२ कर्मकौमुदी-कृष्णदत्तः ।

आ.—यन्नामधेयस्मरणेन तूर्णं विलीयते विघ्नपयो नितान्तम् ॥ सुरासुराराधितपादपद्मं गणेश्वरं नौमि तमर्थसिद्ध्यै ॥ १ ॥
विलोक्य पद्धतीः सर्वाः सम्प्रदायं सतां तथा ॥ करोति पद्धतिं रम्यां कृष्णदत्तः प्रकृष्टधीः ॥ २ ॥
तत्र यजमानः सुस्नातः सुप्रक्षालितपाणिपादः कुशोपग्रहः

च.—सर्वधर्मसाधनं सत्यं च वदेत् । ततोभिषेकस्तिलककरणं दक्षिणादानानन्तरं मन्त्रपाठः ॥
इति श्रीमदावसथिकब्रह्मदत्तात्मजकृष्णदत्तविरचितायां कर्मकौमुद्यां स्नातकसमावर्तनपद्धतिः समाप्ता ॥

२९३ कर्मविपाकः ।

आ.—मोहांधकारमग्नानां जनानां ज्ञानरश्मिभिः ॥ कृतमुद्धरणं येन तं नौमि शिवभास्करम् ॥ १ ॥
अरुणं [णः] परमं ज्ञानं जिज्ञासुर्वेदलोचनम् ॥ ज्योतिषां वैद्यमग्र्यं च गुह्यमध्यात्मसंज्ञिकम् ॥ २ ॥
नृणां कर्मविपाकं च मानुष्ये दुर्लभं परम् ॥ धर्माधर्मं च यत्किंचिद्यत्र सर्वं प्रतिष्ठितम् ॥ ३ ॥
आराधयन्रविं रौद्रं तपस्तेपे सुदुस्तरम् ॥ प्रीतो वरार्थिने तस्मै प्रोवाच भगवान्रविः ॥ ४ ॥
यत्तेभिलषितं सूत तत्त्वं सर्वमवाप्स्यसि ॥ नृणां कर्मविपाकं च गुह्याद्गुह्यतमं परम् ॥ ५ ॥
गोपितं सर्वशास्त्रेषु प्रत्यक्षं सर्वप्रत्ययम् ॥ ६ ॥

च.—जन्मादिमरणांतं हि स्वल्पमेवात्र सूचितम् ॥ यदंतरगतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्म० ॥

कर्मविपाकः ।

आ.—नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १ ।
पुरा कृतयुगस्यादौ ब्रह्मलोकं गतो मुनिः ॥ ददर्श ब्रह्मदेवेशं सर्वज्ञः स पितामहम् ॥ २ ॥
पितामहमतिप्राज्ञं सर्वलोकसुखप्रदम् ॥ स्तूयमानं मुनिगणैः पूज्यमानं सुरासुरैः ॥ ३ ॥
अप्सरोगणसंगीतं सिद्धगंधर्वसेवितम् ॥ मूर्त्तिमद्भिश्चतुर्वेदैरितिहासैरुपासितम् ॥ ४ ॥
सप्तोदधिसमायुक्तं नंदिभिः परिवारितम् ॥ सूर्यकोटिप्रतीकाशं सर्वधर्मसमाश्रयम् ॥ ५ ॥
प्रणिपत्य महाभाग नारदश्च स्वयंभुवम् ॥ विनयेनोपसंगम्य ऋषिर्वचनमब्रवीत् ॥ ६ ॥
नारद उवाच ॥ केन कर्मसुखं प्राप्तं दुःखं च केन कर्मणा ॥ पूर्वजन्मकृतं कर्म प्रायश्चितं कथं भवेत् ॥ ७ ॥
च.—इह जन्म सुखी भूत्वा पुत्रपौत्रादिवर्द्धनम् ॥ एवं विधिश्च कर्तव्यः सफलं तस्य जीवितम् ॥ ७८ ॥
इति श्रीकर्मविपाके ब्रह्मनारदसंवादे सर्वोपकारकरणं नाम द्वादशोध्यायः ॥ इति कर्मविपाके संपूर्णम् ॥ संवत् १८११

कर्मविपाकः ।

आ.—यो देवः किल पूर्वसर्गसमये संस्मर्य्यते ब्रह्मणा यश्चादौ सुरसिद्धदैत्यमनुजैरभ्यर्च्यते कर्म्मणा ॥
विघ्नव्रातविघातजातकठिनं कुंठं कुठारं करे बिभ्राणं तमुपास्महे गजमुखं सिद्धेः परं कारणम् ॥ १ ॥
च.—राज्ञो विजयदं पुण्यं धनधान्यविवर्धनम् ॥ इति शालिहोत्रोक्ताश्वविधिशांतिः ॥
इति कर्मविपाकः समाप्तः ॥

२९४ कर्मसरणौ यजुर्वल्लभाख्यायामाह्निकम्-विठ्ठलदीक्षितः ।

आ.—योगिनो यं प्रपश्यन्ति हृदाकाशे सनातनम् ॥ धर्ममूलमहं वन्दे देवकीतनयं हरिम् ॥ १ ॥
अस्यां तु कर्मसरणावाह्निकं प्रथमं ततः ॥ संस्कारानावसथ्यं च त्रिभिः कौ[कां]डैरहं ब्रुवे ॥ २ ॥
प्रातरुत्थाय रात्रिवासः परित्यज्याचम्य श्रीगुरुं श्रीपतिं च हृदये ध्यात्वा विश्वेशं
च.—अगस्तिर्माधवश्चैव मुचुकुन्दो महामुनिः ॥ कपिलो मुनिरास्तीकः पञ्चैते सुखशायिनः ॥ १ ॥
इति स्मृत्वा स्वपेत् ॥ इति शयनविधिः ॥ इति श्रीविठ्ठलदीक्षितविरचितायां कर्मसरणौ यजुर्वल्लभायामाह्निकविधिः ॥

तत्रैव संस्कारप्रकरणम् ।

आ.—योगिनो यं प्रपश्यंति हृदाकाशे सनातनम् ॥ धर्ममूलमहं वंदे देवकीतनयं हरिम् ॥ १ ॥
अस्यां तु कर्मसरणावाह्निकं प्रथमं ततः ॥ संस्कारानावसथ्यं च त्रिभिः कांडैरहं ब्रुवे ॥ २ ॥ — — — — — —
च.—इत्यर्कविवाहविधिः समाप्तः ॥
इति श्रीविठ्ठलदीक्षितविरचितायां कर्मसरणौ यजुर्वल्लभाख्यायां संस्कारप्रकरणे द्वितीयखंडः संपूर्णः ।

२९५ कामन्दकीयनीतिसारः सटीकः-टी०-विष्णुगुप्तस्य शिष्यः ।

चतुर्मुखमुखांभोजवनहंसवधूर्मम ॥ मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥ १ ॥
अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ॥ सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥ २ ॥
चेतश्चक्रेऽखिलज्ञानव्याप्तिसामर्थ्यधारिणे ॥ नमो विनिर्मितानंतभवध्वंसाय शंभवे ॥ ३ ॥
व्याख्या सुखावबोधार्था स्पष्टा सूक्ता सुसंगता ॥ कामंदकिप्रणीतस्य नीतिशास्त्रस्य लिख्यते ॥ ४ ॥
शास्त्रकारः स्वशास्त्रादौ नमस्यति नमस्कारं करोति किमर्थमितिचेन्नम्यस्य नमस्कारात्पुण्यमुत्पद्यते । तदुत्पद्यमानं विरोधादपुण्यं निवर्तयति । तन्निवृत्तौ तु कार्याणां विघ्नादीनामभावं मन्यमानः सकलार्थशास्त्रपारावारदृश्वा कामंदकिराह ॥
यस्य प्रभावाद्भुवनं शाश्वते पथि तिष्ठति ॥ देवः स जयति श्रीमान्दंडधारी महीपतिः ॥
स देवो महीपतिर्जयति यस्य महीपतेः प्रभावात् प्रभुशक्तेः कोशदंडफलं हि प्रभुशक्तिः । भुवनं जगत् इदं शाश्वते नित्ये पथि स्वर्गमोक्षगामिनि मार्गे तिष्ठत्यवस्थानं करोति । देव इति दिव्यंतीति दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिष्विति धातूक्तसमस्तगुणसंपन्नत्वात् महीपतिरेव देवः । तथा चोक्तं स्मृतिकारैः—
अग्निवायुयमार्काणामिन्द्रस्य वरुणस्य च ॥ चंद्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥
यस्मादेषा सुरेंद्राणां ब्रह्मणा रचिताकृतिः ॥ बालोपि नावमंतव्यो मनुष्य इति पार्थिवः ॥
महती देवता ह्येषा नररूपेण तिष्ठति ॥
एवं देवांशैर्निर्मितत्वान्महीपतिरेव देवः ॥ कौटिल्याचार्येणाप्युक्तम् ॥ इंद्रयमस्थानमेतत् राजानः । प्रत्यक्षदंडप्रसादास्तानवमन्यमानान् दैवो दंडः स्पृशति तस्माद्राजानो नावमंतव्याः ॥ अपिच । मत्स्य[मात्सर्या]न्यायाभिभूताः प्रजा मनुं वैवस्वतं राजानं चक्रिरे ॥ धान्यषड्भागं पुण्यदशभागं हिरण्यं चाग्र्यं भागधेयं प्रकल्पयामासुः । तेन भर्तारो राजानः प्रजानां योगक्षेमावहास्तेषां हि किल्बिषमदंडकारा हरंति । योगक्षेमावहाश्च प्रजानां तस्मादुञ्छषड्भागमारण्यका अपि निर्वपंति ॥ तस्यैव तद्भागधेयं योऽस्मान्गोपायतीति ॥ अतः सर्वस्मान्महीपतिरेव देवः । विशिष्टदेवसद्भावेपि महीपतिरेव देवोधिकृतः ॥ अधिकृतानधिकृतयोरधिकृतप्रतिपत्तिर्गरीयसी ॥ कौटिल्येनात एवं राजवृत्तिरिति उक्तम् । स जयति बाह्याभ्यंतरान्नरान्रंजयतीत्यर्थः ॥ श्रीमानिति श्रीर्हि नृपस्यात्मसंपत्तयेति ॥ आत्मसंपत्तिं च स्वयमेव वक्ष्यति । शास्त्रं प्रज्ञेत्यादिना ॥ दंडधार इति वधः परिक्लेशोर्थग्रहणं च दंडः ॥ तद्दंड्येषु प्रजापालो धारयतीति दंडधारः । दंडभयादेव भुवनं शाश्वते पथि तिष्ठतीति श्लोकार्थः ॥ अधिकृतदेवतास्तुत्यनंतरं पंचश्लोककुलकेन परमगुरोरपि नमस्कारमभिधातुमाह ।
वंशे विशालवंश्यानामृषीणामिव भूयसाम् ॥ अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः ॥
विशालवंश्यानां वंशे यो बभूव तस्मै नम इति संबंधः ॥ विशालवंशे भवाः विशालवंश्याः । विशालता वंशस्य प्रजाप्राचुर्यात् गुणातिशययोगाच्च ॥ गुणातिशयो वंशस्योदितोदितत्वम् । यत्र वंशे वेदविद्यादिमंतो ब्राह्मणा अनुष्ठानसंपन्नाः पूर्वपुरुषा आतूर्यादासप्तमाद्वा नवापरे वंशोसावुदितास्तमितःतद्विपरितोस्तमोदितः ॥
तत्र यथोक्तगुणयुक्ता न पूर्वे नापरे सोऽस्तमितास्तमितःतद्विपरीत उदितोदित इति । गुणेन चानेन विशालता वंशस्य ग्राह्या॥ ऋषीणामिवाप्रतिग्राहकाणां यथा ऋषयोऽप्रतिग्राहका निर्द्वंद्वत्वात्तथैते गार्हस्थ्यधर्ममनुपालयंतोऽप्रतिग्राहका कुटिलत्वात् कुटिर्घट उच्यते तं धान्यभृतं लाति संगृह्णंति प्रातःसमये होमाद्यर्थं नाधिकमधिकं तु ब्राह्मणानुद्दिश्य सद्यः प्रक्षालयंति इति कुटिलाः कुंभीधान्या इति प्रसिद्धाः । अत एव कुटिलानामपत्यं विष्णुगुप्तः कौटिल्य इत्युक्तः । भूयसां गुणैर्महतां

बभूव संभूत: भुवि विश्रुत: न्यायकौटिल्यवात्स्यायनगौतमीयस्मृतिभाष्यचतुष्टयेन प्रकाशित: प्रकाशितपुरुषार्थचतुष्टयोपाय इति भुवि महीतले प्रख्यात: ॥ स्वानुष्ठानतत्परतां प्रतिपादयितुमाह ॥

जातवेदा इवार्चिष्मान्वेद वेदविदां वर: ॥ यो वा वेदान्सुचतुरश्चतुरोप्येकवेदवित् ॥

जातवेदा: वैश्वानर: स इव ब्रह्मतेजस्तेनयुक्त: ॥ वेदानिति सामादीन्चतुरोप्यधीतवान् अक्लेशेन सुचतुर इति सुष्ठुचातुर्ययुक्त: । प्रज्ञातिशयात्परानतिसंधत्ते परैश्च नातिसंधीयत इति । वेदविदां वर इति न केवलं चतुर्वेदाध्यायी वेदविदां वेदपरमार्थवेदिनां मध्ये वर: श्रेष्ठ: सम्यक् वेदपरिज्ञानात् यश्च वेदविदां वर: सोर्थात् सर्ववित्तन्नास्ति यन्न वेदइति न केवलं वेदार्थविदुक्तकर्म्मणामप्यनुष्ठाता तत्फलभोक्ता वेति एतद्दर्शयितुमाह ।

यस्याभिचारवज्रेण वज्रज्वलनतेजस: ॥ पपातामूलत: श्रीमान्सुपर्वानंदपर्वत: ॥

आभिमुख्येन साध्यं प्रति साधकप्रयुक्तानां मंत्राणां मंत्राद्यर्थं चारो गमनमभिचार: स एव वज्रस्तेन यस्य संबंधिनो वज्रज्वलनो वैद्युतवह्निस्तस्यैव तेजो यस्येति । वज्रज्वलनो यथा प्रतिपक्षभूतैर्जलैर्नोपशाम्यति तद्वत्कौटिल्यकोपाग्निरपि नंदादिभि: पपात मूल इति मूलं बंध्वादिमूलं बलं तदारभ्य नंद इति नवनवतिकोटीश्वर: पृथिवीपतिरत एव श्रीमान् स एव पर्वत: सुपर्वेति पर्वशब्देन ख्यातिरुपलक्षिता यथा प्रदेशसंधिर्वाभिधीयते तानि शोभनानि यस्य तथा पपात पतित आमूलत इति पुनरनुत्थानाय यदुक्तं सुचतुरस्तदेव समर्थयन्नाह ।

एकाकी मंत्रशक्त्या य: शक्त्या शक्तिधरोपम: ॥ आजहार नृचंद्राय चंद्रगुप्ताय मेदिनीम् ॥

प्रभुशक्त्यभावाददंडकोशत्वादेकाकी शरीरमात्रपरिच्छद: मंत्रशक्त्येति प्रज्ञातिशयचातुर्य्येण शक्त्योत्साहशक्त्या शक्तिधरोपम: कार्तिकेयसम: आजहार आहृतवान्। नृपमध्ये चंद्राय चंद्रगुप्ताय मौर्यकुलप्रसूताय चतुर्थी तादर्थ्ये मेदिनीं पृथिवीम् । एवं च शास्त्रप्रज्ञागुणयो: प्राधान्यं प्रख्यापितं भवति शुक्रबृहस्पत्योस्तृतीयमात्मगुरुं प्रख्यापयितुं दंडनीतिविषये प्रयोक्तृत्वमपि प्रतिपादयितुमाह ।

नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधे: ॥ य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ॥

प्रत्यक्षपरोक्षानुमानलक्षणप्रमाणत्रयनिर्णीतार्थायां फलसिद्धौ देशकालानुकूल्ये सति यथासाध्यमुपायसाधनाविनियोगलक्षणक्रिया नीति: तदर्थं शास्त्रं नीतिशास्त्रं कौटिल्यभाष्यमित्यर्थ: । तदेवामृतं तदभ्यासान्नरदेवत्वमवाप्यते इति । श्रीमानिति ब्राह्मया श्रिया युक्त: । समन्वित: अर्थशास्त्रमहोदधेरिति अर्थ्यंत इति अर्था: धर्मार्थकामास्तत्प्रतिपादकं धर्मशास्त्रं अर्थशास्त्रं प्राजापत्यं तथा चोक्तं कामसूत्रेऽस्मद्गुरुणा—प्रजापतिर्हि प्रजा: सृष्ट्वा तासां स्थितिनिबंधनं त्रिवर्गस्य शासनमध्यायानां शतसहस्रेणाग्रे प्रोवाच तस्यैकदेशं स्वायंभुवो मनुर्द्धर्माधिकारिकं पृथक् चकार । बृहस्पतिरर्थाधिकारिकम् तत्र लक्षाध्यायास्तृतीयांशत्वेन कोटिग्रंथविस्तृतं संभाव्यते एवं चार्थशास्त्रगांभीर्यान्महाप्रमाणत्वाच्च महोदधेरिव तस्माद्य उद्दध्रे उद्धृतवान तस्मै विष्णुगुप्ताय नम: ॥ नमस्कारानंतरं महाकाव्यस्वरूपनीतिसारस्य संबंधाभिधेयप्रयोजनान्यभिधातुं श्लोकद्वयमाह ॥

दर्शनात्तस्य सुदृशो विद्यानां पारदृश्वन: ॥ राजविद्याप्रियतया संक्षिप्तग्रंथमर्थवत् ॥

तस्य परमगुरोर्विष्णुगुप्तस्य दर्शनात् ज्ञानदृष्ट्या यद्दृष्टं तदेवाह ।

नरदेवेन शक्रेण गुरुणा भार्गवेण च ॥ भारद्वाजविशालाक्षभीष्मपारासरैस्तथा ॥

संक्षिप्तं मनुना चैव तथा चान्यैर्महर्षिभि: ॥ प्रजानामायुषो ह्रासं विज्ञाय च महात्मना ॥

संक्षिप्तं विष्णुगुप्तेन नृपाणामर्थसिद्धये ॥ इति ब्रह्माद्याद्यप्रणीतसंग्रहत्वादस्मत्प्रणीतप्रबंधोपि प्रमाणमिति भाव: ॥

सुदृश इति सुदृष्टेर्निर्मलज्ञानस्य । विद्यानां पारदृश्वन इति आन्वीक्षिकीत्रयीवार्त्तादंडनीतीनां पारं दृष्टवानिति पारदृश्वा । अत एव सुदृक् तस्य राजविद्याप्रियतयेति प्रियस्य भावः प्रियता राजविद्यासु दंडनीत्यादिकासु प्रियतया हेतुभूतया यदुपदेक्ष्याम इति संबंधः ॥ राजविद्याभिर्भूमीश्वरं व्युत्पाद्य रक्षादिभिर्जगतामुपकाराय पुण्यं भवत्विति प्रयोजनम् । संक्षिप्तग्रंथमर्थवदिति संक्षिप्तः संहृत एव ग्रंथो यस्य तत्संक्षिप्तग्रंथं अर्थस्तु तावानेव विद्यते यस्य तदर्थवत् अत एव सामर्थ्यान्नीतिसारमिदमेव ॥

च.—एकोऽपि वारणपतिर्द्विषतामनीकं हन्यान्निहंति मदसत्त्वगुणोपपन्नः ॥
नागेषु हि क्षितिभुजां विजयो निबद्धस्तस्माद्गजाधिकबलो नृपतिः सदा स्यात् ॥
इति श्रीकामंदकीयनीतिसारटीकायामुपाध्यायनिरपेक्षायां गजाश्वरथपत्तीनां व्यूहरचनानां निर्देशो विंशः सर्गः ॥

२९६ कार्त्तिकोद्यापनविधिः ।

आ.—यथोक्तसकलसामग्रीसम्पादनं कृत्वा कार्त्तिकशुक्लचतुर्दश्यां प्रातः ।

च.—देहान्ते वैष्णवं स्थानं प्राप्नुयामतिदुर्लभमिति सम्प्रार्थ्य विप्रान्विसर्जयेत् ॥ इति कार्त्तिकोद्यापनविधिः ॥

२९७ कालतत्त्वविवेचनम्-रघुनाथभट्टः ।

आ.—पितरं माधवमंबां ललितां नारायणं पितृव्यं च ॥ सहजमथ विश्वनाथं गणपतिमीशं च शारदां नत्वा ॥ १ ॥
रामं च सीतयोपेतं रघुनाथेन रच्यते ॥ सम्राट्स्थपतिना सम्यक्कालतत्त्वविवेचनम् ॥ २ ॥
तत्रादौ बहुवाच्यत्वात्तिथितत्त्वं विविच्यते ॥ पश्चान्मासाधिमासादि यथामति विवक्ष्यते ॥ ३ ॥

च.—प्रीयतां जानकीजानिरनेन सुकृतेन मे ॥ १० ॥
सैवांतरात्मा सर्वज्ञो रामो नः कुलदैवतम् ॥ ११ ॥
इति श्रीमत्पदवाक्यप्रमाणाभिज्ञश्रीभट्टमाधवविद्वद्वर्यात्मजसम्राट्स्थपतिभट्टरघुनाथकृतं कालतत्त्वविवेचनं संपूर्णम् ॥

२९८ कालसिद्धान्तः-चन्द्रचूडः ।

आ.—प्रणम्य दक्षिणामूर्त्तिं पितरौ च पितामहम् ॥ मन्वादिस्मृतिकारांश्च तदुक्तार्थानुचिंतकान् ॥ १ ॥
पौराणिकोपनाम्नो वै भटस्योमणशर्मणः ॥ जानक्याश्च सुतेनायं चंद्रचूडेन धीमता ॥ २ ॥
नाना निबंधानालोक्य संप्रदायानुसारतः ॥ क्रियते कालसिद्धांतः सर्वलोकोपकारकः ॥ ३ ॥

च.—इति श्रीमत्पौराणिकधर्मभट्टसूनुश्रीमद्विद्वन्मुकुटमणिश्यश्रीउमणभट्टसूरिसूनुचंद्रचूडभट्टविरचितः कालसिद्धांतः समाप्तः ॥

२९९ कुण्डप्रकाशः ।

आ.—श्रीनृसिंहं नमस्कृत्य गुरूंश्चैव विशेषतः ॥ प्रतापनारसिंहाख्ये वक्ष्ये कुंडप्रकाशकम् ॥ १ ॥

च.—इत्यादिसामग्रीं संपाद्य कुर्यादिति ॥ इति कुंडप्रकाशे नवकुंडीविधानं समाप्तम् ॥

३०० कुण्डमण्डपमण्डनप्रकाशिका-नृहरिः ।

आ.—श्रीहरिं चिन्मयं चिंतयित्वा चिरम् ॥ १ ॥
मंडने प्रस्फुटा व्याकृती रच्यते ॥ २ ॥
चिकीर्षितस्याविघ्नपरिसमाप्तिप्रचयगमनफलकं स्वकृतं मंगलं संप्रदायाविच्छेदाय निबध्नन् सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितमिति शार्दूलविक्रीडितेन तदारंभं प्रतिजानीते ॥
कूर्मानंतधरामृतार्णवमणिद्वीपेऽथ कल्पद्रुमा यश्चितामणिमंडपे सुविलसत्सद्रत्नवेद्यां विभुम् ॥
इष्ट्वांतः सुमनोरथोपरिचितस्वर्गांगपद्मादिभिः सप्तर्षिर्नृहरिर्बहिर्वितनुते सन्मंडपाद्यर्चितुम् ॥
अस्यार्थः सप्तर्षिः सप्तर्ष्युपनामकः नृहरिः ॥
च.—इति श्रीसप्तर्ष्युपनामकनरहरिभट्टदैवज्ञविरचिता कुंडमंडपमंडनप्रकाशिका समाप्ता ।

३०१ कुण्डमृदङ्गः-गोपालः ।

आ.—आर्यादुर्गां प्रणम्यादौ गुरुविघ्नेशवाक्पितॄन् ॥ पांडुरंगिपटुं प्राह कुंडे वास्तवमावहत् ॥ १ ॥
च.—शके — — — — — — — इति कुंडमृदंगनामा ग्रंथः समाप्तः ॥

३०२ गायत्रीपुरश्चरणविधिः ।

आ.—अथ गायत्रीपुरश्चरणप्रयोगः ॥ आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य करिष्यमाणगायत्रीपुरश्चरणेऽधिकारसिद्ध्यर्थ-ममुकशर्मणोऽनुज्ञया तत्प्रतिनिधित्वेन कृच्छ्रत्रयममुकप्रत्याम्नायेनाचरिष्ये इ..........
च.—दीनानाथांश्चान्नादिना सन्तोष्य स्वयं सुहृन्मित्रादियुतः सोत्साहः सन्तुष्टो भुञ्जीतेति ॥
इति गायत्रीपुरश्चरणविधिः समाप्तः ॥ गायत्रीपुरश्चरणचन्द्रिकान्तर्गतोऽयं प्रयोगः ॥ रामरत्नशर्मसम्मतः ॥

३०३ गायत्रीभाष्यनिर्णयः ।

आ.—सर्वावभासकतेजोमयस्य परमात्मनः सर्वात्मताबोधनार्थं सर्वात्मकत्व..........
च.—गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकाम् ॥ प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः ॥
इति श्रीगायत्रीभाष्यनिर्णयः समाप्तः ॥

३०४ गोविन्दार्णवः-नृसिंहः ।

आ.—सन्मायावशतः प्रपञ्चितवपुश्चिरस्वप्रकाशात्मकं श्रुत्यातद्व्यतिरेकगम्यमपरानन्दाद्वितीयात्मकम् ॥
स्वाध्यासान्मनसा वृतस्य जगतोऽसत्यस्य यद्भासकं भूत्यै तन्निखिलाघसंहतिचणं स्यान्नारसिंहं महः ॥ १ ॥
मूर्तिं तूर्णविदीर्णदैत्यनखरां प्रेक्ष्य प्रकम्पां पुरो लक्ष्मीं मुद्रितलोचनां सचकितं वीक्ष्याशु संहृत्य तत् ॥
रूपं सस्मितमीक्षितामरमुखो मायेति विस्मापितां तामालिङ्ग्य विनोदयंश्चटुशतैर्युष्मान्नृसिंहोऽवतु ॥ २ ॥

सिद्धिं बुद्धिमुभे अपि प्रियतमे सङ्घर्षवत्यौ मिथो वाञ्छन्त्यौ प्रथमं स्वयंग्रहपरीरम्भेण मानं प्रियात् ॥
ज्ञात्वा मानयतः समं गणपतेः प्रस्तावनाढ्योत्सवं स्वेच्छालिङ्गनचुम्बनादिललितं जीयादपास्तक्रमम् ॥ ३ ॥
दन्ताघातविभिन्नभूतलवलन्नागेन्द्रमौलिज्वलद्रत्नज्योतिषि कुम्भकण्डुविगमस्तम्भभ्रमादिच्छतः ॥
दानाम्भःस्नुतिपङ्किलक्षितिमिलन्नैजातुबिम्बद्विपं हन्तुः सन्तु मुदे मुधा विधुतयो मूर्द्धो गणानां प्रभो [भोः] ॥ ४ ॥
अन्तर्द्धारितवारिवारिदघटाः प्रेक्ष्यान्तरिक्षेऽद्भुतं संरम्भादिभविभ्रभान्निपततो दानाम्बुमेदस्विनः ॥
उच्चैरुन्नतदन्तकुन्तशिखरप्रोता मुहुर्धुन्वतो विघ्नेशस्य विलोलचामरचमत्काराश्चिरं पान्तु वः ॥ ५ ॥
नागेन्द्र द्रुतमावृणुष्व गरलज्वालावलीमाकुलां गङ्गे जह्नुसुते मनागलमलं कल्लोलकोलाहलैः ॥
वह्ने वारय विस्फुलिङ्गपटलीमित्यद्रिराजात्मजानिद्राभङ्गभयाच्छनैरुपदिशन्देयात्सुखं शङ्करः ॥ ६ ॥
विश्वस्यायतनं तृतीयनयनस्फारस्फुरत्पावकज्वालाजालशिखावलीभिरभितो भक्तौघविघ्नान्दहन् ॥
शर्वाणीकिलकिञ्चितामृतरसानन्दैकमज्जन्मना विश्वेशस्त्रिजगद्गुरुः सकरुणः पायादपायाज्जगत् ॥ ७ ॥
यस्मिन्पौरस्त्यशैलातुलशिखरशिरःशेखरे रिङ्गति द्रागुन्मीलद्वाररागप्रचुरकरपरीरम्भसम्भाविताब्जैः ॥
पद्मासद्माम्बुजानि द्विजवरकरहृद्व्यक्तपङ्केरुहाणि व्यस्तध्वान्तं विकाशं दधति दिनमणिः पातु युष्मान्स देवः ॥ ८ ॥
समुन्मीलन्नीलश्रवणशिखसञ्चारणरणद्विपञ्ची सध्रीची श्रुतिनिगदवीची विजयते ॥
— — — — — — — — — — — — — — — — — — — ॥ ९ ॥
अस्ति स्वस्तिस्थितिरिह चतुर्वर्गसर्गैकभूमिः स्वर्गङ्गायास्तटपरिसरे राजधानी शिवस्य ॥
यस्यामीशः शमितविषमाशेषकीनाशपाशं शश्वज्जन्तोरुपदिशति तत्तारकं ब्रह्म शान्तम् ॥ १० ॥
यस्यां शिष्टा नियमितमनोवृत्तयस्तत्त्वनिष्ठा योगोद्योगादवहितधियः शुद्धसत्त्वा निरीहाः ॥
प्रत्यग्ज्योतिः किमपि तमसां प्रत्ययानां परस्तादस्ताशङ्कं निरवधिपरानन्दमाशीलयन्ति ॥ ११ ॥
पुरहरपुरतः— — — सुरसरितश्चोपतीरमन्तरिता ॥ विविधाभिभवैर्विभवैरभिरामा राजते नगरी ॥ १२ ॥
सुरसरिदुपकण्ठे नीलकण्ठो यदीयं त्रिभुवनकमनीयं वीक्ष्य रम्यत्वमत्र ॥
अकृत सुकृतसारे ताण्डवं तेन नाम्ना प्रथितिरिह पृथिव्यामस्ति ताण्डेतिकास्याः ॥ १३ ॥
अपुरपुरसमृद्धिस्पर्द्धया या परार्द्ध्यानगणितमणिराशीनाश्रयन्त्यम्बुराशेः ॥
विविधविबुधशोभाभाजनानां जनानां व्यनयदनयहीना नागलोकोत्सुकत्वम् ॥ १४ ॥
यस्यामभ्रंलिहगृहमहानीलनीलांशुजालैरह्नो मध्ये कवलितमहो मण्डलं चण्डभानोः ॥
सद्योविद्योतितमणिगणो दीर्घशोणांशुहासग्रासादासादितमलिनिमालक्ष्यमैक्षि— — — ॥ १५ ॥
यत्प्राकाराग्रजाग्रत्स्फुरदरुणमणिश्रेणिसङ्क्रान्तकान्तिर्विश्रान्तोर्द्ध्वे प्रसङ्गादधिनगरि चिराचङ्क्रमोपक्रमेषु ॥
शीतांशुश्चन्द्रकान्तं दिनमणिदृषदं चक्रवाकं चकोरं तुल्यं निश्छद्मपद्मं कुमुदमपि समानन्दसार्द्रीकरोति ॥ १६ ॥
यत्कान्तामुखकान्तिनिर्जिततनुस्तज्जातलज्जाकुलः सौधोत्सेधविचित्ररत्ननिचयोदञ्चद्रुचेश्चुम्बनात् ॥
शोणाब्जीयति षट्पदीयति मुहुर्हैमातपत्रीयति द्राकुन्दीयति चन्द्रमाः कमलिनीपत्रीयति प्रत्यहम् ॥ १७ ॥
स्वे स्वे धर्म्मे निहितमतयो यत्र लोका विशोका नो काङ्क्षन्ति त्रिदशपतितां यक्षराजश्च साक्षात् ॥
यामध्यास्ते विरचितशिवा सा शिवा काशिवासिप्राणत्राणावहितविहितानेककामा निकामम् ॥ १८ ॥

दृष्ट्वा सृष्टिं सुचिरमखिलां नीरसस्याऽब्जयोनेर्गौरीनाथः स्वयमरचयत्कल्पितातल्पशिल्पाम् ॥
यामालोक्य त्रिदशतटिनीदत्तहारामसारां वारांराशौ नियतमपरां मज्जयन्त्यञ्जसांसः ॥ १९ ॥
गौर्यो यत्र गृहे गृहे युवतयः सर्वे महेशा नराः किं चास्यां धनदाः प्रधानपुरुषा यत्रानुगा जिष्णवः ॥
लक्ष्मीशाश्चतुराननाः इह जनाः सन्तीति या स्वर्गताऽप्युच्चैरप्यधिका विनायकगणैर्देवालयैः शोभिता ॥ २० ॥
सद्धर्मकर्मपरिकर्मणमर्मविज्ञा विज्ञातवेदविषया विषयानपेक्षाः ॥
साक्षादिवात्र विधयो निधयो गुणानां शश्वद्द्विजा न हि निजाद्विचलन्ति मार्गात् ॥ २१ ॥
ढिल्लीपल्लीवयस्या विलसति पुरतः कालपी कालपीतेवान्तःपीतेव चम्पा तदनु च मलिना ह्रीविशाला विशाला ॥
रागागाढाभितापा परिपतदयशोमग्नदेहा विदेहा लङ्काऽऽतङ्काकुलासीदपि विशदयशाः सालका [क.ल] कान्तिः ॥२२॥
अस्ति स्वस्तिप्रशस्तिर्भुवि भुवनतलाभोगभूषायमाणो वंशः श्रीवास्तकाख्योऽमितविभवभरो हासितां[ता]शाविभागः ॥
प्रत्यग्रोदग्रजाग्रन्निजभुजयुगलोद्दामदीप्यत्प्रतापज्वालामालावलीढप्रतिनृपतिबलो धर्मकर्म्मैकधुर्य्यः ॥ २३ ॥
तस्मिन्वंशेजनिषत शतं शूरवंशावतंसाः कंसारातेश्चरणयुगले दत्तचित्तावधानाः ॥
सन्नीतिज्ञा द्विजसुरगुरुप्रापितार्थाः कृतार्थाः पार्थप्रख्याविशदयशसो धर्मकर्म्मैकधुर्य्याः ॥ २४ ॥
तत्रासीन्स्तुचिहासः शौर्य्यनिवासः क्र [क्र] तेन्द्रपरिहासः ॥ परिहृतजगदायासो जनितत्रासः परेषु शिवदासः ॥ २५ ॥
शिवाराधनासावधानेन मुक्तामणीहारनीहारवीहारगौरम् ॥
यशोधामधामाभिरामं— — —सदा येन तेने सदायेन येन ॥ २६ ॥
शिवं समाराध्य चिराय येन भगीरथेनेव ततःप्रसादम् ॥ आसाद्य सद्यो निजकीर्तिपूरे दूरेऽभ्यषेचि प्रसभं त्रिलोकी ॥२७॥
तस्मादाविरभूत्प्रभूतविभवो गाङ्गेयमेयोर्जितो गङ्गादास इति प्रसिद्धमहिमा गङ्गां समाराध्य सः ॥
स्वामाख्यामकृतार्थयत्कुलमलंचक्रेऽन्यचक्रेश्वरानक्लेशादजयज्जयैकनिलयः शक्रेऽप्यवज्ञाकरः ॥ २८ ॥
तदनु दनुजवैरिपादपद्मप्रणतिपरः समभून्महेशदासः ॥ इह हरिहरयोरभेदभावं भजनमुपादिशदेव यो जनेषु ॥ २९ ॥
यद्वाहाबलमाकलय्य बलिनः प्रत्यर्थिपृथ्वीभृतो भूभृत्कन्दरमन्दिरेषु निभृताः स्त्रीपुत्रमित्रादिषु ॥
हित्वा स्वेषु च पक्षपातमतुलं गाढान्—रागं मृगव्यालव्याघ्रकिरातकेसरिपरीवारे समातन्यते ॥ ३० ॥
अजनि नयनसिंहः पार्थिवोऽस्मादकस्मात्समरभुवि यदीयं सिंहनादं निशम्य ॥
परनरपतिमाद्यत्तुङ्गमातङ्गसङ्घाः सपदि विपदि मग्नास्ते दिगन्तान्भजन्ते ॥ ३१ ॥
क्रूराक्षीणविपक्षपक्षदलने दक्षेण येन्नेश्वरादन्यूनेन नयेन [येन] सकलं भूमण्डलं शासता ॥
वैषम्यं न विरच्यतेऽत्र भुवने मित्रेष्व [मित्रेषु] वा स्वस्त्रीकेलिपरेषु निर्मितचिरस्वास्थ्येषु नित्यार्थिषु ॥ ३२ ॥
तद्वंशे भूवतंसेऽजनि जननयनानन्दचन्द्रो नरेन्द्रो माहेन्द्रं लोकमेषा हसति वसुमती यं पतिं प्राप्य पुण्यैः ॥
श्रीमानुत्सन्नशत्रुः परिचरितसदामाधवोमाधवो यं सम्प्राप्ताः साधवोऽमी गुणमणिविपणिर्गाधवो धर्मधुर्य्यः ॥ ३३ ॥
दाने माननिदाने विनये च नये च यशसि सौन्दर्य्ये ॥ पार्थादेरयथार्थामप्रथयद्यः प्रथां ततः पुत्रात् ॥ ३४ ॥
आसन्नासन्नभूमीपतिततिनतिमत्कोटिकोटीरकोटिप्रोन्मीलन्नीलरत्नावलिवलितरुचिभ्रान्तभृङ्गाङ्गनाभिः ॥
पीत्वा यत्पादपद्मोदरदरगलितां साधुधूलीमधूलीं स्वैरंयत्कीर्तिगीतैः सपदि मुखरितास्ते दिगन्ताः समन्तात् ॥ ३५ ॥
स्वर्वाहिन्याः प्रवाहाः किमु किमुत सुरा ब्रह्मगोविन्दरुद्राः किं वा धर्मार्थकामा ननु किमु निगमा ऋग्यजुःसामरूपाः ॥
स्वर्भूपातालल्लोकाः किमुत किमुदयाः साधुसिद्धित्रयोत्यास्त्वेषां ज्येष्ठस्त्रयाणामखिलगुणगणैर्भूपगोविन्दचन्द्रः ॥ ३६

यः पद्मासद्मधीरो धरणिधरवरैराश्रितो जाग्रदुग्रोदग्रोदीर्णप्रतापानलकलितदिशः श्रीशदत्तात्मवानः ॥
सर्वाशापूरिभूरिस्फुरितरुचियशश्चन्द्रमाश्चन्द्रहासोदञ्चद्दर्वीकरः सद्गुणगणमणिभिः पूर्णरत्नाकरश्रीः ॥ ३७ ॥
रिङ्गत्तुङ्गतुरङ्गपुङ्गवगलद्दानद्विपद्वीपजोदञ्चच्चारुपदार्थसार्थरमणीचञ्चन्मणीनां गणैः ॥
क्षौणीपा यमुपासते परिजनान्विज्ञापयन्तः परे पारे लक्षमनुष्यनत्यवसरं लब्धुं दिगन्तागताः ॥ ३८ ॥
पूर्वप्रत्यगवागुदग्जलनिधिप्रौढामसीमक्षमापालानां गरिमावगर्हितमहद्धिमाचलैर्मौलिभिः ॥
उह्यन्तेऽवहितैर्विधेरिव चिरं यच्छासनान्यद्भुतो गोविन्दक्षितिपस्य तस्य महिमा केनात्र वा वर्ण्यताम् ॥ ३९ ॥
चित्ते निर्मलधर्मकर्मपरता हस्ते च दानक्रिया नेत्रांते करुणा मुखे मधुरता वाचां क्रमे चातुरी ॥
गांभीर्यं सकलेंगितेषु विजयः सर्वत्र यात्राविधौ गोविंदक्षितिपे दधाति सकलां वृत्तिं सदा वास्तवीम् ॥ ४० ॥
नैवाऽधर्मरतिर्न धर्मविरतिर्नोऽसंमतिस्सन्मतौ न द्विभीषणमाश्रितेषु शरणायातेषु नोपेक्षणम् ॥
अर्हाणां च विगर्हणं न चरितं दाने सदानेन वा रूप्याद्रिः कनकाचलो न दलितो नैवाऽवदानोद्यमैः ॥ ४१ ॥
विसृष्टपुरमंदिराः परिजनैर्निजैर्निर्ममाः स्थिरीकृतसमाधयो गिरिषु मे [ख]लालंबिनः ॥
कृशा जटिलमौलयो विहितशीर्णपर्णाशिनाश्चरन्ति सुचिरं तपः किमु जयाय यस्यारयः ॥ ४२ ॥
स्फुरत्कनकसम्पदः प्रचुरचारुसिंहासना मिलद्बहलभोगिनः कलितपुंडरीकालयाः ॥
चरच्चमरसंचया बहुविशालशालाकुलाः समा रिपुगृहाः कृता विपदि येन सम्पद्यऽपि ॥ ४३ ॥
यस्यासीदनुजोऽनुरक्तमनुजः श्रीकाशिराजो जगज्जेता तर्जितजैत्रशात्रवमिदं भूमंडलं मंडयत् [न्]
सर्वाशाः परिपूरयन्निजकरैः पद्मोदयं भावयन्दिक्चक्रं किल लालयन्दिनकृता तेजोनिधिः स्पर्द्धते ॥ ४४ ॥
यत्कीर्तिः शरदिंदुकुंदधवला निर्माति कर्माऽद्भुतं पीतं भूवलयं तनोति तनुते रक्तानरक्तानपि ॥
मंदानां मलिनीकरोति हृदयं दुःखाकरोति द्विषः संतापं रिपुसुंदरीषु कुरुते मित्रेषु शांतिं पराम् ॥ ४५ ॥
गांभीर्येन [ण] सरित्पतिः सुमहता धैर्येण भूभृत्पतिः सौंदर्येण रतेः पतिश्चतुरया वाचा च वाचस्पतिः ॥
लक्ष्म्या स्वःपतिरार्यचित्तकमलोल्लासेन चाऽहर्पतिः सर्वाह्लादनया निशापतिरसौ शौर्येण सीतापतिः ॥ ४६ ॥
यस्य प्रौढनरेश्वरस्य जयिनः संग्रामयात्रोद्यमे भेरीदुंदुभिझर्झरौघपटहध्वाने समुत्सर्पति ॥
दूरे वैरिमहीमहेंद्रनगराण्याकस्मिकं बिभ्यति क्षुभ्यंति प्रचलंति दिक्षु बहुधा धावंत्यरण्योन्मुखम् ॥ ४७ ॥
अमलकमलपत्रे काशिदासस्य नेत्रे व्यरचयदिव पद्मासद्मनी पद्मयोनिः ॥
विलसति कथमस्मिन्नार्थिसार्थेन्ययायं दरविलसदपांगासंगिनि श्रीतरंगः ॥ ४८ ॥
मिथ्यावादो भाति चैतन्यभिन्ने दाने रागः साधुधर्मेषु लोभः ॥
द्वेषो दोषे मत्सरस्तत्सहाये न त्वन्यस्मिन्काशिराजस्य यस्य ॥ ४९ ॥
यस्य प्रौढतरप्रतापदहने सद्यः पतंगायितैर्नानाद्वीपमहीमहेंद्रनिवहैर्द्रव्यं चिरादर्जितम् ॥
यत्रालक्ष्यत कैश्चनाक्षयतरं लक्षाहिसंख्याशतैर्येनानक्षरकुक्षिभिक्षुकजने प्रक्षिप्यते तत्क्षणात् ॥ ५० ॥
यद्दानृत्वकथाप्रथाश्रुतिपथं प्राप्ता सती तां वृथा कर्णादेर्विरहव्ययाशिथिलयत्यस्मिन्मही मण्डले ॥
यं सृष्ट्वा सकलं त्रिविष्टपमिदं दृष्ट्वा क्व वासं प्रति स्रष्टुर्वस्तुनि वस्तुतस्तु गतया नासीन्मतिः सन्मतेः ॥ ५१ ॥
तदनु तदनुजोजनिष्ट तेजोविजितरविः स नरोत्तमाभिधानः ॥ परपरिभवविरामधामकामावतरणबोधकतानुरूपरूपः ॥५२॥

येन स्फीतप्रतापानलबहलवलत्ज्वा[ज्ज्वा]लजालावलीढप्रौढप्रत्यर्थिपृथ्वीपतिबलजलधिप्रोद्यदुद्दामदोष्णा ॥
क्षोणौ वर्णाश्रमाणामनवरतमहाधर्मकर्माणि सम्यक्[ग्] निर्वोढं वीतविघ्नं यवनपरिवृढः प्राज्यराज्येऽभ्यषेचि ॥ ५३ ॥
यस्य क्ष्मापनरोत्तमस्य सुमतेराकर्ण्य बाहाबलं नानादूतमुखाद्दिगंतधरणीचक्रेश्वराः प्रत्यहम् ।
भूकंपाद्यशुभेन सूचितनिजस्थानापहारापरे शैलांतर्वनदुर्गमार्गमसकृत्संस्कुर्व्वते सर्वतः ॥ ५४ ॥
यो भूभृत्कुलमौलिनिर्मलमणिर्लोकात्तना[ब्जा]वलीवीकासद्द्युमणिः समुन्नतकुलालंकारचूडामणिः ॥
सच्चेतःसरसीविहंगममणिश्चातुर्यचिंतामणिस्तस्यैतस्य नरोत्तमस्य भुवने किं किं न लोकोत्तरम् ॥ ५५ ॥
रूपविनिर्जितकामः पूरितकामः सदा रणोदा[द्दा]मः ॥ सर्वगुणैरभिरामः शत्रुविरामो नरोत्तमोऽवामः ॥ ५६ ॥
महीपालमालस्थितीवर्णमालां लिखित्वार्थिमाले तदीयाक्षरालीम् ॥
नृपालीललाटे लिखित्वा विधातुर्विधत्ते वृथा यो विधेयप्रयासम् ॥ ५७ ॥
द्विजानां निजानामजस्रं सहस्रं सदा पूर्णकामं विधत्ते निकामम् ॥
अकामं च कामद्रुहः प्रीत्त[ति]हेतुं सदा शर्मणे कर्म निर्माति धर्म्यम् ॥ ५८ ॥
दाने कीर्तिनिदाने गाने माने च देवसेवायाम् ॥ यो विनयेपि नयेपि प्रौढिं प्रीत्या परां श्रयति ॥ ५९ ॥
दारिद्र्यादिसुतैर्वृतांप्रियतमामुख्यार्थनादुःस्थितं नानारोगपुरोगमुग्रतरया चौर्यादिचम्वान्वितम् ॥
दानैर्येन मुहुः कदर्थितमयं प्रत्यर्थिपृथ्वीभृतां सार्थैः सार्धमयाचलं जलनिधेः पारेषु विश्राम्यति ॥ ६० ॥
भूपाः किं न हि संति संप्रति परं पारेपरार्धं पुरा नैवासन्कति वा न च त्रिभुवने भूयो भविष्यंति वा ॥
पापाः स्वोदरपूरणैकनिरताः किं त्वत्र पुण्याशयो दृष्टः कष्टहरो नरोत्तमविभोरन्यो न धन्यो भुवि ॥ ६१ ॥
कामारेर्नयनत्रयी यदि भवेत्स्यादष्टनेत्री विधेः स्याच्चेद्वा[द्वा]दशलोचनी हरशिशोर्लंकाधिराजस्य च ॥
स्याच्चोद्विंशतिलोचनी सुरपतेः साहस्रनेत्री यदि स्यादेतद्गुणपूरपारमपरं लोके विलोके परम् ॥ ६२ ॥
यस्मिन्नुर्वीनरामिममिहाखर्वदर्वीकरेंद्रक्षोणीभारक्षमभुजयुगे सादरं सन्निवेश्य ॥
श्रीगोविंदो हरिरिव हरौ संततं मुक्तचिंतस्तन्वन्धर्मं कलयति परं सर्वसाम्राज्यभोगम् ॥ ६३ ॥
गोविंदकाशिनृपभूपनरोत्तमानां सौत्रात्त [सौभ्रात्र] मत्र भुवनेपरिभाव्य भूयः ॥
ते रामलक्ष्मणहरीन्द्रयुधिष्ठिराद्या वासानिलैर्मलिनयंति यशः स्वकीयम् ॥ ६४ ॥
तेषां ज्येष्ठो वरिष्ठः सकलगुणगणैरिष्टपूर्तादिधर्मानिर्माता कर्मनिष्ठः सहृदयहृदयानंदनिष्यंदकंदः ॥
श्रीमान्गोविंदचंद्रः सकलनृपशिरोवंद्यपादारविंदः सानंदं ब्रह्मविंदान्यनरिपरिचरन्याति भूमीमखंडः ॥ ६५ ॥
तरणिसरणिवेल्लच्चंचला चंचला श्रीः कमलदलगतांभोबिंदुलोलां [लं] किलायुः ॥
इति मनसि विमृश्यानन्यसानान्यकीर्तिः स्थिरतरपरिपाकं कर्म निर्मातुमैच्छत् ॥ ६६ ॥
न खलु जगति जातु कर्म जातं न यदि दमाय करोति कर्मजातम् ॥
इह यदजनि साधुसन्निधीनां पदमयमाजनि साधुसन्निधीनाम् ॥ ६७ ॥
अथ कलिकवलीकृतं कृतज्ञस्मृतिनिगमानुगमात्समुद्धरिष्यत् ॥
अनुदिनमनुतिष्ठताहितार्थी स किल निबंधु [न्ध] मियेष धर्मतत्त्वम् ॥ ६८ ॥
तदुचितचिरचिंताचुंबिचेताः स नेता जगति मृगयमाणः पंडिता [न्] क्षोददक्षान् ॥
अपरचिद्गुरवृंदमंदमंदादरासत् [द्] गुरुमथ सविशेषं शेषवंशं ददर्श ॥ ६९ ॥

विलसदुभयपक्षैर्भूषितः सद्द्विजेन्द्रैरुदधिरिव य आस्ते नस्तगंभीरभावः ॥
यदतिविमलदूरापातिसारस्वतौघान्छलदमलपूर्षति क्ष्मातलं प्लावयंति ॥ ७० ॥
यस्मिन्नासन्नविरतमखप्रक्रियाकांडशौंडा दांतास्तत्त्वं परि– –चयोन्मीलदद्वैततत्त्वाः ॥
चातुर्योद्योदितहितसदाचारसंचारचौरोदंचच्चिन्तासुलुकनचमत्कारिचातुर्यधुर्याः ॥ ७१ ॥
शाब्दीमर्थमयीं विधाय विविधां वेधा निधाय द्विधा सृष्टिं भोगिपतौ परां तदपरां यस्मिन्ननन्याश्रयाम् ॥
तं सारस्वतभारधारणपटुं भूभारसारोद्धुरं दृष्ट्वा तं वसमावनस्य सदृशौ श्रीशेषनाम्नांचिकत् ॥ ७२ ॥
दृष्टाशेषविशेषशेषविविधप्रख्यातिसख्यस्पृशं यं श्रीमानधिशिश्रिये स्वयमहो विष्णुः पुराणः पुमान् ॥
यद्प्रोक्ता किल शेषभाषितमहाभाष्या[ब्धि]पोतायिता व्याख्या काचिदुदंचितोचितनया जागर्त्ति लोकत्रये ॥ ७३ ॥
यस्यान्यानि निबंधानानि बहुशो न्यायेथ वैशेषिके मीमांसायुगले श्रुतिस्मृतिपथे ब्रह्मार्कसिद्धांतयोः ॥
नित्यं जैमिनिगौतमात्रिकणभुग्गार्गादिनामावलीं यत्पर्यायतया दिशंति विदुषां श्रोत्रे प्रविश्य स्फुटम् ॥ ७४ ॥
इति कति कति नासन्नीतिरीतिप्रतिष्ठाः क्षितियतिकुलपूज्याः सर्वशास्त्रप्रवीणाः ॥
यदतिविमलकीर्तिस्पर्द्धयोल्लंघयिष्यञ्जलनिधिमुडुपोपि भ्रांतिमभ्यस्यतीव् [व] ॥ ७५ ॥
तत्राभूत्सकलकलाकलापकौतूहलावासः ॥ श्रीरामभद्रविबुधः परममहापुरुषलक्ष्मणोपेतः ॥ ७६ ॥
तर्के कर्कशतां वहन्नतितरां भाट्टे तथात्युद्भटो वदांतेषु पटुस्तथातिनिपुणः सांख्येपि विख्यातधीः ॥
अष्टव्याकरणीप्रबंधचतुरः साहित्यरत्नाकरः क्षोणीमंडलमंडनैकतिलकः श्रीरामचंद्रो गुरुः ॥ ७७ ॥
आचारे चतुराननः श्रुतिवनीसंचारपंचाननः शास्त्रदाश्च षडाननः खलमिलन्मानादिनिर्भेदने ॥
नानाशास्त्रवचोविचारणचमत्कारे सहस्राननः केषमिष मनोविनोदमतनोन्नो रामभद्रो बुधः ॥ ७८ ॥
विद्यानामवनिर्गुणैकविपणिश्चातुर्यचिंतामणिः साधूनां सरणिः खलद्विपसृणिः सत्सूक्तिमुक्ताखनिः ॥
निःश्रेणिः शरदिंदुकांतयशसां श्रेणिः स्वयं श्रेयसां विद्याभिः समतां नयत्त्रिभुवनं यो रामसिंहः स्वयम् ॥ ७९ ॥
तत्तनयः प्रथितनयः क्र[क्री]तविनयः सृष्टदुःक्र[ष्कृ]तापनयः ॥ अभवद्गुणैकनिलयः श्रीनरसिंहाभिधो विबुधः ॥ ८० ॥
तं शेषामलवंशभूषणमणिं गोविंदचंद्रः स्वयं विद्वन्मंडलपुंडरीकतरणिर्भूमंडलीमंडनम् ॥
धर्मोद्धारविधौ समाहितमनाः प्रीत्यानुनीत्यामुना गोविंदार्णवनामकं व्यरचयत[यद्ध] धर्मप्रबंधं शुभम् ॥ ८१ ॥
अशेषविदुषामेष संतोषाय विशेषतः ॥ करोति तदनुज्ञातो नृसिंहः सन्निबंधनम् ॥ ८२ ॥
किं दुर्जनानामिह तर्जनाभिस्तुष्यंति संतो यदि मत्कृतेन ॥ शंभोः शिरःशेखरतां प्रयातं विधुं धुनीते न विधुंतुदोपि ॥८३॥
श्रुतिस्मृतिपुराणानि निबंधान्विविधानपि ॥ दृष्ट्वा सम्यक्समासेन सारोद्धाराय मे श्रमः ॥ ८४ ॥
तत्रादौ सुखबोधार्थं ब्रूमः प्रकरणक्रमम् ॥ संस्कार आह्निकं श्राद्धं शुद्धिः काल इति क्रमात् ॥ ८५ ॥
वीचयः पंच विज्ञेयाः सर्वशास्त्रार्थदीपिकाः ॥ ८५ ॥
निबंधमतिभेदेन धर्मतत्त्वं यदस्फुटम् ॥ विविच्यते सुहृदयप्रीत्यै तत्न्या[न्या]यलेशतः ॥ ८६ ॥
इह यद्यपि धर्म्मार्थकाममोक्षाश्चत्वारः पुरुषार्थाः श्रूयंते सेव्यतया तथापीतरपुरुषार्थत्रयस्य धर्माधीनसिद्धिकत्वेनोपजीव्यत्वादावश्यकत्वात्स एव प्रथमतः सेवनीयः अत एव चायं सकलपुरुषार्थमूलभूततया प्रथममपदिष्टः ।

च.–कामभक्षापर्युषितभोजनादिः प्राग्विवाहात्स्त्रीणामप्येष कामचारः तासां विवाहोपनयस्थानीयत्वात् ॥
विष्णुपुराणे । भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते ॥ अस्मिन्काले न दोषः स्यात्स यावन्नोपनीयते ॥ इति ॥
वसिष्ठोपि न ह्यस्य विद्यते कर्म किञ्चिदामौं – – – – –

३०५ जयसिंहकल्पद्रुमः-रत्नाकरः ।

आ.–करीन्द्राननं चारुचन्द्रावतंसं स्रवद्गण्डपालीमिलद्भृङ्गमालम् ॥...........

च.–जगतो मङ्गलं विष्णुं माङ्गल्येषु च कीर्तयेदिति ॥

श्रीमद्दिल्लीशसेनोद्भटविकटभटोद्दण्डमत्तेभसिंहश्चण्डोन्मादानुरुष्कक्षुभितवसुमतीपालने धर्मराजः ॥

पौत्रः श्रीकृष्णसिंहक्षितिपकुलमणेर्विष्णुसिंहस्य पुत्रः श्रीमान्राजाधिराजो जयहरिरमराधीशवत्कौ सुखी स्यात् ॥ १ ॥

श्रीमत्पण्डितदेवभट्टतनयः श्रीराघवांघ्रिद्वयध्यानावाप्तसमस्तकामनिवहः सम्राट्स रत्नाकरः ॥

तुष्ट्यै श्रीजयसिंहवर्मनृपतेः कल्पद्रुमे गुच्छकं वारादिव्रतविस्तरं समकरोदेकोनविंशं परम् ॥ २ ॥

यश्चक्रेऽवन्तिकायां द्विजवरसहितः सन्मखं सोत्सवाख्यं ज्योतिष्टोमं ततो वै जयनृपतियुतेम्बापुरे वाजपेयम् ॥

श्रेष्ठं सर्वक्रतुभ्यो विविधविधियुतं पौण्डरीकं च यज्ञं षट्त्रिंशद्वत्ससाध्यं द्विजवरमहितं द्वादशाहक्रतुं च ॥ ३ ॥

सर्वतोमुखमखं क्रतूत्तमं संविधाय युगवेदिकायुतम् ॥ देवभट्टजनुरग्रजन्मना कल्पवृक्षरचना त्वियं कृता ॥ ४ ॥

शाके विक्रमपार्थिवस्य शुभदे व्योमर्षिसप्तेन्दुयुग्वर्षे शोभनसञ्ज्ञके शिवतिथौ मासे नभस्याख्यके ॥

कूर्मश्रीजयसिंहदेवनगरे पुण्येम्बिकेशाञ्चिते ग्रन्थः कल्पतरुः समाप्तिमगमत्सज्ज्ञानवित्तप्रदः ॥ ५ ॥

रत्नाकरेण जयसिंहसमर्चितेन सद्वाक्यरत्ननिवहैः किल सङ्गृहीतः ॥

ग्रन्थोऽर्थदः सफलकल्पमहीरुहाख्यः श्रीजानकीशपदपद्मयुगेर्पितोऽयम् ॥ ६ ॥

ग्रन्थान्बहून्सुविततान्सुचिरं विभाव्य कष्टेन यः कविवरैरधिगम्यतेऽर्थः ॥

निर्मत्सरं बुधवराः परितो विचार्य ग्रन्थादुरीकुरुत तं हि विना प्रयासम् ॥ ७ ॥

दिवि पञ्च कल्पतरवः परिश्रुता जयसिंहवर्मनृपतेः समा न ते ॥

कथमन्यथा सुरगणोम्बिकापुरे वनितुं सदाध्वरमिषात्समाययौ ॥ ८ ॥

इति श्रीदेवभट्टात्मजपौण्डरीकयाजिरत्नाकरविरचिते श्रीजयकल्पद्रुमोद्योते एकोनविंशः स्तबकः ॥ समाप्तश्चायं ग्रन्थः ॥

वेदार्षिसप्तेन्दुमिते हि वर्षे नभस्यकृष्णप्रतिपत्तिथौ च ॥ कल्पद्रुमं वै शिवरामभट्टोऽलिखच्छुभं श्रीमथुरोपनामा ॥ १ ॥

३०६ जीवत्पितृकविभागव्यवस्थासारसंग्रहः-गोस्वामिमधुसूदनः ।

आ.–श्रीव्रजराजं पितरं नत्वा मधुसूदनेन या पूर्वम् ॥ जीवत्पितृकविभागे धर्म्या रीतिर्यथाशास्त्रम् ॥ १ ॥

संक्षेपेण निबद्धा तस्या अपि सारसंग्रहः क्रियते ॥ सुखबोधाय नराणामधुना मधुसूदनेनैव ॥ २ ॥

तत्र प्रमाणयुक्तीनां जिज्ञासा स्याद्यदा तदा ॥ जीवत्पितृविभागे द्रष्टव्यं मत्कृते सर्वम् ॥ ३ ॥

च.–इति श्रीलवपुरवासिसारस्वतवंशावतंससकलशास्त्ररहस्याभिज्ञश्रीगोस्वामिव्रजराजात्मजेन गोस्वामिमधुसूदनशर्मणा विरचितो जिवत्पितृकविभागव्यवस्यासारसंग्रहः । समाप्तश्चायं जीवत्पितृकविभागव्यवस्थासारसंग्रहः ॥ संवत् १८१२ ॥

३०७ तिथिनिर्णयः-बालकृष्णः ।

आ.–सकलनिबन्धसम्मत्या तिथिनिर्णयः प्रस्तूयते ॥ तिथिर्द्वेधा सम्पूर्णा खण्डा च । पूर्णायामसन्देहः खण्डा दिनद्वयसम्बन्धिनी ।

च.–अवश्यकर्तव्यतां सूचयतीति दिक् ।

इति श्रीलघुकालस्य निर्णयेन विनिश्चितः ॥ सामान्यतिथिनिर्णयसाधनानां च निर्णयः ॥
कृतस्तु बालकृष्णेन भारद्वाजेन धीमता ॥ विशेषो हेमाद्र्यालोचनेनावगन्तव्य इति ॥
तिथिच्छेदो न कर्तव्यो विनाशौचं यदृच्छया ॥ यदृच्छया तु कुर्वाणो नरकं प्रतिपद्यते ॥
इति तिथिनिर्णयः ॥ संवत् १९११

३०८ तिथिनिर्णयः-बुद्धिलगोविन्दः ।

आ.—अनाद्यनन्तमद्वैतं नत्वा कालरघूत्तमम् ॥ तन्यते धर्मबोधार्थं तिथिनिर्णयसङ्ग्रहः ॥
शुद्धा विद्धेति भेदाभ्यां तिथिर्द्वेधा स्मृता बुधैः ॥ शुद्धायां नास्ति सन्देहो विद्धानिर्णयमर्हतीत्यभिप्रेत्य.........
च.—अगृहीताशौचानां सपिण्डानां त्रिरात्रम् । गृहीताशौचानामाशौचं नास्ति ॥ इति बुद्धिलगोविन्दविरचितेस्मिन् तिथिसंग्रहः ॥

३०९ तिथिनिर्णयः-गोस्वामिशिवानन्दः ।

आ.—प्रणम्य श्रीगणाधीशं विघ्नविध्वंसनक्षमम् ॥ बालबोधाय सङ्क्षेपात्क्रियते तिथिनिर्णयः ॥ १ ॥
तत्र वत्सरायनर्तुमासपक्षदिवसभेदात्कालः षड्विधः । तत्र मासत्रैविध्येन वत्सरस्त्रिविधः । तदुक्तं ब्रह्मसिद्धान्ते ।
चान्द्रसावनसौराणां मासानां तु प्रभेदतः ॥ चान्द्रसावनसौराः स्युस्त्रयः संवत्सरा अपि ॥
तत्र चान्द्रः संवत्सरः चैत्रशुक्लप्रतिपदादिः फाल्गुनद— — — —
च.—श्रावणे मास्यमावास्या फाल्गुने मासि पूर्णिमा ॥ आषाढे कार्तिके मासि चैत्रे ज्येष्ठे च पूर्णिमा ॥
मन्वादयः स्नानदानश्राद्धेष्वानन्त्यपुण्यदाः ॥
इति श्रीमद्गोस्वामिशिवानन्दभट्टविरचितस्तिथिनिर्णयः सम्पूर्णः ॥ १ ॥

३१० तिथिप्रकाशः-द्विवेदिगङ्गादासः ।

आ.—समस्तवाञ्छाविषयप्रदाय श्रीवासुदेवाय नमो विधाय ॥ स्मृत्यादिसन्दोहमवेक्ष्य कुर्वे तिथिप्रकाशं शुचिनिर्णयाय ॥ १ ॥
च.—गङ्गादासद्विवेदेन रचितः शिशुसम्पदे [संविदे] ॥ निबन्धसारमादाय सोयमस्तु सतां मुदे ॥ ३६ ॥
इति श्रीतिथिप्रकाशे द्विवेदिगङ्गादासकृतौ तिथ्यादिनिर्णयः सम्पूर्णः ।

३११ तीर्थचिंतामणिः-वाचस्पतिः ।

आ.—कनकनलिनलक्ष्मीस्पर्द्धिराधाकुचाग्रग्रथितनयनवृद्धिः स्मेरवक्त्राम्बुजश्रीः ॥
नवगगनतमालश्यामलामन्दगात्रः क्षपयतु मम कर्म क्रूरमक्रूरमित्रः ॥ १ ॥
स्वीकृत्य कल्पद्रुमपारिजातरत्नाकरादीनवलोक्य यत्नात् ॥ प्रणम्य मूर्द्ध्ना मधुसूदनाय वाचस्पतिस्तीर्थविधिं तनोति ॥ १ ॥
च.—इति महामहोपाध्यायसन्मिश्रश्रीवाचस्पतिविरचिते तीर्थचिंतामणौ पंचमो गयाप्रकाशः। समाप्तश्चायं तीर्थचिंतामणिरिति

३१२ तीर्थेन्दुशेखरः-नागोजीभट्टः ।

आ.—अथ तीर्थयात्राधिकार्यादिनिर्णयः ॥ कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेदित्यादि ॥.........

च.—इति गयाप्रकरणम् ॥ इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतस्तीर्थेन्दुशेखरः समाप्तः ॥

३१३ तुलसीविवाहपद्धतिः ।

आ.—तत्रादौ कलससामग्रीसम्पादनं कृत्वा विवाहवासरे नित्यकर्म कृत्वा आसने समुपविश्य यथोचितमाचम्य अद्येत्यादि अमुकगोत्रा ॥.................

च.—ततो ब्राह्मणान्क्षमाप्य कर्मेश्वरार्पणं कृत्वा सुहृद्भिः सह भुञ्जीत ॥ इति श्रीतुलसीविवाहविधिः समाप्तः ॥

३१४ दर्शनिर्णयः-वेङ्कटनाथः ।

आ.—तावज्जयंती निर्णीयते सर्वत्र निर्णये शास्त्रमेव हि प्रमाणं न युक्तयः

यदगादि—तस्माच्छास्त्रं प्रमाणं ते कार्य्याकार्य्यव्यवस्थितौ ॥ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥

इति श्रीधरीयज्योतिषार्णवकालनिर्णयादिषु तन्निर्णीयते । किमर्थमयमितिचेन्नैवम् तेषु साकल्येनानुक्तेः

च.—यथाशक्ति नित्यमेवानुष्ठेयम् । पाद्मे च ।

हरिदिवसमुपोष्य प्रोक्तमार्गेण जंतुर्व्रजति न पुनरंतर्वर्त्तिगोलं जनन्याः ॥

बहुवृजिनसमेतः कामबाणान्वितोऽपि व्रजति पदमनंतं लोकनाथस्य विष्णोः ॥

इति श्रीहरितकुलतिलकस्य सरस्वतीवल्लभस्य पुत्रस्य श्रीरिंगनाथसूनोर्वैदिकसार्वभौमापरनामधेयस्य श्रीवेंकटनाथस्य कृतिषु दर्शनिर्णये एकादशीनिर्णयः समाप्तः ॥

३१५ दानवाक्यावली-श्रीधरपतिः ।

आ.—तत्रादौ दानप्रशंसा महाभारते—

यानीमान्युत्तमानीह वेदोक्तानि प्रशंससि ॥ तेषां श्रेष्ठतमं दानमिति मे नास्ति संशयः ॥ १ ॥

च.—यावत्स्वर्गतरंगिणी हरजटामालांतमालंबते यावद्विश्वविकाशविस्तृतकरः सूर्योयमुज्जृंभते ॥

यावन्मंडलमैंदवं वितनुते शंभोः शिरोमंडलं तावत्कीर्त्तिलभेययस्तुसकला देव्याः सतां श्रेयसे ॥

निबंधान्सम्यगालोक्य श्रीविद्यापतिसूरिणा ॥ दानवाक्यावली देव्याः प्रमाणैर्विमलीकृता ॥

इति श्रीसमस्तप्रक्रियाविराजमानदलितकल्पलताभिमाने महादेवीश्रीधरपतिविरचिता दानवाक्यावली संपूर्णा ॥

३१६ दानसारसंग्रहे वास्तुपूजा ।

आ.—प्रकृतमनुसरामस्तत्र समाली यमः । विष्णुधर्मोत्तरे—

चैत्रे शोकाकुलो भावी वैशाखे च धनान्वितः ॥ ज्येष्ठे ग्रहा विपद्यंते नश्यंति पशवः शुचौ ॥ १ ॥

श्रावणे धनवृद्धिः स्यान्नभस्ये न वसेद्गृहे ॥ आश्विने कलहोप्रीतिः कार्तिके च मृतिप्रदः ॥ २ ॥

च.—जीवेद्वर्षशतं साग्रं स्वर्गे कल्पं च तिष्ठति ॥ इति दानसारसंग्रहे वास्तुपूजनं संपूर्णम् ॥ १ ॥

३१७ दाहादिकर्मनिर्णयः-याज्ञिकदेवः ।

आ.-दुश्चिकित्स्यैर्महारोगैः पीडितस्तु पुमानपि ॥ ज्ञात्वाऽरिष्टादिभिर्मृत्युं स्वर्लोकहितमाचरेत् ॥ १ ॥
सितासिते सरिते यत्र सङ्गे तत्राप्लुतासो दिवमुत्पतन्ति ॥ ये वै तन्वं विसृजन्ति वीरास्ते वै जनासो अमृतं भजन्ते ॥ २ ॥
सर्वेन्द्रियविरक्तस्य वृद्धस्य कृतकर्म्मणः ॥ व्याधितस्य स्मृतं तीर्थे मरणं तपसोऽधिकम् ॥ ३ ॥
असाध्यव्याधिना युक्तः स्वव्यापाराक्षमः पुमान् ॥ प्रयि[वि]शत्यनलं दीप्तं करोत्यनशनं तु वा ॥ ४ ॥
अगाधं तोयराशिं वा भृगोः पतनमेव वा ॥ गच्छेन्महापथं वापि तुषारगिरिमादरात् ॥ ५ ॥
च.-स्नेहाद्विप्रादिभिर्वर्णैर्वर्णिता ह्यौर्ध्वदेहिकी ॥ कर्तव्या नैव विप्रेण शूद्रा नेनत-व्यव ॥
इति श्रीयाज्ञिकदेवकृतो दाहादिकर्मनिर्णयः ॥ शान्तिः ॥

३१८ द्रोणचिन्तामणिः ।

आ.-अथ कल्पादिलक्षणान्युच्यंते तत्र याज्ञवल्क्यः ॥
च.-अग्निवैश्वानरमष्टवारं चरुणा शेषेण स्विष्टकृतमित्यादि ॥ संवत् १८११

३१९ धर्म्मप्रवृत्तिः-नारायणभट्टः ।

आ.-नारायणं नमस्कृत्य कामदां च सरस्वतीम् ॥ गणनाथं गुरुं चैव धर्मसंरक्षणाय वै ॥ १ ॥
धर्म्मप्रवृत्त्यै क्रियते कलौ नारायणेन तु ॥ विदुषां कर्म्मनिष्ठानां संमतिर्धर्म्मवर्द्धिनी ॥ २ ॥
आलोक्य धर्म्मशास्त्राणि मन्वादिभिः कृतानि वै ॥ आश्वलायनसूत्रं च वृत्तिं नारायणीं तथा ॥ ३ ॥
सारमेव समुद्धृत्य स्मृतीनां वचनान्यथ ॥ सिद्धान्तानि समूलानि समादायाथ चैव हि ॥ ४ ॥
वचनानि सतां चैव सम्मतानि मनीषिणाम् ॥ ग्रंथेस्मिंस्तानि लिख्यन्ते धर्म्मप्रवृत्तिसंज्ञके ॥ ५ ॥
शौचादिकाः प्रवक्ष्यामि क्रियाश्चानुक्रमेण तु ॥ तिथीनामपि सर्वासां निर्णयानप्यसंशयान् ॥ ६ ॥
॥ योगीश्वरः ॥ यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्म्मान्निबोधत ॥ धर्म्मसंरक्षणार्थाय तस्मिन्देशे वसेद्द्विजः ॥ ७ ॥
च.-सर्वग्रंथेषु यत्प्रोक्तं सारं सारं समुद्धृतम् ॥ नारायणेन तत्सर्वं लिखितं हितकाम्यया ॥ १ ॥
दृष्टं यत्र यदा चैतत्तदा तल्लिखितं मया ॥ परार्थं पुस्तकं चेदमङ्गीकुर्व्वन्तु पण्डिताः ॥ २ ॥
इति श्रीनारायणभट्टविरचितायां धर्म्मप्रवृत्तौ स्थालीपाकादिमंगलांतं प्रकरणम् ॥ समाप्तोयं धर्म्मप्रवृत्त्याख्यो ग्रंथ-शिरोमणिः ॥ संवत् १८४९ ॥

३२० धर्मविवेकः-विश्वकर्मा ।

आ.-कनकं च तिला नागा दासीरथमहीगृहाः ॥ कन्या च कपिला धेनुर्महादानानि वै दश ॥ १ ॥
च.-इति धर्मविवेकः संपूर्णः ॥
दानखंडपदार्थानामनुक्रमोत्र कथ्यते ॥ तत्र योजनिकाक्लेशैः श्लोकैर्ज्ञानं विलंबते ॥
अतोऽनुक्रमणी चैषा संस्कृतैरेव बध्यते ॥ तत्र तावद्दानप्रशंसा दानफलम् दानस्वरूपनिरूपणं दानपात्राख्यज्ञानांग-

निरूपणम् प्रतिग्रहीत्राख्यं रूपद्रव्याख्यादानं गोदानांगकालः दानांगदेशः दानांगेतिकर्तव्यता प्रतिग्रहीतृकृत्यम् परिभाषा अत्रैव प्रतिमासंबंधिद्रव्यपरिमाणविचारः प्रतिमालक्षणानि प्रतिमादेवतात्वादिविचारः कलशलक्षणं दक्षिणानिर्णयः द्रव्यमानं धान्यादिमानं भूमिमानं प्राचीसाधनं मंडपादिलक्षणं मंडपादिसाधनं कुंडादिनिरूपणं तुलापुरुषाख्यमहादानं अत्रैव कालनिरूपणं वृद्धिश्राद्धं पुण्याहवाचनं वरणं आर्ग्वैदिकमधुपर्कः याजुर्वैदिकमधुपर्कः सामगमधुपर्कः आथर्वणमधुपर्कः वास्तुपूजनं मंडपप्रवेशादिषोडशारचक्रनिर्माणं सर्वतोभद्रनिर्माणं ग्रहमूर्तिसंबंधिद्रव्यलक्षणादि ग्रहस्थापनस्थानादि ऋग्वेद्यग्निस्थापनादिविधिः यजुर्वेद्यग्निस्थापनादिविधिः सामगाग्निस्थापनादिविधिः आथर्वणाग्निस्थापनादिविधिः अभिषेकप्रकारः तुलादिलक्षणादि दक्षिणादानादिप्रकारः तुलापुरुषदानप्रयोगः हिरण्यगर्भदानविधिः हिरण्यगर्भदानप्रयोगः ब्रह्मांडदानविधिः ब्रह्मांडदानप्रयोगः कल्पपादपदानविधिः कल्पपादपदानप्रयोगः गोसहस्रदानप्रयोगः हिरण्यकामधेनुदानविधिः हिरण्यकामधेनुदानप्रयोगः हिरण्याश्वदानविधिः हिरण्याश्वदानप्रयोगः हिरण्याश्वरथदानविधिः हिरण्याश्वरथदानप्रयोगः हेमहस्तिरथदानविधिः हेमहस्तिरथदानप्रयोगः पंचलांगलदानविधिः पंचलांगलदानप्रयोगः सुवर्णधरादानप्रयोगः विश्वचक्रदानप्रयोगः कल्पलताख्यं महादानं कल्पलतादानप्रयोगः सप्तसागरदानप्रयोगः रत्नधेनुमहादानं रत्नधेनुदानप्रयोगः महाभूतघटमहादानं महाभूतघटमहादानप्रयोगः अथ कनकदानम् नित्यसुवर्णदानं सुवर्णप्रतिमादानम् अथाश्वदानं श्वेताश्वदानं शिवाश्वदानं तिलदानं तिलद्रोणदानं तिलपात्रदानं महातिलपात्रं मात्रर्णापारण(?)तिलपूर्णपात्रदानं गजदानं दासीदासदानं शिवदासीदानं रथदानं शिबिकादानं महीदानं गृहदानं वास्तुपूजनं सूर्यग्रहदानं कन्यादानं कपिलाधेनुदानं गुडधेनुदानं तिलधेनुदानं घृतधेनुदानं जलधेनुदानं क्षीरधेनुदानं दधिधेनुदानं मधुधेनुदानं रसधेनुदानं शर्कराधेनुदानं कार्पासधेनुदानं लवणधेनुदानं सुवर्णधेनुदानं वंध्यात्वहरसुवर्णधेनुदानविधिः स्वरूपतो गोदानं हेमशृंगीदानं देवतागोदानं गोसहस्रदानं उभयमुखीदानं वैतरणीधेनुदानं महिषीदानं मेषीदानं अजादानं उष्ट्रदानं गर्दभदानं महिषदानं दशावतारदानं शय्यादानं शिवशय्यावारदानानि मासदानानि पक्षदानानि तांबूलदानं अश्वत्थसेवनं शूलदानं आत्मप्रतिकृतिदानं धनमूर्त्तिदानं शालग्रामदानं कालपुरुषदानं कालचक्रदानं यमदानं आयुष्करदानं संपत्करदानं कृष्णाजिनदानं विद्यादानं पुराणदानं पुराणसंख्या वेददानं तिलपर्वतदानं छत्रोपानद्दानं अन्नदानं आपाकदानं जलाशयोत्सर्गः जलाशयप्रशंसा गृहादौ कूपकरणप्रकारः जलाशयारंभकालः जलाशयोत्सर्गकालः संक्रांतिभेदेन जलोत्सर्गफलविशेषनिरूपणं तडागाद्युत्सर्गविधिः अत्रैव मंडपरचना जलाशयोत्सर्गप्रयोगः वापीकूपोत्सर्गविधिः सर्वमूर्त्यादिप्रतिष्ठाविधिः चलप्रतिमाप्रतिष्ठाविधिः जीर्णोद्धारविधिः वृक्षारोपणविधिः आरामप्रतिष्ठाविधिः आरामप्रतिष्ठाप्रयोगः आहुतिप्रमाणनिरूपणम् ॥

उद्भवोदीच्यविप्रेण नर्मदातीरवासिना ॥ निबंधो लिखितः कृत्स्नो धर्मविवेकसंज्ञकः ॥ १ ॥ शुभमस्तु श्रीदुर्गाचरणः ॥

क्षयकृद्वत्सरे याम्येयनेनाद्रे [भाद्रे] सिते तिथौ ॥ कामे बुधे कृतो ग्रंथो बुधेन विश्वकर्मणा ॥ १ ॥

अभ्यस्य विद्या[:स्व]गुरुप्रसादाज्ज्ञात्वा तथा देशविशेषरातीः॥ विश्वेश्वरं भावनया विचिंत्य ग्रंथः कृतो धर्मविवेकसंज्ञः ॥२॥

आलोक्य कल्पद्रुमपारिजातस्मृत्यर्थसारान्समिताक्षरांश्च ॥ हेमाद्रिरत्नस्मृतिदर्पणादीन्ग्रंथः कृतो धर्मविवेकसंज्ञः ॥ ३ ॥

स्थानं मया वैषयिकं सदैव त्यक्त्वा तथा लोकविशेषयात्राः॥ हित्वा च वित्तार्जनकार्यजातं ग्रंथः कृतो धर्मविवेकसंज्ञः ॥४॥

भैमे कुले सर्वसमृद्ध्युपेते विद्यावदाते यशसा समेते ॥ लब्ध्वा मया जन्म कथंचिदत्र ग्रंथः कृतो धर्मविवेकसंज्ञः ॥ ५ ॥

शब्दतश्चार्थतश्चापि यद्यशुद्धं भवेदिह ॥ तच्छुद्धं क्रियतां विज्ञैरुपकारपरैः सदा ॥ ६ ॥

यावद्गंगादयो नद्यो यावत्सूर्यश्च चंद्रमाः ।। तावत्कालमियं जीयाद्विश्वकर्मकवेः कृतिः ॥ ७ ॥
विद्वन्नयनपालंश्च[मालंब्य] सौभाग्यं भजतामियम् ॥ सर्वस्थ्योदकं गांगसलिलांतर्गतं यथा इति ॥
इति धर्मविवेकः संपूर्णः ॥ संवत् १९८३

३२१ धर्मसिन्धुसारः-काशीनाथः ।

पू. आ.—श्रीपांडुरंगमकलंककलानिधानकांताननं यदबुधानमनं मुधा न ॥
श्रीवत्सकौस्तुभरमोल्लसितोरसं तं वंदे पदाब्जभृतनंददुदारसंतम् ॥ १ ॥
भीमाप्रियं सुकरुणार्णवमाशुतोषं दीनेष्टपोषमघसंहतिसिंधुशोषम् ॥
श्रीरुक्मिणीमतिमुषं पुरुषं परं तं वंदे दुरंतचरितं हृदि संचरन्तम् ॥ २ ॥
वंदे प्रतिघ्नन्तमघानि शंकरं धत्तां स मे मूर्ध्नि दिवानिशं करम् ॥
शिवां च विघ्नेशमथो पितामहं सरस्वतीमाशु भजे पितामहम् ॥ ३ ॥
श्रीलक्ष्मीं गरुडं सहस्रशिरसं प्रद्युम्नमीशं कपिं श्रीसूर्यं विधुभौमविद्गुरुकविच्छायासुतान्षण्मुखम् ॥
इंद्राद्यान्विबुधान्गुरूंश्च जननीं तातं त्वनंदाभिधं नत्वार्यान्वितनोमि माधवमुखान्धर्माब्धिसारं मितम् ॥ ४ ॥
दृष्ट्वा पूर्वनिबंधान्प्राच्यांश्च नवांश्च तेषु सिद्धार्थान् ॥ प्रायेण मूलवचनान्युचित्य लिखामि बालबोधाय ॥ ५ ॥
उक्त्वा धर्माब्धिसारेऽस्मिन्निर्णयं कालगोचरम् ॥ परिच्छेदे प्रथमजे द्वितीये च यथाक्रमम् ॥ ६ ॥
अथ गर्भादिसंकारान्धर्मान्गृह्यादिसंमतान् ॥ वक्ष्ये संक्षेपतः संतोऽनुगृह्णंतु दयालवः ॥ ७ ॥
काशीनाथाभिधानेनानंतोपाध्यायसूनुना ॥ निर्णीयते यदेतत्तु शोधनीयं मनीषिभिः ॥ ८ ॥

उ. च.—प्रथमेऽत्र परिच्छेदे कालसामान्यनिर्णयः ॥ द्वितीयेऽथ परिच्छेदे विशेषाख्कालनिर्णयः ॥ १ ॥
तृतीयस्य च पूर्वार्द्धे गर्भाधानादिसंस्क्रिया ॥ आह्निकं च प्रकीर्णानि आधानाद्या सविस्तरा ॥ २ ॥
देवप्रतिष्ठा शांत्यादिर्नित्यं नैमित्तिकं तथा ॥ तृतीयकोत्तरार्द्धेऽस्मिन् जीवत्पितृकनिर्णयः ॥ ३ ॥
श्राद्धाधिकारकालादेर्निर्णयः श्राद्धपद्धतिः ॥ सूतकादेर्निर्णयश्च निर्णयो दुर्मृतावपि ॥ ४ ॥
अंत्येष्टिसंस्कारविधिः संन्यासः सहविस्तरः ॥ प्रायश्चित्तं व्यवहृतिः सर्वदानविधिं विना ॥ ५ ॥
कृत्स्नोपि धर्मशास्त्रार्थः संक्षेपेणात्र निश्चितः ॥ विबुधानां च बालानां तुष्टये कष्टहानये ॥ ६ ॥
मूलभूतानि पद्यानि विकृतानि क्वचित्क्वचित् ॥ निर्विकाराण्यपि न वाचाप्युक्तान्यत्र कानिचित् ॥ ७ ॥
मीमांसाधर्मशास्त्रज्ञाः सुधियोनलसा बुधाः ॥ कृतकार्याः प्राङ्निबंधैस्तदर्थे नायमुद्यमः ॥ ८ ॥
ये पुनर्मंदमतयोलसा अज्ञाश्च निर्णयम् ॥ धर्मे वेदितुमिच्छंति रचितस्तदपेक्षया ॥ ९ ॥
निबंधोयं धर्मसिंधुसारनामा सुबोधनः ॥ अमुना प्रीयतां श्रीमद्विठ्ठलो भक्तवत्सलः ॥ १० ॥
प्रेम्णा सद्भिर्ग्रंथः सेव्यः शब्दार्थतः सदोषोपि ॥ संशोध्यैवाथ हरिणा सुदाममुनिसतुषपृथुकमुष्टिरिव ॥ ११ ॥
श्रीकाश्युपाध्यायवरो महात्मा बभूव विद्वद्द्विजराजराजः ॥ तस्मादुपाध्यायकुलावतंसौ यज्ञेश्वरोऽनंत इमावभूताम् ॥१२॥
यज्ञेश्वरो यज्ञवितानदक्षो दैवज्ञवेदांगसुशास्त्रशिक्षः ॥ भक्तोत्तमोनंतगुणैकधामानंताह्वयोनंतकलावतारः ॥ १३ ॥

एषोत्यजज्जन्मभुवं स्वकीयां तां कोंकणाख्यां सुविरक्तिशाली ॥
श्रीपांडुरंगे वसतिं विधाय भीमातटे मुक्तिमगात्सुभक्त्या ॥ १४ ॥
तस्यानंताभिधानस्योपाध्यायस्य सुतः कृती ॥ काशीनाथाभिधो धर्मसिंधुसारं समातनोत् ॥ १५ ॥
इति श्रीकाश्युपाध्यायसूरिसूनुयज्ञेश्वरोपाध्यायानुजानंतोपाध्यायसुतकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे तृतीय-परिच्छेदोत्तरार्द्धं संपूर्णम् ॥

३२२ नित्यानुष्ठानपद्धतिः-बलभद्रः ।

आ.—विशुद्धधर्मसन्दोहे तत्त्वविज्ञानरूपिणि ॥ वेदवेद्ये सदानन्दे मुकुन्दे रमतां मनः ॥
इह खलु नित्यनैमित्तिककर्मानुष्ठानशीलानामनुष्ठानार्थं अखिलाहर्भागसाध्यकर्मकलापात्मकमाह्निकमभिधीयते ।
च.—इत्येतदखिलं प्रोक्तमहन्यहनि वै मया ॥ ब्राह्मणानां कृत्यजातमपवर्गफलप्रदम् ॥
नास्तिक्यादथवालस्याद्ब्राह्मणो न करोति यः ॥ स याति नरकान्घोरान्काकयोनौ च जायते ॥
नान्यो विमुक्तये पन्था मुक्त्वाश्रमविधिं स्वकम् ॥ तस्मात्कर्माणि कुर्वीत तुष्टये परमेष्ठिन इति ॥
सदानन्दफलेप्सूनां सुखानुष्ठानसिद्धये ॥ चकार बलभद्राख्यो नित्यानुष्ठानपद्धतिम् ॥ इत्याह्निकं समाप्तम् ॥

३२३ निर्णयदीपकः-अचलः ।

आ.—हेरंबः सर्वकार्यार्थसिद्धिदः सर्वदा सताम् ॥ सिद्धिबुद्धियुतः सोस्तु ग्रंथनिर्मितिकर्मणि ॥ १ ॥
देवः श्रीशंभुजन्मा गणपतिरखिलान्नागरानार्यवृद्धीन्रक्षत्वस्मिन्समस्ते जगति नु भयतो यत्र कुत्र स्थितांश्च ॥
येषां सद्यः प्रवृत्ता परमविधियुता पंचयज्ञाचिता या धर्म्या त्वाचारयुक्ता न विरमति यतो नित्यचर्या कदाचित् ॥ २ ॥
षट्कर्मधर्मनिरतैरपि चातिथेयैर्यज्ञक्रियाकुशलिभिस्तु विचारगर्भैः ॥
धर्म्यैर्द्विजैश्च शरणागतसाधुवृत्तैरास्थापितं पुरवरं हि शिवेन वृद्धम् ॥ ३ ॥
विद्यावृद्धा धर्मवृद्धा ज्ञानवृद्धा हि ये नराः ॥ वसंति यत्र तेनैतद्बुधा वृद्धपुरं विदुः ॥ ४ ॥
आचार्यतामुपगताय चतुर्मुखाय शंभुः स्वयं स्वकरसक्तविवाहशोभः ॥
शैलांगजोद्वहनपर्वणि संव्यतारीत्तीर्थास्पदं नगरमेतदमर्त्यसद्म ॥ ५ ॥
नास्माभिर्न्नु नागरस्य पुरतो वेदार्थवादः कदा जेयो यत्र मप[गत]त्रपैरिति शिशोर्ब्रह्मर्षिभिर्निर्गतम् ॥
दुर्वासा वसति स्म नागनिलये व्यासोपि काशीपुरेऽगस्तिः स्वस्ति समुच्चरंस्त्रिजगतां लंकाकृतात्मालयः ॥ ६ ॥
अतः सन्मानमर्हंति सर्वेभ्यो नागरा ननु ॥ यतो ब्रह्मर्षिराजर्षिदेवर्षिभिरुपासिताः ॥ ७ ॥
ये नागरा भूवलये प्रसिद्धाः श्रुत्युक्तमार्गाचरणे प्रगल्भाः ॥
द्रव्यप्रदानात्तकुबेरशोभा धर्मद्विपः प्रत्यनिशं कठोराः ॥ ८ ॥
तेषु व्यक्तिरभूदेका मडोडेत्यभिधोत्तमा ॥ तस्यां धारिगदेवोऽभूद्धरायां धर्मवर्द्धकः ॥ ९ ॥
अनंतनामा समभूत्तदंगजो योध्यापयद्वेदमनंतवाडवान् ॥ अनंतभक्त्या निजजन्म सार्थकं कृत्वा ययावीश्वरधाम निर्मलम् ॥ १० ॥
लक्ष्मीधरः सूनुरभूदनंतादानंददायी भुवि भूसुराणाम् ॥ यस्मिन्द्विजे श्रीश्च सरस्वती च कुटुंबभावेन सदोपतुस्थे ॥ ११ ॥

लक्ष्मीधरादाप्तजनुर्द्विजेशो गोविंदनामा भुवि विश्रुतो यः ॥ वेदार्थविद्वैदिककर्मविज्ञो विद्वज्जनैरर्चितपादपद्मः ॥ १२ ॥
तस्यात्मजोभून्ननु वत्सराजो वत्सैस्त्रिभिर्विस्तृतवंशराजः ॥ यो धर्मवर्त्माश्रयराजराजः सर्वार्थविज्ञानविधौ सराजः ॥ १३ ॥
श्रीवत्सराजादचलद्विवेदी जनुर्दधद्विप्रजनांघ्रिरेणुः ॥ श्रीनागराणां श्रुतिसागराणां करोति किंचिच्छुभकर्मसिद्ध्यै ॥ १४ ॥
श्रीमन्महारुद्रभवं विधानं ऋग्वेदविप्राप्तमकारिषं तत् ॥ तस्यानुजं निर्णयदीपकाख्यं ग्रंथं वचोमोहहरं करोमि ॥ १५ ॥
ग्रंथे मुनीनां वचनानि तानि युक्त्या विचारादधिकार्थवंति॥यथा यथादर्शतलं प्रमृज्यात्तथा तथा निर्मलताधिका स्यात् ॥१६॥
ये नाम केचिदिह नः प्रथयंत्यवज्ञां जानंति ते किमपि तान्प्रति नैष यत्नः ॥
उत्पत्स्यतेऽस्ति मम कोपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥ १७ ॥
द्वैवेदी विदुषां प्रधानमभवच्छ्रीवत्सराजो द्विजस्तत्सूनुः सकलद्विजांघ्रिरजसामंशः कृती योऽचलः ॥
तेनायं क्रियते प्रियाय विदुषां सन्निर्णयाकांक्षिणां ग्रंथो निर्णयदीपकोऽधिवसता श्रीपूर्ववृद्धं पुरम् ॥ १८ ॥
जनकं स्वं प्रणम्याथ गुरुं भट्टविनायकम् ॥ तिथ्यादेर्निर्णयं ब्रूतेऽचलो नागरवाडवः ॥ १९ ॥

च.–इति उक्तेषु निर्णयेषु वर्तमानानां पुंसां सर्वकार्येषु मंगलं स्यादिति मंगलम् ॥ संपूर्णोयं ग्रन्थः ॥
नानानिर्णयसंपन्नः कृतो निर्णयदीपकः ॥ शुभं भावयता येन द्विवेदेनाचलेन च ॥ इति ॥
ऋग्वेदोक्तमहारुद्रविधानस्य सहोदरः ॥ शुद्धांध [सिद्धान्त] दर्शनोपायः कृतो निर्णयदीपकः ॥
द्वैवेदी विदुषां प्रधानमभवभवच्छ्रीवत्सराजो द्विजस्तत्सूनुः सकलद्विजांघ्रिरजसामंशः कृती योऽचलः ॥
तेनायं विदुषां प्रियाय रचितः सन्निर्णयाकांक्षिणां ग्रंथो निर्णयदीपकोऽधिवसता श्रीपूर्ववृद्धं पुरम् ॥
वसंति ये वृद्धपुरे द्विजास्ते विबुधोपमाः ॥ तथापि सद्विवेकाय ग्रंथो भूवलयेस्तु नः ॥
पंचसप्ततिमे वर्षे संवत्पंचदशात्परे ॥ १५७५ ॥ शुक्रस्य कृष्णद्वादश्यां ग्रंथः पूर्णत्वमीयिवान् ॥
इति निर्णयदीपकः समाप्तः ॥

३२४ निर्णयसारः- नंदरामः ।

आ.–नमस्कृत्य प्रवक्ष्यामि नरनारायणावृषी ॥ बालबोधाय संक्षेपात्तिथिकालविनिर्णयम् ॥ १ ॥
तत्र तिथिः प्रतिपदादिः सा च प्रायो वैष्णवव्रतव्यतिरिक्तविषये कर्मकालव्यापिनी ग्राह्या..................

च.–श्राद्धनिर्णयसमुद्रमपारं को लभेदनृषिरस्य च पारम् ॥ तेन सर्वमुनिसंमतसारं क्षुमेतदनवोक्त्यनुसारम् ॥
इति श्रीमिश्रनंदरामकृते निर्णयसारे श्राद्धनिर्णयो नाम षष्ठः परिच्छेदः ॥
एषो निर्णयसारः सुलघुपरिच्छेदषट्केन ॥ ग्रथितोत्रानुष्टुब्जा संख्याभ्रवियत्क्रमाब्धमिता ॥ १ ॥
बालबोधाय संक्षिप्तस्तिथिकालविनिर्णयः ॥ अतो ग्रंथांतरेभ्योपि विशेषस्तु विलोक्यताम् ॥ २ ॥
यः श्रीकामवने व्रजे निवसति श्रीदीपचंद्रात्मजो मिश्रो नंद इति प्रथामतिगतस्तेनादितिर्थोञ्थितः ॥
सारंसारमिहोद्धृतं तिथिकृते स्वीयात्मनां ज्ञप्तये यत्त्वत्राधिकमूनमुक्तमपि तच्छोध्यं दयार्द्रैर्बुधैः ॥ ३ ॥
रसगुणधृतिमित१८३६विक्रमसंवत्सरबोधनीदिवसे ॥ पूर्त्तिमगादग्रंथोयं निर्णयसारोतिसंक्षिप्तः ॥ ४ ॥
इति श्रीमिश्रदीपचंद्रात्मजमिश्रनंदरामविरचितो निर्णयसारः संपूर्णः ॥

३२५ निर्णयामृतम्- अल्लाडनाथसूरिः ।

आ.—कारणमेकं जगतां वारणमास्येन दारणं विपदाम् ॥ किमपि महो महनीयं प्रत्यूहव्यूहदारणं वंदे ॥ १ ॥
भावयामि दृढभक्तिभावनाभावितांघ्रियुगलां सुमंगलाम् ॥ इष्टदां सततमिष्टदेवतां मंत्रवत्सकलमंत्रमातरम् ॥ २ ॥
औपाधिकः स्फुरति यत्र कलादिभेदस्तद्ब्रह्मतत्त्वमपि यस्य न वेद वेदः ॥
सर्गस्थितिप्रलयहेतुमहेतुमेकं कालस्वरूपमहमन्वहमानमामि ॥ ३ ॥
यैः कृतः स्मृतिमहार्णवपारप्राप्तिहेतुरिह संग्रहसेतुः ॥ तान्नमामि मनुविष्णुयमाद्यान्कालनिर्णयकृतोप्यहमाद्यान् ॥ ४ ॥
आद्या व्याप्याहतैश्वर्यभव्या भव्यार्त्तिनाशिनी ॥ दिष्ट्या [दिश्याद] दिष्टयानमद्भक्त्या कामान्कामारिकामिनी ॥ ५ ॥
जयंति भूमाविह बाहुबाणाः क्षितीश्वरा विश्रुतबाहुबाणाः ॥ प्रकुर्व्वते ये विशदा यशोभिर्जगत्समग्रं च सदा यशोभिः ॥६॥
बभूव भूपस्त्रिदशस्वरूपस्तदन्ववाये बलवान्सुरूपः ॥ चकार नित्यं च समाहितानां परिक्षयं यः परमाहितानाम् ॥ ७ ॥
तस्यात्मजन्माजनि कर्णदेवस्त्यागेन यो विश्रुतकर्णदेवः ॥ वपुःश्रिया निर्जितकामदेवः सदा समाराधितवामदेवः ॥८॥
तदात्मभूरुद्धरणः क्षितीन्द्रः कृतींद्रभोगींद्रकृतानुभावः ॥ शुभाय दातायतकीर्त्तिरार्तिहरः सतां श्रीपतिमूर्तिरासीत् ॥९॥
स्वकीर्त्तिवल्लीप्रभवालवालस्थली वहिल्ली नगरीमतल्ली ॥ भल्लीशतप्रोतसकेशकुंभा— —स्वनीरैः समसिंचि येन ॥ १० ॥
प्रव्यक्तमामुक्तमहेमकुंभमुक्ताविमुक्तागणपोषशक्त्या॥रक्तासवैःसंयति येन काली[व्याली]द्विश्वाभिमताप्यते स्म॥ ११ ॥
उद्धरणं शुद्धरणं [उद्धरणं] विद्विषां समुद्धरणम् ॥ सुहृदां नांमतिनतकोननामनाम ॥ १२ ॥
सौंदर्येण विजृंभितो रतिपतिः शौर्येण च श्रीपतिर्गांभीर्येण सरित्पतिर्विलसता धैर्येण भूभृत्पतिः ॥ १३ ॥
सत्कीर्त्योडुपतिः श्रिया धनपतिर्यस्तेजसाहर्प्पतिस्तेनार्योद्धरणेश्वरेण सुमतिः स्पर्द्धेत कः क्ष्मापतिः ॥ १४ ॥
असावरावाहितसत्प्रतापः सुसन्निवेशोचितरम्यदेशम् ॥ अध्यास्त ऋध्यास्तसमस्तशक्रास्पदं पुरं सादरमेकचक्रम् ॥ १५ ॥
राजते यत्पुरं रम्यं राजमंडलमंडितम् ॥ कमलोल्लासिसद्रत्नं रत्नाकरविभूतिमत् ॥ १६ ॥
लसद्विलासिनीसिञ्जन्नूपुरं भाति यत्पुरम् ॥ पुरं पुरंदरस्येव भूरिसुंदरमंदिरम् ॥ १७ ॥
यस्योपकंठे शितिकंठकंठस्पर्द्धिप्रभा भानुसुता वहंती ॥ तदुत्थवेदध्वनिसंनिकर्षादभ्यस्यतीवाखिलपावनत्वम् ॥ १८ ॥
यत्रानिशं सत्रकृतः पवित्राः समं स्वगोत्रैर्गृहिणो वसंति ॥ यद्धोमधूमः कुरुतेतिभूमौ घनाघनैर्मेदुरमंतरिक्षम् ॥ १९ ॥
यत्सौधजालेषु निविश्य रात्रौ यद्वासधूपैः पृथुलीकृताद्रा[तांगाः] ॥
निर्याणनिर्यत्नतया भजंते नीलांबुदा नीलशिलाविकाशम् [विलासम्] ॥ २० ॥
यदुच्चसौधध्वजजालचैलजातानिलैर्हेलिहयाः सलीलम् ॥ विश्रांतिमश्रांतमतः श्रयंतः कुतोपि न श्रांतिमवाप्नुवंति ॥२१॥
व्यरौषि [व्यजैषि] भूलोकपुरीं नराणां पुरीं व्यरौत्सीद्धृतदंडघातैः ॥
जेष्यामि पातालमिति श्रमेण विवक्षतीव प्रतिविम्बदंभात् ॥ २२ ॥
प्रीत्या समापूरितयावकाशं मान्यं वदान्यान्वयमत्र विंदय [वीक्ष्य] ॥
वृंदारकाणां त्रिदिवेपि वृन्दैर्मंदारकाणां वसतिर्विगिता [विगीता] ॥
पुरं शशासैष पुरंदराभस्तदेकचक्राख्यमनेकचक्रः ॥
असंख्यचक्रारि[संख्यारि]जयोर्ज्जिताख्यो विख्यातशुम्भोद्धरणक्षितीशः ॥

समुद्रैरपि यः सप्तसमुद्रैर्मुद्रितां महीम् ॥ पालयंस्तन्महीपालः पुरालंकुरुते पुरम् ॥
गुणचंद्र[रत्ना]कराचंद्रश्चंद्रसेनस्ततोभवत् ॥ महामहामहादेवः शशिमौलिविभूषणः ॥
यस्य विश्वोपकाराय दातुमभ्युद्यते करे ॥ शशंके धनदः स्वैरं चकंपे कनकाचलः ॥
अमनोवृत्तिगम्येन यस्य दानेन दीव्यता ॥ अर्थिप्रत्यर्थिनोऽप्युच्चैः प्रापुरेवं न दुर्गतिम् ॥
यस्य धाटीषु घोटानां प्रखरं खुरजं रजः ॥ चकाराच्छाद्य गगनं दुर्दिनं रिपुमंदिरे ॥
यस्य विश्राणनस्योच्चैःश्रवणेन नरस्य च ॥ सुराः सुरालयं स्वल्पमनल्पमपि मेनिरे ॥
तस्यात्मजन्मा चरितार्थजन्मा श्रीसूर्यसेनो जयति क्षितीशः [जगति क्षितीन्दः] ॥
सुदर्शनेनैव बिभर्त्ति गोपीनारायणत्वं भुवि यः प्रसिद्धम् ॥
संतानशोभमानः कविगुरुबुधमित्रमंगलैः सहितः ॥ जिष्णुर्य एष युक्तः श्रितशतकोटिः सुधर्माढ्यः ॥
यस्मिन्धारयति क्षोणीमेणीदृक्चित्तहारिणि ॥ शेषेपि फणिनामीशे न विशेषधियो वयम् ॥
ददतो यस्य पाणिस्थपारिहार्यजलस्थलात् ॥ रमा रौतीति सततं राजा वितरतीति माम् ॥
द्विषोऽस्य पत्रावलिभिः परिधानं प्रकुर्वते ॥ तद्योषितां ततो मन्ये तच्छून्यं स्तनमंडलम् ॥
बुधानानंदयत्सर्वान्राजा वसुभिरूर्जितैः ॥ कथं मौलौ महेशानां न पदं कुरुतां सदा ॥
निहत्य शत्रून्निखिलांस्तदीया देशाः सदाऽवग्रहखिन्नवेशाः ॥ तदंगनानां घननादयुक्तैर्नेत्राम्बुभिर्येन कृताः सवर्षाः ॥
समुद्यते यस्य करे प्रदातुं विलोक्यते यत्र महद्विचित्रम् ॥ वनीपकानामवनीपतित्वं वनीपकत्वं त्ववनीपतीनाम् ॥
जलेन दिव्येन सदाव[अभि]सिक्ताः सिंहासनाध्यासयिनो [आश्रयिणो] निरस्ताः ॥
श्रीसूर्यसेनेन वने ऽपि राज्यं कान्तातपत्राः कलयन्त्यमित्राः ॥
यत्कीर्त्तिश्वरिकार्ति कार्त्तिकशशिश्येनीयमन्यादृशं
वाहुः [धातुः] सर्गविसर्गमत्र कुतुकं स्पर्शादमुख्यायतः [अमुष्याय तः] ॥
कैलाशंति नगाश्चलंति मनुजाः क्षीरार्णवन्त्यर्णवा श्चक्राह्वंति खगा हरन्त्यपि सुराः शेषंति सर्वेहयः ॥
यत्रास्ति यस्यातितरां प्रतापः प्रतापसेनोऽवरजः प्रतापः [प्रसिद्धः] ॥
भक्त्याभिरामस्य सदाग्रजस्य यो लक्ष्मणाकारमुपैति भद्रम् ॥
औदार्यसौंदर्यदयानयाज्ञाविज्ञानशौर्यादिगुणेषु नान्यम् ॥ प्रतापसेनस्य समं समंताल्लोके विलोकेऽत्र विचित्रलोके ॥
श्रीदेवसेनस्तनयोऽपि गोपीनारायणस्याजनि कामरूपः ॥ लब्धप्रसादेन महेश्वरस्य रामारतिस्तुष्टिमुपैति येन ॥
देवसेनकुमारस्य कुमारस्य न चांतरम् ॥ आर्यानंदकृतो नित्यं बिभ्रतः शक्तिमुत्तमाम् ॥
श्रीसूर्यसेनः पुरमेकचक्रं धराङ्गमध्यास्य जयत्यजस्रम् ॥
यमेत्य कान्तं जितनागकान्तं गुर्वीयमुर्वी च सदोधरा[उर्वरा]स्ते ॥
विद्वांस्तु सत्स्वपि महत्सु समाश्रितेषु श्रीसिद्धलक्ष्मणसुतः सुतरामुष्य ॥
श्रीसूर्यसेननृपतेरुप[उरु]तेजसोऽभूदच्छाडनाथमतिमानपि यत्रपात्रम् [अतिमानपात्रम्] ॥
एनं कदापि नृपतिः सुमतिः सुनाम्ना [स्वनाम्ना] श्रौतादिकर्मसु कलासु विनिर्णयाय ॥
आदिक्षुदक्षपति साक्षयसानिशात [सांद्रयशा निशात] शस्त्राहताहितयशः [शतः] शतमन्युकल्पः ॥

अगाधग्रंथपाथोधिमथालोड्य मया धिया ॥ समुद्धृतं नृपादेशात्तेनेदं निर्णयामृतम् ॥
मनुस्मृतिं विष्णुपरासरापस्तंबस्मृतीर्वीक्ष्य मितक्षरां च ॥ तथापरार्कार्णवपारिजातान्स्मृत्यर्थसारं स्मृतिचंद्रिकां च ॥
मात्स्यं कौर्मं च वाराहं दृष्ट्वा वैष्णववामने ॥ मार्कंडेयपुराणानि भविष्योत्तरभारते ॥
परिशिष्टं च हेमाद्रे रजतमदो [रनंतभट्टीय] गृह्यपरिशिष्टे ॥ कालादर्शं चिंतामणिं त्रिदंडिकृतकल्पतरुम् ॥
धवलपुराणसमुच्चयदुर्गोत्सवरामकौतुकानि तथा ॥ साम्वत्सरप्रदीपं भोजीयदिवोदासीयम् ॥
रूपनारायणीयं विद्याभट्टपद्धतिं विततम् ॥ वीक्ष्य महादेवीयं शुभं निबंधं च विश्वरूपकृतम् ॥
श्रीसूर्यसेननृपतेरादेशात्सिद्धलक्ष्मणतनूजः ॥ अल्लाडनाथसूरिः संग्रहमिह कालनिर्णये कृतवान् ॥
इति ग्रंथावतारानुक्रमिका [रः अथानुक्रमणिका] ॥
ग्रंथेऽस्मिन्सूर्यसेनस्य निर्णयामृतसंज्ञके ॥ आदावस्मिन्नुदाहारः कथितः कथितक्रमः ॥

च.—बुधानामुपकाराय कालव्यामूढचेतसाम् ॥ गोपीनारायणेनेदं निर्णीतं निर्णयामृतम् ॥
इति श्रीसूर्यसेनविरचिते निर्णयामृते आशौचप्रकरणं समाप्तम् ॥
श्रीमत्पंडितसिद्धलक्ष्मणसुतः श्रीसिद्धलक्ष्मीपदद्वंद्वाराधनसुप्रसिद्धमहिमा यः सिद्धसारस्वतः ॥
आदेशादकृतैषसूर्यमहसः श्रीसूर्यसेनप्रभोर्वैधे कर्मणि कालनिर्णयमसावल्लाडनाथः सुधीः ॥
श्रीसूर्यसेनमहीमहेंद्रविरचितं निर्णयामृतं समाप्तम् ॥ सं० १८४४

३२६ निर्णयोद्धारः-राघवः ।

आ.—स्मृत्यर्थसारं हेमाद्रिं माधवं निर्णयामृतम् ॥ वीक्ष्य निर्णयसिन्धुं च स्मृतिदर्पणमादरात् ॥ १ ॥
निर्णयोदन्वतः सारमुक्तोद्धारं करोम्यहम् ॥ राघवो विदुषां प्रीत्यै निर्णयोद्धारनामकम् ॥ २ ॥
तत्र तिथिर्द्वेधा । शुद्धा विद्धा च । तत्र शुद्धा सम्पूर्णत्वान्निर्णयानर्हा ॥ तिथ्यन्तरयुता विद्धा वेधस्तु सायंप्रातस्त्रि-मुहूर्तात्मकः । कौश्चीदि्द्वमुहूर्तोप्युक्तः ॥ प्रातरेव तत्र सौरमानं समाश्रये तिथिविशेषवेध उपवासातिरिक्ते । तद्यथावचनम्।
नागो द्वादशनाडीभिर्दिक्पं — — — — —

३२७ नृसिंहप्रसादे प्रायश्चित्तसारः-दलपतिः ।

आ.—अनंतदेवेशकिरीटकोटिरत्नत्विषा रंजितपादपद्मम् ॥ कारुण्यनेत्रं कमलाकलत्रं लक्ष्मीनृसिंहं हृदि भावयामि ॥ १ ॥
नैमित्तिकं धर्मजातं दलाधिपमहीभुजा ॥ तत्प्रायश्चित्तसारेण प्रोच्यते लोकतुष्टये ॥ २ ॥

च.—प्रौढश्रीद्विजराजवंशतिलकाऽलंकारहीरः प्रभुर्भारद्वाजकुलानुगः प्रथमया यः शाखयालंकृतः ॥
श्रीमद्वल्लभसूनुरात्मनिरतः सत्संमतां प्रक्रियां सारेऽस्मिन्व्रतवर्यसंज्ञक इह श्रीमान्दलाधीश्वरः ॥
निजामसाहसाम्राज्यधुरंधरमहीपतिः ॥ श्रीनृसिंहप्रसादेऽस्मिन्संपूर्णं क्रियते [कुरुते] शुभम् ॥
इति श्रीमल्लक्ष्मीनृसिंहचरणयुगलसरोरुहभ्रमरसकलभूमंडलसमस्तयवनाधीश्वरश्रीनिजामसाहसमस्तसाम्राज्यधुरंधरश्रीमन्म-हाराजाधिराजश्रीदलपतिराजविरचिते श्रीनृसिंहप्रसादे प्रायश्चितसारे प्रायश्चित्तानुष्ठाने कर्मविपाकनिरूपणाच्छम् ॥
व्यग्र सिंधुहदुत्तमां हगपुरीं कुर्वन्नपिश्रेयसः कारुण्यादभयप्रदाननिपुणैरालोकनानाक्रमैः ॥

आह्लादं निजपादपंकजजुषां यः कल्पयत्यन्वहं प्रह्लादप्रणयी स नो वितनुतां भद्रं परः पूरुषः ॥ १ ॥
यो लोकस्य गुरुर्विशारदजना यं भावयंते गुरुं येनैतद्गुरुणोदहारि गुरवे तस्मै नमः सर्वदा ॥
यस्माद्वेदपथस्थिरोऽजनि जने यस्य प्रसादा इति यस्मिन्सर्वगुणा गुरौ हृदि सदा तं त्वां नृसिंहं भजे ॥ २ ॥
प्रौढश्रीद्विजराजवंशतिलकालंकारहीरः प्रभुर्भारद्वाजकुलानुगः प्रथमया यः शाखयालंकृतः ॥
श्रीमद्वल्लभसूनुरात्मनिरतः सत्संप्रदायाग्रणीः प्रायश्चित्तविचारणातिचतुरः श्रीमान्दलाधीश्वरः ॥ ३ ॥
निजामसाहसाम्राज्यधुरंधरमहीपतिः ॥ श्रीनृसिंहप्रसादेऽस्मिन्संपूर्णं क्रियते [कुरुते] शुभम् ॥ ४ ॥
इति श्रीमच्चतुर्दशभुवनैकनाथमहेंद्रादिदेवगणपूजितचरणकमलस्वाडंबरव्याप्यभुवनत्रयभक्तानुग्रहकारिसत्वदनप्रहलाद-
प्रणयवरदकरभावकरदानेकराजाभयकरजगदेकसुंदरश्रीलक्ष्मीनृसिंहचरणयुगलसरोरुहभ्रमरसूर्यवंशतिलक औत्कलतैरभु-
क्तगौडगुर्जरमालवमागधपांचालकर्णाटांध्रान—प्रौढराजस्पृहणीयकीर्तिसकलभूमंडलाखंडलदिङ्मंडलीमंडनायमानानेकभुजा-
र्जितप्रतापासादिसकलसाम्राज्यपरभवैतवरवपदस्वियुतसत्यातानेकमंडलाधीश्वरसकसानेतचक्रचूडामणिकिरणरंजितचर-
णारविंदसकलभूमंडलमंडनश्रीमत्प्रौढप्रतापमहाराजाधिराजश्रीसर्वसुंदरीदेवगिरिपुरीवराधीश्वरसमस्तयवनाधीश्वरश्रीमन्नि
जामसाहसमस्तकरुणाधीश्वरसकलवि — —दयाज्ञवल्कीयलुप्तसाशा [शास्त्र] प्रवर्तकद्विजराजकुलालंकारहीरवैष्णवधर्म-
प्रवर्तकश्रीवल्लभात्मजश्रीवल्लभपंडितप्रसादाच्छीसादि श्रीसूर्यपंडिताभिधागुरुमत्वादिप्रणीतनीतिशास्त्रातिज्ञमहाप्रभुस्व-
कार्यावेक्षणप्रीतिनिधीकृतश्रीमहाराजश्रीदलपतिराजविरचिते श्रीनृसिंहप्रसादे प्रायश्चित्तसारः संपूर्णः ॥

३२८ प्रतापार्कः- विश्वेश्वरः ।

आ.—अंगरंगपरिनृत्यदनंगं सीतया रहसि कल्पितसंगम् ॥ सन्नमामि कृतभार्गवभंगं राघवं कलितरंग[तरङ्गम्] ॥ १ ॥
स्वस्तिश्रीमनुजातिराजितमहावंशावतंसोखिलक्षोणीपालविशालसद्गुणगणैर्भूमंडले विश्रुतः ॥
आसिंधुस्फुरदुज्ज्वलोज्ज्वलयशाः सश्रीभृतो भूभृतां भूषा श्रीजयसिंहभूपतिपतिर्भूमंडलाखंडलः ॥ २ ॥
येन श्रीश्रुतिमार्गपंकजवनीसूर्येण धर्मादराल्लुप्तप्राय इहाखिलः श्रुतिपथः प्राकाशि धर्मावहः ॥
येनाकारि तुरंगमेध उदिताच्छास्त्रोक्तमार्गात्पुनर्भूदेवामरशाखिना सुकृतिना काले कलावप्यहो ॥ ३ ॥
तस्यासीत्तनयः प्रसिद्धविनयः श्रीमाधवोमाधवश्रीपादाब्जरतिर्धरासुरनातिर्भूमीपतिः सन्मतिः ॥
यत्सौंदर्यकला विलोक्य विकलः कामोपि कामं मुदा लोकैराकलि कल्पनापटुतरैः शोभाभरान्निर्भरम् ॥ ४ ॥
तत्सूनुर्विलसत्प्रतापमहिमा श्रीमत्प्रतापाभिधो भूयो भूपतिभूषणाखिलगुणग्रामाभिरामोत्सवः ॥
वैरिव्रातविघातको बहुकलावैदग्ध्यविद्यानिधिर्भूविख्यातयशाः क्षितौ विजयते युद्धोद्भटो जिष्णुवत् ॥ ५ ॥
सद्गीतागमशुद्धमुग्धरमणीनृत्यद्द्वल्लासको रासोल्लासविलासकृष्णकलितानंदग्धरावंबरः ॥
राज्यश्रीशुभचिंतकः क्षितिसुराभीष्टैककल्पद्रुमश्चातुर्योचयचुंचुचारुचरितो रामाभिरामाकृतिः ॥ ६ ॥
श्रीशांडिल्यमुनेः कुले किल महाशब्दोपनामाजनि श्रौतस्मार्तसमस्तकर्मनिपुणः श्रीदेवभट्टो महान् ॥
रामांघ्रिप्रवणस्ततोजनि सुधीः संम्राट् स रत्नाकरः काशीस्थो बहुविश्रुतो निजकुलालंकारचूडामणिः ॥ ७ ॥
कृत्वा येन सतां मतेन विधिवत्सद्वाजपेयं पुनश्चक्रे वैदिकसत्कृतेन कृतिना श्रीपुंडरीकः क्रतुः ॥
विप्रेभ्यो विधिवत्प्रदाप्य बहुशो ग्रामान्निकामार्थदान्कीर्तिर्येन च संविधाय विमलां ब्रह्मास्पदं प्रापिता ॥ ८ ॥

स्वस्तिश्रीजयसिंहनामनृपतेर्नामांकितो भूतले ग्रंथ: पंडितसम्मतोतिललित: कल्पद्रुमाख्य: कृत: ॥
विद्याविश्रुतसत्कुशाग्रमतिना तत्तद्गुणांभोधिना श्रीरत्नाकरशर्मणा जयति स क्षोदक्षमो धीमताम् ॥ ९ ॥
तत्सूनु: सुकृती कृती समभवद्भूदेवदेवद्रुमो गंगाराम इति प्रथामधिगत: श्रीमान्महायाजक: ॥
येन क्षोणिपतिप्रपूजितपदांभोजेन काश्यां मुदा दत्ता ब्रह्मपुरी विधाय विधिवद्भूमीसुरेभ्योऽचिरात् ॥ १० ॥
आसीत्तत्तनुजो निजान्वयगुणावासोतिशांतो महीभूषा भूसुरमंडनं मुनिरिव ख्यात: स रामेश्वर: ॥
येनालं परकामिनीपरधनाकांक्षापि नाराधिता स्वप्नेपि स्फुटकीर्तिना कलयता श्रीशंभुना तुल्यताम् ॥ ११ ॥
जातस्तत्तनयो द्विजातिविनयो विश्वेश्वरस्सन्मति: स्वस्तिश्रीसुमतिप्रतापधरणीपालाज्ञया धर्मधी: ॥
आदाय प्रपितामहेन रचितात्कल्पद्रुमाद्विस्तृतात्सारं संतनुते बुधोपकृतये सोर्कं प्रतापादिकम् ॥ १२ ॥
क्षम्यतां साहसं धीरैर्गुणवद्भिरमत्सरै: ॥ यदर्थ्यं सुष्ठु तद्ग्राह्यं यदसच्छोध्यतामिह ॥ १३ ॥
बहवो हि बुधास्संति तन्निबंधा: सहस्रश: ॥ तथाप्यस्य तु वैदग्ध्यं सुहृद्भि: संविचार्यताम् ॥ १४ ॥

च.—प्रीयतां जानकीजानिरनेन सुकृतेन मे ॥ सर्वांतरात्मा सर्वज्ञो रामो नोभीष्टदैवतम् ॥ १ ॥
इति विश्वेश्वरराचिते प्रतापभूपाज्ञया प्रतापार्के ॥ विद्वद्विनोदकंदे गतो मयूख: कलासंख्य: ॥
इति श्रीमद्वाजपेयपौण्डरीकाद्यनेकक्रतुयाजिमहाशब्दोपाख्यरत्नाकरभट्टात्मजश्रीगंगारामभट्टसूनुश्रीरामेश्वरभट्टपुत्रेण-विश्वेश्वरेण रचित: प्रतापार्क: समाप्त: ॥

३२९ प्रतिष्ठापद्धति: ।

आ.—तत्र सम्भार: अर्कादिग्रहसमिध: प्रत्येकमष्टसहस्रमष्टशतं संक्षेपपक्षे ॥
च.—तत: पुनरष्टोत्तरशतं मूलमन्त्रेण हुत्वांगानां दशांशेन पूर्णाहुत्यंतं कृत्वा स्वस्तिवाचनं कारयित्वा इंद्रादिभ्यो बलिंदत्वा आचम्य शेषं समापयेदिति ॥ इति चतुर्थीकर्मविधि: ॥

३३० प्रतिष्ठाप्रयोग:-नीलकण्ठ: ।

आ.—महो महस्समाराध्य जलोत्सर्गमथोक्तवान् ॥ प्रतिष्ठां सर्वदेवानां नीलकण्ठो वदत्यसौ ॥ १ ॥
च.—यज्ञं गच्छ यज्ञपतिमिति विसर्जनम् ॥ इति प्रतिष्ठाप्रयोग: समाप्त: ॥

३३१ प्रायश्चित्तम्-कमलाकर: ।

आ.—श्रीरामं पितरौ नत्वा कमलाकरशर्मणा ॥ रामकृष्णतनूजेन प्रायश्चित्तं निरूप्यते ॥ १ ॥
च.—एवमेकवृक्षसंसर्गेपि । इति श्रीजगद्गुरुरामेश्वरभट्टसूरिसूनुनारायणभट्टसुतरामकृष्णभट्टात्मजकमलाकरभट्टकृतं प्रायश्चित्तं समाप्तम् ॥

३३२ प्रायश्चित्तकुतूहलम्-रघुनाथ: ।

आ.—नमस्कृत्य गुरून्निष्टाञ्शिष्टेष्टजनतुष्टिदान् ॥ विशिष्टतदभा [तत्कृपा] पुष्टश्रितिमिष्टैरय ब्रुवे ॥ १ ॥
च.—इत्याद्यानदीपिकायां इत्यापस्तंबीयं प्रायश्चित्तम् ॥

अवादीत्थमनन्तेन शिष्टेष्टजनतुष्टये ॥ प्रायश्चित्तविधिर्हौम्यः स संक्षेपान्निरूपितः ॥
इत्येवं रघुनाथेन प्रायश्चित्तकुतूहले ॥ निर्मिते वितते हौम्यप्रायश्चित्तविवेचनम् ॥

३३३ प्रेतदीपिका-गोपीनाथः ।

आ.—प्रणम्य रुद्रमात्मानं गोपीनाथः कृती शिवम् ॥ सर्वेषामुपकाराय कुर्वेऽहं प्रेतदीपिकाम् ॥ १ ॥
च.—नाना ग्रंथान्समालोक्य गोपीनाथः शिवाश्रयः ॥ संतोषार्थाय विदुषामकरोत्प्रेतदीपिकाम् ॥
आदितश्चांतपर्यन्तमालोक्येयं विचक्षणैः ॥ विचार्य सदसन्न्याय [सद्व्रातं] प्रयुंग्ध्वं हि ममाशिषः ॥
इति श्रीशैवाग्निहोत्रिसुतशैवगोपीनाथाग्निहोत्रिविरचिता प्रेतदीपिका समाप्ता ॥

३३४ प्रेतमञ्जरी-द्यादुमिश्रः ।

आ.—नमस्कृत्य हयग्रीवं जगत्कारणकारणम् ॥ क्रियते द्यादुमिश्रेण संक्षिप्ता प्रेतपद्धतिः ॥ १ ॥
च.—अत्र श्राद्धे यत्कृतं तत्सुकृतमस्तु यन्नकृतं तत्सर्वं ब्राह्मणवचनात्परिपूर्णमस्तु ॥

३३५ मथुरासेतुः-अनन्तदेवः ।

आ.—समस्तब्रह्मांडान्युदरविवरे यस्य सततम् — — — — — — — — — — — — — — — — — — —
च.—इति श्रीमत्सकलशास्त्रार्थतत्त्वविद्वैष्णवसन्मार्गप्रतिपादनैकप्रयोजनगृहीतावतारश्रीमदापदेवसुतानंतदेवकृतो मथुरासेतुः समाप्तः ॥

३३६ मदनरत्नप्रदीपे समयोद्योतः-मदनसिंहः ।

आ.—आदायेंदुकलां शंभोर्मुखे विशधिया क्षिपन् ॥ द्वितीयरदनीकुर्वन्पातु पालो गजाननः ॥ १ ॥..........
आस्ते देशः प्रशस्तद्विजवरललिताचारवित्तातिलाभाराध्योबाध्यो विपक्षक्षितिपतिनिकरैर्निर्भरैः संगरेऽपि ॥
ढिल्लीनामा निकामाहवनवमहिमोद्दण्डदोर्दंडदीप्यत्प्रारंभध्वस्तदंभप्रतिबलपरिषद्वीरनीराजितश्रीः ॥ ६ ॥
चत्वारो यत्र वर्णाः श्रुतिनियतविधेः स्वस्ववृत्तिं प्रपन्ना यत्राचारो विशालो यदवधिविरता वीरवार्ता भवंति ॥
दानं यत्राभिमानं हरति सुरतरोः क्षत्रियाणां वराणां सोयं रम्यप्रदेशो जगति विजयते कोपि ढिल्लीति देशः ॥ ७ ॥
तस्मादाकस्मिकोद्यद्दहनघनमहस्तुल्यतापप्रतापज्वालाजालाभिभूतद्विषदवनिपतावन्वये भास्करस्य ॥
राजा राजावतारो वरसमरधुरोद्दामरामानुभावप्रध्वस्ताराातिभूमीपतिदनुजवयोभून्महीपालदेवः ॥ ८ ॥
यत्रासीद्भुवनेषु विश्रुतचणो दामोदराख्यः कृती श्रीमान्पुण्यवदग्रणीर्जितरिपुक्ष्मापालसंघः प्रभुः ॥
मूलस्थानपुरे तुरुष्कनिवहाक्रांते परित्याजितो येनाद्यावधि गोवधो यवनकैश्चात्रापि [:कुत्रापि] न स्मर्यते ॥ ९ ॥
योसौ संगरसोमभीमसदृशः सर्वा दिशः सुंदरीर्वासोभिर्विमलैर्यशोभिरधिकं संभाव्य भव्यक्रमैः ॥
प्रत्यर्थिक्षितिपालपीडनविधिव्यक्तेन तत्तेजसा सिंदूरेण गृहीतपाणिकमलाश्चक्रे महाविक्रमः ॥ १० ॥

एतत्पृथ्वींद्रसूनुः सकलवसुमतीतीव्रभूपालमालाचूडारत्नप्रबुद्धद्युतिभरजनितास्कंदपादारविंदः ॥
सद्वर्णस्वर्णमुक्तामणिकरिगुरगो [णो] द्दामलक्ष्मीनिवासो देवीदासो विलासो विततवरयशोमंडिताशो बभूव ॥ ११ ॥
तत्सूनुः सूर्यदासो विमलतरयशोराशिरासीदसीमक्षोणीनाथोत्तमांगच्युतकुसुमरजोराजिनीराजितांघ्रिः ॥
सन्मार्गोपात्तवित्तव्ययविविधमहादानदानैककर्मा धर्माचारादपाराद्वरधरणिभुजां भूभुजामग्रलेख्यः ॥ १२ ॥
यद्दानं नोपमानं क्वचिदपि लभते यस्य युद्धावरुद्धाः शुद्धांतान्नैव कांतामपि परिचलिता वैरिणस्तारयंति ॥
येन स्वेनार्जितेन प्रचुरतरधनेनानिशं तीर्थराजे वाराणस्यां गयायामपि सकलकरस्त्याजितो धर्मबुद्धया ॥ १३ ॥
एतद्भूमींद्रजन्मा समसमरसमारंभगंभीरबाहुव्यापारव्यस्तदंभप्रतिनृपतिवधोद्गीतकीर्त्तिप्रतापः ॥
राजा प्राचामवाचामपि धरणिभुजामग्रगण्योतिधन्यो दानैर्मानैः प्रयाणैर्विबुधजनगतिः शक्तिसिंहो बभूव ॥ १४ ॥
यस्मिन्नस्मिंश्च पृथ्वीविलयबलभिदि प्राप्तपात्रे पवित्रे लीलामात्रेण गोभूकनकमयमहादानदानप्रवृत्ते ॥
कर्णेनाकर्णनीयः क्व च कनकगिरिर्देववृक्षा विलक्षा भोजो राजापि लज्जास्पदमलमपि का कामना कामधेनोः ॥ १५ ॥
यद्दानं चोपमानं कुलयुगलकया यस्य गाथा सनाथा विद्या सर्वानवद्या वरसमरमहाडिण्डिमोतिप्रचण्डः ॥
आचारः सत्त्वसारः स्फुरदमरसरिद्दीप्तिमूर्त्तिश्च कीर्तिः सोयं श्रीशक्तिसिंहो नृपमुकुटमणिः कस्य न स्यान्नमस्यः ॥ १६ ॥
तस्यात्मजो मनसिजो हरिणेक्षणानां कल्पद्रुमः सकलपंडितमंडलीनाम् ॥
प्रत्यर्थिपार्थिवसरोवरचंडधामा राजा चिरं विजयते मदनेंदुनामा ॥ १७ ॥
यदीयमधिकं यशो मृगदृशां दिशां मंडनं यदीयमधिकं महः कृतरुषां द्विषां खंडनम् ॥
यदीयमखदक्षिणा हरति तत्क्षणाद्दुर्गतिं स एष विदुषां गतिर्मदनसिंहपृथ्वीपतिः ॥ १८ ॥
यस्मिन्नस्मिन्प्रयाणव्यसनिनि नृपतौ तुङ्गरिङ्गत्तुरङ्गक्षोणिक्षोभक्षमोद्यत्खरतरखुरलीधूलिगाढांधकारे ॥
क्वासौ सेना रिपूणां क्व च वयमपि ते क्व स्थिताः प्रास्थिता वा क्वेति त्रस्ता विहस्ताः प्रतिदिशमनिशं वैरिणो नो वदन्ति ॥ १९ ॥
यद्दानारूढयानाभरणमयपरावृत्तिवृत्ताधिकार्थिश्रेणीः सारंगनेत्रा निजमपि न पतिं सोयमित्थं भजंते ॥
यद्यात्रानाममात्रात्प्रतिनृपतिवधूवर्गनेत्रांबुधारामारादुद्वीक्ष्य साक्षादसमयनटनं कुर्वते नीलकंठाः ॥ २० ॥
यस्मिन्दातरि यातरि क्षिति भुजां श्रीसंगरोत्संगिनि स्वैरं हीरकहाटकोपरचितालंकारहारस्त्रजाम् ॥
कर्णाकर्णनमेव नैव भजति स्थेमा न हेमाचले कल्पद्रोरपि विद्रवः किमपरं चिंत्यो न चिंतामणिः ॥ २१ ॥
यो वेदाखिलवेदबोधितविधीनाचारपारंगमो येनाद्यापि च संस्कृतेरवधिना संध्या न वंध्या कृता ॥
यो देवद्विजतातकर्मविलसद्धर्मक्रियातत्परः सोयं श्रीमदनो नृपो विजयते निष्ठावशिष्टद्युतिः ॥ २२ ॥
तेनाहूय मनीषिमंडनमणिं सन्मिश्ररत्नाकरं गोपीनाथमनुत्तमं वसुधियं श्रीविश्वनाथं तथा ॥
मुग्धं पंडितमुन्नतद्युतिमतिं भट्टं च गंगाधरं राज्ञा शक्तिन[क]सूनुना सुकृतिना ग्रंथोयमारभ्यते ॥ २३ ॥
अमुष्य परिनिर्मितान्मदनरत्नदीपाद्बुधा विधाय मतिमंदतातिमिरजातघातक्रियाम् ॥
श्रुतिस्मृतिविबोधिते विहितनिंदिते कर्मणी निरीक्ष्य नृपतेः कृते कलयतेह पुण्याशिषः ॥ २४ ॥
उर्वी यावदहींद्रदंडशिखरासीनातपत्रायते यावत्तत्कनकोच्चकुंभसुषमां पुष्णाति हेमाचलः ॥
यावद्बालमृगांकमंजुलकला मौलौ मृडानीपतेरुद्योतैर्मदनप्रदीपमहिमा तावत्समुज्जृंभताम् ॥ २५ ॥
उद्योताः समयाचारव्यवहारविवेचकाः ॥ प्रायश्चित्तस्य दानस्य शुद्धिशांत्योश्च सप्ततेः ॥ २६ ॥

तत्रादौ राजसिंहेन सर्वधर्मोपयोगिनः ॥ तन्यते मदनेंद्रेण समयस्य विनिर्णयः ॥ २७ ॥

च.—इति श्रीकोदंडपरशुरामेत्यादि विविधबिरुदावलिविराजमानमानोन्नतमहाराजाधिराजश्रीशक्तिसिंहात्मजमहाराजाधिराज-श्रीमदनसिंहदेवविरचिते मदनरत्नप्रदीपे समयनिर्णयो नाम प्रथम उल्लासः संपूर्णः ॥

३३७ महारुद्रपद्धतिः-शाकलशाखायाम्-अचलः ।

आ.—नत्वा गणेशं तु सरस्वतीं च तथाम्बिकां सगणं पञ्चवक्त्रम् ॥ धर्मप्रदं काम्यविधौ प्रधानं वक्ष्ये महारुद्रभवं विधानम् ॥१॥

एकत्रिंशता सार्कं च सहस्रं त्रिशताधिकम् ॥ रुद्रजपानां सङ्ख्यैषा महारुद्राभिधायिनी ॥ २ ॥

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान्प्रति नैष यत्नः ॥

सम्पत्स्यते तु[उत्पत्स्यतेऽस्ति] मम कोपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥ ३ ॥

रौद्रो जपः सर्वशाखानुद्दष्टः [स सर्वशाखासु जपः प्रदिष्टः] सद्भिः स्वशाखाविहीनः [हितः] समाश्रितः ॥

कुर्वन्स्वशाखोक्तमिमं हि नित्यं प्राप्नोति सर्वं हि मनोभिलाषम् ॥ ४ ॥

च.—इदं विश्वजनीनेनाचलेनेशानतुष्टये ॥ महारुद्रविधानं हि विस्तरेण समीरितम् ॥ १ ॥

द्विजैरिदं हृत्कमले निधीयतां शिवार्चनानेन सदा विधीयताम् ॥

शिवार्चनायास्तु फलं प्रगृह्यतां फलोपभोगेन सदा सुखीयताम् ॥ २ ॥

द्वैवेदी विदुषां प्रधानमभवच्छ्रीवत्सरत्नो [राजो] द्विजस्तत्सूनुः सकलद्विजांघ्रिरजसामंशीकृतो योऽचलः ॥

तेनेदं रचितं हि पूजनवरं रुद्रस्य संतुष्टिदं यत्कृत्वा सजपं जनोऽभिलषितं प्राप्नोति सर्वं महत् ॥ ३ ॥

इति द्विवेद्यचलविरचितं ऋग्वेदिनां महारुद्रविधानं समाप्तम् ॥

३३८ महारुद्रपद्धतिः रुद्रार्चनमञ्जर्यपरनाम्नी-मालजीभट्टः ।

आ.—नत्वा विघ्नविनाशनाय च गुरुं विघ्नेशपादाम्बुजं हृत्पद्मान्तरनित्यवृत्तिजडतानाशाय विद्याप्रदम् ॥

विप्राणामुपकारकाय तिगलाभट्टात्मजो मालजीनामाहं प्रकरोमि पद्धतिमिमां रुद्रार्चनामञ्जरीम् ॥ १ ॥

आसीद्गुर्जरमण्डले क्षितितलालङ्कारभूते पुरे स्वच्छे श्रीरयन[ल]सञ्ज्ञके गुणनिधिः श्रीभट्टरत्नाभिधः ॥

त्तजूः [तज्जः] श्रीतिगलाह्वयः प्रवरधीर्वेदांगरायस्तु[यःसु]तो नाम्ना मल्लजिदेष देवकृपयेमां पद्धतिं चाऽकरोत् ॥१॥

इति श्रीविद्वन्मुकुटमाणिक्यभट्टश्रीरत्नात्मजभट्टश्रीतिगलासु[सू]नुना मालजिना वेदांगरायोपनाम्ना कृतेयंमहारुद्रपद्धतिः॥

३३९ मांसमीमांसा-मुनीन्द्रः ।

आ.—श्रीगोपीप्रियचरणं नरकादिविभेदि[दकं] हरिप्रहितम् ॥ रामाराधनतृप्तं मङ्गलजनकं सुकामदं वन्दे ॥ १ ॥

श्रीकवीन्द्रं नमस्कृत्य पुरस्कृत्य श्रुतेर्मतम् ॥ तिरस्कृत्य नवीनोक्ति दर्भगर्भाग्रतीक्ष्णचित् ॥ २ ॥

धीरप्रवीरभूपाललहनासिंहनोदितः ॥ मुनीन्द्रो मांसमीमांसातत्त्वं निर्णेतुमुद्यतः ॥ ३ ॥

च.—आसीद्रत्नपतिर्हिमाङ्गदसुतो विद्यावतामग्रणीः श्रीमान्राजपतीन्द्रि— — — —स्तस्यात्मजास्ते त्रयः ॥

जाताः श्रीहरिदत्तनामकसुधीः श्रीमान्हरीन्द्राभिधो ज्येष्ठः सर्वगुणै रमारमणको धीरः कनिष्ठो बुधः ॥ १ ॥

श्रुतौ पद्ये वेने तर्के काव्ये कुमुदके वरे ॥ श्रीहरीन्द्राच्छ्रीहरीन्द्रात्कवीन्द्रोभूद्बुधाग्रणीः ॥ २ ॥
यो रामानुजवञ्चनोत्पथगतान्निर्जित्य वादे मृगान्माध्वाञ्छूकरतुल्यकानथ च यो जित्वा परान्वाल्लभान् ॥
नैम्बार्कान्सुगतादिनास्तिककुलं जित्वान्यपाखण्डिनो वेदान्सिन्धुगतानिवोर्ध्वमनयच्छ्रीमान्कवीन्द्राभिधः ॥ ३ ॥
सर्वत्रैव ततं विनाशरहितं जन्यं यदीयं यशो दृष्ट्वा न्यायविदो विलक्षणमिदं भावादभावादपि ॥
भ्रान्ता वेदविदो द्वितीयघटनापत्तेर्भ्रमं सङ्गता भग्नां तामुपमां विलोक्य कवयो मोहं ययुः केवलम् ॥ ४ ॥
शौर्य्ये सूर्य इव प्रचण्डभुजको भीमो बले कार्मुके पार्थः शत्रुनिषूदने व्यवहृतौ धर्मोऽथ कर्णो नृपः ॥
औदार्य्येथ कविः कवित्वरचने वाचासु वाचस्पतिर्जीयाच्छ्रीलक्ष्मणामृगेन्द्रनृपतिः सर्वैर्गुणैः संयुतः ॥ ५ ॥
तेनोदितः सुकविधीरकवीन्द्रसूनुर्दृष्ट्वा श्रुतिस्मृतिपुराणवचांसि भूयः ॥
श्रीमान्मुनीन्द्रविबुधः कृतवान्पवित्रां मांसामृतामरनदीं हरितुष्टये सा ॥ ६ ॥
भूयो मांसविचाराद्रम्यैषा मांसमीमांसा ॥ रामाङ्कवसुनिशेशे विक्रमरवितो दिने सूर्य्ये ॥ ७ ॥
इति श्रीमहामहोपाध्यायरत्नपतिसुतहरीन्द्रात्मजकवीन्द्रपुत्रमुनीन्द्रकृता मांसमीमांसा समाप्ता ॥

३४० मौनव्रतधारणविधिः ।

आ.—अथ मौनव्रतम् । शिवधर्मे नन्दिकेश्वर उवाच ॥
शृणु वत्स प्रवक्ष्यामि मौनं सर्वार्थसाधनम् ॥ मौनव्रतं महापुण्यं हुंहुं तत्र विवर्जयेत् ॥ १ ॥
च.—एवं मौनं च ते प्रोक्तं सर्वकामार्थसाधकम् ॥ भुवि सर्वासमर्थानां सुकृतं प्रकटीकृतम् ॥ १७ ॥
इति मौनव्रतम् ॥ शुभं भूयात् ॥

३४१ रामपद्धतिः शाण्डिल्यस्मृत्यन्तर्गता ।

आ.—प्रातः कृत्यमकृत्वा तु यः पूजयति केशवम् ॥ तस्य पूजा तु विफला मद्यस्पर्शपयो यथा ॥ १ ॥
तस्माद्धेतोः प्रयत्नेन नित्याचारं समाचरेत् ॥ पादपाण्याननं धौतं तत्रान्ते श्रीहरिं स्मरेत् ॥ २ ॥
रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृतीयकः ॥ स ब्राह्म इति विज्ञेयो विहितः सम्प्रबोधने ॥ ३ ॥
च.—अमृतापिधानमसि स्वाहा इति उत्तरापोशनं दत्वाचामयेत् ततः ताम्बूलं समर्पयेत् ॥ इति श्रीरामपद्धतिः सम्पूर्णा ॥

३४२ रामार्चनदर्पणम् ।

आ.—दैशिकं गणपं वाणीं प्रणम्य सुरसुन्दरीम् ॥ विरच्यते सुहृद्रम्यं श्रीरामार्चनदर्पणम् ॥ १ ॥
इह खलु निखिलपुरुषार्थानुरागी ब्राह्मे मुहूर्ते चोत्थाय ब्रह्मरन्ध्रे सिताम्बुजे ....
च.—एवं संवत्सरमात्रमविच्छिन्नं पूजयन्नायुः कीर्तिं श्रियं भूमिं विजयं बलमारोग्यमाज्ञासिद्ध्यादि यद्यदभीष्टं तत्सर्वं प्राप्नुयात् ॥
॥ इति काम्यपूजाविधिः सम्पूर्णः ॥

३४३ रुद्रानुष्ठानप्रयोगः-खण्डभट्टः ।

आ.–नत्वा विनायकं देवं शङ्करं रेणुकां तथा ॥ माहेश्वराख्यपितरं श्रौतस्मार्तविशारदम् ॥ १ ॥
याज्ञिकानां सौकर्याय सारमुद्धृत्य ग्रन्थतः ॥ रुद्रानुष्ठानप्रयोगः सङ्क्षिप्तो रच्यते मया ॥ २ ॥
च.–इति अयाचितोपनामकमयूरेश्वरभट्टसुतखण्डभट्टविरचितसनवग्रहमुखहोमात्मकरुद्रानुष्ठानप्रयोगः समाप्तिमगमत् ॥

३४४ विजयदशमीपद्धतिः ।

आ.–अथाश्विनशुक्लदशम्यामपराह्णे अलङ्कारादिना आत्मानमलङ्कृ — — — — — —
च.–वसन्तराजे । त्वं योगयुक्तो मुनिपुत्रकस्त्वमदृश्यतामेषि शिखोद्गमेन ॥
सन्दृश्यते [से] प्रावृषि निर्गतायां त्वं खञ्जनाश्चर्य्य नमोनमस्ते ॥
इति विजयदशम्याः पद्धतिः सम्पूर्णा ॥

३४५ विधानमाला-नृसिंहभट्टः ।

आ.-प्रणम्य लम्बोदरमुत्तमानां सन्तोषदां सर्वपुराणदृष्टाम् ॥ धर्मार्थकामव्यवहारसिद्ध्यै करोमि शुद्ध्यर्थविधानमालाम् ॥ १ ॥
विधानमालेति ग्रन्थनामधेयं तच्चान्वर्थं विधानानां मालेव माला परम्परेत्यर्थः । विधानं विधिः । यद्यपि विधानशब्देन···
च.–इति स्वस्तिवाचनम् ॥ इति श्रीविधानमालायां नृसिंहभट्टविरचितायां सर्वकामसिद्धिदं स्वस्तिवाचनम् ॥
इति विधानमाला समाप्ता ॥
समाहृतमिदं शास्त्रं सर्वशास्त्रार्थसङ्ग्रहात् ॥ विधानमालिकाख्या हि प्राणिनामुपकारिका ॥ १ ॥
धर्मकामार्थशास्त्रेभ्यः सङ्गृह्यालङ्कृतं मया ॥ उद्धृतं सर्वपुष्पेभ्यो यतः स्यान्मधुमासकम् ॥ २ ॥
ग्रन्थस्यास्य च रागेण ममानुग्रहणेन च ॥ संतोषं यान्तु विद्वांसः स्युरेनांसि समञ्जसा ॥ ३ ॥
वैराटो विषयोस्ति चन्दनगिरेर्गव्यूतिमात्रं पुरं देव्याः प्राक्सुमनोहरं वसुमतीतीरे ग्रहारं महत् ॥
तत्रस्योऽत्रिकुलोद्भवो गुणनिधिः श्रीमान्नृसिंहो द्विजश्चक्रे शास्त्रमिदं नृणामुपकृतं सन्धाय चित्ते निजे ॥ ४ ॥
विधानमालां हि मया मुमूर्षुणा गुणानुसन्धानविराजमानाम् ॥ प्रमेयसारैः सुरभिं पवित्रां कुर्वन्तु कण्ठेषु निजेषु धीराः ॥ ५ ॥

३४६ विवाहकर्ममन्त्रव्याख्या सुबोधिनी ।

आ.–यन्नामस्मरणप्रभञ्जनमहावेगेन पापद्रुमा भिद्यन्ते नितरां हि यस्य वशगः कालो जगद्भक्षकः ॥
यत्पादौ वरपङ्कजोद्भवनिव[द्भवभव]स्वर्लोकपाद्यैर्नुतौ सोयं वो भवतु प्रशस्तफलदो लक्ष्मीपतिः श्रेयसे ॥ १ ॥
मतं हरिहरादीनां दृष्ट्वा चूडामणिं बुधाः ॥ विवाहकर्मणो रम्यां व्याख्यां सन्तनुमत्तराम् [ते तराम्] ॥ २ ॥
तत्रादौ विवाहस्य सम्बन्धविचारपूर्वकत्वात्प्रथमं सम्बन्धो विविच्यते । तत्र मनुः ।
असपिण्डा च या मातुरसगोत्रा च या पितुः··········
च.–पाणिग्रहे वधूः प्रोक्ता लाजहोमे सुमङ्गली ॥ सप्तपद्यां सखी प्रोक्ता पत्नी चतुर्थकर्मणि ॥

विवाहकर्मणो रम्या कृता टीका सुबोधिनी ॥ या काचिद्भ्रान्तिरत्रत्या तां क्षमन्तु सुधीवराः ॥
टीकेयं स्वीयबोधाय कृता देवीप्रसादतः ॥ पश्यन्तु स्वेच्छया सन्तः क्षमन्तु मम साहसम् ॥
इति श्री विवाह[कर्ममंत्र]टीका समाप्ता ॥

३४७ विवाहप्रयोगः ।

आ.—विवाहदिवसात्पूर्वेद्युः कति[पयेष्व]वशिष्टेषु दिवसेषु शुभेऽह्नि— — — — —
च.—ततो बहिःशालातो गृहाभ्यन्तरे गत्वा कल्याण्यादिजीवमातॄः सम्पूज्य श्वशुरावभिवाद्य वधूं शिबिकायामारोप्य पितृगृहात्स्वगृहं नयेत् ॥ इति विवाहप्रयोगः ॥

३४८ विष्णुयागपद्धतिः ।

आ.—अथ वैष्णवयागप्रयोग उच्यते । शुक्लैकादश्याः कस्याश्चित्पूर्वं शुभदिने — — — —
च.—ततो द्विजाः स्वस्ति वाचयेयुः आशिषो दद्युः॥दीनानाथान्संतोष्य बन्धुयुतो भुञ्जीतेति ॥इति विष्णुयागप्रयोगः समाप्तः ॥

३४९ वृषोत्सर्गप्रयोगः अथवा नीलवृषोत्सर्गः-अनन्तभट्टः ।

आ.—अथ नीलवृषोत्सर्गः तत्र वृषलक्षणम् जीवद्वत्सायाः पयस्विन्याः पुत्रं त्रिहायनमेकहायनं वा नीलं बभ्रुं ....
च.—सर्वसिद्धिमवाप्नोति यथा ते ब्रह्मचारिण इत्यादिफलकथनं विस्तरभयान्नोक्तं हेमाद्र्यादेरवगन्तव्यम् ॥
इति श्रीमद्विद्वन्मुकुटमणिप्रथमशाखिश्रीमन्नागदेवभट्टसूनुनाऽनन्तभट्टेन कृतो वृषोत्सर्गप्रयोगः ॥

३५० व्यासपूजाविधिः ।

आ.—आषाढ्यां पौर्णमास्यां व्यासपूजोक्ता ॥ तत्र त्रिमुहूर्ता चेत्परैव ग्राह्या ॥
व्यासपूजां प्रवक्ष्यामि सम्यक्पीठस्य सिद्धये ॥ कृत्वानुष्ठानमाषाढ्यां पूजाङ्गं सन्निधापयेत् ॥
प्राणायामत्रयं कृत्वा षडङ्गन्यासपूर्वकम् ॥ व्यासपूजां करिष्यामीत्युक्त्वा तु सलिलं स्पृशेत् ॥
तत्र प्रयोगः । प्रातः कृतनित्यक्रियः गङ्गादौ क्षौरं कृत्वा स्नात्वा पूजास्था — — — — — —
च.—वसेत्समानशीलेषु सुशीलेषु तपस्विषु ॥ इति व्यासपूजाविधिः ॥ अथात्रेतिहासः ।
दाल्भ्य उवाच । विष्णुधर्मास्त्वयाख्याताः श्रुताश्च त्वत्प्रसादतः ।...........
भुक्त्वा भोगान्यथाकाममन्ते विष्णुपदं व्रजेत् ॥ १९ ॥
इति विष्णुधर्मोत्तरे दाल्भ्यविष्णुसंवादे व्यासपूजाविधौ इतिहासः ॥

३५१ व्रतसारः-श्रीदत्तः ।

आ.—श्रेयः समादिशतु सालसपक्ष्मपाते निद्रायिते अपि दृशौ भृशमुन्नमय्य ॥
संवाह्यमानचरणाम्बुजजातहर्षो लक्ष्मीमुखेक्षणपरः परमेश्वरो वः ॥ १ ॥

निबन्धेषु निबद्धानि वचनानि विविञ्वला [विचिन्वता] ॥ श्रीदत्तेन व्रतादीनां सारमाकृष्य लिख्यते ॥ २ ॥
तत्र पूर्वदिने स्नानादिना शरीरशुद्धिं कृत्वा निरामिषमेक — — — — — — — — —
च.—सदा प्रीतमनास्तस्य कृष्णो देवकिनन्दनः ॥ तुलसी— — — — — — — — — — — — — — — — — —

३५२ व्रतोद्यापनकौमुदी-शङ्करः ।

आ.—नत्वा गणेशं सन्तुष्ट्यै शङ्करेण वितन्यते ॥ मुदा पुराणविख्यातव्रतोद्यापनकौमुदी ॥
तत्र तावत्सर्वव्रतोपयोगित्वात्किञ्चिन्निर्णयादिकं लिख्यते । ....
च.—शाके शरद्वयङ्कचन्द्रे श्रीमुखाह्वयवत्सरे ॥ शाङ्कर्य्यऽगच्छत्पूर्णत्वं व्रतोद्यापनकौमुदी ॥
आलोच्य बहुशो ग्रन्थान्सारमुद्धृत्य सर्वतः ॥ धारयित्युपनाम्ना च वितथावनसञ्ज्ञिना ॥
वाञ्छारिणा शङ्करेण व्रतोद्यापनकौमुदी ॥ रचिता या तया देवस्तु[स्तु]ष्यतां परमेश्वरः ॥
इति श्रीमद्वितथावनकुलाब्धिसम्भवधारेइत्युपनामकवञ्छारिसूरिसूनुशङ्करविरचिता व्रतोद्यापनकौमुदी समाप्ता ॥

३५३ शान्तिविवेकः-मदनदेवः ।

आ.—यत्तत्सुरासुरशिरोमणिघृष्टपीठमुत्संगभूषणमुमाहरयोरुदारम् ॥
धामस्तमंधपसुधाकरधाम नौमि वक्त्रेण वारणमनीशितवारणं तत् ॥ १ ॥
अत्रोपसर्गनिवहेन निपीडितस्य शांत्यै जनस्य करुणावरुणालयोऽयम् ॥
श्रीशक्तिसिंहतनयो विनयोदितः श्रीराजा विवेचयति शांतिकपौष्टिकानि ॥ २ ॥
अत्राणुं वा पृथुमपि गुणं पर्वतीकृत्य दोषान्प्रेम्णा नम्रे मयि सुमनसः संति संतो दयार्द्राः ।
तेन्ये दूरात्प्रकृतिकुटिला वंदिताः प्रोझ्य सारं ये स्युर्दोषग्रहणकुशलाश्चालनीतोलनीयाः ॥ ३ ॥
तत्रादौ ग्रंथानुक्रमणी ॥
अथ शांतिसमुच्चयेस्मिन्नर्था ये समुदीरिताः ॥ तेषां सुखावबोधार्थं कुर्वेऽनुक्रमणीं स्फुटम् ॥ ४ ॥
आदौ विनायकस्नानं सूर्यशांतिरथोदिता ॥ चंद्रशांतिर्भौमशांतिर्बुधशांतिर्बृहस्पतेः ॥ ५ ॥
शांतिस्तत्पूजनं चाथ शुक्रशांतिस्ततः शनेः ॥ शांतयो राहुकेत्वोश्च व्रतं शानैश्वरं ततः ॥ ६ ॥
ततः स्कांदी शनेः शांतिरन्या नागरखंडजा ॥ शांतिः प्रभासखंडोक्ता पूजाथ गुरुशुक्रयोः ॥ ७ ॥
पंचादिक्रूरयोगेषु शांतयो यामलोदिताः ॥ विष्णुधर्मोत्तरोक्तानि ग्रहस्नानान्यतः परम् ॥ ८ ॥
तिथिशांतिर्ज्वरोत्पत्तौ वारशांतिर्ज्वरादिषु ॥ उक्ता नक्षत्रशांतिस्तु नक्षत्रविधयस्ततः ॥ ९ ॥
जन्मादिनवनक्षत्रशांतयस्तदनंतरम् ॥ वंध्याभिषेके स्नपनं मृतवत्सादि योषितः ॥ १० ॥
सर्वार्थसाधनं स्नानं शान्तिर्दंतैः सहोद्भवैः ॥ शांतिः कृष्णचतुर्दश्यामुत्पन्नस्याप्युदीरिता ॥ ११ ॥
सिनीवालीकुहूजातशांतिश्च तदनंतरम् ॥ दर्शजातस्य शांतिश्च मूलशांतिरथोदिता ॥ १२ ॥
गर्गोदिता मूलशांतिरश्लेषाशांतिरप्यथ ॥ शांतिर्मूलाश्लेषयोश्च ज्येष्ठाशांतिरतः परम् ॥ १३ ॥
पित्रा भ्रात्रैकनक्षत्रे शांतिर्गंडेष्वपीरिता ॥ तिथ्यादिगंडजनने शांतिरन्यापि गंडजे ॥ १४ ॥

वैधृतौ व्यतिपाते च संक्रांतौ जननेपि च ॥ विषनाडीजातशांतिः शांतिर्ग्रहणजेष्वपि ॥ १५ ॥
पित्राद्यरिष्टहृच्छांतिर्गोमुखप्रसवाभिधा ॥ अथ प्रथममासादौ गर्भरक्षार्थमीरिता ॥ १६ ॥
बलयस्तत्र गर्भस्य वेदनाहरमौषधम् ॥ उक्तं सुखेन तदनु प्रसवोपाय ईरितः ॥ १७ ॥
च.—महाराजाधिराजस्य मदनेंद्रस्य शासनात् ॥ श्रीमल्लिनाथगूर्जरेण भट्टपूज्यात्मकेन वा ॥
भट्टश्रीविश्वनाथेन काशीतीर्थनिवासिना ॥ शांतिकं पौष्टिकं वापि यथाशास्त्रं प्रकाशितम् ॥
उर्वी यावत्[भाति] सुमेरुदंडशिखरासा[स्थानां]नां तपः श्रूयते यावत्तत्कनकांबुकुंभसुखमां पुष्णाति हेमाचलः ॥
यावद्भाति मृगांकमंजुलकला मौलौ मृडानी शिवे तावत्त्वं[द्वं] सुखशांतिकर्मविधिषु[भिः] पुष्णातु नूनं जनान् ॥
इति श्रीराजाधिराजशक्तिसिंहजीदेवस्यात्मजमदनदेवविरचितायां शांतिकपौष्टिकविधिनिरूपणं समाप्तम् ॥
समाप्तोयं शांतिविवेकग्रंथः ॥

३५४ श्राद्धकारिका ।

आ.—भौमेर्के भृगुजे मघागृहनिशासप्तम्यनंगाहयानन्दाजन्मदिनेषु संधियुगले नो तर्पणं स्यात्तिलैः ॥
नोद्वाहव्रतचौलवृद्धिषु समार्द्धार्द्धैकमासे क्रमान्नो दुष्येत्तु मृतौ महालयगयापुण्याहतीर्थादिषु ॥ १ ॥
च.—घंटानिनादो हरसंनिधानं शंबूकशंखौ कदलीदलं च ॥ उन्मत्तजात्यर्कहयारिजानि श्राद्धस्य वैगुण्यकराण्यमूनि ॥ १ ॥
विषदिग्धेन बाणेन हतौ यौ मृगपक्षिणौ ॥ तयोर्मांसं कलंजस्य[जंस्यात्] तन्नामिभ्यां[न भक्ष्यं] द्विजातिभिः ॥ २ ॥

३५५ श्राद्धकृत्यप्रदीपः-होलिलः ।

आ.—गुरुपदेशैर्मुनिवाक्यबोधात्सतां सदाचारपदीं विदित्वा ।
श्रीहोलिलो मन्दधियां हिताय वक्ति स्फुटं श्राद्धविधिप्रदेशान् ॥
आदौ श्रद्धा श्राद्धफलं श्राद्धकालावृतो[स्ततो] हविः ॥ पुष्पधूपादिकथनं ब्राह्मणानां परीक्षणम् ॥
उद्देशः पार्वणविधेः निमन्त्रणमतः परम् ॥ कर्तुर्भोक्तुश्च नियमा विश्वेदेवविवेचनम् ॥
कथनं पार्व[र्ण]पात्राणामन्नस्य परिवेषणम् ॥ पिण्डदानादिकं पिण्डप्रतिपत्तिरनन्तरम् ॥
आमश्राद्धं तथा जीवत्पितृकश्राद्धनिर्णयः ॥ श्राद्धं द्विपितृके याद्दक्पुत्रिकायाः सुते तथा ॥
एकोद्दिष्टं वृद्धिनित्यतीर्थश्राद्धानि च क्रमात् ॥
च.—वृषोत्सर्गमंत्रः चतस्रो वत्सतर्यः ॥ इति गृह्योक्तपद्धतिः ॥

३५६ श्राद्धमन्त्रव्याख्या-हलायुधः ।

आ.—लक्ष्मणक्षोणिपालस्य धर्माध्यक्षो हलायुधः ॥ निखिलश्राद्धमंत्राणां व्याख्यां निर्मितवानिमाम् ॥..........
च.—अत्रान्ये मंत्राः पार्वणश्राद्धादपरे बोद्धव्याः ॥ इति वृद्धिश्राद्धमंत्रव्याख्या ॥
इत्यावसथिकमहाधर्माधिकृतभट्टश्रीहलायुधब्राह्मणसर्वस्वे पार्वणादिसर्वश्राद्धमंत्रव्याख्या ॥ संवत् १६१९ ॥

३५७ श्राद्धषोडशविधिः ।

आ.—अथ श्मशाने शुचौ देशे आस्तरणस्थं शवं धृत्वा मज्जनं कृत्वा ब्राह्मणानीतेन काष्ठेन पुत्रादयश्चितां कुर्युः ॥
च.—पित्रादिभिः सह कर्तव्यं जीवत्पितृकेण पितामह्या[हा]दिभिः सहकार्य्यम् ॥
इति श्राद्धषोडशविधिः समाप्तः ॥

३५८ श्राद्धसूत्रभाष्यम्-गदाधरः ।

आ.—शिवं च विघ्नहर्तारं गुरूंश्च वामनं तथा ॥ अंबिकां शारदां चापि वन्दे विघ्नोपशान्तये ॥ १ ॥
कात्यायनकृते श्राद्धसूत्रे व्याख्यापुरःसराम् ॥ प्रयोगपद्धतिं कुर्वे याज्ञवल्क्यादिसंमताम् ॥ २ ॥
तत्र पूर्वां पौर्णमासीमुत्तरां वोपवसेदित्यादिना श्रौतकर्माण्युपदिश्याथातो गृह्यस्थालीपाकानां कर्मेत्यादिना स्मार्तान्यथाख्यायावशिष्टं श्राद्धकर्म वक्तव्यमित्यत आह अपरपक्षे श्राद्धं कुर्वीत ॥..........
सहस्रान्यर्तिक पुनानीतिवचनात् ॥ इति श्री त्रिरग्निचित्सम्राट्स्थपति श्रीम० दी० वा० त्मज– – – – – –
च.—आवृत्तिः समाप्तिसूचनार्था ॥ इति श्रीत्रि० ते कातीयश्राद्धसूत्रभाष्ये नवमी कंडिका ॥ समाप्तं श्राद्धसूत्रभाष्यम् ॥
पित्रोः क्षयाहे संप्राप्ते यस्य भार्या रजस्वला ॥ तदा श्राद्धं न कुर्वीत कर्तव्यं पंचमेऽहनि ॥
भर्तुः क्षयाहे या नारी कथंचित्स्याद्रजस्वला ॥ असुता ससुता चैव न च श्राद्धं समाचरेत् ॥ २ ॥ संवत् १८७६ ॥

३५९ श्राद्धाङ्गभास्करे प्रयोगपद्धतिः विष्णुशर्मा ।

आ.—साध्यसाधनयोगेषु साधके च निजेच्छया ॥ अन्तर्यामितया तिष्ठन्फलदोस्तु स्मृतो हरिः ॥ १ ॥
अथ पार्वणश्राद्धप्रयोगः ततश्च श्राद्धमिति निश्चित्य पूर्वेद्युर्वस्त्रक्षालनस्थानोपलेपनभूमिकरणं च विधाय द्विजान्निमंत्रयीत॥
च.—इतिकर्तव्यता सूत्रकर्कभाष्यानुसारिणी ॥ श्रीमाध्यंदिनशाखीयैर्गृह्यतां विष्णुनोद्धृता ॥
श्राद्धरत्नानि हि मया श्राद्धरत्नमहोदधेः ॥ संगृह्यात्र पिनद्धानि रंजतां दूयेसृताम् [हृदयं सताम्] ॥
इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमदनुभूतिस्वरूपदीक्षितयज्ञदत्तात्मजाग्निहोत्रिविष्णुशर्मविरचिते श्राद्धांगभास्करे प्रयोगपद्धतिः समाप्ता ॥

३६० श्राद्धेन्दुशेखरः-नागोजीभट्टः ।

आ.—श्रद्धया ब्राह्मणेभ्यो यत्पितॄनुद्दिश्य दीयते ॥ ऋषयः श्राद्धमित्याहुः शुद्धिसत्यादिसंयुतम् ॥ इति गृह्यविदः ॥
च.—तस्माद्वृद्धिश्राद्धेषु रेखाकरणं पिंडदानादिकं प्राङ्मुखं कर्तुर्दक्षिणसंस्थमेव सर्वत्र भवतीति सिद्धांतः॥
इति श्रीमत्कालोपनामश्रीमन्नागोजीभट्टविरचितः श्राद्धेंदुशेखरः समाप्तिमागमत् ॥

३६१ सन्ध्या सटीका-शत्रुघ्नः ।

मू. आ.—अघमर्षणसूक्तस्याघमर्षण ऋषिरनुष्टुप्छन्दोभाववृ – – – –
टी. आ.—अय च ऋग्वेदीयो मन्त्रः । परश्च तैत्तिरीयः । तत्र रात्रिरजायतेति पाठः ॥

मू. च.—गायत्रिच्छन्दसां मातर्जपे मे सन्निधिं कुरु ॥

टी. च.—पदाय कथम्भूताय दर्शिताय दर्शनीयाय ध्यानिनेति शेषः॥ परोरजसे रजसः परोभूताय शुद्धसत्त्वस्वरूपाय इत्यर्थः ॥

३६२ सन्ध्याभाष्यम्-रामाश्रमः ।

आ.—जयति गिरिशबालः स्वर्णमाणिक्यमालः स्फुरदुरसि विशालः स्फारसिन्दूरभालः ॥

नटकनिकटतालः प्रोल्लसत्कान्तिजालः सकलदुरितकालः स्वर्णरत्नप्रवालः ॥ १ ॥

यं वेदत्रितयं सदा निजगदे कालत्रयस्थापितं लोकानां त्रितयस्य येन भवति प्रायादवस्थात्रयम् ॥

यं वर्णत्रिगुणं त्रयोपि निपुणं ध्यायन्ति सन्ध्यात्रये तं भास्वन्तमनन्तमौपनिषदं भक्त्या मुहुर्भावये ॥ २ ॥

हरन्तं संसारं निगमवनसारं त्रिजगतां सदाधारं पारं स्थितिनिलयनारम्भजलधेः ॥

उदारं सद्द्वारं समुपहितहारं हृदि परं भजे वारंवारं मदनसुकुमारं रघुपतिम् ॥ ३ ॥

आलोच्याप्यऽखिलश्रुतिस्मृतिपुराणाद्यर्थनिर्णायकं भाष्यं वेदवचोर्थसंशयसमुच्छेदाय दृष्ट्वा मुहुः ॥

विद्वल्लोकहिताय नायतगिरा सारार्थमत्याहितं सान्ध्यातत्त्वमतिस्फुटं प्रकुरुते रामाश्रमो[ऽयं] यतिः ॥ ४ ॥

अहरहः सन्ध्यामुपासीत इति श्रुतेः स्मृतेश्च तत्र सन्ध्याशब्दो यद्यपि कालवचनस्तथापि दर्शपौर्णमासादिवत्कालयोगं निमित्तीकृत्य कर्मणि प्रवर्तते तत्कालोपास्यदेवता इति माधवः । सा चैकस्मिन्दिवसे त्रिवारमुपास्या अत्रिवचन-प्रामाण्यात् । सन्ध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा । इति वाक्यात् । सन्ध्यावन्दनकर्मणि ध्यानं प्रधानम् मार्जनादि-अङ्गम् । कुतस्तदिति चेत्सम्यक्प्रकारेण ध्यानं सन्ध्येति सन्ध्याशब्दनिर्वचनात् ॥ ननु सन्ध्याशब्दवाच्यमर्घदानमेवास्तु तत्र सन्ध्याशब्दो रूढ एवाङ्गीकर्तव्यः । सूर्यार्घदानस्यावश्यकत्वात् । आवश्यकत्वं च स्मर्य्यते ।

प्रमादादथवाज्ञानात्समीपे चोदकं न हि ॥ मार्गे वा विषमे प्राप्ते रजसा चार्घमुत्क्षिपेत् ॥

जलाभावे महामार्गे बन्धने च गिरावपि ॥ उभयोः सन्ध्ययोः काले रजसाचार्घमुत्क्षिपेत् ॥..........

च.-तस्मादवैधकृतिघोरकुठारधारात्संरक्ष मूलमनिशं फलकामना चेत् ॥

मूले गते न हि फलं न दलं न पुष्पं शाखापि नैव न कदापि पुनः प्ररोहः ॥ ३ ॥

ब्रह्मा जृम्भायते यस्मिन्गायत्र्यार[अ]र्थसाधने ॥ का कथास्मद्विधादीनां क्षन्तव्यं वेदविद्द्विजैः ॥ ४ ॥

शिवरामप्रीतये चेदं गुह्यं गोप्यं प्रकाशितम् ॥ न देयं शठदम्भेभ्यो मानस्ते—द्विजाधवे [मा तथा द्विजबन्धवे] ॥ ५ ॥

आसीत्पुरा यतिवरः किल विश्वनाथो विष्ण्वाश्रमोपि समभूत्खलु तस्य शिष्यः ॥

मुख—गोपति— — — — रामचन्द्रः शिष्योपि तस्य च महादिमदेवनामा ॥ ६ ॥

शिष्यस्तदीयो गुरुपादसेवी रामाश्रमाख्यो रघुनाथभक्तः॥श्रीरामतुष्ट्यै व्यलिखत्सुभाष्यं सन्ध्याविवर्णं जगदर्थमेतत्॥७॥

संवेत्यंकाभूमुनिचन्द्रमिते वरेब्दे शाके च वेदमुनिबाणयुते च उर्व्यां (१५७४) ।

— — — स्यष्टमीगुरुकृष्णपक्षे रामाश्रमेण रचितं किल काशिपुर्य्याम् ॥ ८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यरामाश्रमविरचिते सन्ध्याविवर्णे [रणे] सम्पूर्णोयं ग्रन्थः ॥

३६३ संन्यासदीपिका-सच्चिदानन्दाश्रमः ।

आ.—श्रीगणेशाय नमः श्रीकृष्णाय नमः ॥ प्रणम्य परमात्मानं ब्रह्मादींस्वगुरूंस्तथा ॥ सर्वेषामुपकाराय कुर्वे संन्यासदीपिकाम् ॥

तत्रादौ आरुणेयोपनिषत् ॥ ॐ आरुणिः प्रजापतेर्लोकं जगाम तं गत्वोवाच केन भगवन्कर्माण्यशेषतो विसृजामीति ॥

तं होवाच प्रजापतिस्त्वव पुत्रान्भ्रातॄन्बन्ध्वादीन् शिखां यज्ञोपवीतं च यागं च सूत्रं च स्वाध्यायं च भूर्लोकं च भुवर्लोकं च स्वर्लोकं च महर्लोकं च जनलोकं च तपोलोकं च सत्यलोकं च तलातलपातालानि विसर्जयेत् । दण्डमाच्छादनं कौपीनं च परिग्रहेच्छेषं विसृजेच्छेषं विसृजेदिति ॥

च.—देहेऽस्थिमांसरुधिरेऽहमतिं त्यज त्वं जायास्नुषादिषु सदा ममतां विमुञ्च ॥
पश्याऽनिशं जगदिदं क्षणभङ्गनिष्ठं वैराग्यभावरसिको भव योगनिष्ठः ॥ १ ॥
इति । तथान्यत्र फलं चोक्तम् ।
स्नातं तेन समस्ततीर्थसलिलैर्दत्ता समस्ता मही यज्ञानां च हुतं सहस्रमखिला देवाश्च सन्तर्पिताः ॥
संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्यो ह्यसौ यस्य ब्रह्मविचारणे क्षणमपि स्थैर्य्यं मनः प्राप्नुयात् ॥ इति ॥
तथा । मृषाऽयं प्रपञ्चः सदानन्द शंवि[संवि]श्व[त्स्व]रूपे विभाति स्वगेहैकहेतु[तुः] ॥
इतीदं विनिश्चित्य तिष्ठत्यसङ्गः कृतार्थो भव त्वं हि वेदान्ततत्त्वम् ॥ १ ॥
कुलं पवित्रं जननी कृतार्था वसुन्धरानेन पवित्रिता वा ॥ अयेस्र [अजस्र] संवित्सुखसागरे सदा विलीयते यस्य मनःप्रचारः ॥२॥
आश्रमः सच्चिदानन्दोऽकरोत्संन्यासदीपिकाम् ॥ विशेषः [श्वेशः] प्रीयतां तेन सर्वसाक्षी महेश्वरः ॥ ३ ॥
इति श्रीपरमहंसपरिव्राजकार्य्यश्रीनृसिंहाश्रमशिष्यसच्चिदानन्दाश्रमविरचिता संन्यासदीपिका समाप्ता ॥

३६४ संस्कारकल्पद्रुमः-याज्ञिकजगन्नाथः ।

आ.—वन्दे श्रीशिवरूपिणं निजगुरुं लम्बोदरं सुन्दरीं [रं] सानन्दं सुखशङ्करं स्वपितरं ध्याये परां शारदाम् ॥
गृह्यं भाष्यसुवासुदेवसरणीं ज्ञात्वा तथा कारिकां सर्वांस्तानवलोकितान्विरचयेत्सं[सं]स्कारकल्पद्रुमम् ॥ १ ॥
कात्यायनं नमस्कृत्य सर्वकर्म्मप्रवर्तकम् ॥ कल्पद्रुमं करिष्येऽहं देवशिष्टेष्टतुष्टयोः [ये] ॥ २ ॥
काण्डत्रयेण संयुक्तं द्रुमं सर्वार्थसिद्धिदम् ॥ तस्य शाखासु कर्माणि प्रयोगाः पुष्पसञ्ज्ञिताः ॥ ३ ॥
यथाविधिफलास्तस्य वाञ्छितार्थप्रदायिकाः ॥ ब्राह्मणक्षत्रियविशां संस्कारकरणाय च ॥ ४ ॥
क्रियन्ते ह्युपकाराय स्मार्तानुष्ठानपद्धतिः ॥ सुखशङ्करशुक्लस्य सूनुना याज्ञिकेन वै ॥ ५ ॥
जगन्नाथेन रचिताः प्रयोगाश्च समन्त्रकाः ॥ माध्यन्दिनीयशाखेषु सन्ति पद्धतयः शतान् [तम्] ॥ ६ ॥
विना पुस्तकमार्गेण कर्म कर्तुं न शक्यते ॥ तदर्थं क्रियते यत्नं [त्नः] पाठबोधहिताय च ॥ ७ ॥
सुलभोपायसिद्ध्यर्थं वैदिकानां तदुच्यते ॥ पञ्चविंशतिसंस्कारैः संस्कृता ये द्विजातयः ॥ ८ ॥
ते पवित्राश्च योग्याः स्युः श्राद्धादिषु विशेषतः ॥ गणेशपूजनाद्यं च काण्डं प्रथमसञ्ज्ञकम् ॥ ९ ॥
संस्काराख्यं द्वितीयं च स्मार्ताधानं तृतीयकम् ॥ अथानुक्रमणीं वक्ष्ये कर्म्मज्ञानप्रबोधिनीम् ॥ १० ॥
आदौ गणपतिः पूज्यः कलशस्थापनं परम् ॥ पुण्याहवाचनं कार्य्यं मातॄणां पूजनं ततः ॥ ११ ॥
नान्दीश्राद्धं ततः कृत्वा स्थालीपाकविधिस्ततः ॥ रजोदर्शनशान्तिश्च ग्रहयज्ञपुरःसरम् ॥ १२ ॥
एतानि प्रथमे काण्डे कर्म्माणि रचितानि च ॥ द्वितीये रचिताः सम्यक्संस्काराः पञ्चविंशाति [तिः] ॥ १३ ॥
गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा ॥ जातकृत्यं षष्ठिपूजा नामकर्म च दोलनम् ॥ १४ ॥
तथा निष्क्रमणं चैव ततो भूम्युपवेशनम् ॥ अन्नप्राशनकं चैव वर्द्धापनमतः परम् ॥ १५ ॥

चौलाख्यं कर्णवेधं च अक्षरारम्भमेव च ॥ तथोपनयनं चैव वेदारम्भमतः परम् ॥ १६ ॥
केशान्तं च ततः कृत्वा समावर्तनमेव च ॥ वाग्दानं च विवाहं च एरि [ल] रायास्य (?) पूजनम् ॥ १७ ॥
चतुर्थीकरणं चैव देवकोत्थापनं तथा ॥ तथा वधूप्रवेशं च स्मार्ताधानमतः परम् ॥ १८ ॥
गृह्योक्ताश्चैव स्मृत्युक्ताः संस्काराः पञ्चविंशतिः ॥ काण्डे तृतीये रचितः स्मार्ताग्नेः सेवनाविधिः ॥ १९ ॥
आधानं मणिकाधानं महायज्ञाश्च नित्यशः ॥ सायंप्रातर्होमविधिः समारोपणमेव च ॥ २० ॥
पक्षादिः पितृयज्ञश्च उपाकर्मविधिस्तथा ॥ उत्सर्गकर्मणश्चैव कृषिकर्मविधिः स्मृतः ॥ २१ ॥
श्रावण्यां प्रौष्ठपद्यां च आश्वियुज्यां यथा तथा ॥ सीतायज्ञं चाग्रयणं मार्गशीर्ष्यामथाऽष्टकाः ॥ २२ ॥
औपासनेषु कर्माणि एतानि सन्ति नित्यशः ॥ संस्कारा नियता ह्येते ब्राह्मणस्य विशेषतः ॥ २३ ॥
अथ स्वस्तिवाचनम् । ....

च.–इति अग्निप्रक्षेपं कृत्वा ॐभूर्भुवःस्वःस्वाहा इत्याज्याहुति – – – – – – –

३६५ सहस्रचण्डीप्रयोगविधिः ।

आ.–तत्र कृतनित्यक्रियो यजमान आचम्य प्राणानायम्य श्रीगणेशं स्मृत्वा कुशजलाक्षतद्रव्याण्यादाय ॐतत्सत ज्येष्ठे मासे कृष्णपक्षे............

च.–तत आचार्यो देवीं विसृज्यर्त्विग्भिः सह सभार्यस्य सपुत्रस्य यजमानस्याभिषेकं कुर्यात् ॥ इति सहस्रचण्डीविधिः ॥

३६६ स्मार्तमार्तण्डः-मार्तण्डसोमयाजी ।

आ.–शिवात्मजं नमस्कृत्य स्वप्रकाशगुरूनिति[नपि] ॥ करोमि स्मार्तमार्तण्डं यथास्मृत्यनुसारतः ॥ १ ॥

च.–नावसथ्यात्परा सिद्धिर्नावसथ्यात्परा गतिः ॥ नावसथ्यात्परं स्थानं नावसथ्यात्परं व्रतम् ॥ १ ॥
इति मार्तण्डसोमयाजिकृतस्मार्तमार्तण्डप्रयोगः समाप्तः ॥

३६७ स्मार्तोल्लासः-शिवप्रसादः ।

आ.–विघ्नराजं नमस्कृत्य पितरं मातरं तथा ॥ त्रिपुरां शारदां नत्वा श्रीगुरोश्चरणद्वयम् ॥ १ ॥
यजुःशिवप्रसादेन सूत्रशाखार्थसंमतिम् ॥ आलोक्य क्रियते सम्यक्स्मार्त्तोल्लासो मयाधुना ॥ २ ॥

च.–इति श्रीशिवप्रसादकृतस्मार्त्तोल्लासग्रंथे गृह्यकर्मकृताकृतमहिमवर्णनं चाधिकार्यनधिकारिनिर्णयः ॥ १ ॥

३६८ स्मृतिकौस्तुभः अनन्तदेवः ।

आ.–दध्नो मंथनकाम्यया व्रजवधूं कुंभे तदा सिंचतीं सस्नेहं दधि देहि मह्यमधुनेत्युक्ते रमेशे यथा ॥
ओमित्युक्तपुरःसरं निजकरे तस्यार्पणं कुर्वतीं प्रत्युक्तिः कुरु कार्यमस्तु शमिति श्रीशस्य सा पातु नः ॥ १ ॥
यः पूर्वजन्मार्जितपुण्यभारैः संलब्धया दिव्यधियावनीशान् ॥ वशेऽकरोच्छीतकरोचवंशे स ज्ञानचंद्रो नृपतिर्बभूव ॥ २ ॥

कल्याणकर्ता सकलप्रजानां कल्याणचंद्रस्तत आविरासीत् ॥ कदापि दंड्या न यदीयराज्ये बभूवुरेवं क्व नु दंडवार्ता ॥ ३ ॥
प्रतापेन रुद्रो यमः स्वच्छकीर्त्या समाल्हादयन्यो जनांश्चंद्रतुल्यः ॥
सदा सर्वविद्वद्गुणज्ञो वदान्योऽभवच्चन्द्रवंशे ततो रुद्रचन्द्रः ॥ ४ ॥
श्रीरुद्रस्य षडाननः शशिधरस्यासीद्यथा वा बुधः श्रीमल्लक्ष्मणचंद्रनामकसुतोऽभूद्रलचंद्रस्य यः ॥
तेनानेकहिमाचलय[लस्थ]नृपतीन्दुष्टान्विजित्य स्वके राज्ये वृद्धिरकारि तुष्टिरमिता चाद्धीरि[चाधारि]विद्वद्हृदि ॥ ५ ॥
ततस्त्रिमल्लचंद्रोऽभूद्भूयो रूपोद्भटो भुवि ॥ काशीस्थविद्वदादिभ्यो[ऽधिकं] धन[म]दात्सदा ॥ ६ ॥
तस्मिन्कुलेऽजनि ततः किल नीलचंद्रो यस्तीर्थसज्जननिषेवणभूरिपुण्यैः ॥
तेजो दधार परमं पुरुषोत्तमाख्यं धत्ते यथेन्द्रदिशि नीलिगिरिः परं तत् ॥ ७ ॥
श्रीबाजबाहदुचरद्रनृपस्ततोऽभूचंद्रान्वयस्य भुवि भूरियशोकरोद्य[द्यः] ॥
सर्वावनिस्थविदुषामवनं प्रकुर्वन्योस्मिन्कलावपि ररक्ष समस्तशास्त्रम् ॥ ८ ॥
यदीयप्रतापोदयाद्दूरदेशे स्वदुर्गांतरस्यूष्मणा त्यक्तदुर्गाः ॥ परांभोधिपल्लीतटे संवसंतो वसंतोद्भवं नैव संतोषमा[पुः] ॥९॥
ब्रह्मण्यदेवस्य हरेरिवास्य गुणैरनंतैः श्रुतिषु स्पृशद्भिः ॥ आकृष्य नीताः परभूपकन्याः कन्या बभूवुः स्वकुलोद्भवानाम् ॥१०॥
सर्वाशापरिपूरणक्षमयशःसौधप्रवाहेण यो न्यक्कारं प्रतनोति सौधवपुषो नामार्थवत्तां नयत् ॥
कस्तस्मादितरः कलौ किल सतां सेव्यः प्रभुर्यो भवेत्क्रीडायामपि दानमानविनयैः संतोषदातुः सताम् ॥ ११ ॥
येनार्चिता बुधवराः शिबिराणि यांतो यांति स्फुटं पथि नृपा इति भांति लोके ॥
नित्यं भटैः सतुरगैः परिपाल्यमाना मानार्थदं तदितरं न कलौ विलोके ॥ १२ ॥
आसीद्गोदावरीतीरे वेदवेदिसमन्वितः ॥ श्रीकृष्णभक्तिमानेक एकनाथाभिधो द्विजः ॥ १३ ॥
तत्सुतस्तद्गुणैर्युक्तः सर्वशास्त्रार्थतत्त्ववित् ॥ आपदेवोऽभवद्देवान्प्राप यः सकलान्मनून् ॥ १४ ॥
मीमांसानयकोविदो मधुरिपोः सेवासु नित्योद्यतो विद्यादानसुभावितोत्तमयशा आसीत्तदीयात्मजः ॥
यस्यानंतगुणैरनंत इति सन्नामार्थवत्तां गतं येनावादि च वादिनां श्रुतिशिरःसिद्धांततत्त्वं मुदे ॥ १५ ॥
न्यायप्रकाशकर्त्ता निरवधिविद्यामृतप्रदः सततम् ॥ मीमांसाद्वयनयवित्तनयस्तस्यापदेवोऽभूत् ॥ १६ ॥
तस्यात्मजं वैदिकशास्त्रविज्ञं संतोऽसकृत्प्राहुरनंतदेवम् ॥ बाजाह्वराज्ञो वचसा विधेयं निबंधसारोद्धरणं त्वयेति ॥ १७ ॥
अनंतदेवेन तदाज्ञयाथो मुदे हरेः पूर्वनिबंधरूपम् ॥ क्षीरांबुधिं बुद्धिगुणैर्मथित्वा प्रकाश्यतेऽयं स्मृतिकौस्तुभस्तु ॥१८॥
भवानीशंकरौ नत्वा ससुतौ प्रार्थयाम्यदः ॥ धृतः श्रीहरिणा धार्यो राज्ञोयं स्याच्छुभप्रदः ॥ १९ ॥
तिथिदीधितिरुक्ता प्राग्वक्ष्यामोऽद्याब्ददीधितिम् ॥ अष्टभेदां वदाम्येनां माधवोक्त्यनुसारतः ॥ २० ॥
चांद्रः सौरः सावनोथ बार्हस्पत्यो न[भ]भूस्तथा ॥ वत्सरः पंचधा प्रोक्तश्चांद्रोत्र बाहुकार्यभाक् ॥ २१ ॥
वक्ष्यामः पूर्वमेवातश्चांद्रवत्सरदीधितिम् ॥ मासानां च तिथीनां च यानि कर्माणि संति हि ॥ २२ ॥
कालं तेषां वदामोत्र प्रयोगं मानपूर्वकम् ॥ संक्रांतीनां सकार्याणां निर्णयं सौरदीधितौ ॥ २३ ॥
वक्ष्यामो वासराणां च निर्णयं सौरदीधितौ ॥
गुरौ सिंहादिराशिस्थे कार्याकार्यविनिर्णयम् ॥ तस्य शुक्रस्य चास्तादि बार्हस्पत्याब्ददीधितौ ॥ २४ ॥
अथ भानां सयोगानां करणानां च निर्णयम् ॥ कार्याकार्याणि चैतेषां वक्ष्ये नाक्षत्रदीधितौ ॥ २५ ॥

ततः स्मृत्यर्थसारादिनिबंधोक्तं कलौ युगे ॥ यत्कार्यं यदकार्यं च वक्ष्यामोत्रैव दीधितौ ॥ २६ ॥
निर्णीतास्तिथयः प्राग्याः शुक्लाः कृष्णाश्च तद्गुणौ ॥ क्रमात्पक्षौ शुक्लकृष्णौ मुख्यौ माराष[मासश्च]चंद्रभूः ॥ २७ ॥
मासा द्वादश चंद्रा [द्रौ] यास्त्वादृशाः साधिकाः क्वचित् ॥ चांद्रसांवत्सरो ज्ञेयस्तदारंभोऽथ कथ्यते ॥ २८ ॥

३६९ स्मृतिसारः-याज्ञिकदेवः ।

आ.—यज्ञोपवीतं कुर्वीत सूत्रेण नवतन्तुना ॥ देवतास्तत्र वक्ष्यामि वानुपूर्वेण याः स्मृताः ॥ १ ॥.........
च.—अनूढायां तु कन्यायां सद्यः शौचं विधीयते ॥ स्वगोत्रो ह्यन्यगोत्रो वा तस्या ह्यग्निं ददाति यः ॥ २९५ ॥
इति श्रीयाज्ञिकदेवविरचितः स्मृतिसारः समाप्तः ॥

३७० स्मृतिसारः-सरोजसुन्दरः ।

आ.—शिवाय नो दीनदयापरायणे सति प्रधानेशितयावृतक्षितिः ॥
शिवार्चितोग्र्यप्रकटीकृतो वृतो दयांबुधिः सर्वजनिर्भवत्वजः ॥ १ ॥
सरोजसुंदरं नाम स्मृतिसारमिमं बुधाः ॥ सेवयंतु सदा शांताः सर्वसंदेहशांतये ॥ २ ॥
क्षौरं तैलं जलं चोष्णमामिषं निशि भोजनम् ॥ रतिस्नानं च मध्याह्ने रवौ सप्त विवर्जयेत् ॥ ३ ॥
च.—इति नानाशास्त्रपुराणदृष्टसंग्रहः समाप्तः ॥

३७१ स्मृतिसारसंग्रहः-विद्यानन्दनाथः ।

आ.—युगमुखासनशंकरतेजसे विमुखमिश्रघनक्षयहेतवे ।.........
च.—यावन्मूढा न पश्यंति स्वं चिदात्मानमात्मना ॥ चिदानन्दमये देवि क्रियताम् — — — — —
इति श्रीविद्यानन्दनाथेन कृतः स्मृतिसारसंग्रहः समाप्तः ॥

३७२ स्मृतिसारसमुच्चयः-धर्मशास्त्ररुचिः ।

आ.—प्रातरुत्थाय कर्तव्यं गृहकृत्यं दिने दिने ॥ तत्सर्वं संप्रवक्ष्यामि द्विजानां बुद्धिसिद्धये ॥ १ ॥
च.—वृद्धिश्राद्धं प्रकुर्वीत आश्रमग्रहणे तथा ॥
इति धर्म्मशास्त्ररुचिकृत्रे स्मृतिसारसमुच्चयः संपूर्णः ॥

३७३ स्मृत्यर्थसारः-श्रीधरार्यः ।

आ.—व्रात्यानां याजनं कृत्वा परेषामंत्यकर्म च ॥ अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति ॥ १ ॥
कामधेनौ प्रदीप्यौ[?] च कल्पवृक्षकृतादिषु ॥ शंभुद्रविड्केदारलोल्लटाद्यैश्च भाषितम् ॥ २ ॥
मन्वत्रियाज्ञवल्क्यार्दौ व्याख्यातृप्रतिपादितम् ॥ स्मृत्यर्थसारं वक्ष्यामि सुखानुष्ठानसिद्धये ॥ ३ ॥

च.—सर्वप्रायश्चित्तादीनीत्यादि ॥ इति प्रायश्चित्ताध्यायानुक्रमणिका ॥
इदं स्मृत्यर्थसारं तु मूलास्मरणहेतुना ॥ नावमान्यं सतां मूलं पश्यंत्येव बहुश्रुताः ॥
इदं स्मृत्यर्थसाराख्यं नागविश्वार्यसूनुना ॥ यज्वना श्रीधरार्येण श्रुतिस्मृतिविदा कृतम् ॥ संवत् १९१४ ॥

३७४ हारीतस्मृतिः ।

आ.—यस्य द्विरदवक्त्राद्याः पारिषद्याः परःशतम् ॥ विघ्नं निघ्नंति भजतां विश्वक्सेनं तमाश्रये ॥ १ ॥
च.—परमं वैष्णवं शास्त्रं एतद्वैष्णवमुत्तमम् ॥ ज्ञात्वैव परमैकांते पूजयेद्विष्णुमीश्वरम् ॥
इति श्रीहारीतस्मृतौ विशिष्टपरमधर्मशास्त्रे वृत्त्यधिकारो नाम अष्टमोऽध्यायः समाप्तः ॥

३७५ होमपद्धतिः- माधवः ।

आ.—यामर्चन्ति निशा [न्त्यनिशं] सुरासुरगणा ध्यायन्ति यां योगिनो व्यक्ताव्यक्तगिरः स्तुवन्ति सततं यां केशवेशादयः ॥
यां ज्ञात्वा मुनयो व्रजन्ति परमं स्थानं रमासेवितं तां विद्वज्जनवन्दितां भगवतीं भक्त्याहमीशां भजे ॥ १ ॥
श्रीरूपनारायणनारदादिभिः कृतं विचित्रं बहुशास्त्रविस्तरम् ॥
विलोक्य सम्यक्शुभदं सुशान्तिकं व्यधात्समासादिह माधवो बुधः ॥ २ ॥
च.—आगमनाय च ॥ इति मखतिलके होमपद्धतिः समाप्ता ॥

३७६ क्षमाषोडशी ।

आ.—श्रीरंगेश यया करोषि जगतां सृष्टिप्रतिष्ठाक्षयानत्रामुत्र च भोगमक्षयसुखं मोक्षं च तत्तनृणाम् ॥
त्वत्स्वातंत्र्यमपोह्य कल्पितजगत्क्षेमातिहृद्या स्वतः क्षान्तिस्ते करुणासखी विजयतां क्षेमाय सर्वात्मनाम् ॥ १ ॥
च.—त्वत्क्षांत्याः खलु लक्ष्यतामनुगुणामानीयतां तत्त्वया ॥ १६ ॥ इति क्षमाषोडशी समाप्ता ॥

३७७ गङ्गाशतकम्-नारायणाचार्यः ।

आ.—गङ्गेनङ्गारिसङ्गे शमितदुरितसत्तुङ्गभङ्गे ममाङ्गे स्वर्गे वर्गे सुराणां यदसुलभशिवं तत्तरङ्गैरपाङ्गैः ॥
कुर्वाणाया भवेस्मिंस्तव जननि सदा वारिपुरैरदूरं तीरं संसेवमानो न समवगणये नाकहेवाकमन्तः ॥ १ ॥
च.—गङ्गे विधातुं तव वैभवादहं श्लोकान्सहस्रानपि युक्तियुक्तान् ॥
शक्तोपि तेऽन्तो न गुणस्य विद्यते मिताप्यतो युक्ततमैव ते स्तुतिः ॥ १०१ ॥
द्वि [द्वी] पाद्रिसमार्य(?) पदारविन्दयोर्लोलम्बनारायणगीरसौ सताम् ॥
अलङ्कृतिव्याकृतियुक्तिदुर्गता मुदेस्तु सा पञ्जरकीरगीरिव ॥ १०२ ॥
गङ्गाशतकं कतमं मानससरसः सुपठत हे सुधियः ॥ कवितावनितापदिकं कमलारमणसुवशीकृतिसुतिलकम् ॥ १०३ ॥
॥ इति श्रीमदात्रेयनारायणाचार्यविरचितं श्रीगङ्गाशतकं समाप्तम् ॥

३७८ गोकुलेशलीलासुधासिन्धुः ।

आ.—गोकुलेशं प्रपद्येऽहं भगवन्तं कृपार्णवम् ॥ आविर्भूय कलौ घोरे यो विश्वमकृतार्थयत् ॥ १ ॥

च.—वक्ष्यमाणं निपिबत रसिकाः श्रोत्रपाणिभिः ॥..........

इति श्रीमद्गोकुलेशलीलासुधासिंधौ श्रीमुखश्रीमदुक्तिमुक्तामये चतुर्दशकल्लोले तरंगार्थनिरूपकस्त्रिंशस्तरंगः ॥

३७९ गौरगदाधराष्टकम् उत्कण्ठमणिमालिका च। गौर० अच्युतानन्दः ।

आ.—क्षितौ लुठद्गौरकलेवराभ्यां सदा महाप्रेमविलासकाभ्याम् ॥ समुद्रतीरे तटनागराभ्यां नमोस्तु मे गौरगदाधराभ्याम्॥१॥

च.—इति श्रीगौरगदाधरचरणकमलमधुकरायमाणश्रीमदच्युतानन्दगोस्वामिना विरचितं प्रभोरष्टकं समाप्तम् ॥

आ.—दुष्पारैः कलिलीकृतं कलिमलैः कारुण्यवन्योच्छलत् ॥..........

च.—इत्युत्कंठमणिमालिका समाप्ता ॥

३८० गौराङ्गस्तवकल्पवृक्षः-रघुनाथदासगोस्वामी ।

आ.—गतिं दृष्ट्वा यस्य प्रमद इव गजवर्य्येऽखिलजना मुखं च श्रीचन्द्रोपरि दधति थूत्कारनिवहम् ॥
स्वकान्त्या यः स्वर्णाचलमधरयेच्छीधु च वचस्तरङ्गैर्गौराङ्गो हृदय उदयन्मां मदयति ॥ १ ॥

च.—रलं सिञ्चेद्विन्देत्सरसगुरुतल्लोकनफलम् ॥ १२ ॥

इति श्रीरघुनाथदासगोस्वामिवि० गौरांगस्तवकल्पवृक्षः समाप्तः ॥

३८१ चतुःश्लोकीव्याख्या-विठलदीक्षितः ।

आ.—ननु पुरुषार्थाश्चत्वारस्तत्र त्रिवर्गविघातं भगवानेव करोति मोक्षस्तु भक्तानामेव नापेक्षित इति भक्तिमार्गे न कोपि पुरुषार्थः सिद्ध्यतीत्याशंक्य भक्तिमार्गीयं तच्चतुष्टयं भिन्नमेवेत्याह चतुर्भिः ....

च.—इयमेव मुख्या आशीरिति सर्वान्ते क्रियापदप्रयोग इति भावः ॥

इति श्रीमद्विठ्ठलदीक्षितविरचिता वृत्रचतुःश्लोकीव्याख्या समाप्ता ॥

३८२ नारायणसारसङ्ग्रहः ।

आ.—शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १ ॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परःशतम् ॥ विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥ २ ॥
बकुलाभरणं वन्दे जगदाभरणं मुनिम् ॥ यः श्रुतेरुत्तरं भागं चक्रे द्राविडभाषया ॥ ३ ॥
श्रीरङ्गमङ्गलमहोत्सववर्द्धनाय वेदान्तपान्थपरमार्थसमर्थनाय ॥
कैङ्कर्य्यलक्षणविलक्षणमोक्षभाजे[ग्यो]रामानुजो विजयते यतिराजराजः ॥ ४ ॥
वेदे रामायणे चैव पुराणे भारतेऽपि च ॥ आदौ मध्ये तथा चान्ते हरिः सर्वत्र गीयते ॥ ५ ॥

श्रुतिः स्मृतीतिहासेभ्यः पुराणं धर्मसंहिता ॥ सर्वतः सारमादद्यात्षट्पदः कुसुमाद्यथा ॥ ६ ॥
वैष्णवं नारदीयं च तथा भागवतं शुभम् ॥ गारुडं च तथा पाद्मं वाराहं शुभदर्शने ॥ ७ ॥
ब्रह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयं तथैव च ॥ भविष्यं वामनं ब्राह्मं राजसानि निबोध मे ॥ ८ ॥..........
च.—यः पठेच्छृणुयाद्भक्त्या सन्दर्भमिद[म]मुत्तमम् ॥ सर्वार्थसिद्धिं सम्प्राप्य लभेतान्ते परं पदम् ॥ ५४४ ॥
इति श्रीसारसङ्ग्रहे भगवद्भागवताराधनमाहात्म्यकथनं नाम — — — — । ग्रन्थः सम्पूर्णः ॥

३८३ पञ्चतत्त्वनिरूपणम्-हरिकृष्णः ।

आ.—राधामाधवसेवाढ्यं राधामाधवशंसकम् ॥ श्रीगुरुं तमहं वन्दे कृपालुं करुणार्णवम् ॥ १ ॥
च.—श्रीरूपग्रंथतः सम्यक्पञ्चतत्त्वनिरूपणम् ॥ संगृह्य हरिकृष्णेन लिखितं स्वात्मबोधकम् ॥ इति पञ्चतत्त्वाख्यं स. — —

३८४ प्रमेयरत्नावली टिप्पणीसमेता।-मू० टि० विद्याभूषणः ।

मू. आ.—जयति श्रीगोविन्दो गोपीनाथः समदनगोपालः ॥ वक्ष्यामि यस्य कृपया प्रमेयरत्नावलीं सूक्ष्माम् ॥ १ ॥
टि. आ.—गौडोदयमपयातस्तमः समस्तं निहन्ति यो युगपत् ॥ ज्योतिश्चयोतिशीतः पीतस्तमुपास्महे कृतांजलयः ॥ १ ॥
विद्याभूषणपरनाम्ना बलदेवेन श्रीगोविन्दैकान्तिना ब्रह्मसूत्रेषु गोविंदभाष्याभिधानं व्याख्यानं विरचितम् । अथ कैश्चिच्छिष्यैर्भाष्यप्रमेयाणि परिपृष्टः स तानि संक्षेपाद्वक्ष्यन्निर्विघ्नायैतत्पूर्त्तये मंगलमाचरति जयतीति ....
मू. च.—नित्यं निवसतु हृदये चैतन्यात्मा मुरारिर्नः ॥ निरवद्यो निर्वृतिमान्गजपतिरनुकंपया यस्य ॥ ३ ॥
इति प्रमेयरत्नावलीपू — — — — — — — — —
टि. च.—गजपतिर्गोपालदासाख्यः करी — — — — — — — —
वेदान्तवागीशकृतप्रकाशा प्रमेयरत्नावलिकांतिमाला ॥ गोविन्दपादाम्बुजभक्तिभाजां भूयात्सतां लोचनरोचनीयम् ॥ ३ ॥
इति प्रमेयरत्नावल्यां कांतिमाला टिप्पणी समाप्ता ॥

३८५ भक्तिभास्करः-तर्कतिलकभट्टाचार्यः ।

आ.—नित्यं मत्पतिचारुका— — — — —नरं संचारयंत्याहृता मद्ध्यानामृतनिर्मले स्वहृदये मत्पादपद्मद्वयम् ॥
— ॥ १ ॥
च.—रक्षणीयमिदं तत्त्वं लक्षणीयं प्रविश्य च ॥ तक्षणीयं न तर्कज्ञैः पक्षणीयं विचक्षणैः ॥ ५२ ॥
स्वल्पे मनसि न माति प्रसृता उक्तिर्महामनसः ॥ किं माति कुंदकुसुमे मधुपालिः शतदलादुदिता ॥ ५३ ॥
श्रीमज्ज्ञानतनूजनेरजनि यः श्रीद्वारकादासतो देवी देवमतीव यस्य जननी रामेश्वरस्यात्मजा ॥
श्रीदक्षान्वयजः स सज्जनमुदे नत्वाग्रजं मोहनं भट्टाचार्यपदस्थतर्कतिलकोऽकार्षीद्यथोक्ताभिधम् ॥ ५४ ॥
इति श्रीतर्कतिलकभट्टाचार्य्यविरचितं भक्तिभास्कराभिधानं प्रकरणं समाप्तम् ॥

३८६ भक्तिभूषणम् ।

आ.—रामचन्द्रं प्रणम्यादौ शठकोपं मुनीश्वरम् ॥ वैष्णवधर्मज्ञानार्थं करोमि भक्तिभूषणम् ॥ १ ॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परःशतम् ॥ विघ्नान्निघ्नन्ति भजतां विष्वक्सेनं तमाश्रये ॥ २ ॥

यतीश्वरं प्रणम्याहं वेदान्तार्थमहागुरुम् ॥ करोमि बालबोधार्थं भक्तानां भक्तिभूषणम् ॥ ३ ॥
दत्तात्रेयः कृतयुगे त्रेतायां राघवोऽभवत् ॥ द्वापरे वासुदेवश्च कलौ देवपराङ्कुशः ॥ ४ ॥
तत्र वैश्यकुले कश्चिद्विष्णोरंशांशसम्भवः ॥ शठकोप इति ख्यातो महायोगी भविष्यति ॥ ५ ॥
तत्त्वज्ञघनपूर्णश्च तिन्तिणीमूलसंश्रितः ॥ बाल्यात्तु षोडशाब्दाच्च मूकभावं गमिष्यति ॥ ६ ॥
नियोगेन महाविष्णोर्वेदवेदान्तसंहिताम् ॥ करिष्यति सहस्रेण गाथा द्राविडभाषया ॥ ७ ॥
शाखासहस्रभेदानां गाथारूपा विधास्यति ॥ द्राविडी ब्रह्मविद्या सा तस्मादुक्तं महामुने ॥ ८ ॥
द्राविडैश्च प्रबन्धैश्च तस्मात्संस्कृतबद्धतः ॥ संस्कृतस्य श्रियो यद्वि द्राविडस्य श्रियस्तथा ॥ ९ ॥..................

च.—लक्ष्मीहीनं ततः पुण्ड्रं निष्फलं चैव जायते ॥ श्रिया हीनं न कुर्वीत वैष्णवो विष्णुवल्लभः ॥
सर्वसौख्यदा रजनी सर्वपापविनाशिनी ॥ हरिद्रावेति वैसीदा हरिद्रेति प्रकीर्तिता ॥
इति श्रीभक्तिभूषणे वैष्णवशास्त्रे आह्निककर्मश्रीधारणविधिवर्णनो नाम सप्तदशोऽध्यायः॥ समाप्तोयं ग्रन्थः ॥

३८७ भक्तिमार्गोपदेशः-श्रीवल्लभनन्दनचरणदासः ।

आ.—यथाधिकारं शरणभक्तिमार्गोपदेशतः ॥ य उद्दधार सर्वांस्तं वन्दे श्रीवल्लभं प्रभुम् ॥ १ ॥
ननु सर्वपदं त्रैवर्णिकभिन्नपरत्वेनात्र व्याख्यातव्यम् । यतः ।
सर्वे शाक्ता द्विजा जात्या न शैवा न च वैष्णवाः ॥ यस्मादुपासते नित्यं गायत्रीं वेदमातरम् ॥
इति विश्वामित्रवाक्ये सर्वेषां द्विजानां जात्या शाक्तत्वकथनात्रैवर्णिकानां शाक्तत्वं साहजिकं शैववैष्णवत्वादिकं तु पारिभाषिकत्वात्कृत्रिमं गायत्र्युपदेशापेक्षयाऽन्यस्य जघन्यत्वात्। किंच द्विजातीनां कर्मार्थत्वात्कर्म्मणां च श्रौतस्मार्त्तभेदेन द्वैविध्यादन्येषां चेतो जघन्यत्वाच्छ्रौतस्मार्तकर्माधिकारस्य गायत्र्युपदेशादेव सिद्धावुपदेशान्तरस्यानर्थकत्वात्— — —

च.—अथैतत्परमं गुह्यमित्यनेन ततः पूर्वोक्तस्य व्यवच्छेदात् आत्मनिवेदनवत्पुनरत्रासंग्रहाच्च । एतेनैवान्येपि भक्तिपंथानो व्याख्याता ज्ञेयाः। शंकापंकान्तरपरिहारश्च साक्षाद्भगवदुक्तिसलिलधाराभिरेव विभाव्य साधनीय इत्यलं विस्तरेण ॥
इति श्रीवल्लभाचार्य्यदासदासेन निर्मितः ॥ उपदेशादिविषयो वादोयं प्राप पूर्णताम् ॥
इति श्रीवल्लभनंदनचरणदासेन कृतो भक्तिमार्गीयोपदेशादिशंकानिरासः समाप्तः ॥

३८८ भक्तिरत्नम्-कमलाकरः ।

आ.—शुण्डादण्डनिरस्तविघ्ननिवहो मूर्द्धानमांदोलयन् — — — — — — — — — —
विधातुराद्या किल या सृष्टिर्भागीरथी सा वरदास्तु मे सदा ॥ ५ ॥
तस्यास्तटे पंचनदेधिकाशि विश्वोपकाराय धृतावतारः॥ श्रीमाधवो बिंदुपरः पृथिव्यां जागर्ति लोकत्रयगीतकीर्तिः ॥६॥
कलौ निमग्नान्निरये जनौघान्स्वदर्शनेनैव समुज्जिहीर्षुः॥ श्रीबिंदुपूर्वः कृपयाग्निबिंदुः श्रीमाधवाख्यो हरिराविरासीत् ॥७॥
श्रीविष्णोर्भक्तिरत्नं यद्विदुषां प्रीतिवर्द्धनम् ॥ क्रियते तेन विष्णुर्मे प्रीयतां बिंदुमाधवः ॥ ८ ॥

च.—रामकृष्णतनूजेन कमलाकरशर्मणा ॥ भक्तिरत्नं कृतं तेन प्रीयतां बिंदुमाधवः ॥ इति भक्तिरत्नं समाप्तम्

३८९ भक्तिवर्द्धिनीटीका । मू०-वल्लभाचार्यः । टी०-कल्याणरायः ।

आ.—वामे करे गिरिं स्त्रीषु मुदमिन्द्रे च साध्वसम् ॥ धारयन्तमहं वन्दे चित्रं गोपेषु गोप्रियम् ॥ १ ॥
यदंगीकृ[कार]तो भक्त्या स्वानन्दं नन्दनन्दनः ॥ ददाति तान्प्रभून्वन्दे सर्वकामार्थसिद्धये ॥ २ ॥
श्रीकृष्णभक्तिस्पृष्टांतःकरणानां स्वकीयानां तत्फलविलंबासहिष्णुः श्रीवल्लभाचार्य एकादशेन्द्रियशोधिका भक्तिरित्येकादशभिः श्लोकैर्भक्तिप्रवृत्त्युपायनिरूपणं प्रतिजानीते यथेति ·········

च.—श्रीमत्कल्याणरायेण श्रीगोविन्दात्मजेन वै ॥ गुरून्नत्वा यथाबुद्धि विवृता भक्तिवर्द्धिनी ॥ १ ॥
इति श्रीविठ्ठलेश्वरचरणैकतानश्रीकल्याणरायविरचिता भक्तिवर्द्धिनीविवृतिः समाप्ता ॥

३९० भक्तिवर्द्धिनीटीका-वल्लभः ।

आ.—नत्वा स्वाचार्य्यचरणाब्जं कृपामधुसुपूरितम् ॥ तत्परागारक्तबुद्ध्या व्याख्यास्ये भक्तिवर्द्धिनीम् ॥ १ ॥
तद्बुद्धिदृढतासिद्धौ पितृपादरजांस्यहम् ॥ ह्याचार्यप्रवृत्तोस्मि नान्यथेति हि निश्चितम् ॥ २ ॥
अथाचार्यचरणाः स्वमार्गांगीकृतानां स्वमार्गेपि भक्तिवृद्धिप्रकारमजानतां कृपया तज्ज्ञानाय तद्वृद्धिप्रकारं प्रतिजानीते यथेति । यथा येन साधनेन भक्तिः स्वप्रवर्त्तितमार्गरूपा प्रकर्षेण वृद्धिं प्राप्नोतु तथा तत्प्रकारक उपायः साधनं निरूप्यत उच्यत इत्यर्थः······················

च.—अत्यन्तं निश्चला रतिः रसभावयुक्तः स्नेहो भवतीत्यर्थः ॥
पितृपादनखालोकप्रकाशितधिया मया ॥ स्वाचार्य्यचरणाख्येन विवृता भक्तिवर्द्धिनी ॥ १ ॥
कृपया पितृपादाब्जैर्दत्ता मे यादृशी मतिः ॥ तन्मत्या विवृतं भक्तिवृद्धिशास्त्रं सुदुर्लभम् ॥ २ ॥
यद्यपीश्वरवाक्यानि दुर्बोधानि सदा स्वतः ॥ तत्कृपातो यथाबुद्धि विवृतानि न चान्यथा ॥ ३ ॥
बुद्धिदोषेण यद्यत्र व्याकृतौ चेद्विपर्ययः ॥ क्षमंत्वाचार्य्यचरणाः स्वकीयेषु दयालवः ॥ ४ ॥
इति श्रीपितृचरणैकतानश्रीवल्लभविरचिता भक्तिवर्द्धिनीविवृतिः समाप्ता ॥

३९१ भगवदर्चनविधिः-रघुनाथः ।

आ.—शुचिः शुचिपदं स्मरन्नहरहः शुचिं तर्पयञ्शुचामपहतोहतः प्रयतचेत्यता [तसा] चिन्तितः ॥
गिरामधिपतेर्गुरुर्गुणगणैरगण्यः प्रभुः प्रभूतसुकृतान्म—भव— —त्प्रभूतोदयः ॥ १ ॥
स्मृत्वा नाथपदाम्भोजं कृत्वा पूर्वाङ्गसङ्ग्रहम् ॥ विदुषा रघुनाथेन पूजाविधिरथोच्यते ॥ २ ॥
अथेत्थं विहितप्रातःकृत्यादितर्पणांततद्विधिः स्वकल्पकल्पिता — — — — — — — —

च.—भगवदर्चनविधिसमूहसत्सङ्ग्रहः ॥

३९२ भगवदाराधनविधिः-नारायणमुनिः ।

आ.—प्रातः समुत्थाय हस्तौ पादौ प्रक्षाल्य प्राङ्मुखः स्थित्वा हरिं हरिं — — — — — — — —

च.—निवेद्य शेषं भागवतैः सह भुञ्जीत ॥
इति श्रीमन्नारायणमुनिकृतो भगवदाराधनविधिः ॥

३९३ भगवद्भक्तिमाहात्म्यम्-चन्द्रदत्तः ।

आ.—आकुञ्चितोरुबाहुभ्यां रिङ्गमाणं व्रजाङ्गणे ॥ श्रीनन्दनन्दनं वन्दे व्रजनाथं रमापतिम् ॥ १ ॥
विनायकं नमस्कृत्य शारदां सर्वकामदाम् ॥ भक्तिमाहात्म्यचरितं कुर्वेऽहं मैथिलो द्विजः ॥ २ ॥
यथा मे मतिरुत्पन्ना भक्तिमाहात्म्यवर्णने ॥ यथा मेऽनुभवो जातो वक्ष्याम्यग्रे सविस्तरम् ॥ ३ ॥
च.—दशसहस्रमिताः श्लोका उक्ताः सप्तशताधिकाः ॥ ऊनपंचाशदधिकं सर्गाणां च शतं शुभम् ॥ ३५ ॥
इति श्रीभगवद्भक्तिमाहात्म्यं चन्द्रदत्तकृतं सम्पूर्णम् ॥

३९४ भगवद्भक्तिरत्नावली सटीका-विष्णुपुरी ।

मू. आ.—जयति जननिवासो देवकीजन्मवादो — — — — — — — — — — —
टी. आ.—ये मुक्तावपि निस्पृहाः प्रतिपदप्रोन्मीलदानन्ददां यामास्थाय समस्तमस्तकमणिं कुर्वन्ति यं स्वे वशे ॥
तान्भक्तानपि तां च भक्तिमपि तं भक्तप्रियं श्रीहरिं वंदे संततमर्थयेऽनुदिवसं नित्यं शरण्यं भजे ॥ १ ॥
मंगलमाचरति भागवतपद्येनैव जयतीति शुकवाक्येन ....
मू. च.—तत्किं सुन्दरमादरेण रसिकैर्नापीयते तन्मधु ॥ १३ ॥ ....
इति श्रीमत्पुरुषोत्तमचरणारविन्दकृपामकरंदबिंदुप्रोन्मीलितविवेकतैरभुक्त [धैर्यभक्त]परमहंसविष्णुपुरीग्रथितायां श्रीभागवतामृताब्धिलब्धभगवद्भक्तिरत्नावल्यां सुकांतिमाला संपूर्णा ॥
टी. च.—महायज्ञशरप्राणशशांकगुणिते शके ॥ फाल्गुने शुक्लपक्षस्य द्वितीयायां सुमंगले ॥ २ ॥
वाराणस्यां महेशस्य सान्निध्ये हरिमन्दिरे ॥ भक्तिरत्नावली सिद्धा सहिता कांतिमालया ॥ ३ ॥
इति भक्तिरत्नावल्याष्टीका सुकांतिमाला समाप्ता ॥

३९५ भगवद्भक्तिविवेकः-अनन्तदेवः ।

आ.—ततः सिद्धा भगवति भक्तिं कुर्म इति प्रतिज्ञा । सा च भक्तिर्द्विधा साधनभक्तिः फलभक्तिश्च । तत्र फलभक्तिरग्रे वक्ष्यते
च.—तस्मात्सर्वेषां परमेश्वरनामोच्चारणेन सर्वपापक्षय इति सिद्धम् ॥
भगवद्भक्तिविवेकः सोयमनेकप्रकारकोऽभिहितः ॥ तुष्यतु यदुपतिरमुना कथमपि यमुनातटस्थायी ॥ १ ॥
इति श्रीमदापदेवसूनुना अनंतदेवेन कृते भगवद्भक्तिविवेके हरिभक्तिफलनिरूपणं नाम द्वितीयं प्रकरणम् ॥

३९६ यमुनाष्टकं सविवृतिकं सटिप्पणं च ।

मू. आ.—नमामि यमुनामहं सकलसिद्धिहेतुं मुदा मुरारिपदपंकजस्फुरदमन्दरेणूत्कटाम् ॥
तटस्थनवकाननप्रकटमोदपुष्पाम्बुना सुरासुरसुपूजितस्मरपितुः श्रियं बिभ्रतीम् ॥ १ ॥
विवृ. आ.—विश्वोद्धारार्थमेवाविर्भूता वृन्दावनप्रियाः ॥ कृपयन्तु सदा तातचरणा मयि विठ्ठले ॥ १ ॥
विविधलीलोपयोगिनीं कालिन्दीं स्तोतुकामाः श्रीगोकुलेशे यथा जीवैर्नमनातिरिक्तं न कर्तुं शक्यं तथा कालिन्द्यामपीत्याशयेनादौ नमनमेवाहुः नमामि यमुनामहमिति ....

टी. आ.—अथ श्रीमत्प्रभुचरणा यमुनाष्टकविवृतिं विरचयन्तः प्रथममाचार्य्यस्वरूपमेतत्सजातीयधर्मवत्त्वेन निरूपयंतः स्वस्मिन्विवृतिकृतिशक्तिसिद्ध्ये तत्कृपां प्रार्थयन्ति विश्वोद्धारार्थमिति ....

विवृ. च.—स्वस्य तु साक्षत्ताद्दृशस्वरूपज्ञानात्कथनमिति नानुपपत्तिः काचित् ॥

इति श्रीगोपीजनवल्लभचरणैकतानवल्लभात्मजश्रीविठ्ठलविरचिता यमुनाष्टकविवृतिः समाप्ता ॥

टी. च.—प्रदिशन्तु निजाचार्य्याः स्वदासे निजवंशगे ॥ प्रयच्छन्तु स्वतोभावं यमुनासहिते हरौ ॥

इति श्री व. चा. चरणतामरसपरागाभिलाषिहरिदासविरचितं यमुनाष्टकविवृतिटिप्पणं समाप्तम् ॥

३९७ राधाकृष्णगणोद्देशदीपिका ।

आ.—ये सूत्रिताः सतां रत्या प्रसिद्धाः शास्त्रलोकयोः ॥ व्याह्रियन्ते परीवारास्ते वृन्दावननाथयोः ॥ १ ॥

च.—शाके दृगश्वशक्रे नभसि नभोमणिदिने षष्ठयाम् ॥ व्रजपतिसद्मनि राधाकृष्णगणोद्देशिकादीपि ॥ १३ ॥

इति श्रीराधाकृष्णगणोद्देशदीपिका समाप्ता ॥

३९८ राधाकृष्णभक्तिचन्द्रिका-प्रद्युम्नगुरोः शिष्यः ।

आ.—आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तम् ॥ योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं स्मरामि ॥ १ ॥

श्रीमन्नारायणं मिश्रं शुकदेवकृपाभृतम् ॥ विष्णुस्वामिमताचार्य्यं प्रणौमि जगतां गुरुम् ॥ २ ॥

सर्वशास्त्रार्थयन्तारमदभ्रकरुणाकरम् ॥ श्रीभागवतहार्द्दज्ञं श्रीप्रद्युम्नं गुरुं भजे ॥ ३ ॥

स्तौमि वंशीधराचार्य्यं सत्समज्ञासु संस्तुतम् ॥ राधाराद्धांतकर्त्तारं तत्सुखे निरतं सदा ॥ ४ ॥

च.—देवी कृष्णमयी प्रोक्ता राधिका परदेवतेति अलमतिपल्लवितेन ॥ पुराणवाक्यानि नित्यलीलामयूखे वक्ष्यामः ॥

इति श्रीराधाकृष्णभक्तिचन्द्रिकायामुपोद्घातात्मकः प्रथमो मयूखः ॥

३९९ राधेयसिद्धान्तः-वंशीधरः ।

आ.—स्वसौन्दर्य्यमहाराशौ नित्यं सक्ता किशोरिका ॥ राधास्माकमुपास्यास्ति तदनन्येन चेतसा ॥ १ ॥

शक्तेर्वा ब्रह्मणो वापि तथा भगवतोपि हि ॥ कर्त्री श्रीराधिका ज्ञेया अधिष्ठात्री तथैव च ॥ २ ॥

च.—ललिताभजनं यावद्धृदि नैवावतिष्ठति ॥ तावद्राधापदाम्भोजधूलिगंधोपि दुर्लभः ॥ ७ ॥

इति श्रीमद्वंशीधरविरचितः श्रीराधेयसिद्धान्तः समाप्तः ॥

४०० रामनाममाहात्म्यम्-अच्युताश्रमस्वामी ।

आ.—चिदा यं चिद्गुणं चैव चिद्रूपं त्वखिलं जगत् ॥ कवीनां भाति यज्ञानं [ज्ञानं] तं विष्णुं नौमि चिद्गतम् ॥ १ ॥

यस्य स्मरणमात्रेण न मोहो नैव दुर्गतिः ॥ न रोगा नैव दुःखानि तमनन्तं नमाम्यहम् ॥ २ ॥

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ॥ विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ ३ ॥

पूर्वं मन्वाद्यष्टादशस्मृतिषु मन्वादिभिः श्रीविष्णुनाम जाप्यं पापकृतां प्रायश्चित्तं स्मृतम् ॥
तत्र विष्णुराह । तज्जाप्यं जपनं ध्यानं तत्कथाश्च — — — — —
च.–इदमस्तु परार्थं वा स्वकीयार्थं तथैव च ॥ श्रीरामभजनं को नु न कुर्यात्पुरुषाधमः ॥
इति च परमभक्त्या रामचन्द्रस्य विष्णोः पठति च घनपापक्षालिनीं नाममालाम् ॥
दृढतरमभिमानं लोकलज्जां च हित्वा य इह च शृणुयात्तद्रामतत्त्वं स याति ॥
पादारविन्दमकरन्दमधुव्रतेन सन्नामकीर्तनपरेण दृढव्रतेन ।
श्रीरामकीर्तनमिदं सुखवत्प्रयुक्तं धार्ष्ट्यं तु मे रघुपतेः क्षमयन्तु भक्त्या ॥
इति श्रीरामनाममाहात्म्ये श्रुतिस्मृतिपुराणेतिहासोक्ते चतुश्चत्वारिंशं प्रकरणम् ॥ समाप्तोऽयं ग्रन्थः ॥

४०१ वशिष्ठसंहिता ।

आ.–भरद्वाज उवाच । वेदवेदान्तसारज्ञ विरंचिप्रभवोत्तम ॥ भवता यत्परिज्ञातं तन्न जानाति कश्चन ॥ १ ॥
अतस्त्वां परिपृच्छामि हरेर्द्धाम्नां हि कारणम् ॥ किं तत्परतमं धाम माधुर्य्यैश्वर्य्यभूषणम् ॥ २ ॥
च.–नमामि नित्यं च तवास्मि किंकरः ॥ १७६ ॥ इति श्रीमद्वशिष्ठसंहितायां श्रीमद्वशिष्टभरद्वाजसंवादे श्रीमद्रामधाम-नित्यस्वरूपवर्णनो नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

४०२ वार्त्तामाला ।

आ.–स्वस्वरूपसीमा तदीयशेषत्वं परस्वरूपसीमा अर्चावतारः विरोधिस्वरूपसीमा अहंकारममकारौ उपायस्वरूपसीमा भगवत्कृपा उपेयस्वरूपसीमा तत्सुखोल्लासः ॥ एषानं विल्लगारि वार्ता — — — — — —
च.–ते व्यापकधारकत्वे स्वरूपोदयहेतुर्न भवति ॥ इति वार्तामाला सम्पूर्णा ॥

४०३ विष्णुधर्म्ममिमांसा ।

आ.–ननु पञ्चरात्रस्य कुतः प्रामाण्यं कूर्मपुराणे शतशो विगीतत्वात् ॥
कापालं पञ्चरात्रं च यामलं वाममार्हन्तम् ॥ एवंविधानि चान्यानि मोहनार्थानि तानि तु ॥
ये कुशास्त्राभियोगेन मोहयन्तीह मानवान् ॥ मया सृष्टानि शास्त्राणि मोहयैषां भवान्तरे ॥
इति दक्षं प्रति पार्वतीवचनम् ॥
तस्माद्धि वेदबाह्यानां रक्षणार्थाय पापिनाम् ॥ विमोहनानि शास्त्राणि करिष्यावो वृषध्वज ॥
एवं सञ्चोदितो रुद्रो माधवेन मुरारिणा ॥ चकार मोहशा — — — — — — —
च.–शातातपोपि–
स्तेयं कृत्वा गुरुदारांश्च गत्वा मद्यं पीत्वा ब्रह्महत्यां च कृत्वा ॥
भस्मच्छन्नो भस्मशय्याशयानो रुद्राध्यायी मुच्यते सर्वपापैः ॥
इति रागिसेव्यत्वमाहेति दिक् ॥ विष्णुधर्ममीमांसा ॥ संवत् १९१२ ॥

४०४ सङ्कल्पकल्पद्रुमः-सटीकः ।

मू. आ.—वृन्दावनेश्वरि वयोगुणरूपलीलासौभाग्यकेलिकरुणाजलधेऽवधेहि ॥
दासीभवानि सुखयानि सदा सकांतां त्वामालिभिः परिवृतामिदमेव याचे ॥ १ ॥

टी. आ.—राधिकायाश्चरणतलमारभ्य मस्तकपर्य्यन्तं वर्णयित्वा अधुना तस्या निकटे प्रार्थनां करोति शतश्लोकैः हे वृन्दावनेश्वरि···

मू. च.—हित्वान्याः किल वासना भजत रे वृन्दावनं तत्र तं राधाकृष्णविलासवारिदरसास्वादं न चेद्विदय ॥
त्यक्तुं शक्नुथ न स्पृहामपि पुनस्तत्रैव हृद्वृत्तयो विश्रब्धः श्रयते ममैव सततं सङ्कल्पकल्पद्रुमः ॥ १०४ ॥
इति संकल्पकल्पद्रुमः समाप्तः ॥

टी. च.—इति भावः ॥ इति संकल्पकल्पद्रुमटीका समाप्ता ॥

४०५ संप्रदायप्रदीपः-गदः ।

आ.—योऽनुग्रहार्थं श्रुतिगोपिकानां गिरीन्द्रधर्त्ताजनि रासमध्ये ॥
बभूव भूयः स कलौ कलेशः स्वाम्यन्तविष्णवादिपदैकनामा ॥ १ ॥
स एव भूयोऽजनि वल्लभाख्यः स्वकीयमाहात्म्यमावदि येन ॥
नत्वा त्रिरूपं तमहं करोमि तत्सम्प्रदायक्रममुक्तपूर्वम् ॥ २ ॥
श्रीवल्लभस्यात्मजविठ्ठलेशे प्रशासति प्राणिहितैकहेतौ ॥
मार्गं तदीयं किल तस्य शिष्यो गदाभिधो चक्र इदं यथामति ॥ ३ ॥

च.—इति श्रीसम्प्रदायप्रदीपे श्रीकृष्णाख्यब्रह्मनिर्णये पञ्चमं प्रकरणं समाप्तम् ॥

४०६ सिद्धान्तचन्द्रोदयः ।

आ.—आदौ उद्दीपनादिश्च साधकादिस्ततः परः ॥ क्रमाधिकारसंप्राप्तविधिनैषिधि किंचितम् ॥ १ ॥

च.—अवैष्णवस्य पाण्डित्यं सर्वशास्त्रसमन्वितम् ॥ तस्य वाक्यं न गृह्णीयादनालीढं हरिर्यथा ॥
इति श्रीसिद्धान्तचन्द्रोदय उपासनातत्त्वादिनिरूपणं सम्पूर्णम् ॥

४०७ स्वमनोबोधवाक्यानामन्तःकरणप्रबोधापरनाम्नां विवृतिः-वल्लभः ।

आ.—दर्शयन्स्वस्य सौभाग्यं स्वीयानां भक्तिवर्त्म च ॥ स्वमनोबोधवाक्यानि प्रकटीकृतवान्प्रभुः ॥ १ ॥

च.—चित्तप्रबोधकाचार्य्यवचांसि विवृतानि वै ॥ तेनाचार्य्याः प्रसीदन्तु स्वीये मयि सदा स्वतः ॥ १ ॥
इति श्रीपितृपादाब्जपरागधनिना मया ॥ श्रीवल्लभेन रचिता विवृतिः पूर्णतामगात् ॥

४०८ हरिनामव्याख्या-जीवगोस्वामी ।

आ.—हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥··········
त्वं माधुर्येण प्रथमं मम चेतो हरसि तत्र हेतुः हेकृष्णेति ॥

च.—आगत्य दुःखं हतवान्सर्वेषां व्रजवासिनाम् ॥ श्रीराधाह[हा]रितो हरिः श्रीकृष्णो नन्दनन्दनः ॥ १६ ॥
इति श्रीजीवगोस्वामिविरचिता हरिनामव्याख्या सम्पूर्णा ॥

४०९ अर्कप्रकाशः-रावणः ।

आ.—ओषधीपतिनेत्राय पन्ननीपतिमूर्तये ॥ कालकालाय नीलाय पार्वतीपतये नमः ॥ १ ॥
गर्भभारपरिक्लिन्ना कन्या मंदोदरी शुभा ॥ रावणं परिपप्रच्छ पूजांते तुष्टमानसम् ॥ २ ॥

च.—एवमुक्त्वा तु भैषज्यरहस्यं स दशाननः ॥ सायंसंध्याविधिं कर्तुमुक्त्वा तां मंदिरं ययौ ॥ १०० ॥
इति श्रीलंकानाथरावणकृतेऽर्कप्रकाशे धातुशुद्धिदर्शकं शतकं समाप्तमिति सम्पूर्णम् ॥

४१० आयुर्वेदमहोदधिः-सुखेनः ।

आ.—नत्वा धन्वंतरिं देवं गणाध्यक्षं दिवौकसाम् ॥ अन्नपानविधिं वक्ष्ये समस्तमुनिसंमतम् ॥ १ ॥

च.—इत्यायुर्वेदमहोदधौ श्रीसुखेनकृतौ शारीरं परिपूर्णम् ॥

४११ आयुर्वेदसंग्रहः-चक्रदत्तः ।

आ.—गुणत्रयविभेदेन मूर्तित्रयमुपेयुषे ॥ त्रयीभुवे त्रिनेत्राय त्रिलोकीपतये नमः ॥ १ ॥
नानायुर्वेदविख्यातसद्योगैश्चक्रपाणिना ॥ क्रियते संग्रहो गूढवाक्यबोधकवाक्यवान् ॥ २ ॥

च.—गौडाधिनाथरसवत्यधिकारपात्रं नारायणस्य तनयः सुनयोंतरंगान् ॥
नाभोरथ प्रथितलोध्रवलीकुलीनः (?) श्रीचक्रदत्त इह कर्त्व [र्त्र] पदाधिकारी ॥
यः सिद्धयोगलिखिताधिकसिद्धयोगात्त्रैव निक्षिपति केवलमुद्धरेद्वा ॥
भट्टत्रयत्रिपथवेदविदा जनेन दत्तः [त्तोऽ] पतत्सपदि मूर्द्धनि तस्य शापः ॥
इति श्रीगौडाचार्यचक्रदत्तकृत आयुर्वेदसंग्रहः समाप्तः ॥

४१२ क्षेमकुतूहलम्-क्षेमशर्मा ।

आ.—कपोलतलनिर्गतप्रमदवारिधारालसत्षडंघ्रिकुलकाकलीकलितमंजुकोलाहलः ॥
गिरिशतनयो गुरुः सकलसिद्धिवारांनिधिर्भिनत्तु दुरितानि वः सततमोदकादः सदा ॥ १ ॥
भारद्वाजकुलांभोधौ वलक्षः पक्षयोर्द्वयोः ॥ द्विजराजमणिर्जातो निष्कलंकः सदाऽक्षयः ॥ २ ॥
सन्नाहरूढान्वयभूषणोऽभूत्सलक्ष्मणो लक्षणपूर्णगात्रः ॥ भिषग्वरो राक्षसराजधान्यां विभीषणं यो विगदं विधत्ते ॥ ३ ॥
तदन्वये धर्मधरः समजनि भिषजां शिरोरत्नम् ॥ येनाघाति जगत्स्थः सुश्रुतविदुषा रुजां निचयः ॥ ४ ॥
अजनि तदनुसारः सत्सुहृत्पूर्णकामः सुकृतगमितयामः पुण्यकर्मस्वभावः ॥
गदनिचयविदारी वैद्यविद्याविहारी बुधजनरतिकारी साधुमार्गप्रचारी ॥ ५ ॥

अभूत्पतिस्तस्य सुतो महौजा विज्ञानभैषज्यकलाकलापः ॥
हृषीकचक्रं प्रथमं विजित्य यत्नेष्टया [जघ्नेचयो] व्याधिचयं प्रजानाम् ॥ ६ ॥
यशोराजो महाराजः प्रह्लादः कामराजकः ॥ हृदनिस्त्रिपुरारिज्यः षट्सुनास्तस्य [सुतास्तस्य] जज्ञिरे ॥ ७ ॥
शीलचातुर्य्यविज्ञानकलाकौशल्यसंपदः ॥ षण्णां समाजे भाग्येन महाराजोऽधिकोऽभवत् ॥ ८ ॥
येनाराधि शकेश्वरो निजकलाकौशल्यमातन्वता दिल्यानां त्रिपुरे (?) स्वपाटवबलैर्बंदी च निर्मोचिता ॥
नीतो ग्रामजडो नरो दशपुरः साकं शकाधीशतो धन्योऽभून्महाराज एव भिषजां चक्रैकचूडामणिः ॥ ९ ॥
हृदनिस्तदनुजो बहुवेत्ता वाग्भटचरकसुश्रुतशास्त्रम् ॥ शीलयन्ननिशमीशशारदाः शर्म कस्य न ततान भूतले ॥ १० ॥
मन्मथो जयशर्म्मा च वामदेवोथ पंडितः ॥ सूर्यदासस्तु विख्यातो हृदनेः पंच सूनवः ॥ ११ ॥
यदुताविवेकविषयः [युक्तायुक्तमहाविवेकविषयं] कौलीनमत्यद्भुता भैषज्याश्रितचातुरीप्रियवचःपांडित्यसत्संमतम् ॥
पुण्यापायविरक्तिशक्तिमतयो दीने सदा दानता सर्वो मन्मथमाश्रितो गुणगणः श्रीकांतपूजारतम् ॥ १२ ॥
क्षेमशर्ममल्लिनाथसंज्ञकौ तत्सुतावभवतां मनोरमौ॥ यौ विलोक्यजनु वंशुमागतौ[भुवमागतौ गतौ]लज्जयेवभिषजौ दिवःपुनः
अकृतनिजविपक्षस्तर्कविद्यापिपक्षः फलितराजनरक्षः काव्यकोशेषु दक्षः ॥
विधिविहितसुकर्मा संचितानेकधर्मा विदितसुकविकर्मा राजते क्षेमशर्मा ॥ १४ ॥
क्षेमो विक्रमसेनभूपतिलकं संसेव्यविद्वद्गुणैर्मंत्रक्षात्रकलावनिः समभवद्भैषज्यविद्याविभुः ॥
पात्रापात्रविवेकवान्परहिताधाने सदा सादरस्तद्दत्ते च पुरे सुधामयजलापूर्णां व्यधाद्वापिकाम् ॥ १५ ॥
सीतेव शीता जननी यदीया नेयाग्ररेखा पतिदेवतानाम् ॥ स क्षेमकर्मा कृतपुण्यकर्मा शर्माणि धत्ते न कथ परेषाम् ॥१६॥
वैकुंठलोकमगमद्दहनं प्रविश्य शीतासती सुकृतवारविचारदक्षा ॥
भर्त्रा सह प्रथितशीलगुणोदयेन श्रीनिंबशाखकुलभूषणरत्नशोभा ॥ १७ ॥
श्रीसूर्यदासगुरुदाससरोजसेवाकेना[हेवाकिना] परहितार्थपरायणेन ॥
क्षेमेण तर्कपदवाक्यविचारदक्षा ग्रंथस्य कर्मविधये धिषणा व्यधायि ॥ १८ ॥
ग्रंथं व्यधत्त सुरसं त्वमृतौघपूर्णं क्षेमः क्षमाजलनिधिर्द्विजदेवभक्तः ॥
भूमंडले कृतनिवासजना यदीयाः पादार्घभावरसिका ननु शोधयंति ॥ १९ ॥
गौरीमतं च नलवाग्भटभीमसूक्तं हारीतसुश्रुतमतं रविसिद्धपाकम् ॥
ज्ञेयो[यं]भिषग्वरसुधीरवलोक्य सम्यग्ग्रंथं व्यधत्त खलु क्षेमकुतूहलाख्यम् ॥ २० ॥
च.–भोजनांते च यः पठेत् ॥ – – – – – स भवेद्वल्लभो राज्ञां शतमायुरवाप्नुयात् ॥ इति क्षेमकुतूहलम् ॥

४१३ चिकित्साञ्जनम्-विद्यापतिः ।

आ.–सहस्रकरसंशोभिधनुर्बाणमभीष्टदम् ॥ कार्त्तवीर्य्यार्जुनं वंदे रक्तांबरविभूषणम् ॥
चिकित्साज्ञानतिमिरच्छन्ननेत्रप्रसाधनम् ॥ भिषजां प्रीतये सूक्ष्मं सुयोगांजनमुच्यते ॥ १ ॥
ये प्राकृतैर्वैद्यवचोभिरुक्ता योगाः सतां यन्न भवंति मान्याः ॥
प्राचां निबध्नाति वचोभिरेव विद्यापतिस्तान्बहुशोऽनुभूतान् ॥ २ ॥
च.–इति श्रीमदुपाध्यायविद्यापतिकृतं चिकित्सांजनं समाप्तम् ॥

४१४ चिकित्सासारसंग्रहः-त्रिपुरारिः ।

आ.—नत्वा शिवं सन्निदेशधारिणा त्रिपुरारिणा ॥ लिख्यते मितबुद्धीनां शिक्षायै रुक्प्रतिक्रिया ॥ १ ॥
च.—परिणाशूलशांत्यर्थं वमनानि प्रयोजयेत् ॥ त्रिफला क्वाथगोमूत्रक्षीरमांसरसैर्हिता ॥ ....

४१५ आनन्दमालिका-आनन्दभारती ।

आ.—जयति जगति विष्णुः श्रीनृसिंहाख्य एष दितिजदनुजदावज्वालनांतःकृशानुः ॥
सकलनिजजनानां ज्ञानविज्ञानहेतोः प्रकटितनिजदेहं तं हरिं संनतोऽस्मि ॥ १ ॥
श्रीनृसिंहं नमस्कृत्य देवदानववंदितम् ॥ जगत्स्थाननिरोधादिकारणं परमेश्वरम् ॥ २ ॥
आनंदभारतीनाम्ना यतीन्द्रेण प्रकाशिता ॥ आनंदार्थं पंडितानामानंदस्य तु मालिका ॥ ३ ॥
च.—इति श्रीआनंदसिद्धिकृते योगज्ञाने वैद्यकसारसंग्रहे आनंदमालिका समाप्ता ॥

४१६ ज्वरतिमिरभास्करः-चामुण्डः ।

आ.—स्फुरत्त्रिपुरसुंदरीचरणयुग्ममाराधयन्प्रणम्य च रुजां रिपुं प्रथमवैद्यमंभोधिजम् ॥
विलोक्य विविधागमान्करणवीरकुंभात्मजश्चिकित्सितमतिं निजां प्रथयतीह चूडाभिधः ॥ १ ॥
कारणमंडलविततं लक्ष्मरथं भैषजोद्योतम् ॥ ज्वरतिमिरभास्कराह्वं ग्रंथं तनुते सरोगिणस्त्रातुम् ॥ २ ॥
च.—देशे श्रीमेदपाटे रसयुगशरभूमत्सुवर्षे १५४६ दशम्यां शुक्लायामाश्विनस्य त्रिदशगुरुदिने योगिनीपत्तनस्य ॥
भूपे श्रीराजमल्ले विलसति वसुधामंडले कुंभसूनुः कायस्थश्चंडनामा ज्वरतिमिरहरं भास्करं संव्यधत्त ॥
इति श्रीकायस्थचामुंडकृते ज्वरतिमिरभास्करे ज्वरोपद्रवचिकित्सा नाम षोडशोऽध्यायः ॥

४१७ त्रिशती सटीका । मू०-शार्ङ्गधरः । टी०-वैद्यवल्लभभट्टः ।

टी. आ.—नमस्कृत्वा महादेवं सोमं सर्वार्थसिद्धिदम् ॥ क्रियते त्रिशतीव्याख्या मुग्धवैद्यमुदे मया ॥ १ ॥
शार्ङ्गधरनामवैद्यस्त्रिशतीनामग्रंथमारभते श्रीमतीति ॥............
मू. आ.—उदयगिरिशिरःस्थो निद्रयामूढमेतज्जगदगदमशेषं निर्मिमीतेऽनिशं यः ॥
अमिततमतमिस्रोद्दामदारिद्र्यहारिप्रसृमरकिरणौघः स्तान्मुदे वः स देवः ॥ १ ॥
मू. च.—सुधीरभूत्संसदि भूपतीनां सन्मानभुङ्नागरवंशजन्मा ॥
दोषज्ञमान्यः सुकविः कलावान्दयानिदानं भुवि देवराजः ॥ ३३२ ॥
तस्यात्मजः शार्ङ्गधरस्त्रिलोकीपतिं त्रिनेत्रं त्रिपुरां च शाश्वत् ॥
ध्यायन्निमां वैद्यमुदे त्रिदोषज्वरच्छिदे च त्रिशतीं चकार ॥ ३३३ ॥
मय्यनुग्रहबुद्ध्या वा कवित्वश्रुतिकौतुकात् ॥ संतः सततमेवैनामाद्रियध्वं मनोरमाम् ॥ ३३४ ॥
इति श्रीयतिवरवैकुंठाश्रमश्रीचरणशिष्येण शार्ङ्गधरेण विरचिता श्रीत्रिशती समाप्तिमगमत् ॥
टी. च.—इति श्रीवैद्यवल्लभभट्टविरचिता वैद्यवल्लभाख्या त्रिशतीटीका समाप्तिमगमत् ॥

४१८ भिषक्चक्रचित्तोत्सवः-हंसराजः ।

आ.–ध्यायेद्बालां प्रभाते विकसितवदनां फुल्लराजीवनेत्रां मुक्तावैदूर्यगर्भै रुचिरकनकजैर्भूषणैर्भूषितांगीम् ॥
विद्युत्कोटिच्छटाभां परिमलबहुलां दिव्यसिंहासनस्थां गीर्देवी तस्य दासी भवति सुरवनं नंदनं केलिगेहम् ॥ १ ॥
च.–भिषक्चक्रचित्तोत्सवे वैद्यशास्त्रं कृतं हंसराजेन पद्यैर्मनोज्ञैः ॥ सुहृद्यैरदोषै रुजो ध्वांतनाशं हरेरंघ्रिसंसेवनानंदमूर्ति ॥ ११ ॥
महामङ्गल विश्वेश मङ्गलेश जगत्पते ॥ मंगलं कुरु मे देव वासुदेव नमोस्तु ते ॥ १२ ॥
महामंगले [मंगले] मंगलेशे शिवे कालिकंठे मुरारे किलेशे ॥
शुभे वा किलं [बालिक] विश्वकृच्चंद्रकांते नमस्ते नमस्ते नमस्ते नमस्ते ॥ १३ ॥
इति श्रीभिषक्चक्र चित्तोत्सवे हंसराजवैद्यकृते रोगिमूललक्षणं समाप्तम् ॥

४१९ मधुकोशः-जयपारदीक्षितः ।

आ.–शशिरुचिरहरार्द्धव्यक्तशक्त्यार्द्ध[क्त्यर्द्ध]देहो दिशतु घनघनाभः पद्मनाभः श्रियं वः ॥
त्रिदशसरिदशीतद्योतजा[द्योतितं]वारिमध्यप्रभमिव भवनाभौ वारिजं यस्य रेजे ॥ १ ॥
भट्टारजैज्जटगदाधरवाप्यचंद्रश्रीचक्रपाशिवकुलेश्वरसेनभव्यैः ॥
ईशानकार्शिवभुवीरसुकीरवैच्छै[द्यै]र्मैत्रेयमाधवमुखैर्लिखितं विचिन्त्य ॥ २ ॥
च.–अनेन श्लोकेन समदोषः समाग्निश्चेति श्लोकस्य सकल एवार्थो निबद्ध इति शुभम् ॥
इति श्रीवैद्यमहामहोपाध्यायजयपारदीक्षितकृतौ मधुकोशे विषनिदानव्याख्यानम् ॥

४२० योगतरङ्गिणी-त्रिमल्लभट्टः ।

आ.–कपोलविगलल्लोलदानपानीयपिच्छिलम् ॥ भ्रमद्भ्रमरझंकारं वंदेऽहं द्विरदाननम् ॥ १ ॥
आपस्तंबस्यारवेलोपनाम्नो धाम्नो भासां कोठपल्लीभवस्य ॥
तैलंगस्य प्रीतिभाजो गिरीशे काशीवासं कुर्वतो भूरिकीर्त्तेः ॥ २ ॥
राज्ञां मान्यस्पात्रगस्म[स्यात्रिगोत्रस्य]भट्टस्यासीत्पुत्रो वल्लभो वेदविद्यः ॥
तस्यासीरन्सूनवोऽमी त्रिमल्लो रामो गोपश्चेति नाम्ना त्रयोपि ॥ ३ ॥
तेषु त्रिमल्लभट्टेन नाम्ना योगतरंगिणी ॥ चिकित्सा लिख्यते भूरिग्रंथेभ्यः स्वपरार्थिना ॥ ४ ॥
च.–स्वार्थं चापि परार्थमादरतया दृष्ट्वा चतुःपंचषान्ग्रंथान्वैद्यकृतप्रसिद्धपथगान्भट्टैस्त्रिमल्लाभिधैः ॥
एषा योगतरंगिणीसमभिधा साध्वी कृता संहिता संक्षिप्ता सरसा सुखेन सुचिरं जीयादनेकाः समाः ॥ १९ ॥
इति श्रीत्रिमल्लभट्टग्रथिता योगतरंगिणी समाप्ता ॥

४२१ योगतरङ्गिणी-त्रिमल्लः ।

आ.–जयति जगति जनताजयहेतुः सकलदुरितचयवारिधिसेतुः ॥ – – – – – गणपतिरचलसुतासुखसिंधुः ॥ १ ॥
कुचकलसपयोभिर्मेतया[मेनया] साधुसिक्ता पुरमथनसुद्रस्तांव[सुरद्रुस्तंभ]मालंबमाना ॥
करकिशलयकांता मंदहासप्रसूना ददतु फलमभीष्टं कल्पवल्ली शिवा नः ॥ २ ॥

ब्रह्मादीनभिवंदे संदेहध्वांतभास्करान्भिषजः ॥ सुश्रुतचरकाचार्य्यानार्यानुच्चैश्च वैद्यके शास्त्रे ॥ ३ ॥
सक्काथादिरसैर्निदानसहितैरात्मानुभूतैर्नितै[जैः] स्तैर्लिंगस्त्रिपुरांतकस्य नगरे योगैस्त्रिमल्लो द्विजः ॥
नाम्ना योगतरंगिणीं प्रथयति ग्रंथं ज्वराद्यामयश्रेणीपावककीलजुष्टवपुषां नृणामिह श्रेयसे ॥ ४ ।
अत्र ग्रंथे भूरितंत्रात्तसारे सद्भिर्दत्तं दूषणं भूषणं नः ॥
छिन्नं दग्धं घृष्टमष्टापदं हि छायामृच्छा [छायामच्छाम्] च्छति स्वेच्छयैव ॥ ५ ॥

च.—उद्वर्त्तितं तदनु ये महिणी[षी]पुरीषैर्धत्तूरकांबुनवनीतविलेपितं च ॥
तत्साधनं — — — — — — — — — — — — — — — — — — — ॥

४२२ योगमुक्तावली-श्रीवल्लालदेवः ।

आ.—श्रीमत्कदंबाभविकासमाशः [विकाशिताशौः] भासा जगत्त्राणविभातकीर्तिः ॥
वल्लालदेवः क्षितिपालदेवो नारायणोऽयं विजयी जगत्याम् ॥ १ ॥

च.—इति श्रीवल्लालदेवविरचितायां योगमुक्तावल्यां समाप्तं चि० भे० संपूर्णा ॥

४२३ योगसमुच्चयः-नवनिधिरामः ।

आ.—वंदेऽहं श्रीशं तु धन्वंतरिं वै देवादेवैरर्चितांघ्र्यब्जयुग्मम् ॥ त्रैलोक्ये विख्यातमानंदकंदं कर्त्तारं चाप्योषधीनामधीशम् ॥१॥

च.—युग्मेंदुवस्वींदुमितेऽब्दवृंदे भौमे नभे शुक्लत्रयोदशीषु ॥ निधीकृतो योगसमुच्चयोऽयं ग्रंथोऽचिरं तिष्ठति मंगलार्थे ॥ ९३ ॥
इति श्रीमन्महात्मन्साहिमल्लात्मजेन नवनिधिरामेण विरचिते योगसमुच्चये संकीर्णयोगनिरूपणो नाम पंचमो वृंदः॥ ५ ॥

४२४ राजेन्द्रकोशः-रामचन्द्रः ।

आ.—ध्यात्वा श्रीरामचन्द्रं प्रणतसुरवरं प्रोल्लसन्मौलिमालामाणिक्योद्योतभास्वद्रुचिविकचलसत्पादपाथोजमीशम् ॥
सर्वाघौघातिरेकांधतमसदलनप्रोल्लसन्नामदीपं ध्वस्तप्रत्यूहजालं निखिलनिजजनाभीष्टकल्पद्रुमीशम्[ड्रे] ॥ १ ॥
कृत्स्नार्थिस्तोमजाग्रद्विधिरचितललाटस्थदारिद्र्यलेखाऽजस्त्रं नानाप्रदानोदकबहु — — — रयैराशु येन प्रमृष्टा ॥
विद्वद्वृंदैकगोष्ठीप्रचुरपरिसरत्सर्वशास्त्रार्थतत्त्वज्ञानप्रख्यातकीर्तिर्विपुलरसमतिः कोविदेन्द्रानुयातः ॥ २ ॥
एकेनैव प्रयुक्तं निखिलगुणचयं द्रव्यसंघप्रसक्तं विद्वत्सद्वैद्यनानाविधरचितनिघंट्वर्थजातं विविच्य ॥
गौडोर्वीशावतंसः क्षितिपतितिलकः प्रादिशच्छ्रींद्रसिंहो राजा सर्वोपकृत्यै निखिलबुधवरानिंद्रकोशं चिकीर्षुः ॥ ३ ॥
नानाद्रव्यार्थसंघाननवरतमतश्चाक्षयादिंद्रकोशादर्थिप्रत्यर्पितार्थादमलसुमतयो मत्सरत्वं विहाय ॥
गृह्णीध्वं वै यथेच्छं निखिलजनमनोहारिणोनन्यलभ्यानासाद्यैतान्प्रदिक्षु प्रभवत गुणविख्यातकीर्तीन्दुभाजः ॥ ४ ॥
प्रभाकरतनूजनिर्विबुधरामचंद्राभिधो बुधेन्द्रसमनुव्रतो नृपवरेंद्रसिंहाज्ञया ॥
समीक्ष्य विविधागमानखिलवैद्यसद्गुंफितान्करोति विविधार्थसंग्रहसदिंद्रकोशाभिधम् ॥ ५ ॥

च.—स्निग्धा वीर्य्यविवर्द्धनी च कथिता पिंडाख्य एता — — — — — — —

४२५ रसरत्नप्रदीपः-रामराजः ।

आ.—प्रेंखोल्लस्फुटनीलनीरजदलाद्वैतप्रतीतिः प्रभोर्दृष्टिर्दोर्ष्टि[र्ध्रु] तमालनीलिमगुणग्राहिण्यनन्तस्य वः ॥
लक्ष्म्याः सासु[श्रु]सुखाय चिंतितवती या भाति नीलांबुदश्यामश्रीयमुनाप्रवाहजठरे लोलेव मीनाङ्गना ॥
जयति विदितसारः सृष्टविश्वोपकारः प्रबलमदकुठारः संहिताकण्वहारः ॥
सकलगुणसमाजः सिद्धविद्यानिकुंजस्त्रिपुरहर — — — — — — — — — — — — — — — ॥
— — — — — — — — — — — — खिन्द्रनामाटाकान्वये—मुकुटः क्षितिपो बभूव ॥
तस्यात्मजः क्षितिपतिर्जगति प्रसिद्धः साधारणो रणविनिर्जितशत्रुसेनः ॥
त्रिस्थानमार्गमधिगम्य जगद्विरिंचेर्भूतं स्थितं च पुरवास्यकरोत्प्रतापात् ॥
तस्यात्मजास्त्रय इमे विदिता जयन्ति ज्यायानयं समिति लक्ष्मणसिंहनामा ॥
शत्रून्विजित्य कृतवान्रिपुकामिनीनां वर्षा विलोचनयुगे हृदये निदाघम् ॥
श्रीमान्परः सहजपाल इति क्षितीन्द्रः स्वयं सुकवि[चंद्रः स्वयं सुकवि]लोचनकैरवाणाम् ॥
स्त्रीणां नृणां हृदयपंकजकर्णिकायां तुल्यानुरागप्रव [इव] भाति गुणैः सदा यः ॥
यत्कीर्तिकांतिविमलो वचसां विलासो हारावलीव लुठति स्तुतिपाठकानाम् ॥
कण्वे कवित्वधनिनां मदनो नरेन्द्रो लक्ष्मीविलासनिलयो बलिवद्वदान्यः ॥
वंशेऽथ विश्वविदिते नृपरत्नमालः प्रादुर्बभूव करुणावरुणालयोऽस्मिन् ॥
यस्मादभूत्सुतनयो विनयाम्बुराशिः श्रीरामरत्न इति रम्यतया श्रिया च ॥
साधारणक्षितिपतेः सुनियोगयोगात्संप्राप्य सेवकपदं खलु रामराजः ॥
नानामयांधतमसः प्रशमाय धन्यो रम्यं करोति कुतुकाद्रसरत्नदीपम् ॥

च.—इति श्रीटीकान्वयमण्डनरत्नदेवसुतश्रीरामराजविरचिते रसरत्नदीपे गणगण्डमालादिकफकेत्वन्ताधिकारः स० ॥

४२६ रसरत्नसमुच्चयः-सिंहगुप्तसूनुः ।

आ.—यस्यानंदभवेन मंगलकलासंभावितेन स्फुरद्धाम्ना सिद्धरसा[यि]तेन करुणादीक्षासुधासिंधुना ॥
भक्तानां प्रभवप्रसंहृतिजरारागादिरोगाः क्षणाच्छांतिं यांति जगत्प्रधानभिषजे तस्मै परस्मै नमः ॥ १ ॥
रत्नकोशश्च शंभुश्च तथैको नरवाहनः ॥ इंद्रदो गोमुखश्चैव कंबलिर्व्याडिरेव च ॥ २ ॥
नागार्ज्जुनः सुरानंदो नागबोधिर्यशोधनः ॥ खंडः कपालिको ब्रह्मा गोविंदो लंपको हरिः ॥ ३ ॥
आदिमश्चंद्रसेनश्च लंकेशश्च विशारदः ॥ कपाली मतमांडव्यो भास्करः शूरसेनकः ॥ ४ ॥
सप्तविंशतिसंख्याका रससिद्धिप्रदायकाः ॥ रसांकुशो भैरवश्च नंदी स्वच्छंदभैरवः ॥ ५ ॥
मंथानभैरवश्चैव काकचंडीश्वरस्तथा ॥ वासुदेव ऋषिः शृंगः क्रियातंत्रसमुच्चयी ॥ ६ ॥
रसेन्द्रतिलको भोगी भालुकिर्मुष्कलाह्वयः ॥ महादेवो नगेन्द्रश्च वासुदेवो हरीश्वरः ॥ ७ ॥
एतेषां क्रियतेऽन्येषां तंत्राण्यालोक्य संग्रहः ॥ रसानामामयघ्नानां चिकित्सार्थोपयोगिनाम् ॥ ८ ॥

सूनुना सिंहगुप्तस्य रसरत्नसमुच्चय: ॥..................
च.—देवदालीरसो व्योषलेपनाद्विषनाशन: ॥ रसेन चक्रमर्द्दस्य — — — — — — — — — — —

४२७ रससार:-गोविन्दाचार्य्य: ।

आ.—गणेशं प्रणिपत्यादौ शिवं च शिवया सह ॥ गुरुभैरवसिद्धेभ्यो योगिनीग्रहमंडलम् ॥ १ ॥
च.—कटुतिक्तकषायाम्लै: क्षारतैलादिसेवनम् ॥ अन्नोपवासकृच्छ्राणि वर्जयित्वा विचक्षण: ॥
इति गोविंदाचार्यविरचिते रससारे पंचविंशतितम: पटल: ॥ स० ग्रंथ: ॥

४२८ रोगारोगवाद:-वीरेश्वर: ।

आ.—नमामि ॐनम: सिद्धं सर्वमक्षरमंडलम् ॥ यदाश्रितसरस्वत्या अंतं कोपि न गच्छति ॥ १ ॥
नमामि ग्रंथकर्तॄंस्तान्वाणीपूर्वान्महाशयान् ॥ यद्व्याख्यालेशमादाय विज्ञानं जायते नृणाम् ॥ २ ॥ इति मंगलम् ॥
अथ पूर्वरंग: । मंगलोक्तमार्गेण जातविज्ञान: इष्टकापथनामग्रामवासी कान्यकुब्जवोसरिहा द्विवदी ध्रुवंशात्मज-देवीदासात्मज: आयुर्वेदाध्ययनकृतश्रम: वीरेश्वर: आयुर्वेदादिसर्वशास्त्राध्यापकाध्येतॄणां ग्रंथकारकाणां चाश्चर्य्यजनकै: पूर्वाचार्य्यकृतरोगारोगलक्षणैर्नवीनं वाग्विलासं करोति । इति पूर्वरंग: ॥
च.—पञ्चद्विसप्तचंद्राब्दे माघशुक्लद्वितीयके ॥ रोगारोगस्य वादोयं समाप्तो मरामध्रुवं[समाप्तिमगमद्ध्रुवम्] ॥ ७ ॥
इति श्रीवीरेश्वरविरचिते रोगारोगवाद: समाप्त: ॥

४२९ लङ्घनपथ्यनिर्णय:-काशिनाथ: ।

आ.—श्रीसर्वज्ञं नमस्कृत्य तापत्रयनिवारकम् ॥ चतुर्गतिप्रहर्त्ता च[र्तारं] सर्वसौख्यप्रदायकम् ॥ १ ॥
च.—विद्वज्जनान्सं[नांश्च सं]पूज्य नमस्कृत्य गुरून्प्रति ॥ सर्वशास्त्राणि संवीक्ष्य आत्मबुद्ध्यनुसारत: ॥ २७ ॥
द्विनंदमुनिभूवर्षे मासि च माघसंज्ञके ॥ शुक्ले प्रतिपदायां तु वारे च भृगुवासरे ॥ २८ ॥
संपूर्ण: क्रियते ग्रंथ निर्णय: पथ्यलंघने [ग्रंथो लंघने पथ्यनिर्णय:] ॥ श्रीजैपुरे महारम्ये राज्ये जैसिंघभूपके ॥ २९ ॥
पूर्णो ग्रन्थो मनोज्ञश्च वैद्यानां च हिताय वै ॥ मुखाधीत[ती]कृतो येन विद्वद्मध्ये तु[स]शोभते ॥ ३० ॥
कपोलकल्पितं नास्ति पूर्वाचार्यानुसारत: ॥ वाचकेन लक्ष्मीनाथेनैकत्रीकृतशास्त्रत: ॥ ३१ ॥
मया च मंदबुद्ध्या च यत्कुर्य्यात्पथ्य[चायं कृत: पथ्य]निर्णय: ॥ शुद्धाशुद्धं च विज्ञाय मम कोपो न कार्य्यताम् ॥ ३२ ॥
कृपां कुरुध्वं भो संतो मम विज्ञप्तिरेव च ॥ तावद्विजयते ग्रंथो यावच्चंद्रदिवाकरौ ॥ ३३ ॥
इति श्रीलंघनपथ्यनिर्णय: समाप्त: ॥

४३० लक्ष्मणोत्सव:-लक्ष्मण: ।

आ.—प्रणतविबुधमौलिस्फाररत्नांशुगर्भाश्च[र्भश्च]रणनखरभासो[सा] भाति यो भक्तिभाजाम् ॥
दव[द]दभिमतसिद्ध्यै[द्धिं]कल्पवल्लीरिवाग्र्या [वल्लीव रम्य:] स जयति गणनाथो दाननीरप्रसिक्ता [क्त:] ॥ १ ॥ ...

यस्मिन्नुदंचद्द्युतिरत्नबद्धसौधेषु कांतावदनैः समत्वम् ॥ व्रजत्यधः प्राप्तुमिवाकलंकं स्पष्टप्रकाशी सकलोऽपि चंद्रः ॥ ४ ॥
तस्मिन्पुरे श्रीपयनाम्नि वंद्यो यशोविधुः सद्गुणरत्नसिंधुः ॥ आस्ते शकेशो महमंदखानः शौर्य्यप्रतिक्षिप्तपराभिमानः ॥ ५ ॥
हर्म्येषु शून्येषु समीक्ष्य चित्रद्विपान्समाकुंचितनिश्चलांगाः ॥ पराक्रमे भांति यदीयवैरिपुरेषु सिंहा अपि चित्रतुल्याः ॥ ६ ॥
तत्सन्महीभृद्व्रजमौलिमालास्खलत्परागारुणपादपद्मे ॥ तस्मिन्क्षितौ राजपदं दधाने ग्रंथः कृतः श्रीमहमंदखाने ॥ ७ ॥
श्रीमत्पुरी सर्वजगत्प्रसिद्धा निवासलोभादिव यत्र विष्णुः ॥ जन्माददे सर्वसतीर्विहाय त्रैलोक्यवंद्या मथुरेति नाम्ना ॥ ८ ॥
तस्यामशेषकुलपालवयोभिरामः कायस्थवंशसरसीरुहकाननार्कः ॥
कामाधिकोत्तमधनार्चितमार्गणाढ्यो भास्वद्गुणौघमहिमाक्षयनागनामा ॥ ९ ॥
तस्यात्मजो लोहडनामधेयः सच्छीललोकैर्हृदि सन्निधेयः ॥ आसीत्सदा सज्जननेत्रपेयः पुण्यात्ममध्ये प्रथमाभिधेयः ॥ १० ॥
तत्पुत्रः सहदेव इत्यनुगतः क्ष्मादेवसेवोऽभवद्विज्ञाने सहदेव एव किमसौ सद्धर्मबंधुः सदा ॥
लोकालोकविलोकनाय विलसत्कीर्त्तिप्रदीपोऽखिलक्षोणीमंडलमंडने मलयजालेपानुकारोऽभवत् ॥ ११ ॥
सत्पूज्यः सहदेवसूनुरभवद्दामोदरो नामतो यो दामोदरपादपंकजरतस्वांतद्विरेफः सदा ॥
गांभिर्य्येण सरित्पतिं वितरणैः कल्पद्रुमं धैर्यतो मेरुं देवगुरुं धिया च जितवान्यक्षेश्वरं संपदा ॥ १२ ॥
तस्मात्समुद्रादिव धर्मदेवश्चंद्रो यथाऽभूत्कृतविप्रसेवः ॥ सौंदर्य्यसंतर्ज्जितकामदेवः सदा हृदि स्थापितका[वा]मदेवः ॥ १३ ॥
जातो यो धर्मदेवात्सकलगुणनिधिर्द्धर्म्मदेवादिवाभूत्पार्थाग्र्यं पार्थिवाग्र्याद्दूरविविधमहारत्नसन्मानपात्रम् ॥
सोऽजस्रं भूमिदेवार्पितविविधवसुर्द्धर्म्मवृक्षं सुमूलं चक्रे संकल्पनीरैर्दिविरकुलवरः खेतलः प्रोर्जितश्रीः ॥ १४ ॥
रैपालस्तनयोस्पृश[ऽस्यस]द्गुणगणोदंचद्यशोमंडलो जातोऽसौ दिविरोत्तमः कविवरस्वांतैकतुल्यप्रभः ॥
आवासोऽखिलसंपदामधिपदं धर्मश्रियामाश्रयः साधूनामवधिः समस्तसुहृदामास्थानकं सद्वियाम् ॥ १५ ॥
तस्याभवद्गजपतिर्द्विजराजकांतिः पुत्रोऽपरः स्थिरपि[य]शाः स्थिरराजनामा ॥
दासुक इत्यवरजः सुरविष्णुदासो लोकत्रयोद्धृतसुरत्ननिभास्त्रयस्ते ॥ १६ ॥
कीर्तिर्भाति जगत्त्रये गजपतेर्विद्वन्मुदाधायिनी शत्रुग्लानिविधायिनी गुणगणस्वच्छांबुसद्वाहिनी ॥
शीतांशोः परिभाविनी शुचितया भूयो जगत्पाविनी साधुस्वांतनिवासिनी सुरपतेराश्चर्यसंदायिनी ॥ १७ ॥
आसंस्त्रयो गजपतेः प्रथिताः पृथिव्यां पुत्राः पवित्रचरिताः खलु कामराजः ॥
ख्यातस्ततोऽप्यमरसिंह इति प्रसिद्धस्तस्यानुजो विदितजालपनामधेयः ॥ १८ ॥
पुत्राः पवित्रचरिताः स्थिरराजनाम्नो जातास्त्रयोऽप्यमितविक्रमविक्रमश्रीः ॥
ज्येष्ठोऽपरः पृथुगुणैकनिधिः पृथुश्रीः कीर्त्यानुजो धनदजिद्धनराजनामा ॥ १९ ॥
पद्मापतिपदांभोजभ्रमरीभूतमानसः ॥ श्रीमान्भ्रमरराजोऽभूद्दासुकस्यात्मसंभवः ॥ २० ॥
ज्येष्ठः सुतो गजपतेरपि कामराजो नो कामराजवशगो द्विजकामधामा ॥
यः सद्गुणार्जितयशःशशिमंडलेन प्राकाशयत्सुकविकैरवकाननानि ॥ २१ ॥
कामराजसुतौ जातौ ख्यातौ कीर्त्या यथा सुरौ ॥ अभूदुद्धरणो ज्यायान्महीचंद्रोनुजस्तयोः ॥ २२ ॥
प्राप्तोदयो गजपतिप्रवरोदयाद्रेः स्फूर्जत्प्रभावमहिमामरसिंहभानुः ॥
उत्सादयन्नपि समस्ततमःप्रवृत्तिं चित्रं न जातु जनतापमयं तनोति ॥ २३ ॥

येनाकारि समस्तमानसमलत्यागो रतिं बध्नता शांतौ येन भवार्णवैकतरणिस्तत्त्वार्थधीराहृता ॥
येनासादि निजापरैकमतिना ब्रह्मैकशर्मोदयः श्रीमान्सोऽमरसिंह एष जयति क्षोणौ सुकल्पद्रुमः ॥ २४ ॥
येनाशेषसकोत्तमात्मविलसत्प्रौढप्रतापानलज्वालालीढसमस्तवैरिनिवहारण्यात्पदं प्रोन्नतम् ॥
लब्ध्वा श्रीमहमंदखानसुनृपात्प्रत्यर्थिकांताननोदंचचंद्रपराभवाय सततं शौर्येण सूर्यायितम् ॥ २५ ॥
योलाउमाख्यजननीशुभकल्पवल्ल्याः प्रादुर्भवन्प्रसवसुस्तबकाभिरामः ॥
अर्थिव्रजोचितविचित्रफलैकधामा क्षोणौ स भाति दिविरोऽमरसिंहनामा ॥ २६ ॥
येनाप्रापि दयालुना क्षितितले बंदीः समस्ता धनैर्नित्यं मोचयता विमुक्तिरमणीलीलाकटाक्षोत्सवः ॥
सिक्तो धर्मतरुर्निजाश्रितजनेष्वातन्वता रत्नजां वृष्टिं सोऽमरसिंह एवमभवत्कल्याणपात्रं मुदा ॥ २७ ॥
दाने कल्पद्रुमो यः परहितकरणे भास्करः सिंधुराजो गांभीर्ये वापि धैर्ये सकलजनिजुषां तापनाशे शशांकः ॥
विश्वांभोधौ निमज्जल्ललितवृषतरिर्गौरवे रत्नसानुः श्रीमान्कायस्थवर्यो भवतु बहुमुदामास्पदं सोमराजः ॥ २८ ॥
तस्य द्वौ तनयौ प्रशस्तविनयौ जातौ सदा सद्गुणैः ख्यातौ मूर्तिधरौ धरामधिगतौ किं भानुचंद्रावुभौ ॥
सर्वाशापरिपूरितार्चितवभू[तनू] भास्वत्प्रतापोज्ज्वलौ ज्येष्ठो लक्ष्मणसंज्ञकः समभवत्तस्यानुजो रावणः ॥ २९ ॥
सर्वाशाः परिपूरयन्नपि हरंल्लोकेषु तापव्ययां शुष्म[ष्य]द्रुसुमनोव्रजानपि सुधाहस्तोदकैः पोषयन् ॥
वृष्टिं सत्कमलोद्भवामपि शुभां मुंचन्सदा रावणांभोदश्चित्रमिदं न यत्प्रकुरुते क्वापि क्षितौ दुर्दिनम् ॥ ३० ॥
विश्वप्रशस्तमहिमा गुणरत्नसिंधुस्त्रैलोक्यवंद्यपरमोत्तमधर्मबंधुः ॥
दिक्कामिनीहृदयमंडनकीर्तिहारः प्रोद्भाति रावण इह क्षितिलोकसारः ॥ ३१ ॥
प्रसूतोऽमरसिंहाख्यकासारात्कमलोपमः ॥ लक्ष्मणो भाति भूलोके करुणावरुणालयः ॥ ३२ ॥
जयति सदसि दक्षः क्षिप्तविद्वेषिपक्षः फलितसुकृतवृक्षः स्वीकृतश्रेष्ठशिक्षः ॥
यशसि विहितरक्षः सत्कृतात्मीयपक्षः सुधनविजितयक्षो लक्ष्मणः कल्पवृक्षः ॥ ३३ ॥
यस्योदारविवेकमंदरगिरिप्रक्षुब्धनानागुणाकूपारोत्थयशोविधुर्धवलयंस्त्रैलोक्यमुज्जृंभते ॥
अर्थिव्रातचकोरलोचनमुदं कुर्वन्नपीत्यद्भुतं यन्मित्रोदयमीहतो[ते]ऽत्र जनतातापं हरन्सर्वदा ॥ ३४ ॥
सौंदर्येन[ण] मनोभवो न हि यतो नो संयमिद्वेषणश्चंद्रो नैव यतः कलंकरहितो दस्रोऽपि नैको यतः ॥
भूमौ संचरतीति वामनयना चेतोहरं न क्षमा वक्तुं यं कवयोऽपि स क्षितितले प्रोद्भासते लक्ष्मणः ॥ ३५ ॥
प्राग्लीनो जलधौ चिरं तदनु यो जातः सुमेरोः शिरो वाञ्छामात्रफलप्रदः प्रकटितः स्तब्धश्च कल्पद्रुमः ॥
वांछातीतवसुप्रदोऽपि च मृदुर्नम्रः सदा लक्ष्मणस्त्रैलोक्ये प्रकटीभवन्निजगुणैस्तेनोपमेयः कथम् ॥ ३६ ॥
त्रैलोक्यप्रसरन्सुकीर्तिसलिलभ्राजत्यु[त्सु]शीलोल्लसद्वीचिव्रातपवित्रिताखिलजगत्प्रासूत यं निर्मलम् ॥
देवी मौलिकसंज्ञिका सुरसरित्प्रोद्यत्त्रिवर्गोदयं धर्मं मूर्त्तमिवोदितं स जयति श्रीमान्सदा लक्ष्मणः ॥ ३७ ॥
येनाकारि जनार्त्तिहारिणि नवग्रामे शुभा दीर्घिका नित्यं सज्जनमार्गणैकवसतिं यो धर्मशालां व्यधात् ॥
सोऽयं सर्वजनान्विलोक्य विविधातंकार्दितान्लक्ष्मणः कर्तुं तान्विरुजः करोति करुणासिंधुर्निबंधं शुभम् ॥ ३८ ॥
दृष्ट्वा सुश्रुतवाग्भटात्रिचरकाचार्योदिताः संहिता भेदाचार्यमतं विलोक्य बहुशः श्रीनित्यनाथादिभिः ॥
प्रोक्तं चापि विविच्य सर्वमखिलं सारं गृहीत्वा ततो ग्रंथं नाम सुलक्ष्मणोत्सवमिमं ब्रूते सुधीर्लक्ष्मणः ॥ ३९ ॥

च.—औदार्यगांभीर्यविवेकधैर्यदाक्षिण्यशीलादिगुणैककेतोः ॥ ज्येष्ठस्तनूजोमरसिंहनाम्नः सर्वातिदुष्पारसमुद्रसेतोः ॥
कायस्थमाथुरकुलाब्धिजकल्पवृक्षः श्रीलक्ष्मणः सकललोकहितैकदक्षः ॥
विद्वन्मुखेन कुरुते स्म शुभं निबंधं संतः समीकुरुत तत्र यदस्त्यबद्धम् ॥ युग्मम् ॥
आयुर्वेदपयोनिधेरभिनवं पीयूषसारं सुधां नीत्वा यं प्रकटीकरोति सकलं श्रीक्षेमशर्मा भिषक् ॥
तस्मादिदंदुमुदीरयन्नपि कविः स्याद्वेदशर्मा न किं तं सम्यग्लिखति स्म सन्मतिवरो व्यासश्च दामोदरः ॥
क्षोणीधन्वंतरिः साक्षादभवत्पुरुषोत्तमः ॥ क्रियमाणनिबंधस्य युक्तायुक्तविवेचकः ॥
अभूज्जगच्छ्रीरितिचारुसभ्यः सद्धर्मसाहित्यविवेकभव्यः ॥ आसीद्द्वितीयोऽत्र तथार्हदासः साधूत्तमः कीर्तिकृतप्रकाशः ॥
रसव्योमशरैंद्वंकैर्वीते विक्रमवत्सरे ॥ मार्यो[र्गे] शुक्ले हरिदिने पूर्णो ग्रंथो नवो बुधे ॥
कल्याणभाजः सकला भवंतु लोके घनो वर्षतु साधुकाले ॥ संतो लभंतां सततं यशांसि प्राप्नोतु धर्मो जयमत्र नित्यम् ॥
यावन्नीरनिधौ नीरं दिवि भानुनिशाकरौ ॥ क्षोणौ मेरुः कुलं तावल्लक्ष्मणस्येह नंदतात् ॥
इति श्रीमाथुरकायस्थवंशावतंसामरसिंहात्मजश्रीलक्ष्मणनामप्रथितो लक्ष्मणोत्सवग्रंथः समाप्तः ॥

४३१ वङ्गसेनः चिकित्सासारसंग्रहापरनामा-वङ्गसेनः ॥

आ.—नत्वा शिवं प्रथमतः प्रणिपत्य चंडीं वाग्देवतां तदनु तातपदं गुरूंश्च ॥
संगृह्यते किमपि यत्सुजनास्तदत्र चेतो विधातुमुचितं मदनुग्रहेण ॥ १ ॥
हे दुर्ज्जनाः परगुणेषु भवादृशानां द्वेषः किमेष सहजो गुणतापहारी ॥
यो वापि दैन्यफलभूरिफलात्तदानीं तादृग्विधस्य मिथुनस्य विमोचनाय ॥ २ ॥
कांतिकावासनिर्यासश्रीगदाधरसूनुना ॥ क्रियते वंगसेनेन चिकित्सासारसंग्रहः ॥ ३ ॥
च.—छिन्नोयुतोवनसकौतुकमीक्षिताना: ।..........
इति वैद्यश्रीगदाधरसेनसुतवैद्यविद्याचार्यश्रीवङ्गसेनोति ॥ ....
चतुर्द्दशसहस्राणि संख्या पंचशताधिका ॥ क्रियते वङ्गसेनेन चिकित्सासारसंग्रहः ।

४३२ वृन्दः-वृन्दः ।

आ.—ध्यात्वा शिवं परमतत्त्वविचारवेद्यं चंडीमभीष्टफलदां सगणं गणेशम् ॥
धन्वंतरिं मुनिवरं मुनिसुश्रुतादीनात्रेयमुग्रतपसं मनसा प्रणम्य ॥ १ ॥
नानामतप्रमथितं दृष्टि[र्वि]कल्पप्रयोगैः प्रस्तावक्यसहितैरिह सिद्धियोगः ॥
वृंदेन मंदमतिनात्महितार्थिनायं संलिख्यते गदविनिश्चयजः क्रमेण ॥ २ ॥
च.—इति वृंदः सम्पूर्णः ॥

४३३ वैद्यकदम्बम्-कदम्बः ।

आ.—लंबोदरं प्रणतभक्तजनानुकंपं विघ्नांधकारतरणिं (गणपं) प्रणम्य ॥
नानाविधप्रथितग्रंथसमुद्धृतं च वैद्येन मंदमतिना क्रियते कदंबम् ॥ १ ॥

च.—वैद्येनैव कदंबेन स्वनाम्नेदं कृतं शुभम् ॥ ९७ ॥
श्लोकाणि — — — — — —
इति कदंबनाम्ना महावैद्यमणिना कृतं वैद्यकदंब — — — — — — —

४३४ वैद्यचन्द्रोदयः-त्रिमल्लः ।

आ.—श्रीमत्सिंदूरपूरारुणतनुरतनुद्योतिविद्योतिताशो दानांभःपानलोभोपगतमधुकरश्रेणिमुच्चैर्दधानः ॥
बन्दीकृत्यांधकारार्भकविततिमिवावस्थितो बालभानुर्निर्विघ्नं विघ्नराजो वितरतु विपुलं सर्वदा मंगलं नः ॥ १ ॥
च.—हेमंते यद्यदुक्तं हितमिहभिषजा वासरे शैशिरेऽस्मिंस्तत्तत्सर्वं हिताय प्रभवति क[व]रुणात्प्राणिनां प्राणभूतम् ॥
किं चाप्यन्यत्सतूलीशयनमभिनवं प्राणरामाभिरामा श्रेयस्याः श्लक्ष्णचूर्णं रुचिरमगवजायुक्तमुक्तानुपानम् ॥
इति ऋतुचर्य्या ॥

४३५ वैद्यजीवनटीका-हरिनाथः ।

आ.—यस्यांघ्रिपंकजमरंदलिहोलयोऽमी व्यासादयो विविधवाङ्मयमाचिकीर्षुः ॥
भक्तार्तिदैत्यदलनाय कृतावतारो विघ्नं स नो नरहरिर्निखिलं निहन्यात् ॥ १ ॥
जम्बूद्वीपप्रथितसुयशोराशिरुद्भासितद्यौरब्धे राकापतिरिव हरेराविरासीद्द्विजेशः ॥
लक्ष्मीदासः सकलजगतां वंदनीयानुभावो ध्वस्तादानान्धकारः करगलदमृतानंदिताशेषविश्वः ॥ २ ॥
भक्त्या प्रसाद्य नृहरिं स तदीयपादपाथोजपूजनपवित्रविचित्रकीर्तिः ॥
गोस्वामितां समधिगम्य हरिप्रधानधर्म्मैः शशास वसुधां तपवर्त्मनिष्ठः ॥ ३ ॥
श्रीमन्मनोहर इति प्रथितः पृथिव्यां तस्यात्मजोऽखिलमहीपशिरःस्थरत्नैः ॥
प्रद्योतितांघ्रियुगलो भिषजाविपरयमापादि वैद्यरचनासु कृतश्रमोऽलम् ॥ ४ ॥
तस्यात्मजो निखिलवैद्यकतंत्रवेत्ता भेत्ता द्विषां प्रबलदुर्ज्जनमानछेत्ता ॥
लक्ष्मीनृसिंहकृपयाप्तसमस्तशर्म्मा टीकां व्यत्नीकल्पदिमां हरिनाथशर्म्मा ॥ ५ ॥
च.—इति श्रीमन्मनोहरसूनुहरिनाथकृतायां वैद्यजीवनटिकायां पंचमोऽयं विलासः ॥

४३६ वैद्यदर्पणः-प्राणनाथः ।

आ.—गीता मधुनिःस्फीता मुनिवृंदैरवितथा कथा यस्य ॥ रुचिजितनवजीमूतं प्रणवाहूतं महः कलये ॥ १ ॥
निरक्षरोऽप्यहो यस्य प्रसादात्साक्षरो भवेत् ॥ अबालविक्रमं बालं बटुकं तमुपाश्रये ॥ २ ॥
रुजां संशमनोपायः सुखं विज्ञायते यतः ॥ क्रियते प्राणनाथेन सोऽयं वैद्यस्य दर्प्पणः ॥ ३ ॥
च.—अन्यष्ट[अन्यष्ट]वस्विदुमिते सं[च]वत्सरे वैशाखमासस्य सितेतरे दले ॥
हरेस्तिथौ वासरे चंद्रपुत्रे संपूर्णमेतद्भिषगाख्यदर्प्पणम् ॥

४३७ वैद्यरत्नम्-शिवानन्दभट्टः ।

आ.—नारदादिमुनिवृंदसेविता पारदादपि नितांतमुज्ज्वला ॥ शारदामृतमरीचिभावना शारदा वसतु मे हृदंबुजे ॥ १ ॥

च.—इति श्रीगोस्वामिशिवानन्दभट्टविरचिते वैद्यरत्नेऽष्टमः प्रकाशः ॥ ८ ॥

४३८ वैद्यविलासः-राघवः ।

आ.—अलिकुलसंकुलगंडं धृतशशिखंडं वरादि[द]दोर्दण्डम् ॥ वंदे सुंदरशुंडं दानवचंडं द्विरदतुंडम् ॥ १ ॥

पुराविदां वीक्ष्य हि योगसारं सतां मुदे द्राग्गदखंडनाय ॥ सदुक्तिभाजां कविराघवेण वितन्यते वैद्यविलास एषः ॥ २ ॥

च.—ग्रहेन्दुरसचन्द्रे च १६१९ शके मासि च कार्तिके ॥ अयं वैद्यविलासश्च रचितो वृषवत्सरे ॥

किल बालमृगांककिराटदयादस्य गुणप्रतिभाविते ननु तर्कमुखाशिल वाग्रचा[वाग्रचना]घटिकशतपद्यनिषण्यामते ॥५२॥

मनोहरकुलांभोजरघुनाथविधोर्मुखः ॥ वागस्त्रैश्च रसज्ञानां हृत्पद्मविकसात्विह ॥ ५३ ॥

चंपावतीपुरनिवासवतादरेण संदर्भितश्च रघुनाथकवीश्वरेण ॥

मोदाय वैद्यविदुषां गदखंडनाय मान्यः सतां जयति वैद्यविलास एषः ॥ ५४ ॥

इति श्रीवैद्यविलासे महाकाव्ये कविकुलावतंसराघवकविकृतौ दशमस्तरंगः ॥ १० ॥ समाप्तोयं ग्रंथः ॥

४३९ वैद्यसर्वस्वम् ।

आ.—शिवं धन्वन्तरिं नत्वा वासुदेवं द्विजोत्तमः ॥ करोति वैद्यसर्वस्वं विलोक्य विविधागमम् ॥ १ ॥

अथ पाकावलीं वक्ष्ये कटुतिक्तादिभेषजैः ॥ विचिकित्सावतां नृणां राजसानां हिताय वै ॥ २ ॥

च.—जीर्णज्वरं तथा दाहं पीनसार्शांसि नाशयेत् ॥ अंगपुष्टिबलारोग्यजनको वीर्यवर्द्धनः ॥.........

४४० वैद्यामृतम्-मोरेश्वरः ।

आ.—नत्वा ब्रह्ममहेशविष्णुगिरिजानागास्यधन्वंतरीन्पूज्यान्सुश्रुतवाग्भट्टप्रभृतिकान्सर्वांश्च वैद्यान्गुरून् ॥

श्रीमन्माणिकभट्टवैद्यतनयो मोरेश्वराख्यो भिषङ्नानावैद्यमतं विलोक्य कुरुते वैद्यामृतं सुंदरम् ॥ १ ॥

च.—हुताशनाकाशरसेन्दुयुक्ते १६०३ संवत्सरे दुर्गतिनामभाजि ॥

वैद्यामृतं नाम दधान एष ग्रंथः स्मरारेः कृपया समाप्तिम् ॥ २४ ॥

इति महमदानगरस्थितमाणिकभट्टवैद्यात्मजमोरेश्वरविरचिते वैद्यामृते चतुर्थोऽलंकारः ॥

४४१ शतश्लोकीटीका-बोपदेवः ।

आ.—भैषज्यद्विजतारकाधिपतिः — — — — — — —

च.—देशानावरदातटवरमनः साप्याभिधानं महास्थानं वेदविदः सदग्रजगणाग्रण्याः सहस्रं द्विजाः ॥

तत्राभीष्टधनेशकेशवविधौ वैद्यो वरिष्ठः क्रमाच्चक्रे शिष्यसुतस्तपो कृतिमिति श्रीबोपदेवः कविः ॥

कैलाशाचलमौलिमंडनमणेर्नृत्योत्सवे यद्यशो गायंति त्रिदशांगनाः कलरणद्गंभीरतारस्वरैः ॥
चक्रे चंद्रकलांशुगोपितशतश्लोकीं पदोल्लासिनीं तत्त्रैलोक्यमहाकवीन्द्रतिलकः श्रीबोपदेवः कविः ॥ ४ ॥
इति बोपदेवविरचिता शतश्लोकीविवृतिः ॥

४४२ शार्ङ्गधरदीपिका-आढमल्लः ।

आ.—करशिरसाच्युतमीशं भवभवपुष्टिक्षयालयमुपायम् ॥ स्वर्गापवर्गयोरपि तापत्रयनाशनार्थमभिवंदे ॥ १ ॥
सगणगणेशं मतिदं विघ्नसमूहं च हंति यः स्मरणे ॥ तदनु गुरोरपि चरणं शरणं गदहीनमनुजानाम् ॥ २ ॥
ये दुर्ज्जनाः परगुणाननुसूचयंति तेऽपि स्वभाववशगाः किमु वारणीयाः ॥
ये शास्त्रबोधगुणदोषविचारदक्षास्ते सज्जनाः सुमतिभिः खलु वंदनीयाः ॥ ३ ॥
श्रीवास्तव्यकुलप्रकाशमणयो ये पूर्वजा विश्रुताः श्रीहम्मीरपुरे महाजनततो[नता]येषां स्थितिः कथ्यते ॥
ये कामं मदविह्वलोद्भवरविक्षीराक्षिकद्योगतः सत्साश्रय्यसुचंद्रकांतविततां प्रख्यातकीर्त्तिं गताः ॥ ४ ॥
तदन्वये किं बहुना प्रसिद्धः श्रीचक्रपाणिः कुलकैरवेन्दुः ॥ नानागुणालीयमभून्न यस्य समस्तवैद्ये घटनादिरूपा ॥
तस्य बुद्धिसुभगस्य तनूजो भावसिंह इति भूपतिमान्यः ॥
सुश्रुतादिकरहस्यविधिज्ञो यो यशांसि विपुलानि च लेभे ॥ ६ ॥
तस्यात्मजो दीर्धमतिः प्रहृष्टो नाम्नाढमल्लोल्पनिबंधदर्शी ॥ तेन स्वगुर्व्वर्च्चनतत्परेण विन्यस्यते शार्ङ्गधरप्रकाशः ॥ ७ ॥
केचिच्छास्त्रविशारदाः कतिपये दिव्यौषधीकोविदा नानाव्याधिपरीक्षणेषु चतुराः कर्मोत्सुकाश्चापरे ॥
कामं तानधिकर्त्तुमुत्सुकमना नाहं समर्थो यतस्तेषां सन्निधिमेत्य चात्र रचितं यत्किंचिदेव श्रुतम् ॥ ८ ॥
हस्ति[स्ती]कांतिपुरी परा पुरजितः काश्मीरविद्वज्जनैर्व्याप्ता यत्र सरःसरिद्गणवरा चर्म्मण्वती पापहा ॥
यस्या हृद्गतवासुदेवचरणद्वंद्वांबुजः क्ष्मापतिः ख्यातो धर्म इवास्ति धर्म्मगतिषु श्रीजैत्रसिंहः प्रभुः ॥ ९ ॥
तस्यां शार्ङ्गधरोक्तानां योगानां च प्रकाशिनी ॥ क्रियते चाढमल्लेन संहितायाः प्रदीपिका ॥ १० ॥
च.—एकादशसहस्राणि तथा द्वादश शतानि च ॥ श्लोकानामाढमल्लो हि पंजिकायां विनिर्ममे ॥ ३ ॥..........

४४३ सद्योगरत्नावली-गङ्गारामः ।

आ.—श्रीशमच्युतमनंतं चतुर्वर्गप्रदं विभुम् ॥ विश्वनाथमहं वंदे कारणं पुरुषोत्तमम् ॥
गिरिजानंदनं वंदे विघ्नं हंति [विघ्नहं तं] दिवाकरम् ॥ सर्वसिद्ध्येकदातारं गजवक्त्रं महाबलम् ॥
अगदागमगं सारं समुद्धृत्य यथामति ॥ गंगारामेण लिखिता सद्योगरत्नावली ॥
च.—विलोक्य सुश्रुताग्रुक्तशास्त्राणि विविधानि च ॥ स्वगदानि [नां] संग्रहोयं स्वकपोलकल्पितः [न कपोलविकल्पितः] ॥
महेशशक्तियंत्रितो गंगारामो यथा शुकः ॥ आयुर्वेदाब्धिगं रत्नं समुधृतकतावली [समुद्धृत्याकृतावलीम्] ॥
इति श्रीसद्योगरत्नावली समाप्ता ॥ पंचमः खंडः ॥

४४४ सन्निपातचन्द्रिका सटिप्पणीका । टि०-माणिक्यः ।

मू. आ.—अम्लस्निग्धोष्णतीक्ष्णैः कटुमधुररसातापसेवाकषायैः कामक्रोधातिरूक्षैर्गुरुतरपिशिताहारनीहारशीतैः ॥
शोकव्यायामचिताग्रहगणवनितात्यंतसेवाप्रसंगैः कुप्यंति — — पुंसां मधुसमयशरद्दर्पणे सन्निपाताः ॥ १ ॥

टि. आ.—नत्वा वैद्यपतिं शंभुं सन्निपातार्णवस्य च ॥ सनिदानचिकित्साया व्याख्यानं क्रियते मया ॥ १ ॥

मू. च.—जिह्वकेषोडशाहान्यभिन्यासे पक्षसंख्यया ॥ परमायुरिति प्रोक्तं तदर्वाग्वा मृतिर्भवेत् ॥ ६२ ॥

इति सन्निपातचंद्रिका समाप्ता ॥

टि. च.—टिप्पनं[णी] सन्निपातस्य माणिक्येन कृता खलु ॥ पद्मनाभात्मजेनैषा नामतः पदचंद्रिका ॥

इति सन्निपातपदचन्द्रिकायां सन्निपातार्णवः समाप्तः ॥

४४५ सर्वरोगनिदानम् ।

आ.—स जयति सिंधुरवदनो देवो यत्पादपंकजस्मरणम् ॥ वासरमणिरिव तमसां राशिं नाशयति विघ्नानाम् ॥ १ ॥

अथातः सर्वरोगनिदानं व्याख्यास्यामः ....

च.—जलसंत्रासनामानं दृष्टं तमपिवर्ज्जीयत् ॥ इति मूषिकाऽलर्कविषनिदानम् ॥

४४६ सर्वसंग्रहः ।

आ.—क्षीराब्धेरुत्थितं देवं पीतवस्त्रं चतुर्भुजम् ॥ वंदे धन्वन्तरिं नित्यं नानारोगनिषूदनम् ॥ १ ॥

देहादुत्पद्यते पुंसः पुरुषार्थचतुष्टयम् ॥ न नीरोगः स कुत्रापि स[त]च्छांतिस्तु चिकित्सया ॥ २ ॥

च.—आयुर्हिताहितं व्याधिनिदानं शमनं तथा ॥ विद्यते यत्र धीमाद्भिः स आयुर्वेद उच्यते ॥

ब्रह्मदक्षर्क्षदेवेन्द्रभूचंद्रार्कानिलानलाः ॥ ऋषयः सौषधिग्रामा भूतसंघाश्च पांतु वः ॥

इति श्रीसर्वसंग्रहः सम्पूर्णः ॥

४४७ सर्वौषधनिदानम्-भावमिश्रः ।

आ.—गजमुखममरप्रवरं सिद्धिकरं विघ्नहर्तारम् ॥ गुरुमनगमगयन[मागमनयन]प्रदमिष्टकरीमिष्टदेवतां वंदे ॥ १ ॥

परमोपयोगिकतिचिद्द्रव्याणां भावमिश्रेण ॥ संगृह्यते र[स्व]भावो नानामुनिभिः समाख्यातः ॥ २ ॥

च.—अथ पित्तस्य गुणाः ॥ पित्तमुष्णं द्रवपीवन्नालयवद्गुणोत्तरं कटुतिक्तरस — — — — —

४४८ सारसमुच्चयः-बिल्हणः ।

आ.—येन ज्ञानवता हिमालयतरुच्छायासु विक्रीडितं यः स्नातो हयपक्षवातशिशिरैर्गंगाजलैः पावनैः ॥

रेमे यस्तु तुरंगयूथजनितैर्नानाविधैर्ह्रेषितैः पायाद्वः स तुरंगघोषतनयः श्रीशालिहोत्रो मुनिः ॥ १ ॥

श्रीशालिहोत्रं जनुघोषपुत्रं महामुनीन्द्रं प्रणिपत्य तस्मात् ॥

श्रीमद्यशःपालसुतं चिकित्साविशारदं कल्हणमात्मतातम् ॥ २ ॥

श्रीशालिहोत्रादिमुनिप्रणीतशास्त्रोदधेः संग्रहणं विधाय ॥ विचार्य्य वस्तूनि च बिल्हणेन विरच्यते सारसमुच्चयोऽयम् ॥३॥

प्राक्शास्त्रविज्ञानविमूढबुद्धिः संक्षेपविज्ञानपरो भिषग्यः ॥ अस्मत्कृते सारसमुच्चयेऽस्मिन्बुद्धिं करिष्यत्यबुधो बुधो वा ॥ ४ ॥

च.—संकोचिता मारुतपूर्णरंध्रा प्रसार्यते सकुंचतीतिचाश्वा ॥ ३४ ॥

इति श्रीबिल्हणकृते सारसमुच्चये वाहनविधिः समाप्तः ॥

४४९ सिद्धमन्त्रः प्रकाशसहितः । प्र०-वोपदेवः ।

प्र. आ.—आरोग्यवैद्यनाथाभ्यां नमः सत्त्वादिसद्मना ॥ मातापितृभ्यां दातृभ्यामायुःसुखहिताहितम् ॥ १ ॥
येनोच्चारितमात्रेण पुरः स्फुरति भेषजम् ॥ सोऽयं चिकित्सकप्रीत्यै सिद्धमंत्रः प्रकाशते ॥ २ ॥
ग्रंथारंभे ग्रंथकृदभीष्टसिद्धये स्वेष्टदेवतामभिष्टौति.................

मू. आ.—आयुर्वेदसुधांभोधिसारमारणिका गिरः ॥ उल्लासितौषधग्रामा जयंत्यमृतजन्मनः ॥ १ ॥

प्र. च.—अनेकजन्माराधनेन संतुष्टारिंसहराजान्नरसिंहमूर्त्तदेवात्सर्वतः ॥ सन्मानं लेभे
धनेशाध्यापितो वेद पदौका: पितृकर्तृकः ॥ सिद्धमंत्रं विवृतवान्बोपदेवः सतां मुदे ॥
इति श्रीबोपदेवविरचितः सिद्धमंत्रप्रकाशः समाप्तः ॥

४५० अब्दरत्नम्-दुर्गासहायः ।

आ.—गणाधिपं विघ्नहरं जनानां प्रणम्य पादांबुजसेवकानाम् ॥ विलोक्य सत्प्रोदितमब्दरत्नं दैवज्ञकण्ठाभरणं तनोमि ॥ १ ॥
च.—उदारमतिरात्मधीर्विविधशास्त्रनिष्ठः प्रधीः सुधीभिरभिपूजितो विमलकीर्त्तिविद्योतितः ॥
विलासकृदुवास सत्पुरि विलासनामेशितुः सतोऽस्य सुखदं सताममलमब्दरत्नं व्यधात् ॥ ८८ ॥
इति श्रीदैवज्ञदुर्गासहायविरचिते अब्दरत्ने संज्ञाकृतिः समाप्ता ॥ संवत् १९१२ ॥

४५१ अमरभूषणम्-अमरसिंहः ।

आ.—प्रणिपत्य महादेवं शारदां च गणेश्वरम् ॥ वक्ष्येऽहं ज्यौतिषं शास्त्रं बालानां बुद्धिवर्द्धनम् ॥ १ ॥
विलोक्य नानामुनिनां[सं]मतानि संशोधितं सारसुसंग्रहं च ॥ कृते[तं]हितार्थं द्विजबालकानामबोधिनां सत्प्रतिबोधनाय ॥२॥
शास्त्रे शूरश्च दाता च पृथ्वीपालनतत्परः ॥ अमरसिंहो महाराजः क्षत्राणां नायको महान् ॥ ३ ॥
तन्नाम्ना च कृतो ग्रंथः पूर्वशास्त्रानुसारतः ॥ बालानां च विनोदाय बुद्धिवर्द्धनहेतवे ॥ ४ ॥
अत्र अंगभूतकालो निरूप्यते ज्योतिःशास्त्रे ॥ तत्र पंचाङ्गप्रकरणं प्रथमं प्रारभ्यते ॥.................

४५२ अरिष्टनवनीतं सटीकम् । मू०-नवनीतरामः । टी०-श्रीधरः ।

मू. आ.—श्रीरंगेशं नत्वा होराशास्त्राम्बुधीन्समालोच्य ॥ नवनीतनर्तनकविररिष्टनवनीतमाजन्हे ॥ १ ॥

टी. आ.—अरिष्टनवनीतं यद्धोराशास्त्रात्समुद्धृतम् ॥ व्याख्या विरच्यते तस्य श्रीधराख्या मनोहरा ॥
प्रथमं प्रबंधारंभे अभिमतदेवतां नमस्कृत्य प्रबंधसंज्ञां कर्तृसंज्ञां च प्रकाशयति ॥

मू. च.—दिक्स्थानकालादिपृथग्बलानि रिष्टेशतद्भंजकयोर्विमृश्य ॥ यस्याधिकं तद्बलमेव योज्यं समानतायामपरिष्टमेव ॥........

टी. च.—अत्रादिशब्देन चेष्टा नैसर्गिकी ह्युच्यते । अरिष्टेशः अरिष्टयोगेषु च यद्ग्रहोद्देशेनारिष्टमुक्तं सोरिष्टेशः तद्भंजकारिष्टापवादयोगेषु यद्ग्रहोद्देशेनारिष्टनाश उच्यते सोरिष्टभंजकः । (य)योरुभयोश्च स्थानदिकालचेष्टादिसंचितानि बलानि पृथग्बलान्याह कापिष्टलः । स्वोच्चसुहृत्स्वत्रिकोणनवांशैः स्थानबलं स्वगृहोपगतैश्च । इत्यादिना संक्षेपेणोक्तानि । श्रीपतिस्तु-

स्पष्टमाह । जे[ज्ञे]योऽत्र प्रथमं हि जन्मसमय इत्यादिना । एवमुक्तप्रकारे बलानि विचार्य रिष्टेशग्रहस्य बलमधिकं चेद्रिष्टमस्तीति जानीयात् रिष्टपदग्रहस्यबलमधिकं चेदरिष्टं नास्तीति । उभयोर्बलसाम्येऽपरिष्टमस्त्येव ॥
इत्यरिष्टनवनीतव्याख्यानेऽरिष्टापवादो नाम षष्ठः परिच्छेदः ॥

४५३ अष्टैश्वर्यफलम् ।

आ.—अष्टैश्वर्यफलं वक्ष्ये सर्वशास्त्रसमुद्धृतम् ॥ अत्र यामाष्टकफलं भूभुजामपि सर्वदा ॥ १ ॥
च.—मंदः स्यात्तत्र पापर्क्षे योगे वा राहुमंदयोः ॥ तत्र श्रीगुरुदृष्टिश्चेद्विरक्तो वा यतिर्भवेत् ॥ ९ ॥
इत्यष्टैश्वर्ये भोजनभक्त्यादिकं सम्पूर्णम् ॥

४५४ आखेटकचक्रम् ।

आ.—चक्रमाखेटकं वक्ष्ये मृगयासिद्धिदं नृणाम् ॥ पापारिष्टकरैर्योगैर्मृगयासिद्धिरुत्तमा ॥ १ ॥ ....

४५५ करणकण्ठीरवः-केशवः ।

आ.—कमलजकमलेशव्योमकेशार्कवाणीगजवदनगुरूणामंघ्रियुग्मं प्रणम्य ॥
गणककविकुलेन्दुः केशवः सत्प्रकारं सृजति करणमेतद्ब्रह्मसिद्धान्ततुल्यम् ॥ १ ॥
च.—अभूद्भरद्वाजमहर्षिवंशे विश्वावतंसे श्रुतिशास्त्रवेदी ॥ उदीच्यचारित्र्यपथप्रवर्त्ती जनार्दनो याज्ञिकचक्रवर्त्ती ॥ २९ ॥
अस्ति श्रियादित्य इति स्म तस्य सूनुः श्रियादित्य इति [इव] द्वितीयः ॥
त्रिस्कंधपारांगतरंगमल्लस्तदात्मजो राणिग इत्युदासे ॥ ३० ॥
जयादित्यस्तस्मादजनि गणकश्रेणितिलकः कनीयानस्यासीन्मतिरुचिरविः केशवकविः ॥
ततः कृष्णो ज्ञानी जलधिजलजंघालतपतीतटोत्तंसांवेनुस्त्रिनयनममीराजनगरम् ॥ ३१ ॥
श्रीकेशवेन कविना गणितार्णवांतर्विभ्रांतशिष्यकरुणातरुणार्जवेन ॥
चक्रेञ्जलिस्करदनस्यविकल्पकुंभीकंठीरवं रचयता करणं कृतिभ्यः ॥ ३२ ॥
अशंकं शिष्याणां विदधति विकल्पद्विपघटास्तटाक्षेपक्षोभैर्मतिसरसि तावत्कलुषताम् ॥
स यावद्गोलग्रहगहनमूर्छत्प्रतिरवः श्रवःपांथो न स्यान्मम करणकंठीरव[रवः] ॥ ३३ ॥
अभूद्गणकमंडलीमुखसरोजराजीविनीपतिर्जगति विश्रुतः श्रुतिविदां द्विजो राणिगः ॥
तदीयतनुजन्मना जलधिचुंबितापीपदप्रतेन करणे कृते भमुनिखेचराणां युतिः ॥ ३४ ॥
इति श्रीकेशवाचार्यविरचिते करणकंठीरवे नक्षत्रमुनिग्रहाणां युत्यधिकारो दशमः ॥ १० ॥ समाप्तोऽयं ग्रन्थः ॥

४५६ करणप्रकाशः-ब्रह्मदेवः ।

आ.—ब्रह्माच्युतत्रिनयनार्कशशांकभौमसौम्येज्यशुक्रशनिवागधिपागणेशान् ॥
नत्वाहमार्यभटशास्त्रसमं करोमि श्रीब्रह्मदेवगणकः करणप्रकाशम् ॥ १ ॥

च.–आसीत्पार्थिववृंदवंदितपदांभोजद्वयो माथुरः श्रीश्रीचंद्रबुधो गुणैकवसतिः ख्यातो द्विजेन्द्रः क्षितौ ॥
नत्वा तस्य सुतोंघ्रिपंकजयुगं खंडेंदुचूडामणेर्वृत्ते स्पष्टमिदं चकार करणं श्रीब्रह्मदेवः कृती ॥ ११० ॥
इति श्रीब्रह्मदैवज्ञगणकविरचिते करणप्रकाशे ग्रहयुद्धाधिकारो नवमः ॥ समाप्तश्चायं ग्रन्थः ॥

४५७ कालचक्रम्-वररुचिः ।

आ.–वन्देऽहं गोपिकानाथं भारतीं गणनायकम् ॥ पार्वत्यै कथितं पूर्वं कालचक्रं पिनाकिना ॥ १ ॥
तच्चक्रसारमुद्धृत्य लघुमार्गेण कथ्यते ॥ भूतैकविंशतिगिरियो ७ नवादिक् १० षोडशाब्दयः ॥ ४२ ॥
सूर्यादीनां क्रमादायूराशीनां स्वामिनां वशात् । ·········
नवमं दिनसंप्राप्तिर्गतिः सिंहावलोकने ॥

च.–संदेहमाप्नोति कन्याफलं मिथुनवत् तुला ॥ सर्वसंपत्करं लाभं मेदे[षे] शुक्रदशागमे ॥
इति श्रीकालचक्रं संपूर्णम् ॥

४५८ कुण्डलीकल्पतरुः-जागेश्वरः ।

आ.–श्रियं वक्रतुण्डं गुरूनसूर्यमुख्यान्ग्रहान्पद्मजं पद्मनाभं सुरेशम् ॥
हृदाहं च नत्वा नराणां हिताय प्रकुर्वे फलं भावजं सूक्तिव्यक्तम् ॥ १ ॥

च.–गुर्जरे गुरुतरे च सुदेशे नारदीपुरवासविलासी ॥ टागईश्वरपदं च यदीयं नाम तेन कृत एष निबंधः ॥ २५ ॥
इति श्रीकुण्डलीकल्पतरौ द्वादशभावज्ञानप्रकाशशाखा समाप्ता ॥

४५९ कृपापद्धतिः-देवकीनन्दनः ।

आ.–श्रियं गिरामेकनिदानभूतां निदानभूतामरवंद्यमानाम् ॥ सहस्रनिष्कल्मषपूर्णचन्द्रच्छविं जगन्मातरमानतोऽस्मि ॥ १ ॥
नतोऽस्मि तेषां च पदारविंदं न शक्यतेहो मनसापि येषाम् ॥ पयोनिधिर्गौरवसद्गुणानां विलंघितुं ख्यातधियां गुरूणाम्॥२॥
हृदि स्थिताः काश्चिदजीर्णयुक्तीः सुधीभ्य आलोकयितुं सुखाय ॥ अथामयाद्यागमसम्मतिस्थामहं कृपापद्धतिमातनोमि ॥३॥

च.–आसन्ने तुहिनाचलस्य कमठाद्रौ सोमनाथांतिके गोत्रे चांगिरसे बभूव सुकृती लक्ष्मीधरो दैववित् ॥
जीवानंद इति प्रथामधिगतः पुत्रो महादैववित्तस्याभूत्क्षोणिराजभाषितमहाभाष्यादिवाचस्पतिः ॥ ११ ॥
तत्पुत्रस्तच्चरणकमलद्वंद्वसंप्राप्तबोधः शाके षड्वह्निनगविधुमिते देवकीनंदनोऽहम् ॥
चैत्रे मासे व्यरचयमिमां पद्धतीनां कृपाख्यां भोअम्बैतत्कातिजसुकृतं पादयोस्तेऽर्पयेऽहम् ॥ १२ ॥
इति श्रीमन्महामाहिमजीवानंददैवज्ञतनयदेवकीनन्दनदैवज्ञविरचितायां कृपापद्धताविष्टशोधनं समाप्तम् ॥

४६० केशवीपद्धतिः प्रौढमनोरमाटीकासमेता । मू०-केशवः । टी०-दिवाकरः ।

टी. आ.–आदित्यमज्ञानघनांधकारच्छिदं मुदं संततमादधानम् ॥ जगत्प्रसूतिस्थितिनाशहेतुं श्रीभास्करं भास्वररूपमीडे ॥ १ ॥
विघ्नविघ्नमहं वंदे विघ्नपं विबुधार्चितम् ॥ यस्य स्मरणतः साध्यां सिद्धिं प्राप्नोति सत्वरम् ॥ २ ॥
श्रीकेशवार्यवचनानि जयंति तानि निर्दूषणानि बहलार्थसुपूरितानि ॥
धन्यानि शिष्यजनबुद्धिविवृद्धिदानि स्वल्पाक्षराणि बुधतोषविधायकानि ॥ ३ ॥

अपि स्फुरत्पंडितमंडितेन प्रचंडपांडित्यमखंडि येन ॥ ज्ञानाधिराजस्य गुरुं नृसिंहं प्रचंडचंडांशुमतिं तमीडे ॥ ४ ॥
श्रीमच्छिवाख्यं गणितज्ञचक्रचूडामणिं सज्जनवृंदवंद्यम् ॥
विदुर्विदो यं धिषणेन तुल्यं तं नौमि नित्यं धिषणाप्तिहेतोः ॥ ५ ॥
श्रीकेशवार्यैर्गगनाब्धिवृत्तबद्धोदिता जातकपद्धतिर्या ॥ तैरेव तस्या विवृतिः कृतास्ति परं न तत्रास्ति सुयुक्तिरुक्ता ॥ ६ ॥
संप्रार्थितः शिष्यगणेन युक्तिः कार्यातिवर्येति दिवाकरोऽहम् ॥
सवासनां तद्विवृतिं करोमि यत्ते[यतो]जनो मे सकलोऽपि रंज्यः ॥ ७ ॥
यद्यप्यशक्या विवृतिर्विधातुं मया जडेनामलकेशवोक्तेः ॥
तथापि कुर्वे शिवपादपद्मप्रसादतः प्रौढमनोरमाख्याम् ॥ ८ ॥
अथ श्रीकौशिकमुनिवरवंशोद्भवोऽपरपारावारतीरनिकटवर्तिनंदीग्रामनिवासकडमृत्ते[दमृते]श्वरसुंदरचरणकमलयुगलभजनावाप्तसमस्तविद्यः सकलागमाचायवर्यः सांवत्सराणि[णा]माचार्यः श्रीकमलाकरदैवज्ञनंदनः श्रीकेशवो ग्रहकौतुकादिगणितस्कंधं प्रथमतो विधिवद्य[द]वस्थाप्याधुना संक्षिप्ताक्षरवृत्तैर्निबद्धां बह्वर्थां सुलघुप्रक्रियां जातकपद्धतिं चिकीर्षुर्जन्मजन्मांतरार्जितदुरितोत्पन्नप्रत्यूहव्यूहनिरासनग्रंथसमाप्त्यर्थं समाप्तेऽपि ग्रन्थे तत्प्रचयगमनार्थं शिष्टाचारपरिपालनेन शिष्यशिक्षार्थं च नमस्कारलक्षणं मंगलमाचरन्ग्रंथारंभं शार्दूलविक्रीडितपूर्वार्द्धेन प्रतिजानीते ॥

मू. आ.—नत्वा विघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान्कुर्वे जातकपद्धतिं — — — — —

टी. च.—भास्वान् श्रीसूर्यः शिवो मद्गुरुः । शेषं स्पष्टम् ॥
शाके गजांभोधिशरेंदु१५४८तुल्ये सिद्धांतवित्प्रौढमनोरमाख्या ॥
दिवाकरोक्ता बुधकेशवोक्तेर्वृत्तिः सयुक्तिः समगात्समाप्तिम् ॥
इति श्रीसकलगणकचक्रचूडामणिश्रीकृष्णदैवज्ञसुतश्रीमन्नृसिंहगणकस्य सुतेन संप्रदायप्रवर्त्तकाचार्यश्रीमत्पितृव्यशिवैज्योतिर्विल्लब्ध(ब्ध)विद्येन दिवाकरेण विरचितायां श्रीमत्केशवसांवत्सरोक्तजातककर्मपद्धतेष्टीकायां सवासनायां प्रौढमनोरमाभिधायां ग्रंथसमाप्त्यलंकारः ॥

४६१ कौतुकलीलावती-रामचन्द्रः ।

आ.—नत्वा नारायणं रुद्रं गणेशं भारतीं गुरुम् ॥ सारोद्धारं प्रवक्ष्यामि ज्योतिषां क्षीरधेरिव ॥ १ ॥

च.—श्रीमालिज्ञातिविप्रेण विद्याधरसुतेन च ॥ व्यवहारनिबंधोऽयं रामेणाकृत कौतुकम् ॥ १ ॥
इति श्रीकौतुकलीलावत्यां भट्टरामचंद्रेण कृतो निबंधोऽयम् ॥ ....
पक्वे फले तु बीजानि निराख्ये प्रस्फुटं फलम् ॥ ....
इति श्रीकौतुकलीलावती समाप्ता ॥

४६२ क्रान्तिपातार्यात्रयं सविवरणम् । मू०-भास्करः । वि०-विश्वरूपः ।

मू. आ.—विषुवत्क्रान्तिबलयोः सम्पातः क्रांतिपातः स्यात् ॥ तद्भगणाः सौरोक्ता व्यस्ता अयुतत्रयं कल्प इति ॥ २ ॥

वि. आ.—गणेशं भारतीं नत्वा रामं नारायणं गुरुम् ॥ भास्करोक्तक्रान्तिपातार्यात्रयं विवृणोम्यहम् ॥ १ ॥

अथोपोद्घातसंगत्या क्रांतिपातस्वरूपमुपगीत्याह ॥ विषुवत्क्रान्तिबलयोः प्रागुक्तयोः सम्पातः संयोगाश्रितभ [भू] गोलप्रदेशविशेषः ॥ क्रान्तिविषुवद्वृत्तसम्पात इत्यत्र मध्याक्षरलोपात्क्रांतिपातः ॥

वि. च.—मया निष्काशितं ह्येतन्मरीचेः—ष्कतात्पृथक् ॥ एकनाथनिरासार्थं गणकानन्दहेतुकम् ॥ १ ॥

इति श्रीसकलगणकसार्वभौमरङ्गनाथगणकात्मजमुनीश्वरापरनामकविश्वरूपगणकविरचितं क्रांतिपाताधात्रयविवरणमेकनाथमुखभंजनं समाप्तिमगमत् ॥

४६३ गजयोगार्णवः ।

आ.—श्रीपार्वत्युवाच । देवदेव महादेव गजानामपि यो भवेत् ॥ यैर्योगैर्वद तं क्षिप्रं गजयोगार्णवाभिधम् ॥ १ ॥

ईश्वर उवाच । शृणु देवि प्रवक्ष्यामि गुह्यानां गुह्यमुत्तमम् ॥ न प्रकाश्यं न देयं वा कदापि ज्ञानहेतवे ॥ २ ॥

गुरूपदिष्टमार्गेण वक्तव्यं योगजं फलम् ॥ तथापि न प्रकाश्यं तु हृदिस्थं फलते ध्रुवम् ॥ ३ ॥

मया दत्तं गणेशाय गणपेनाच्युताय वै ॥ विष्णुना ब्रह्मणे दत्तं ब्रह्मणा गुरवे मुदा ॥ ४ ॥

गुरुणा दिननाथाय दिनेशेन प्रकाशितम् ॥ ततः कदाचित्कालेन मागधो द्विजपुंगवः ॥ ५ ॥

चरिष्यति तपस्तीव्रं दिनेशाभिमुखं सदा ॥ ततः कदाचिद्भगवान्दिवसो विश्वमूर्त्तिधृक् ॥ ६ ॥

प्रसन्नोऽस्मि द्विजश्रेष्ठ तीव्रेण तपसा च ते ॥ दास्याम्यद्य मुनिश्रेष्ठ वरं तेऽद्य सुनिश्चितम् ॥ ७ ॥

तस्याग्रे कथयामास सविता योगजं फलम् ॥ यत्तच्छृणु महादेवि वदाम्ययपशु (म्येव सु) निश्चितम् ॥ ८ ॥

श्रीसूर्य उवाच । शृणु विप्र महादेवादुपदेशं गणाधिपः ॥ प्रार्थ[प्राप]यं तं वदाम्यद्य भव सुस्थिरमानसः ॥ ९ ॥

जन्मलग्ने यदा कर्के कर्कांशे कर्कगे रवौ ॥ तत्रैव यामिनीनाथे स गजाधिपतिर्भवेत् ॥ १० ॥ ....

४६४ गणकमण्डनम्-नन्दिकेश्वरः ।

आ.—नत्वा दुर्गां गणेशं च श्रीमद्वेदांगरायजः ॥ नंदिकेश्वरसंज्ञोऽहं वक्ष्ये गणकमण्डनम् ॥ १ ॥

च.—इति श्रीमद्वेदांगरायात्मजनंदिकेश्वरविरचिते गणकमंडने गृहाद्यारंभः प्रवेशांतः सप्तमोऽध्यायः समाप्तः ॥

४६५ गणिततत्त्वचिन्तामणिः-दिवाकरः ।

आ.—अथ विघ्नविघाताय ग्रन्थकृन्निजगुरुप्रणामपूर्वकं मङ्गलमाचरति ॥

श्रीमच्छिवाख्यमिति स्पष्टम् । चिकीर्षितं प्रतिजानीते श्रीकेशवेति...............

च.—दिवाकराराधनलब्धबुद्धिर्दिवाकराख्यो नरसिंहसूनुः ॥ रम्यं निजोक्तेर्गणितस्य तत्त्वचिंतामणिं संरचयांबभूव ॥

यन्मयात्र समकारि कुत्रचित्त्वेकदेशिभर्त्त[मत]खंडनं वरम् ॥ तच्छिवस्य सुगुरोर्दयाभरालोकनप्रभववैभवं किल ॥

योयोडूपयुतोर्हितो भवति भं सैकं यमाभ्यां हतं मासः स्याच्छशिहीनितोऽग्निविहृतो वारो भवेत्तद्दलात् ॥

पक्षः स—तिर्युतिः शशिगुणैः ३१ रेयो हताकाश्वियुक्शाकः सर्वयुतिर्यदा नृपशतै रामैर्विहीना १२९७ तदा ३ ॥

सिद्धान्तसिद्धान्तविदग्रगण्यो दिवाकरो ग्रंथमिमं लिलेख ॥ यः शाचमन्नाम यतिर्द्विजेन्द्रो मन्यामहे विज्ञविदां वरं तम्॥

आक्रान्ता ननु बटुना जगत्त्रयीयं निर्वीर्यो मणिशकलेन जायतेत्रिः[ग्निः] ॥

आचांत: कलशभुवा सवाडवोऽब्धिर्दुर्ज्ञाना खलु विदुषां जनेन शक्तिः ॥
इति श्रीदिवाकरविरचितो गणिततत्त्वचिंतामणिः समाप्तः ॥

४६६ गणितलता-वल्लभः ।

आ.–शंकर ईश निशम्य वचः पुरुहूतमुखैः कथितं जगदीश्वर सिंधुरतुंडजनुःपरिसूचकमिंदुकरोज्ज्वलदिव्यकलेवर ॥
तेभ्य इमा मुदितो हरितो व्यतरोर्वसनानि निजानि दिगंबर देहि कवित्वविशेषचमत्कृतिमेकरदाश्रयणस्य विपद्धर ॥ १ ॥
निखिलगणितविद्याप्रभुं विभाकरं प्रणमामि ॥ तदनुवराहोदितवचःप्रसूहमेव भजामि ॥ २ ॥
ज्योतिर्विद्याधाम ब्रह्मगुप्तदेवो जयतु ॥ द्विजवरसकुलललामभास्करोऽपि भास्करगुणः ॥ ३ ॥
तेषां वचनैश्चोदितबुद्धेर्गणिते विलसितुमेव विशुद्धे ॥ भवत्युद्यतामिद्य मनीषा(शा)स्त्राभ्यासे यदप्यनिशा ॥ ४ ॥
श्रीवालाभिधदीक्षितैर्निजयशःशुक्लीकृताशांतरैर्भूदेवोपकृतींगितैश्च गुरुभिः पाटीविधौ दीक्षितः ॥
अंबाशंकरदीक्षितात्मजपटुः श्रीवल्लभो गुर्जरः पृथ्वीनिर्जर ईशदत्तधिषणो ग्रंथप्रबंधोद्यतः ॥ ५ ॥
विकसितरुचिशास्त्रकंजवृंदोत्कटमकरंदविमत्तचित्तवृत्तेः ॥
रसिकजनमधुव्रतस्य प्रीत्यै गणितलता भवतात्सुपुष्पिताग्रा ॥ ६ ॥
च.–इति गणितलतायां विपुलरसायां श्रीवल्लभगणकेन वरैः कलवृत्तदलाढ्यैः पंचसुकुसुमैः संयुक्तं मधुगंधधरैः ॥
मुनिखेंदुसमानैः सुललितगानै रचितायां वृत्तै रम्यं प्रकीर्णसंज्ञकं पंचमसंख्यं स्तबकमिदं सुजनैर्गम्यम् ॥ १०७ ॥
इति प्रकीर्णस्तबकः पंचमः ॥ ५ ॥
इति गणितलतेयं सप्तरामेषुवृत्तै रसभुजसुमनोभिः संयुता पंचगुच्छैः ॥
मुदितहृदय एनामभ्यसेन्मानुषो यो दिशतु बहुलभव्यं तस्य गौरीगिरीशः ॥ ५३७ ॥
इति श्रीवल्लभगणककृता गणितलता समाप्ता ॥

४६७ गार्गीय(वृद्धगार्गीय)संहिता ।

आ.–जगद्विधात्रे तमसां निहंत्रे गोप्त्रे प्रजानां फलसंप्रदात्रे ॥ गंत्रे क्षणं स्रोतसि भावकर्त्रे तस्मै नमो धीविधये सवित्रे ॥ १ ॥
अथातः संवत्सरनिर्देशं व्याख्यास्यामः । तदा सस्यमनारोग्यमनावृष्टिं च निर्दिशेत् ॥ ....
वृद्धगर्गकृते ज्यौतिषे मयूरचित्रके ....
अथ नक्षत्रारिष्टाध्यायं व्याख्यास्यामः..................
च.–भरण्यां दुःखमाप्नोति सुदारुणमिति ॥ २३ ॥
इति वृद्धगार्गीयसंहितायां ज्योतिःशास्त्रे मयूरचित्रके नक्षत्रारिष्टकनामाध्यायः ॥ ६६ ॥
वृद्धगर्गेण कृता चेयं गार्गीयसंहिता संपूर्णा मया लिखिता ॥ संवत् १९१२ ॥

४६८ गौनमजातकं सटीकम् । टी०-लक्ष्मीपतिः ।

टी. आ.–गणपदिनपपार्वतीश[र]मेशप्रकृतिगुरूनतिभक्तितः प्रणम्य ॥
लिखति मतिमतां सुखाय कश्चिन्मुनिवचनैर्मुनिगौतमोक्तभाष्यम् ॥

अथ परमकारुणिको मुनिर्गौतमः शिष्टाचारं परिपालयन् जगदादिकारणं प्रणमन् ग्रंथस्य समूलकत्वमभिव्यंजयन्-शिष्यप्रशिष्यान्शिक्षयन्प्रत्यूहव्यूहनिर्मूलनपूर्वकग्रंथपरिसमाप्तिमभिलषन्मंगलमाचरति ॥

मू. आ.—क्षुब्धप्रकृतिपुरुषाभ्यामिति ॥..................

टी. च.—एवमित्यनेन ग्रन्थोपसंहार इति ॥ ३१ ॥

गौतमोदितसूक्तस्य टिप्पणं यन्मया कृतम् ॥ योग्यायोग्यं विचार्यैतच्छोधनीय विचक्षणैः ॥ १ ॥

इति मुनिगौतमसूक्तपद्यटीका गुरुपदसत्कृपया यथाकथंचित् ॥

गुरुमुखसुश्रुततत्त्वसारमध्वामनसि निधाय विनिर्मिता किलेयम् ॥ २ ॥

वृत्त्या शंभुवलीवर्दो जात्या ब्राह्मणपुङ्गवः ॥ नाम्ना लक्ष्मीपतिः ख्यातष्टीकेयं तेन निर्मिता ॥ ३ ॥

इति लक्ष्मीपतिशर्म्मणा कृतेयं सुजनसुखाय च गौतमप्रसादात् ॥

उपहासाय च दुर्जनस्य भूयात्फलकथनाय विचारसारवीनाम् ॥ ४ ॥

इति गौतमवाक्यार्थानुमानायोपलब्धिदाम् ॥ काशिवासी द्विजः कश्चिदकरोच्छंभुतुष्टये ॥ ५ ॥

गौतमस्य कृपादृष्ट्या विश्वेशप्रीतये मया ॥ लिखितेयं क्रीडनाय बालानां धीमतां मुदे ॥ ६ ॥

४६९ ग्रहकल्पतरोष्टीका-रघुनाथः ।

आ.—श्रीगणेशं नमस्कृत्य देवेंद्रैर्वंदितं पदम् [सदा] ॥ ग्रहकल्पतरोर्व्याख्या रघुनाथेन रच्यते ॥ नत्वेति..........

च.—ब्रह्मणो गणनया जातः पर्वेशोग्निः ॥ इति कल्पतरोटीका समाप्ता ॥

४७० ग्रहकौस्तुभः-मापिदासः ।

आ.—विभुर्जयति सद्भुजः स्फुरदधिज्यचापेषुभिः प्रभग्नखलपद्धतिर्निगमपद्धतिः सद्धितः ॥

गुरुर्गुरुमतानुगः सकलसाध्यसिद्धिप्रदः समीकृतसमागणो रघुपतिर्निबंधोऽप्ययम् ॥ १ ॥

अन्यत्र कर्म्माधिकतां बहुत्वं प्रत्यक्षवाचां च विलोक्य सारम् ॥ श्रीमापिदासो ग्रहकौस्तुभाख्यं सौरानुसारं करणं करोति ॥२॥

च.—इत्थं मया विबुधरामगुरोः प्रसादात्सिद्धांततत्त्वमनुकीर्तितमब्धिरूपम् ॥

निर्मथ्य दर्शितमनेन परावरेशो तुष्टो विभुर्भवतु शिष्यसुबुद्धिवृद्ध्यै ॥ ११ ॥

कंठे विलंब्य नितरां मुदितस्वभावस्त्वाद्यन्तविद्विविदिषुः समयाववुद्धः ॥

प्रौडेल्प[प्रौढेल्य]बुद्धिविबुधेशसदोगतः सन्विभ्राजतां हरिरिव ग्रहकौस्तुभेन ॥ १२ ॥

योऽभूद्गुर्जरदेशजो गणितवित्तापीतनूजोऽशुमानौदीच्यः सुसहस्रवंशतिलकः शांडिल्यगोत्रो द्विजः ॥

नाम्नापि प्रथितः प्रयाग इति तत्सूनुः स रामात्सधीश्चक्रे च ग्रहकौस्तुभं बुधमुदे श्रीमापिदासः कृती ॥ १३ ॥

इति श्रीसूर्यसिद्धान्ततुल्ये श्रीग्रहकौस्तुभे मापिदासकृतौ पातसाधनम् ॥

४७१ चन्द्रप्रदीपिका ।

आ.—अश्विन्यादि लिखेद्द[द्द]क्षं सव्यापसव्यमेव च ॥ साभिजित्सहितं लेख्यं यात्राचन्द्रप्रदीपनम् ॥ १ ॥

च.—भंगो मृत्युविनाशाय जायते नात्र संशयः ॥ १६ ॥ इति चन्द्रप्रदीपिका ॥

४७२ चन्द्रोन्मीलनम् ।

आ.—दितितनयक्षतविहिताकृतवाहिन्या मृगेंद्रवाहिन्याः ॥ सकलचराचरशिरसि स्फुरितपरागं पदं नौमि ॥ १ ॥
करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ॥ हंसारूढां वीणावादनशीलां नमामि तां वाणीम् ॥ २ ॥
पाषाणान्निःसृताः सर्वे हिरण्याद्या यथाक्रमम् ॥ तथा हि सर्वशास्त्राणां सारभूतं मयोदितम् ॥ ३ ॥
अतीतानागतं चैव वर्त्तमानं शुभाशुभम् ॥ लाभो हानिर्जयो युद्धे अपमृत्युर्धनागमः ॥ ४ ॥
मनोमध्ये च या चिंता मुष्टिभेदोप्यनेकधा ॥ लूका च द्रव्यशल्यं च ग्रामनाम च तस्करः ॥ ५ ॥
दिशो भेदश्च ज्ञातव्यं सकलं निश्चलानि च ॥ गमनागमनं चैव यादृशं यस्य कर्म च ॥ ६ ॥
आतुरे व्याधिरूपं च गर्भश्च प्रसवः स्त्रियाः ॥ मृगयां कुरुते यत्र आस्वादो भोजने तथा ॥ ७ ॥
कोट्टभंगश्च दुर्भिक्षं प्रावृट्च जलदागमः ॥ छत्रभंगो नरेंद्राणां राष्ट्रभंगस्य लक्षणम् ॥ ८ ॥
वापीकूपजलोद्देशमुद्यानं मठमंदिरम् ॥ त्रिशतं षष्टिसंयुक्तं चार्थकाण्डस्य निश्चितम् ॥ ९ ॥
गजादिसर्वजीवेषु वाणिज्ये क्रयविक्रयम् ॥ परोक्षे मंत्रभूपानां पत्रलेख्यं समुद्रितम् ॥ १० ॥
पारधीरमते यत्र जीवमृत्युमुपेक्षया ॥ नृपस्य संधियुक्तस्योद्वाहो नष्टं च जातकम् ॥ ११ ॥
भूमिभागश्च ज्ञातव्यं सफलं निष्फलं च यत् ॥ मंत्रिभावो यथा राज्ञः स्त्रीपुरुषनपुंसकम् ॥ १२ ॥
अन्यजन्मनि या योनिः स्वर्गपातालमेव च ॥ मृतः स गच्छते यत्र मुक्तिः स्वर्नरकाभिधाः ॥ १३ ॥
अन्यत्र त्रिषु लोकेषु वर्तते सुरदानवाः ॥ उद्धृतं तन्मया ज्ञानं ज्ञातव्यं च चराचरम् ॥ १४ ॥
समुद्रस्थं यथा रत्नं पुष्पमध्ये यथा मधु ॥ तथा हि सर्वशास्त्राणां सारभूतं मयोदितम् ॥ १५ ॥
दृष्ट्वा चक्राण्यनेकानि कोटिभेदशतानि च ॥ तेन दृष्टेन मार्गेण चंद्रोन्मीलनभाषितम् ॥ १६ ॥
इति चंद्रोन्मीलने मूलतत्त्वसंबंधं प्रकरणम् ॥ १ ॥
अत उर्ध्वं प्रवक्ष्यामि वर्गवर्णं यथाविधि ॥ एकैकस्य यथा भेदं कथयामि न संशयः ॥ २ ॥
उत्तरं चाधरं चैव — — — — — — — — — —

च.—इति श्रीचंद्रोन्मीलनाख्यग्रंथः समाप्तः ॥ संवत् १९०७ ॥

४७३ चन्द्रोन्मीलनदीपिका प्रभानाम्नी ।

आ.—शङ्करजगदंबिकयोरंके पङ्क — — — न खेलन्तम् ॥ लम्बोदरमवलम्बे यं न वेद तत्त्वतो वेदः ॥ १ ॥
हेतवे जगतामेव संसारार्णवसेतवे ॥ प्रभवे सर्वविद्यानां शंभवे गुरवे नमः ॥ २ ॥
अमरीकबरीभारभ्रमरीमुखरीकृतम् ॥ दूरीकरोतु दुरितं गौरीचरणपङ्कजम् ॥ ३ ॥
श्रीचंद्रोन्मीलनव्याख्या प्रभाख्या भासते यदि ॥ हृदि संख्यावतां संख्या कुत्र कुत्र न जायते ॥ ४ ॥
संपूर्णाविप्युपोद्घाताध्यायौ स्पष्टत्वान्न व्याख्यातौ ॥
इदानीमुत्तराधरसंज्ञां बध्नाति प्रथमेति। प्रथमवर्गाक्षरास्तृतीयवर्गाक्षरा उत्तराक्षराः ते केअएकचटतपयशाः ॥ प्रथमो वर्गः॥

च.—इति चंद्रोन्मीलनदीपिकायां वाप्यादिषु जलनिर्णयः ॥ सप्तविंशतिः पटलः ॥ २७ ॥

४७४ चन्द्रोन्मीलनदीपिकाया उदाहरणम् ।

आ.—इदानीमुत्तरसंज्ञां वक्ष्ये प्रथमेति। प्रथमवर्गे तृतीयवर्गाक्षरयोगेति । ते के । अएकचटतपयशाः । प्रथमवर्गाः इउगजड-दवलसा ॥ तृतीयवर्गाः । एते परस्परयुक्ता यत्र दृश्यंते त एवोत्तराख्याः । इदानीं अधराः कथ्यन्ते ॥ ....

च.—इति श्रीचंद्रोन्मीलनदीपिकाया उदाहरणं सम्पूर्णम् ॥

४७५ चूडामणिसारः-लक्ष्मणभट्टः ।

आ.—नमस्कृत्य परं देवं ज्ञानमूर्तिं सनातनम् ॥ अव्यक्तं सर्वगं सूक्ष्मं व्योमव्यापिनमीश्वरम् ॥ १ ॥
पुरा प्रोक्तमिदं ज्ञानमनेनाव्यक्तमूर्त्तिना ॥ चूडामणिश्च नामेदं सर्वप्रत्ययकारकम् ॥ २ ॥
तस्यार्थसुखबोधाय संक्षेपात्सारमुद्धृतम् ॥ नानाचूडामणेः सारं भट्टलक्ष्मणनिर्मितम् ॥ ३ ॥
बहुभिर्ग्रंथभेदैश्च ज्योतिर्ज्ञानैः स्वरोदयैः ॥ शारीरैः शाकुनैर्ज्ञानैः प्रोक्तं ज्ञानमनेकधा ॥ ४ ॥
सर्वेषामेव ज्ञानानामुत्तमं सर्वमूर्द्धनि ॥ स्थितं चूडामणेः सारं नृपादीनां सुखप्रदम् ॥ ५ ॥
ज्ञानदीपकमादाय वर्तिं कृत्वा सदाक्षरैः ॥ स्वरस्नेहेन संयोज्य ज्वालयेदुत्तराधरैः ॥ ६ ॥
एनं दीपकमादाय त्रैलोक्यं दृश्यते स्फुटम् ॥ प्रवक्ष्यामि विधानेन व्यापारं भुवनत्रये ॥ ७ ॥

च.—अधरैश्च भवेद्धानिः शिवाकाले विशेषतः ॥
इति श्रीचूडामणिसारे सटिप्पणीके भट्टलक्ष्मणविरचिते वर्णधर्मप्रकरणं समाप्तम् ॥

४७६ जातककामधेनुः ।

आं.—त्रिभुवनजननं त्रिलोकदीपं त्रिभुवनपालनतत्परं दिनेशम् ॥
तनुसुखभवनाधिपाश्रितोत्थं निखिलगृहेषु फलं मिथः प्रवक्ष्ये ॥ १ ॥

च.—सुभोजनो जीवधनाम्बरान्वितो नरः स्ववंशस्य सुधर्मतत्परः ॥ १२ ॥
इति जातककामधेनौ लग्नादिमान्त्यभावस्थितद्वादशभावेशफलनिरूपणाध्यायः ॥ १ ॥ संवत् १९१२ ॥

४७७ जातकचन्द्रिका-व्येङ्कटेशः ।

आ.—सिद्धान्तमौपनिषदं शुद्धांतं परमेष्ठिनः ॥ शोणाधरं महः किंचिद्वीणाधरमुपास्महे ॥ १ ॥
फलानि नक्षत्रदशाप्रकारेण विवृण्महे ॥ [दशा] विंशोत्तरी चात्र ज्ञेया न[ना]ष्टोत्तरी मता ॥ २ ॥
वयं पाराशरीहोरामनुसृत्य यथामति ॥ उडुदायप्रदीपाख्यं कु[कु]र्मो दैवविदां मुदे ॥ ३ ॥

च.—यज्ञनारायणेत्याख्या यायजूकतनूद्भवा ॥ श्रीव्येंकटेशेन कृता शुभा जातकचन्द्रिका ॥ ७६ ॥
इति श्रीकेरलशास्त्रे पाराशरीमतानुसारेण जातकचन्द्रिका समाप्ता ॥

४७८ जातकपद्धतिः-दिवाकरः ।

आ.—श्रीमच्छिवाख्यं गणितज्ञचक्रचूडामणिं सज्जनवृंदवंद्यम् ॥
विदुर्विदो यं धिषणेन तुल्यं तं नौमि नित्यं धिषणाप्तिहेतोः ॥ १ ॥
श्रीकेशवश्रीपतिसुंदरादिप्रणीततंत्रादधिगम्य सारम् ॥
प्रकाश्यते सुज्ञदिवाकरेण पद्यांशुभिर्जातकमार्गपटनम् [पाटी] ॥ २ ॥
च.—१०४ इति दिवाकरकृता जातकपद्धतिः ॥ संवत् १९१२ ॥

४७९ जातकपद्धतिकल्पवल्ली-विठ्ठलः ।

आ.—गौरीं च गौरीपतिमादरेण गौरीसुतं च प्रणिधाय चित्ते ॥ तोषाय होराविदुषां तनोति श्रीविठ्ठलः पद्धतिकल्पवल्लीम् ॥ १ ॥
च.—कृष्णात्रिगोत्रे सुतरां पवित्रे पवित्रशर्म्माजनि बूबशर्म्मा ॥ तत्सूनुना विठ्ठलदीक्षितेन चक्रे लघुः पद्धतिकल्पवल्ली ॥ १२ ॥
होरापथे हौरिकपांथवृन्दश्रमच्छिदे विठ्ठलरोपितायाम् ॥ समुल्लसत्पद्धतिकल्पवल्ल्यां दशाद्यमेतत्कुसुमं समाप्तम् ॥ ५ ॥
वृत्तसंख्या ६४ इति श्री० ॥ संवत् १९१२ ॥

४८० जातकपारिजातः-वैद्यनाथः ।

आ.—अथाष्टकवर्गः
चक्रं विलिख्य सह लग्नदिवाकराद्यैः सूर्यादिलग्नभवनात[च]वियचराणाम् ॥
वाक्याष्टकोपगतवर्णवियोजिताश्चेद्भिन्नाष्टवर्गजनिताखिलविंदविण्णु ॥ १ ॥
श्रीवैद्यनाथकृतजातक[पारिजात]पाराशरादिफलसाररसोपयाते ॥
प्रस्तारभिन्नसमुदायकबिंदुशीलः संकीर्त्तितस्तु सकलद्युचरप्रसादात् ॥ ७१ ॥
इति दशमोध्यायः ॥ अथ कालचक्रगतिः ॥
प्रणम्य परमानंदं शिवं परमकारणम् ॥ खेचरे चक्रमध्यस्थं चतुःषष्टिकलात्मकम् ॥ १ ॥
तं दृष्ट्वा देवदेवेशमीश्वरं सर्वमंगलाम् ॥ कालचक्रगतिं सर्वां विस्तराद्वद मे प्रभो ॥ २ ॥
ईश्वर उवाच ॥..........
च.—इति पाकेष्वखिलेषु चिंतयेत् ॥ १११ ॥ इति श्रीजातकपारिजाते कालचक्राध्यायः ॥

४८१ जातकसारदीपः-नृहरिः ।

आ.—यद्भासा खलु नैशमंधतमसं विध्वंसमेति क्षणाचंद्रादीनि तथाम्बुगोलकमयान्यृक्षाणि दीव्यन्ति च ॥
यो विश्वोद्भवसंस्थितिप्रलयकृत्तत्त्वं परं योगिनां द्राग्वाचं प्रकटीकरोतु भगवांस्त्रैलोक्यदीपो रविः ॥ १ ॥
प्रोक्तानि होरागणितानि पूर्वैर्वसिष्ठगर्ग्गात्रिपराशराद्यैः ॥ वराहलल्लप्रमुखैश्च तेषु फलक्रमो नैव कृतो हि यस्मात् ॥ २ ॥
सारावली जातकशास्त्रतोऽपि होराप्रदापादपि जन्मदीपात् ॥ आदाय सारं यवनादिशास्त्रात्फलक्रमार्थं खलु जन्मपत्र्याः ॥ ३ ॥
निजजा[ता]तपदारविन्दयुग्मं स्वमनोनीरजपञ्जरे निधाय ॥ लिखनक्रमसंयुतं प्रवक्ष्ये नृहरिर्जातकसारदीपमस्मात् ॥ ४ ॥
च.—जातकदीपिकायां — — — — — — दावुरानयलो — — — — —

४८२ जातकादेशः-दामोदरः ।

आ.–तं ढुंढिं हृदये स्वीये भावयामि पुनः पुनः ॥ भक्त्या पश्यंति कार्यादौ प्रसन्नमुखपंकजम् ॥ १ ॥
प्रश्नकालधरागोलोत्पातानां च स्वरस्य च ॥ मुहूर्तानां तथादेशमुक्ता वक्ष्येऽथ जातकम् ॥ २ ॥
च.–आदेशोऽयं जातकस्य यथाबुद्धि प्रकाशितः ॥ ढुंढिराजप्रसादेन श्रीमद्भास्करतुष्टये ॥ ५० ॥
इति श्रीदैवज्ञदामोदरकृतजातकादेशे स्त्रीजातकाधिकारोऽष्टाविंशः ॥ समाप्तोऽयं जातकादेशः ॥

४८३ जैमिनीयसूत्राणि ।

आ.–उपदेशं व्याख्यास्यामः । अभि पश्यन्पृ[नृ]क्षाणि पार्श्वभे च । तन्निष्ठाश्च तद्वत् ....
च.–बुधकेतुरवी [केतू रवि] शुभचंद्राभ्यां स्वलग्ननाथश्च ॥ ....
इति जैमिनीये उपदेशसूत्रे वियोनिभेदो नाम चतुर्थाध्यायस्य चतुर्थपादः ॥ समाप्तोऽध्यायोऽयम् ॥

४८४ जैमिनीयसूत्राणां टीका-कृष्णानन्दसरस्वती ।

आ.–भूमानं पुरुषार्थसारमखिलाधारं प्रकाशं परं सीमानं भवसागरस्य सकलानंदामृतांभोनिधिम् ॥
सन्मानं सततं प्रमाणपदवीदूरं विदूरं हृदि स्वात्मानं श्रुतिशेखरैकहृदयं स्फूर्तिस्वरूपं श्रये ॥ १ ॥
भावयामो हृदि श्रीमद्गोपालानंददेशिकम् ॥ श्रीमत्स्वयंप्रकाशार्यान् श्रीश्रीधरगुरूनपि ॥ २ ॥
सम्यग्व्यंजयितुं समस्तजगतां कर्मानुरूपं फलं संपूर्णानि विचित्रभावनिचयैर्नानाविधैर्व्याचिनोत् ॥
सूत्राणि स्फुरिताखिलर्षिहृदयाकूतानि योऽसौ मुनिः सोऽयं नः पुरतः सदा विजयतां साम्नां खनिर्जैमिनिः ॥ ३ ॥
कैलासाधिपतिं बटुं ननु महादेवाभिधं मोदयन्नाचार्यो द्रमिलो नवः श्रुतिपुरीनेता यतिर्बालकः ॥
स्कंधे जातकनाम्नि जैमिनिमुनींद्रेणाहृते सर्वतः कृष्णानन्दसरस्वती वितनुते भावस्य संशोधनम् ॥ ४ ॥
उपदेशमित्यादि जैमिनीयसूत्रनिकरमयं जातकं तस्याल्पग्रंथा विवृतिरारभ्यते ॥
च.–सर्वमपि विचारणीयमिति दिक् ॥ इत्युपदेशसूत्रे जैमिनीये तृतीयपादविवृतिः ॥ संवत् १८१२ ॥

४८५ जैमिनीयसूत्राणां टीका-व्येङ्कटेशः ।

आ.–विष्णोः पादपयोरुहं प्रतिदिनं प्रक्षालयंती पुनः खेलंती हरमूर्ध्नि पातकपरानप्यूर्ध्वयंती नरान् ॥
कालिंद्या सह संगता किल चतुर्वर्गान्दिशंती भृशं भूयाद्भूधरभूषणं भुवनभूर्भव्याय वो भीष्मसूः ॥ १ ॥
अभ्यस्तशास्त्रजाला यशोविशाला विधूतकलिकालाः ॥ ध्यातश्रीशिवचरणा वोमैय्याख्या जयंति पितृचरणाः ॥ २ ॥
श्रीमद्गंगाधराख्यद्विजवरतनयो ज्यौतिषांभोधिपारावारिणो दाक्षिणात्यो निखिलबलमहीपालकप्रेमभावः ॥
नत्वा सोमेश्वराख्यांघ्रियुगसरसिजे जातके जैमिनीये व्याख्यां कुर्वेऽर्थरम्यां विशदसुवचनैर्व्यंकटेशाभिधानः ॥ ३ ॥
उपदेशमित्यादि जैमिनीयसूत्रनिकरमयं जातकं तस्याल्पग्रंथा विवृतिरारभ्यते ।
उपदेशं व्याख्यास्यामः । उपदिश्यत इत्युपदेशो रहस्यार्थः ।
च.–इति श्रीव्येंकटेशविरचितायां जैमिनीयसूत्रव्याख्यायां द्वितीयाध्यायस्य चतुर्थः पादः ॥ समाप्तोऽयं ग्रंथः ॥

४८६ ज्योतिःसारः-कीर्त्तिकरः ।

आ.—यस्मिन्नभ्युदितेऽभ्युदेति भुवनं यत्रास्तभाजि व्रजत्यस्तं ध्वस्तसमस्तदुस्तरतमस्तोमाब्धिपूरोदरे ॥
यद्दोषागमने तनोति सद्दशामाशु प्रसन्नां दृशं ज्योतिर्भ्रांतिहरं हरेस्तदमलं भूयात्सतां भूतये ॥ १ ॥
अनेकतंत्रसिद्धांतनितांतासक्तचेतसाम् ॥ ज्योतिर्विदां मुदेऽस्माभिः क्रियते सारसागरः ॥ २ ॥
मांडव्यगर्गादिमुनिप्रणीतं ग्रंथार्थतत्त्वं विदुषां वचांसि ॥ आचिन्वतो लल्लवराहभोजादीनां न मे चापलमस्ति तत्र ॥३॥······

४८७ ज्योतिःसारसंग्रहः ।

आ.—नत्वा श्रीकृष्णचंद्रं नवघनरुचिरं श्यामलं वेणुहस्तं देवीं लक्ष्मीं तथा श्रीं करधृतकमलां शंकरं लोकपूज्यम् ॥
वाणीं सूर्यं सुरेशं गणपतिसहितं श्रीगुरुं ज्ञानमूर्तिं कुर्वे ज्योतिर्विदां वै सकलशुभकरं[रीं] संहितां ज्यौतिषस्य ॥ १ ॥
त्रिकालज्ञानसंदर्शी श्रीभृगुर्ऋषिसत्तमः ॥ शुक्राय वै स्वपुत्राय कथयामास यां पुरा ॥ २ ॥
तां दृष्ट्वा विस्तरां श्रेष्ठां संहितां भृगुभाषिताम् ॥ तस्याः सारं समादाय क्रियते ग्रंथसंग्रहः ॥ ३ ॥
प्रकाशाः पंच विज्ञेयाः संहिताया मनोहराः ॥ मुहूर्त्तजातकौ चैव ताजकप्रश्नमिश्रकाः ॥ ४ ॥ ···········

४८८ ज्योतिःसारसिद्धान्तः-मथुरानाथः ।

आ.—सिंदूरारुणभालं कालं विघ्नस्य शर्मगणपालम् ॥ मोदकपूरितवदनं सत्सुखसदनं नमस्यामः ॥ १ ॥
कर्माण्युत्तरभव्यान्युदयाद्यस्य क्षितौ प्रवर्त्तन्ते ॥ लोकानामयमात्मा त्रयीतनुः श्रीरविर्जयति ॥ २ ॥
जय जय भारति भव्ये विचित्रवेषे विभूषिताशेषे ॥ कविजनवदनविभूषे अतिशयितानंदमंजूषे ॥ ३ ॥
जयति श्रीगुरुचरणं मादृशजडवर्गजीवनं शरणम् ॥ हरणं स्वहृद्द्यतमसां करणं सज्ज्ञानसंपत्तेः ॥ ४ ॥
सहृदयहृदयसरोजं विकाशयंति स्वपुष्टतरसुकरैः ॥ परिपूरितजगदाशा जयंतु जीवंतु मित्राणि ॥ ५ ॥
कथमहमेकरसनया सज्जनगणगौणवर्णनं कुर्याम् ॥ श्रीव्यासो वाल्मीकिः क्षमो गणेशोऽथ वा शेषः ॥ ६ ॥
अतिविचित्रशक्तिभाजः सन्तो सन्तोषमुख्यस्य गुणवंतः ॥ परगुणदोषारोपे पटवः कटवः क्षमान्विताः संतु ॥ ७ ॥
किमिह विशेषबहूक्त्या नामं नामं तृ[क्ष]णादथ ब्रह्म ॥ मालवमथुरानाथस्तनोति वसुधाभ्रमीमांसाम् ॥ ८ ॥
तत्र यथारुचिपद्यैर्हृद्यैः स्वापेक्ष्यविवृतिसंयुक्तैः ॥ कलिता कालकलेयं व्योमपदादर्शचित्राढ्या ॥ ९ ॥
अथ ग्रंथारंभे परिभाषा ॥
विभागार्हं न यच्चिह्नं दृश्यं तद्बिंदुरुच्यते ॥ तदेकतो विभागार्हं रेखा स्यात्सा द्विधा मता ॥ १ ॥

च.—इति निगदितं मानं सर्वं निरीक्ष्य पुरातनं गणितकुशलैर्न्यस्तं शास्त्रे विभिन्नमतानुगैः ॥
तदिह सकलं बुद्ध्वा शास्त्रात्स्वकादपि भो बुधा जनयत मनो हर्षं किं चान्तरं च विविच्यताम् ॥ १०८ ॥
अति हि कठिनं ज्योतिःशास्त्रं ततो विषयो ह्ययं किमिह सुतरां बोध्यं शोध्यं मनुष्यचतुष्पदैः ॥
जगदधिपतिर्ब्रह्मा विष्णुस्तथा च सदाशिवो निजकृतिमिमां वेदध्वस्तांतरीयतमागुरुः ॥ १०९ ॥
यैद्वि हैयतुहैपतेति यवनैरुद्घुष्यते प्रायशो यद्ज्ञानादखिलैस्तदंगकुशलोऽत्रत्योऽथवा गण्यते ॥

तच्चेदं गुरुपादपद्मयुगले भृंगायमाण: सदा शुक्लोपाह्वयमालवीयमथुरानाथो मुदेऽबीभवत् ॥ ११० ॥
पूर्वं यद्यपि संस्थितिस्त्रिदिवपस्त्रोतस्वनीरोधसि श्रीमत्पाटलिपुत्रनामनगरे विद्वज्जनोपाश्रये ॥
तत्राप्यालमगंजनामसुपुरे ज्योतिर्विदा धीमता वंद्यांघ्रे: स्वपितामहस्य विमलभ्राजत्सदाचारिण: ॥ १११ ॥
अन्वर्थं प्रथितं जगत्यथ सदानंदाह्वयं बिभ्रतो ह्यासीदस्ति तथाप्यनेकादिवसै: श्रीविश्वनाथाज्ञया ॥
काश्यां श्रीमदशेषपेशलधियां वंद्यस्य राज्ञां गुणैर्गुण्यश्रीयुतडा[भा]लचंद्रनृपते: संगे विचिंता स्थिति: ॥ ११२ ॥
तत्राहं द्विज ईशप्रेरितधिया छात्रान्समध्यापयन्नासिन्माखिलभूनभ: स्थितिगते: शास्त्राणि प्राङ्मूलयो: ॥
तांस्त्वेतद्विषयाक्तपेशलधियो दृष्ट्वा नृपाज्ञाभवन्मच्चित्ते च भवेत्सुहैयतवपुर्गीर्वाणवाण्या ऋजु: ॥ ११३ ॥
त्यक्त्वा तत्र दुरूहदुर्घटपदं तस्योपपत्तिं बहुं स्वल्पं सारमिदं च बालजनताबोधाय पूर्वं व्यधात् ॥
ज्ञात्वैतत्प्रभवेच्चमत्कततरा सूक्ष्मास्य बुद्धिर्यदि स्यादेवाखिलशास्त्रकष्टनिरपेक्षोयं सुधीर्वदित: ॥ ११४ ॥
अपूर्वेयं विद्या यदियमतिकष्टाददतिबलात्परेषां सच्छास्त्रादमितजलधे: श्रीरिव मया ॥
प्रकाशं संनीता [ह्य] तिशयविनीता पुनरियं सदानंदायास्तां जगदधिपते: श्रीयुतगुरो: ॥ ११५ ॥
वेदाभ्रनगभूगण्ये शाके ज्येष्ठे सिते कुजे ॥ समाप्तिमगमद्ग्रंथस्तियौ विश्वसृज: शुभ: ॥ ११६ ॥
इति श्रीमद्विविधविद्याविनोदितांत:करणाखिलगोलगणितविदावलीनीराजितचरणपीठश्रीमद्गुरुनाथांघ्रिसरोजमधुपमालवीयशुक्लमथुरानाथविरचितो ज्योति:सार: समाप्तिमफाणीत् ॥

४८९ ज्योति:सारोद्धार:-हर्षकीर्त्तिसूरि: ।

आ.—उँनमामि समाधीनां सर्वज्ञं सर्वसिद्धिदम् ॥ प्रतिबिंबितमाभाति जगत्सदज्ञा[ज्ञा]नदर्पणे ॥ १ ॥
कैश्चित्पुरातनै: कैश्चिन्नवैर्वृत्तैर्मया मुदा ॥ क्रियते बालबोधाय ज्यौतिषे सारसंग्रह: ॥ २ ॥
च.—नागपूरीयतपोगणराजा:श्रीचंद्रकीर्तिसूरिवरा: ॥ तच्छिष्यहर्षकीर्ति: सूरि: संकलितवानेतम् ॥ १ ॥
श्रीहर्षकीर्तिसूरिसंकलिते ज्यौतिषसारोद्धारे ग्रहस्तोत्रनवग्रहजपनवग्रहदानतुरकीमासवारनक्षत्रादिविचार४मंडलविचारकेतूदयविचारउत्पातादिविचार१२दुघडियाविचारशिवालिखितमुहूर्त्तदोषकेवलीदोषलग्नसामुद्रिक४स्त्रीकीजातिकामकावासाको विचार: ॥
अष्टनायिकास्वप्नविचार शकुनविचार पल्लीपतनविचार अंगस्फुरण नेत्रस्फुरण मुहरापरीक्षा मुहराचलावणविधि शांतिकविधि कुलदेवी सती पितर[पितृ]प्रतिष्ठाविधिनिरूपणो नाम तृतीयोऽध्याय: ॥ इति संपूर्णोऽयं ग्रंथ: ॥

४९० ज्योतिर्निबन्धसर्वस्वम्-शिवदासभट्ट: ।

आ.—वेदाद्यं यांतमर्द्धेन्दुभालयुक्विन्दुतत्पुन: ॥ मायनत्यंतमगणौमनुयस्य नमामि तम् ॥ १ ॥
अभीष्टफलदो देव: सर्वज्ञ: परमेश्वर: ॥ आदधातु गणाध्यक्ष: स्थितो मनसि न: सदा ॥ २ ॥
तिथ्यादिकालावयवस्वरूपां ज(ग)त्प्रतीत्यादिकहेतुभूताम् ॥
कालत्रयज्ञानविधायिनीं तां वंदेऽहमाद्यामिह शास्त्रदेवीम् ॥ ३ ॥
नारद: । ब्रह्माचार्य्यो वशिष्टोऽत्रिर्मनु: पौलस्त्यरोमशौ ॥ मरीचिरंगिरा व्यासो नारद: शौनको भृगु: ॥ ४ ॥

च्यवनो यवनो गर्गः कश्यपश्च पराशरः ॥ अष्टादशैते गंभीरा ज्योतिःशास्त्रप्रवर्तकाः ॥ ५ ॥
वराहमिहराचार्यः श्रीपतिः सत्यभास्करौ ॥ लल्लः सूरिब्रह्मगुप्तौ वैद्यनाथश्च रेणुकः ॥ ६ ॥
एषां शास्त्राणि संवीक्ष्य सारमादाय यत्नतः ॥ तदुक्तवचनैः कुर्वे फलग्रंथं मनोरमम् ॥ ७ ॥
यथैवारोपयत्येकं श्रेयोऽर्थी सद्रुमे पथि ॥ सत्स्वारामेषु शास्त्रेषु तथैनां विद्धि मत्कृतिम् ॥ ८ ॥

च.–विति[नि]वृत्ता च या शूद्रा उदके समुपस्थिता ॥ तदा पश्यति ते विप्रा इति धर्मविदो विदुः ॥ ४३ ॥
इति श्रीसूरिमहाभट्टशिवदासनिर्मिते ज्योतिर्निबंधसर्वस्वे सूतकादिनिर्णयः ॥ समाप्तश्चायं ग्रंथः ॥ संवत् १९०२ ॥

४९१ ज्योतिर्मणिमाला-केशवः ।

आ.–श्रीमच्छ्रीजगदीशपादकमलं नत्वा त्रिसंध्यं मुदा वेदांगाजडधीस्तमोपहरणा सद्बुद्धिसंबंधिना ॥
तस्याः पादसरोजयुग्मत्रिविधं[मनिशं] ध्यायामि पद्मावलां[लं] विद्याबुद्धिसुधर्मदं स्वकगुरुं श्रेयस्कृतेऽहं भजे ॥ १ ॥
लमाजं खेचरं नत्वा पूर्वग्रंथमतं मतम् ॥ विलोक्य मणिमालाख्यं ज्योतिःशास्त्रं करोम्यहम् ॥ २ ॥
प्रमोदशीलस्वगुरून्नत्वा मातसखीलघो ॥ हरिनाथस्य पुत्रेण क्रियते मणिमालिका ॥ ३ ॥

च.–व्यवहारचंडीश्वरं रत्नमाला व्यवहारं च त्रिविक्रमः ॥ व्यवहारचूडामणिनारचंद्रनृपतिर्जयं चैव तु बालबोधम् ॥ २७ ॥
शतं शतं च शिल्पं च शौनार्कं च स्वरोदयम् ॥ विवाहपटले तानि शास्त्राणि च मतो[यो]धृतम् ॥ २८ ॥
जन्माभिधानकेशवगुरुणा दत्तं च देवशीलश्च ॥ तस्य श्रीगुरुचरणान्नत्वा मणिमालिका कृत्वा ॥ २९ ॥
इति श्रीकेशवविरचितायां ज्योतिर्मणिमालायां गोरजलग्नाधिकारे अष्टादशस्तबकः ॥

४९२ ज्योतिर्विंदाभरणं सटीकम् । मू०-कालिदासः । टी०-भावरत्नः ।

टी. आ.–श्रीमान्पार्श्वजिनोतिशेषकगणं प्राप्तः प्रभुः पूर्णगीर्द्राक्क्षिप्तप्रचलत्कुयोगकमठप्रौढिः प्रजानां पुरः ॥
सत्कीर्त्यानकनादपूरितजगत्साकल्य इष्टार्थदो गीर्वाणेश्वरसेवितो विजयते विश्वैकचिंतामणिः ॥ १ ॥
नत्वा गुरुं गिरमपीभमुखं च खेटाञ्श्रीकालिदासकविशक्रविनिर्मितस्य ॥
ज्योतिर्विदाभरणनामवरागमस्य संतन्यते गुरुकृपासुखबोधिकेयम् ॥ २ ॥
श्रीपत्तने प्रवरपौर्णिमिकाह्वगच्छे ढंढेरपाठकशुभाश्रयसंश्रितानाम् ॥
श्रीयुक्तपूज्यमहिमप्रभसूरिराजशिष्येण भावमुनिना मयका यथावित् ॥ ३ ॥ युग्मम् ॥
अथ ग्रंथारंभे ग्रंथकृत् श्रीकालिदासकविशक्रो वसंततिलकावृत्तेन समुचितेष्टदेवतानमस्काररूपमंगलमाचरन्ननुबंधचतुष्टयमाह ॥ रैभ्येति ॥..................

मू. च.–इति श्रीकविकुलचूडामणिश्रीकविकालिदासोदिते श्रीज्योतिर्विदाभरणे ग्रंथाध्यायनिरूपणक्रमनृपश्रीविक्रमार्कवर्णनं नाम द्वाविंशतितमोऽध्यायः ॥ २२ ॥
गच्छे श्रीमहिमप्रभाख्यसुगुरोः श्रीपौर्णिमीयाभिधे शिष्यः सूरिवरस्य मांडणसुतो यो भावरत्नाभिधः ॥
बाद्लाकुक्षिसमुद्भवः स कृतवाञ्श्रीपत्तने पत्तने छन्दोव्याकरणाभिधास्मरणतोऽलंकारयुक्तामिमाम् ॥ १ ॥

वक्तुवालधिमारूढो वरडाह्वो महाबली ॥ सुखाय क्षेत्रपालोऽस्तु राकापक्षकधारिणाम् ॥ २ ॥

टी. च.–अथ सुखबोधिकाकृत्प्रशस्तिमाह ॥

ध्वस्तैकांतगृहध्वान्तं स्यात्काराऽशीतरश्मिना ॥ सदनुष्ठानफलोपेतं जयताज्जैनदर्शनम् ॥ १ ॥

विशदकनकगात्रो रत्नपात्रो गुणाढ्यो विविधफलविशालीमागमालीं दधानः ॥

सकलसुरविभूनां सेव्यसामीप्यदेशो जयति सततमहं न [मीनो] वर्द्धमानः स्वरद्रिः [सुरेन्द्रः] ॥ २ ॥

श्रीवर्द्धमानात्सुपरंपराप्ते पदेऽभवत्सूरिवरः श्रियाढ्यः ॥

चन्द्रप्रभाख्यो विधुकान्तिकीर्तिः श्रीपौर्णिमीयाऽभिधपक्षगच्छे ॥ ३ ॥

श्रीसिद्धराजसदसीह विजित्य सूरीन्वादं विधाय बत षण्मितमासकालम् ॥

यः पूर्णिमां जिनवरागमसूक्तियुक्त्या सत्योद्दधार दृढधीरनवद्यविद्यः ॥ ४ ॥

तत्पदेऽभूच्छ्रिया युक्तो धर्मघोषस्ततो यतिः ॥ षड्द्विचन्द्रमिता १२६ जाताः शाखाः पौर्णिमिकाभिधाः ॥ ५ ॥

परंपराप्ते क्रमतस्ततः श्रीविद्याप्रभः सूरिवरोऽत्र पदे ॥ बभूव सार्थः ससुधासमुद्रप्रोल्लासने चन्द्रसमानधर्म्मा ॥ ६ ॥

ललितप्रभसूरिकुंजरोऽजनि पदे – – आश्रितः श्रियम् ॥ विनयप्रभसूरिपुंगवोऽजनि पदे तत आश्रितः श्रियम् ॥७॥

तत्प[ट्ट]पूर्वाचलभानुमंतो जयंति शश्वत्किल सूरिराजाः ॥

नाम्नार्थतश्चापि गुणैरशेषैः सर्वोत्तमैः श्रीमहिमप्रभाख्याः ॥ ८ ॥

येषां प्रतापतपनश्च यशःसितांशुर्भुव्यंबरे स्वरि समस्तपदे प्रतापः ॥

नित्योदयौ विदधतो [तः] खलु राहुनाशं चित्रं यतो न महसामभितोनभावः ॥ ९ ॥

आप्तोक्तौ परिपूर्णनिर्मलमतिः शब्दानुशास्तौ प्रधीः काव्ये कर्कशतर्कशास्त्रकलनागाणित्यशास्त्रे तथा ॥

संगे श्रीमहिमप्रभाख्यसुगुरुः सूरीश्वरो राजते ख्यातः सर्वगणैः परोपकरणाद्विद्यादिदानेन वै ॥ १० ॥

तच्छिष्योभूद्भावरत्नाभिधानस्तत्पादाब्जोपासनासक्तचित्तः ॥

एतत्कृत्याः कालिदासस्य गुर्व्या ज्ञानार्थो यस्तद्दुरोज्ञानिलाभात् ॥ ११ ॥

तेनासौ सुखबोधिका सुललिता ज्योतिर्विदां तुष्टये शास्त्रस्यास्य कृता यथामति मया शोध्यं सुधीभिर्यतः ॥

संश्लिष्टानि पदान्यनेकश इहैकैकाक्षराख्यान्यपि काठिन्यं कविना गिरां समुदितं त्याज्यं खलत्वं पुनः ॥ १२ ॥

परिश्रमोऽयं सफलो मम स्यात्तद्वाच्यमानेन विलेखनेन ॥

सतां प्रसादाच्च ततो दधानैः खलैः खलत्वं जगतीह किं स्यात् ॥ १३ ॥

सज्जनेभ्यो नमो नित्यं खलेभ्योऽपि नमो नमः ॥ भवन्त्येके गुणज्ञाय दोषज्ञायापरे दृढम् ॥ १४ ॥

उभयेषां कृपादृग्भिः कृतिर्मे यातु शुद्धताम् ॥ अग्निक्षारे यथा हेम निर्दोषं च सुढानताम् [विशुद्धताम्] ॥ १५ ॥

श्रीविक्रमार्कादहिषड्ढयोर्वीमिते गतेऽब्दे खलु राधमासे ॥

शुक्के तृतीयेऽथ तिथौ गभस्तिवारे समाप्ता सुखबोधिकेयम् ॥ १६ ॥

इति श्रीपौर्णिमीयगच्छाधिराजभट्टारकपुरंदरश्री५श्रीमहिमप्रभसूरीश्वरचरणसरोरुहचंचरीकायमाणशिष्यभावरत्नविरचितायां श्रीकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायां ग्रंथाध्यायनिरूपणक्रमश्रीविक्रमार्कनृपवर्णनो नाम द्वाविंशतितमोऽध्यायः सम्पूर्णः ॥ संवत् १९११ ॥

४९३ ज्योतिश्चन्द्रार्कः-रुद्रमणिः ।

आ.—श्रीगौरी वचसां प्रियैः स्वविधया ध्याता ध्रुवं मानसे सूर्याग्नींदव एव जन्म[न्य]नुकलाः सर्वार्थसिद्ध्यै सदा ॥
ब्रह्माण्डानि परार्द्धभूरिगुणितान्युद्यंति यत्र स्फुटं बीजानीव वटेस्त्वनंतमहिमा श्रीभूतिवाक्सिद्धये ॥ १ ॥
श्रीविश्वमूर्त्तिं त्रिजगद्भवादेर्निमित्तमूलं प्रणिपत्य भानुम् ॥ यद्दर्शने संस्कृतियज्ञसिद्धिदे विप्रप्रमोदो जगदप्रबोधः ॥ २ ॥
काश्यां हि गंगाधरबोधितोऽसौ ब्रह्मर्षिविद्वत्कलितं सुबुद्ध्वा[ध्य] ॥
विद्वन्महादेवजरुद्रदेवो जोतिःसुधांश्वर्करुचिं व्यनक्ति ॥ ३ ॥

च.—यो वेदवक्तृकुशलोऽभिधकाव्यतर्कसाहित्यवित्सहृदयः श्रुतिमौलिनिष्ठः ॥
सिद्धांतबीजगणितागमसन्मुहूर्तसामुद्रशाकुनविदूहतु मच्छ्मं सः ॥ ४७ ॥
हिमाचले या सरजू[यू]रसाक्षिजा शिवः पिनाकीश इतोस्ति पश्चिमे ॥
तत्कौशिकी पूर्वनगेस्ति मल्लिका तत्राश्रयः श्रीगणकाग्रणीरभूत् ॥ ४८ ॥
पुरंदरो यः स्वशिरोहविर्भुजि जुहाव काश्यां पठितो हि तत्सुतः ॥
पद्माकरो भूपनतोऽप्रतिग्रही हरीधरस्तत्तनयः सुसाधुधीः ॥ ४९ ॥
हेरंबनामास्य सुतः सुदैवविद्धीरामणिर्बाजबहादुरार्चितः ॥
तज्जो महादेव इतीवसा[इवास]सत्कृतो वागीशकाश्यां स्वतनुर्य [तनुं य] उज्जहौ ॥ ५० ॥ त्रिभिः कुलकम् ॥
यं[यः] श्रीमाहेंद्रमत्यामजनि सुगणकः श्रीमहादेवशर्मा काश्यां सर्वस्वदोषः कविवरगणितो वैद्यनाथप्रसादात् ॥
गायत्रीश्रीशविद्या मधुत हि हृदयं श्रीप्रयाणादिपीठे गोविप्रस्त्रीसुरेज्यांघ्रिषु नमितशिरा एकपत्नीव्रतोऽसौ ॥ ५१ ॥
काश्यां हि गंगाधरबोधितोऽब्रवीत्कूर्माचली योगिरसः कुलाग्रणीः ॥
शाकेऽष्टवेदर्तुधरा १६४८ मितेर्थदं सर्वोपकाराय मुनीरितादमुम् ॥ ५२ ॥
वर्षेशाद्ययनर्तुमासदिवसैर्योगं मनोर्ब्रह्मणो मानं तिथ्यहनी भयोगकरणैर्मौहूर्त्तलग्नांशकः ॥
खेटर्क्षस्फुटवर्गभावगमना गुर्वस्तपूर्वाखिला दोषा ग्राह्यगुणा नृदि–विषया मौहूर्त्तवेक्षः खिलाः ॥ ५३ ॥
स्मृत्वाद्यं जनुषि ग्रहादिजफलं योगा दशाब्दं फलं शंकुर्जातकनाम कर्मपुरतोन्नप्रासचौलव्रतम् ॥
सामुद्राणि च लक्षणानि रमणीपाणिग्रहो भूभुजां नीतिः साद्भुतवर्णनान्वधरणीगोलः फलं कू[क]र्मजम् ॥ ५४ ॥
युद्धानां विषयोगप्रश्नकथनं सद्दंशचारेश्वराः वालाद्या अथ कोटचक्रकलनं सच्छत्रसिंहासनम् ॥
स्वप्नांगस्फुरणानि शाकुनफलं यात्रादिगीशावनं यात्रायाः समयः सयोगशकुनः प्रस्थानसंकीर्त्तनम् ॥ ५५ ॥
वास्तव्यावनिवीक्षणं द्विजनृपादीनां च वेधो दिशे विस्मायव्ययवक्त्रशालरचना दिक्पालवास्त्वर्चनम् ॥
प्रविश्यं [आवश्यं] रविसंक्रमोंबुदकथात्रार्थं फलं गोचरं खेटानां क्रमशोऽष्टवर्गजफलं चक्रे हि सौदर्शने ॥ ५६ ॥
आयुर्दायमिहाब्दमासदिनजात्पाकाद्भुतस्वामि[मि]कं प्रश्नाद्यं हि समीरितं च त्रिशरा तत्सर्वतोभद्रकम् ॥
दोषावासविधिष्वरिष्टकलनं छाया न रायं फलं सर्वात्मेशतया ग्रहार्चनमिहेंद्वर्कद्युतौ कीर्त्तितम् ॥ ५७ ॥
संज्ञाहे यो मिश्रसंस्कारकांतोद्वाहे यात्रावास्तुखेटप्रचारः ॥
अष्टौ षड्भिश्चित्रिता ज्यौतिषांगैरध्यायास्तैः श्रीशदेवद्विजेष्टः ॥ ५८ ॥
इति श्रीज्योतिर्विद्रुद्रमणिकृतज्योतिश्चंद्रार्कग्रंथः समाप्तिमगात् ॥

४९४ ज्योतिष्केदारः-कृपाशंकरः ।

आ.—तत्त्वं ज्ञानात्मकं दिव्यं ज्ञानगम्यं सनातनम् ॥ भेदं प्राप्तं विहारार्थं तं नमामि परं महः ॥ १ ॥
ज्योतिष्केदारं संहितागणितहोराप्रश्नलग्नताख्यम् ॥ करोति सारसहितं कृपाशंकरः शिशुबोधनाय लघुम् ॥ २ ॥
सारं सारं संगृहीत्वा कृतोऽयं ज्योतिःशास्त्रे यस्य वेत्ताऽखिलज्ञः ॥
स्याद्दातव्यः साधुशिष्यं परीक्ष्य दुष्टायान्यद्वेषिणे नो खलाय ॥ ३ ॥

च.—ज्योतिष्केदारजातं फलममृतसमं ह्यश्नतो लोकपूज्यास्तस्मात्स्वीकार्य एषः सुविशदहृदयैः पंडितैः शास्त्रविद्भिः ॥
तैरस्मिन्दृष्टदोषो न भवति गुणवत्किं मणौ लग्नलोहमग्रे स्वीकुर्वतां मे बहुशतनतये कोटिपां[पं]चांजलिर्वा ॥ ७७ ॥
शकेष्टवस्वंगशशीमिते च १६८८ त्रिद्व्यष्टचंद्रे १८२३ नृपविक्रमाब्दे ॥
सौम्यायनेऽर्के किल माघमासे शुक्लच्छदे सौम्यदिने च षष्ठ्याम् ॥ ७८ ॥
श्रीमन्महारावगुमानसिंहराज्ये तथा मालवके च देशे ॥
चर्मण्वतीपूर्वतटस्थिते च कोटाभिधाने नगरे विशाले ॥ ७९ ॥
सहस्रौदीच्यजातीयो द्विवेदीत्यवटंककः ॥ भार्गवो देवकृष्णोऽभूच्छाजूरामश्च तत्सुतः ॥ ८० ॥
तत्सूनुना कृतो ग्रंथः कृपाशंकरशर्मणा ॥ बालानां सुखबोधाय स्वेष्टदेवार्पणं शुभम् ॥ ८१ ॥
इति श्रीमद्दैवज्ञछाजूरामसूनुकृपाशंकरविरचिते ज्योतिष्केदारे प्रश्नवल्ल्यां प्रश्नप्रकथनं नाम द्वितीयः पल्लवः ॥ २ ॥

४९५ ज्योतिष्कौमुद्यां प्रश्नप्रकरणम्-नीलकण्ठः ।

आ.—तत्र प्रश्नविचारस्य प्रयोजनमाह वराहः ।
दैवज्ञस्य हि दैवेन सदसत्फलवाञ्छया ॥ अवश्यो गोचरं मर्त्यः सर्वः समुपनीयते ॥ १ ॥
अश्रौषीच्च पुरा विष्णोर्ज्ञानार्थे समुपस्थितः ॥ वचनं लोकनाथोऽपि ब्रह्मा प्रश्नादिनिर्णयम् ॥ २ ॥
आदिशब्देन स्वरशकुनादिकम् । ....

च.—श्रीगर्गान्वयभूषणं गणितविच्चिंतामणिस्तत्सुतोऽनंतोऽनंतमतिर्व्यधात्खलमतध्वस्त्यै च उत्पद्यते ॥
तत्सूनुः खलु नीलकण्ठविबुधो विद्वच्छिवानुज्ञया ग्रंथालोकनकं चकार विदुषां प्रीत्यै जगद्विश्रुतः ॥ १ ॥
इति श्रीनीलकंठरचितज्योतिष्कौमुद्यां प्रश्नप्रकरणं संपूर्णम् ॥

४९६ ज्योतिष्प्रकाशः-हीरानन्दः ।

आ.—श्रीगणेश तव पादपंकजं नौमि तद्विबुधवृन्दवंदितम् ॥ यत्स्मृतिर्विषमविघ्नमर्दिनी वर्द्धिनी सुमतिसिद्धिसंपदाम् ॥ १ ॥
श्रीमन्मंगलमूर्तेः पुनः पुनः स्मरणम् ॥ प्रत्यूहव्यूहनिवारकमेवेति पद्यान्तरम् ॥
गणनाथमभीष्टसिद्धिदं प्रणिपत्यार्थकरीं च भारतीम् ॥ अभिवन्द्य रविं तथा गुरुं मतिदं तंत्रमिदं तनोम्यहम् ॥ २ ॥
श्रीवाग्देवीं सुमतिसुखदां भास्करादींश्च खेटाञ्ज्योतिःश्रेष्ठान्नरहरिगुरून्भक्तितश्चाभिवन्द्य ॥
दृष्ट्वा ग्रंथान्विबुधविततान्संहितास्कंधसारान्हीरानन्दो नरहरिसुतो ग्रन्थमेतं करोमि ॥ ३ ॥

गोमत्याः पुलिने विमुक्तिभवने धर्म्मार्थकामप्रदे श्रीमल्लक्ष्मणपत्तनं क्षितितले व्यक्तं वरीवर्त्तते ॥
इभ्योद्भासितसभ्यसंभृतसमां सं–रवितं – – – हर्म्यै रम्यतलैस्त्रिधात्रिभुवनैकीभूतशोभान्वितम् ॥ ४ ॥
विख्यातादिह देवखातविषयान्निर्गम्य धर्म्मद्रवैर्व्यक्ता नैमिषमुख्यतीर्थमखभुग्ब्रह्मर्षिहर्षप्रदा ॥
लोकानां किल मज्जतां कलिमलप्रक्षालनं कुर्वती गंगातीरतरंगसंगमवती यस्यांतिके गोमती ॥ ५ ॥ अन्यच्च ॥
यद्भक्ता ननु पातकादिरहितास्त्यक्त्वा तनुं भौतिकीं दीव्यन्ति त्रिदिवे तु दैवतगणैर्गोमंडलोद्भासिताः ॥
गोस्वामी किल कोऽपि कश्चिदपि गोगामी च गोपालकः काश्चित्तेष्वपि जायते विजयते साऽन्वर्थकद्गोमती ॥ ६ ॥
अथ लक्ष्मणपुरवर्णनम् ॥

च.–टिकैतरायस्य मुदे मयायं ग्रंथः कृतोऽभीष्टफलोक्तिभव्यः ॥
मुनिप्रणीतव्रतनिर्णयाय ज्योतिष्प्रकाशोऽस्तु जगत्प्रसिद्धः ॥ ५६ ॥
अथ ग्रंथसमाप्तिसमयसूचकज्ञानं बीजगणितेनाह ॥
राशिः सकोऽस्ति त्रिगुणः सकुर्याद्घनं भवेत्तस्य घनस्य मूलम् ॥
एती[की]कृतं तद्गुणितं च रामैः सोमान्वितं स्यात्कृतिरेव भूयः ॥ ५७ ॥
नन्दवर्गगुणिते नगा७न्विते स्याच्छकस्त्रिवधुवर्जिते तुमाः ॥
तद्दलं च तिथिवासरौ रसैरूनितैर्भवति भे नगोद्धृते ॥ ५८ ॥
तद्युतिर्भवति सायकोनिते तत्र तत्करणमिन्दुसंयुते ॥ बीजसूत्रगणितैर्मया कृतं ग्रंथपूर्तिसमयादिवर्णनम् ॥ ५९ ॥
टिकैतरायनिदेशाद्धीरानंदेन रचितेऽस्मिन् ॥ ज्योतिष्प्रकाशनामा उल्लासो धर्मशास्त्रीयः ॥ ६० ॥
इति श्रीदैवज्ञवर्यनरहरितनयहीरानन्दविरचिते टिकैतरायज्योतिष्प्रकाशे धर्मशास्त्रीय उल्लासोऽष्टादशः परिपूर्णः ॥
अथ ग्रंथलिखनसमाप्तिसूचकं पद्यं शार्दूलविक्रीडितेनाह ।..........
अथ ग्रंथसमाप्तिसूचकं पद्यम् ॥
नन्दवर्ग८१गुणिते नगा७न्विते स्याच्छकस्त्रिविधुवर्जिते तुमाः ॥
तद्दलं च तिथिवासरौ रसै६रूनिते भवति भे नगो७द्धृते ॥ १ ॥
तद्युतिर्भवति सायकोनिते तत्र तत्करणमिंदुसंयुते ॥ बीजसूत्रगणितैर्मया कृतं ग्रंथपूर्तिसमयादिवर्णनम् ॥ २ ॥
राशिः २१ अयं नन्दवर्गः ८१ गुणितः १७०१ असौ नगाऽन्वितः १७०८ जातः शालिवाहनशकः १७०८ । राशिः २१ असौ त्रिविधु १३ हीनः जातो मासः चैत्रादिगणनया कार्तिकः । राशिः २१ तद्दलं विभक्तं जातः शुक्लपक्षः । राशिः २१ रसै ६ रूनितः १५ जाता तिथिः पूर्णिमा । सप्ततष्टे भेऽयं १ जातो रविवारः । अथ राशिः २१ असौ नगभक्तः लब्धं ३ कृत्तिकानक्षत्रं । अथ राशिः २१ असौ सायकोनितः १६ जातः षोडशः सिद्धियोगः । अथ राशिः २१ असौ इन्दुसंयुतः सप्ततष्टे जातं बवकरणम् १ । एवमत्र शकादिः प्रसिद्धः शके १७०८ कार्तिक शुक्ल पूर्णिमा रविवारः कृत्तिकानक्षत्रं सिद्धियोगः बवकरणम् । अस्मिन्समये टिकैतरायज्योतिष्प्रकाशनामा ग्रंथोऽयं परिपूर्णः ॥ संवत् १९१२ ॥

४९७ ज्योतीरत्नमाला सविवरणा । मू०-श्रीपतिः । वि०-चतुर्भुजः ।

मू. आ.–प्रभवविरतिमध्यज्ञानवंध्या नितांतं विदितपरमतत्त्वा यत्र ते योगिनोऽपि ।
तमहमिह निमित्तं विश्वजन्मात्ययानामनुमितमभिवंदे भग्रहैः कालमीशम् ॥ १ ॥

वि. आ.—गोपालपादकमले भ्रमरायितमानसः ॥ चतुर्भुजो रत्नमालां विवृणोति यथामति ॥
अथ निर्विघ्नपरिसमाप्तिकामो ग्रंथकृन्मङ्गलमाचरति ॥ विदितपरमतत्त्वा विदितं ज्ञातं परमतत्त्वं ईश्वराख्यं यैस्ते कपिलादियोगिनः ....

वि. च.—पद्यांतरैः पुनर्निमित्तमेव दर्शितमित्यर्थः ॥ इति श्रीमिश्रचतुर्भुजकृतं रत्नमालाविवरणम् ॥

४९८ ज्योतीरत्नमाला सविवरणा । मू०-श्रीपतिः । वि०-महादेवः ।

मू. आ.—प्रभवविरतिमध्यज्ञानवन्ध्या नितांतं विदितपरमतत्त्वा यत्र ते योगिनोऽपि ॥
तमहमिह निमित्तं विश्वजन्मात्ययानामनुमितमभिवंदे भग्रहैः कालमीशम् ॥ १ ॥

वि. आ.—प्रणम्य भानुं त्रिजगत्तमोऽपहं समस्तसर्गस्थितिनाशहेतुकम् ॥
दैवज्ञबोधाय मृदुस्फुटाख्या व्याख्यायते ज्यौतिषरत्नमाला ॥ १ ॥
आमशर्मप्रसादेंदुविवृद्धमतिवारिधिः ॥ महार्थां विवृणोम्येनां रत्नमालामलंतराम् ॥ २ ॥
अत्र सतां तावदयमाचारो यत्प्रवक्तृश्रोत्रध्येतॄणामात्मनश्चाशेषांतरायोपशमायेष्टदेवतानमस्कारं विधत्ते तदयमपि कश्यपवंशपुंडरीकखंडमार्तंडो दैवज्ञचूडामणेः केशवस्य पौत्रो ज्योतिःशास्त्रसमुद्रदृष्टपारस्य गणकगणवंदितपदद्वयस्य श्रीमन्नागदेवस्य सूनुर्ज्योतिःशास्त्रमहार्णवस्य तरणे हनुमान् अवगाहने मंदराद्रिः पाने कुंभोद्भवो निर्माणे प्रजापतिरंतर्निवासे यथार्थनामा समस्तमौहूर्तिकशिरोमुकुटमाणिक्यकान्तिनीराजितपदद्वंद्वो महाकारुणिकः श्रीपतिर्ग्रहगणितपाटीगणितबीजगणितरूपसुनिश्चलमूलस्य बहुविधविततहोरातंत्रशाखस्य ज्योतिःशास्त्रवनस्पतेः संहिता एव फलानीत्यवधार्य-जातकर्मनामकर्मकरणमौंजीबंधविवाहयात्रादौ गर्गादिसंहिताभिर्विस्तीर्णविसंष्ठुलत्वात्प्रतिदिवसमायास्यमानदैवज्ञनिवहमवेक्ष्य संजातदयोदयो निखिलसंहितार्थमल्पग्रंथेनाभिधातुमिच्छुः समुचितेष्टदेवतानमस्कारं मालिन्याह ॥ अहं श्रीपतिनामा तं कालं अभिवंदे नमस्करोमि ॥

वि. च.—शश्वद्वाक्यप्रमाणप्रवणपटुमतेर्वेदवेदांगवेत्तुः सूनुः श्रीलूणिगस्याच्युतचरणनतिः श्रीमहादेवनामा ॥
तत्प्रोक्ते रत्नमालारुचिरविवरणे ज्ञानदीपाख्यशास्त्रे भर्तृव्यत्वप्रसिद्धे प्रकरणममु—स्थापनं विंशमेतत् ॥ २० ॥
श्रीजन्यालयवंशमौक्तिकमणिः श्रीकर्णभूभृत्सखो धीमान्बंधुक इत्यसीममहिमाऽभूद्भूमिदेवाग्रणीः ॥
सर्वज्ञस्तनयस्ततोऽस्य स महादेवाभिधोऽभूद्बुधो यश्चक्रे स्फुटशब्दसिद्धिममलां कालापकोद्बोधनीम् ॥ १ ॥
सूनुस्तस्यामशर्म्मा गणकपरिवृढः सर्वशास्त्रांतदृष्टा ख्यातस्तस्यानुजस्त्वाजड इति विबुधो भीमभूपस्य मित्रम् ॥
विद्वद्वृंदैकवंद्यस्तदनुज उदयद्बुद्धिनिर्द्धूतमोहः ख्यातः श्रीलूणिगाख्यो गरुडपतिपदद्वंद्वपद्मद्विरेफः ॥ २ ॥
शरवसुशशिसोमैः ११८५ संमिते शाककाले नभसि तिथिचतुर्थ्यामिंदुपुत्रस्य वारे ॥
निजमतिपरिणामात्तत्तनूजेन तेन विवृतिरिति किल श्रीश्रीपतिप्रोक्तशास्त्रे ॥ ३ ॥
इति पंडितश्रीमहादेवविरचितं रत्नमालाविवरणं समाप्तम् ॥

४९९ ठाकुर्दासविलासः-हीरानन्दः ।

आ.—श्रीमन्मंगलमूर्त्तिमार्तिशमनं विघ्नौघविध्वंसनं स्वांतध्वांतविदारणं कुजविदां ज्ञानोद्गतेः कारणम् ॥
सिंदूरारुणशुण्डमिंदुशकलप्रोल्लासिमौलिस्थलं वंदेऽहं सुरवृंदवंदितपदं देवं द्विपेंद्राननम् ॥ १ ॥

विश्वं स्थावरजंगमं सृजति यो रक्षत्यजस्रं ततो भूयस्तं हरति स्वयं विरचितैर्ब्रह्माच्युतस्थाणुभिः ॥
श्रीसूर्यादिनवग्रहैर्भगणगैर्नित्यं जगत्पूजितैर्लोके प[र]क्षति यः शुभाशुभफलं कालाय तस्मै नमः ॥ २ ॥
श्रीमल्लक्ष्मणपत्तनान्मनु१४मितक्रोशांतरेऽवाग्दिशि व्यक्तं श्रीरघुवीरसंज्ञकपुरं वर्वर्ति सर्वार्तिहृत् ॥
इभ्योद्भासितरम्यहर्म्यमभितः सम्यास्पदैः शोभितं वापीकूपसरोभिरर्चितपदैर्देवालयैश्चावृतम् ॥ ३ ॥
योजनद्वयविहारिणी ततो जाह्नवी सकलपापहारिणी ॥ तद्गतश्रुतिविदुद्गतध्वनिः शृण्वतीव मुदिता तरंगिता ॥ ४ ॥
यस्याः कारणमच्युतांघ्रिकमलं धातुश्च पात्रे स्थितिः श्रीकंठस्य जटासु मेरुशिखरे काश्यां प्रयागे तथा ॥
प्रांत्या [प्राच्यां] सागरसंगता प्रतिपदं या भुक्तिमुक्तिप्रदा सा गंगा रघुवीरपूर्वकपुरे सद्भिः सदा सेव्यते ॥ ५ ॥

च.–ज्योतिःसिद्धांतवेत्ता सकलगुणयुतः शीलसौजन्यसिंधुर्विश्वामित्रान्वये श्रीनरहरिरभवन्मालवत्यां नगर्य्याम् ॥
द्वौ पुत्रौ तस्य जातौ नयनसुख इति ज्येष्ठ आसीत्कनिष्ठो हीरानंदोऽस्त्युभावप्यखिलफललसज्जौतिषज्ञाननिष्ठौ ॥१८॥
आज्ञप्तो जयसिंहभूमिपतिना सूर्यादिकान्खेचरान्यंत्रैः स्पष्टतरान्विधाय विविधैर्धृत्वा खगोलं स्फुटम् ॥
सिद्धान्तं जयसिंहकौस्तुभमिति ख्यातं च जीर्णं नवं पूर्वं पंडितराजनामपदवीं दिल्लीश्वरादाप्तवान् ॥ १९ ॥
गर्गाद्यैर्गदितास्तथा मुनिवरैर्व्यक्ता वशिष्ठादिभिः सर्वैराधुनिकैर्विचार्य रचिता ये ये निबंधा बुधैः ॥
तांस्तान्वीक्ष्य मुहुः प्रणम्य गणपं वाणीं गुरुं च क्रमाद्धीरानंद इमं चकार रुचिरं ग्रंथं तदर्थानुगम् ॥ २० ॥
दृष्ट्वा तद्विविधं समस्तफलदं ज्योतिष्प्रबंधं ततः स्कंधं सांहितिकं विचिंत्य सुतरां श्रेष्ठं चतुर्वर्गदम् ॥
श्रीमट्ठाकुरदासभूपतिमुदे ग्रंथः कृतोऽयं मया वृत्तैर्जातकताजकादिगणितप्रोक्तप्रकारान्वितैः ॥ २१ ॥
यावच्छ्रुतिस्मृतिपुराणकथातिपुण्या यावच्च रामचरितं रुचिरं विभाति ॥
तावत्समुल्लसतु ठाकुरदासनाम्ना ग्रंथो विलास उदितः (सततं) पृथिव्याम् ॥ २२ ॥
येन श्रमेण रचितोऽच्युत चारुवृत्तैर्ग्रंथो मयैष न हि कोऽप्यपरोऽस्य वेत्ता ॥
त्वामंतरेण विदुषां रसनासने तु सम्यङ्निवेश्य करुणालय पालयस्व ॥ २३ ॥
अथ ग्रंथसमाप्तिसूचकं पद्यं बीजगणितेनोच्यते ॥
यो राशिर्गुणगुणितो मकरसहितो घनं भवति ॥ घनमूलं वर्गीकृतमग्नि[मग्निः]उर्विनिघ्नं कृतिः सैका ॥ २४ ॥
राशिर्वाजिगजा ८७ हतः ससहितो विश्वैस्तु १३ संवत्सरो माः पक्षतिथिवारभप्रभृतयो विश्वो १३ नराशेः समाः ॥
ठाकुर्दासविलास उद्यतपदो ग्रंथोऽत्र घस्रे शुभे हीरानंदकृतः सदा विजयतां विद्वज्जनैः पूजितः ॥ २५ ॥
अथ ग्रंथसमाप्तिसूचकं पद्यम् ॥
वाय्वाकाशमुनींदुभिः १७०५ परिमिते शाके तथा कार्तिके मासे कृष्णदलेन शंकरतिथौ पुष्यार्कयोगे शुभे ॥
ठाकुर्दासविलासनाममहितं ग्रंथं मुहूर्तैर्वृतं हीरानंदद्युत्र पूर्तिमनयत्पंचांगशुद्धे दिने ॥ २६ ॥
श्रीमट्ठाकुर्दासभूभृद्विलासे हीरानंदप्रोक्तवृत्तप्रकाशे ॥ ग्रंथेऽन्वर्थे संहितास्कंधसारः संपूर्णोऽयं शुद्धिपूर्वोऽधिकारः ॥ २७॥
इति श्रीदैवज्ञवर्यनरसिंहतनयहीरानंदविरचिते ठाकुर्दासविलासे शुद्धिनिरूपणतिथिवर्ज्यशाकाद्यधिकारः १६ समाप्तः ॥

५०० तत्त्वपञ्चाशिका-हरिरसकविः ।

आ.–कस्तूरीकोशभासः कमलदलदृशः कौस्तुभांकः कृपालुः कालिंदीकूलकेलीकुलिकुलिशरतः कामिनीकंठमालः ॥
कंसारिः कैटभारिः कलिकुलकदनः कौणपानां करालः कल्पस्थाणुः कवीनां कलयतु कुशलं केशवः केशिपालः ॥ १ ॥

वि. आ.—गोपालपादकमले भ्रमरायितमानसः ॥ चतुर्भुजो रत्नमालां विवृणोति यथामति ॥
अथ निर्विघ्नपरिसमाप्तिकामो ग्रंथकृन्मङ्गलमाचरति ॥ विदितपरमतत्त्वा विदितं ज्ञातं परमतत्त्वं ईश्वराख्यं यैस्ते कपिलादियोगिनः ....

वि. च.—पद्यांतरैः पुनर्निमित्तमेव दर्शितमित्यर्थः ॥ इति श्रीमिश्रचतुर्भुजकृतं रत्नमालाविवरणम् ॥

४९८ ज्योतीरत्नमाला सविवरणा । मू०-श्रीपतिः । वि०-महादेवः ।

मू. आ.—प्रभवविरतिमध्यज्ञानवंध्या नितांतं विदितपरमतत्त्वा यत्र ते योगिनोऽपि ॥
तमहमिह निमित्तं विश्वजन्मात्ययानामनुमितमभिवंदे भग्रहैः कालमीशम् ॥ १ ॥

वि. आ.—प्रणम्य भानुं त्रिजगत्तमोऽपहं समस्तसर्गस्थितिनाशहेतुकम् ॥
दैवज्ञबोधाय मृदुस्फुटाख्या व्याख्यायते ज्यौतिषरत्नमाला ॥ १ ॥
आमशर्मप्रसादेंदुविवृद्धमतिवारिधिः ॥ महार्थां विवृणोम्येनां रत्नमालामलंतराम् ॥ २ ॥
अत्र सतां तावदयमाचारो यत्प्रवक्तृश्रोत्रध्येतॄणामात्मनश्चाशेषांतरायोपशमायेष्टदेवतानमस्कारं विधत्ते तदयमपि कश्यपवंशपुंडरीकखंडमार्तंडो दैवज्ञचूडामणेः केशवस्य पौत्रो ज्योतिःशास्त्रसमुद्रदृष्टपारस्य गणकगणवंदितपदद्वयस्य श्रीमन्नागदेवस्य सूनुर्ज्योतिःशास्त्रमहार्णवस्य तरणे हनुमान् अवगाहने मंदराद्रिः पाने कुंभोद्भवो निर्माणे प्रजापतिरंतर्निवासे यथार्थनामा समस्तमौहूर्तिकशिरोमुकुटमाणिक्यकान्तिनीराजितपदद्वंद्वो महाकारुणिकः श्रीपतिर्ग्रहगणितपाटीगणितबीजगणितरूपसुनिश्चलमूलस्य बहुविधविततहोरातंत्रशाखस्य ज्योतिःशास्त्रवनस्पतेः संहिता एव फलानीत्यवधार्य जातकर्मनामकर्मकरणमौंजीबंधविवाहयात्रादौ गर्गादिसंहिताभिर्विस्तीर्णविसंष्ठुलत्वात्प्रतिदिवसमायास्यमानदैवज्ञनिवहमवेक्ष्य संजातदयोदयो निखिलसंहितार्थमल्पग्रंथेनाभिधातुमिच्छुः समुचितेष्टदेवतानमस्कारं मालिन्याह ॥ अहं श्रीपतिनामा तं कालं अभिवंदे नमस्करोमि ॥

वि. च.—शश्वद्वाक्यप्रमाणप्रवणपटुमतेर्वेदवेदांगवेत्तुः सूनुः श्रीलूणिगस्याच्युतचरणनतिः श्रीमहादेवनामा ॥
तत्प्रोक्ते रत्नमालारुचिरविवरणे ज्ञानदीपाख्यशास्त्रे भर्तृव्यस्त्वप्रसिद्धे प्रकरणममु—स्थापनं विंशमेतत् ॥ २० ॥
श्रीजन्यालयवंशमौक्तिकमणिः श्रीकर्णभूभृत्सखो धीमान्बंधुक इत्यसीममहिमाऽभूद्भूमिदेवाग्रणीः ॥
सर्वज्ञस्तनयस्ततोऽस्य स महादेवाभिधोऽभूद्बुधो यश्चक्रे स्फुटशब्दसिद्धिममलां कालापकोद्बोधनीम् ॥ १ ॥
सूनुस्तस्यामशर्म्मा गणकपरिवृढः सर्वशास्त्रांतदृष्टा ख्यातस्तस्यानुजस्त्वाजड इति विबुधो भीमभूपस्य मित्रम् ॥
विद्वद्वृंदैकवंद्यस्तदनुज उदयद्बुद्धिनिर्धूतमोहः ख्यातः श्रीलूणिगाख्यो गरुडपतिपदद्वंद्वपद्मद्विरेफः ॥ २ ॥
शरवसुशशिसोमैः ११८५ संमिते शाककाले नभसि तिथिचतुर्थ्यामिंदुपुत्रस्य वारे ॥
निजमतिपरिणामात्तत्तनूजेन तेन विवृतिरिति किल श्रीश्रीपतिप्रोक्तशास्त्रे ॥ ३ ॥
इति पंडितश्रीमहादेवविरचितं रत्नमालाविवरणं समाप्तम् ॥

४९९ ठाकुर्दासविलासः-हीरानन्दः ।

आ.—श्रीमन्मंगलमूर्त्तिमार्तिशमनं विघ्नौघविध्वंसनं स्वांतध्वांतविदारणं कुजविदां ज्ञानोद्गतेः कारणम् ॥
सिंदूरारुणशुण्डमिंदुशकलप्रोल्लासिमौलिस्थलं वंदेऽहं सुरवृंदवंदितपदं देवं द्विपेंद्राननम् ॥ १ ॥

विश्वं स्थावरजंगमं सृजति यो रक्षत्यजस्रं ततो भूयस्तं हरति स्वयं विरचितैर्ब्रह्माच्युतस्थाणुभिः ॥
श्रीसूर्यादिनवग्रहैर्भगणगैर्नित्यं जगत्पूजितैर्लोके प[र]क्षति यः शुभाशुभफलं कालाय तस्मै नमः ॥ २ ॥
श्रीमल्लक्ष्मणपत्तनान्मनु१४मितक्रोशांतरेऽवाग्दिशि व्यक्तं श्रीरघुवीरसंज्ञकपुरं वर्वर्त्ति सर्वार्तिहृत् ॥
इभ्योद्भासितरम्यहर्म्यमभितः सभ्यास्पदैः शोभितं वापीकूपसरोभिरर्चितपदैर्देवालयैश्चावृतम् ॥ ३ ॥
योजनद्वयविहारिणी ततो जाह्नवी सकलपापहारिणी ॥ तद्गतश्रुतिविदुद्गतध्वनिः शृण्वतीव मुदिता तरंगिता ॥ ४ ॥
यस्याः कारणमच्युतांघ्रिकमलं धातुश्च पात्रे स्थितिः श्रीकंठस्य जटासु मेरुशिखरे काश्यां प्रयागे तथा ॥
प्रांत्या [प्राच्यां] सागरसंगता प्रतिपदं या भुक्तिमुक्तिप्रदा सा गंगा रघुवीरपूर्वकपुरे सद्भिः सदा सेव्यते ॥ ५ ॥

च.—ज्योतिःसिद्धांतवेत्ता सकलगुणयुतः शीलसौजन्यसिंधुर्विश्वामित्रान्वये श्रीनरहरिरभवन्मालवर्यां नगर्याम् ॥
द्वौ पुत्रौ तस्य जातौ नयनसुख इति ज्येष्ठ आसीत्कनिष्ठो हीरानंदोऽस्त्युभावप्यखिलफलसज्जौतिषज्ञाननिष्ठौ ॥१८॥
आज्ञप्तो जयसिंहभूमिपतिना सूर्यादिकान्खेचरान्यंत्रैः स्पष्टतरान्विधाय विविधैर्धृत्वा खगोलं स्फुटम् ॥
सिद्धान्तं जयसिंहकौस्तुभमिति ख्यातं च जीवं नवं पूर्वं पंडितराजनामपदवीं दिल्लीश्वरादाप्तवान् ॥ १९ ॥
गर्गाद्यैर्गदितास्तथा मुनिवरैर्व्यक्ता वशिष्ठादिभिः सर्वैराधुनिकैर्विचार्य रचिता ये ये निबंधा बुधैः ॥
तांस्तान्वीक्ष्य मुहुः प्रणम्य गणपं वाणीं गुरुं च क्रमाद्धीरानंद इमं चकार रुचिरं ग्रंथं तदर्थानुगम् ॥ २० ॥
दृष्ट्वा तद्विविधं समस्तफलदं ज्योतिष्प्रबंधं ततः स्कंधं सांहितिकं विचिंत्य सुतरां श्रेष्ठं चतुर्वर्गदम् ॥
श्रीमट्ठाकुरदासभूपतिमुदे ग्रंथः कृतोऽयं मया वृत्तैर्जातकताजकादिगणितप्रोक्तप्रकारान्वितैः ॥ २१ ॥
यावच्छ्रुतिस्मृतिपुराणकथातिपुण्या यावच्च रामचरितं रुचिरं विभाति ॥
तावत्समुल्लसतु ठाकुरदासनाम्ना ग्रंथो विलास उदितः (सततं) पृथिव्याम् ॥ २२ ॥
येन श्रमेण रचितोऽच्युत चारुवृत्तैर्ग्रंथो मयैष न हि कोऽप्यपरोऽस्य वेत्ता ॥
त्वामंतरेण विदुषां रसनासने तु सम्यङ्निवेश्य करुणालय पालयस्व ॥ २३ ॥
अथ ग्रंथसमाप्तिसूचकं पद्यं बीजगणितेनोच्यते ॥
यो राशिर्गुणगुणितो मकरसहितो धनं भवति ॥ घनमूलं वर्गीकृतमूग्नि[मग्निः]उर्विनिघ्नं कृतिः सैका ॥ २४ ॥
राशिर्वाजिगजा ८७ हतः ससहितो विश्वैस्तु १३ संवत्सरो माः पक्षस्तिथिवारभप्रभृतयो विश्वो १३ नराशैः समाः ॥
ठाकुर्दासविलास उद्यतपदो ग्रंथोऽत्र घस्रे शुभे हीरानंदकृतः सदा विजयतां विद्वज्जनैः पूजितः ॥ २५ ॥
अथ ग्रंथसमाप्तिसूचकं पद्यम् ॥
वाय्वाकाशमुनींदुभिः १७०५ परिमिते शाके तथा कार्तिके मासे कृष्णदलेन शंकरतिथौ पुष्यार्कयोगे शुभे ॥
ठाकुर्दासविलासनाममहितं ग्रंथं मुहूर्तैर्वृतं हीरानंदद्युधोत्र पूर्तिमनयत्पंचांगशुद्धे दिने ॥ २६ ॥
श्रीमट्ठाकुर्दासभूभृद्विलासे हीरानंदप्रोक्तवृत्तप्रकाशे ॥ ग्रंथेऽन्वर्थे संहितास्कंधसारः संपूर्णोऽयं शुद्धिपूर्वोऽधिकारः ॥ २७॥
इति श्रीदैवज्ञवर्यनरसिंहतनयहीरानंदविरचिते ठाकुर्दासविलासे शुद्धिनिरूपणतिथिवर्ज्यशाकाद्यधिकारः १६ समाप्तः ॥

५०० तत्त्वपञ्चाशिका-हरिरसकविः ।

आ.—कस्तुरीकोशभासः कमलदलदृशः कौस्तुभांकः कृपालुः कालिंदीकूलकेलीकुलिकुलिशरतः कामिनीकंठमालः ॥
कंसारिः कैटभारिः कलिकुलकदनः कौणपानां करालः कल्पस्थाणुः कवीनां कलयतु कुशलं केशवः केशिपालः ॥ १॥

नत्वा कृष्णांघ्रियुग्मं परमपदप्रदं रम्यराजीवरूपं विश्वोत्पत्त्येकबीजं भवभयहरणं कामधेनुः कृपालुः ॥
काशीस्थो गौडविप्रो हरिरसकवयो[विप:]सेवकः साधकानां कुर्वे सिद्धांतसारं मुनिमनुजमतं तत्त्वपंचाशिकेयम्[काख्यं] ॥

५०१ ताजिककौस्तुभः-बालकृष्णः ।

आ.–ध्यात्वा तत्समयः[ये]पयःप्रदनिभं विंध्याद्रिसंस्थं महो यश्चासीत्सकलागमार्थकलितः श्रीरामजित्पंडितः ॥
तद्वंशोद्भवभट्टयादवसुतः श्रीबालकृष्णाभिधः कुर्वे ताजिककौस्तुभं सुललितं विद्वद्व्रजाभूषणम् ॥ १ ॥
सत्ये विधिः शास्त्रमधान्न तन्मुधा त्रेतायुगे यन्मुनिबादरायणः ॥
यद्द्वापरे गर्गकृतं यथा भवेत्तिष्ये तथा ताजिकशास्त्रजं फलम् ॥ २ ॥
स्थूलकालफलदं हि जातकं तत्र धीर्न वरिवर्ति धीमताम् ॥ ताजिकं विशदिमादि ताजिका ताजिकज्ञसुखदं वदाम्यतः ॥३॥
समरसिंहकखिन्नकरोमकप्रभृतिभिर्गदिता बहुताजिकाः ॥
य इति ते सुगमा न भवंति मे स्फुरति धीरिव ते सुगमस्य वै ॥ ४ ॥
ललितपदपराणां चित्रवृत्तादराणां फलविधिचतुराणां प्रीतये कीर्तयेऽदः ॥
विमलमतिविचार्यं पंडितैश्चापि धार्यं सततमपरिहार्यं बालकृष्णोक्तकाव्यम् ॥ ५ ॥
संबंधं निजगदुरन्वयेतराभ्यां प्राचीना गणितफलाभिधानयोर्यत् ॥
कुर्वेऽतोऽहमिह विलेखनक्रमेण निर्देशं गणितविधेः फलान्वितस्य ॥ ६ ॥
च.–या ताप्युत्तरतीरसंश्रयवती ख्याता प्रकाशीपुरी यश्चासीदिह याज्ञवल्क्यतिलकः श्रीरामजित्पंडितः ॥
षट्शास्त्राध्ययनाधिराट्समभवन्नारायणस्तत्सुतस्तत्सूनुर्नयवेदविरसमभवद्यो रामकृष्णाभिधः ॥ १५ ॥
तदंगजो यादवभट्टनामा नानागमार्थाकलितो वभूव ॥ साहित्यपीयूषमु[सु]पोषितांगः श्रितप्रकाशे जगति प्रसिद्धः ॥१६॥
इह यादवभट्टजातजन्मा जनकांघ्र्यंबुजषट्पदस्ततान ॥ स हि ताजिककौस्तुभाभिधानं कमनीयं भुवि बालकृष्णभट्टः ॥१७॥
श्रीनारायणशंकरस्तवनके स्तोत्रं शिवायास्ततो यंत्रोद्धारयुतं महागणपतेः स्तोत्रं त्रिकोण्या[त्रिवेण्या] स्ततः ॥
योगिन्यष्टदशाक्रमश्च तरणेः संक्रांतिजो निर्णयः पत्न्या यस्य विराजते कृतिरियं पांडित्यचिंतामणिः ॥ १८ ॥
एनं नरस्ताजिककौस्तुभं यः कंठे विदध्यात्समनीषिमान्यः ॥ सर्वे सभामंडलमंडनाय भवेन्नरेशाप्तगजाश्ववित्तः ॥१९॥
नाभ्यर्थ्यंते चंद्रिकायां चकोराश्चंद्रेणाथो कल्पपुष्पैर्न भृंगाः ॥
तद्वत्स्यादस्मिन्[तस्मादस्मिन्स्याद्]गुणोत्कर्षलेशः कश्चिन्नूनं पंडिताः संतु शक्ताः ॥ २० ॥
यादृशो मम मतेः परिपाकस्तन्निदानवशतोयमकारि ॥ शोधयंत्विह बुधा यदशुद्धं प्रार्थनं सफलयंतु ममैतत् ॥ २१ ॥
इति श्रीमद्भट्टयादवात्मजबालकृष्णभट्टविरचितो ताजिककौस्तुभः समाप्तः ॥ संवत् १८६१ ॥

५०२ ताजिकनीलकण्ठः रसालाटीकासहितः । मू०-नीलकण्ठः । टी०-गोविन्दः ।

टी. आ.–वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ॥ यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
श्रीसिद्धिवुद्धिप्रदमंबुदाभं विघ्नावलीसंतमसांशुमंतम् ॥ सिंदूरपूरारुणगंडयुग्मं वेतंडतुडं शरणं प्रपद्ये ॥ २ ॥
ऋग्भिः प्राह्णे यजुर्भिर्दिन इह तरुणे सामभिश्चापराह्णे स्रष्टापि स्पष्टमष्टावपि हरिदधिपाश्चोपतिष्ठन्ति रातेत्रौ[त्रौ] ॥
एतज्ज्योतिःसवित्रात्मकमखिलजगत्राणजन्मक्षयादिक्रीडाकर्मैकवंद्यं त्रिभुवननमितं तत्त्रिसंध्यं नमामि ॥ ३ ॥

यस्याः प्रवाहनिवहानवगाहमानः पारं न पश्यति परं चतुराननोऽपि ॥
किं तत्र चिंतयतु चित्रशिखंडिजन्मा स्रोतस्विनीमिव नमामि सरस्वतीं ताम् ॥ ४ ॥
अनन्तपुत्रं बुधनीलकण्ठं सचंद्रिकं भूमिभृदग्र्यमान्यम् ॥ समस्तविद्याखनिमीशमीडे वाराणसीशं कमलानिवासम् ॥ ५ ॥
आसीद्विंध्यमहीध्रभूपिततनुर्विद्यावतामाकरो नानाभूमिपतीन्द्रसेविततलो देशो विदर्भाह्वयः ॥
कूलद्वन्दविवर्तिपत्तनयुता योगीश्वरैः सेविता यत्र स्थाणुजपाद्यपास्तदुरितैर्गोदावरी त्याज्यते[राजते] ॥ ६ ॥
तत्रासीदपरो वाशिष्ठ इव स स्वाचारनिष्ठः कृती ज्योतिःशास्त्रकलाकलापनिपुणो दैवज्ञचिन्तामणिः ॥
यत्कर्म्मोघवलीकृतं त्रिभुवनं भोगीन्द्रगंगेन्दवो क्रीडाभारमिपादथांधकरिपोरद्यापि सेवापराः ॥ ७ ॥
तस्यात्मजोऽभवदनन्त उमातनूजः पादारविन्दमकरन्दमधुव्रताख्यः ॥
ज्योतिर्नयत्रिनयनेह गदा(न्व)वाये येन त्रिकालविदुषा खलु गर्भभावः ॥ ८ ॥
सूनुस्तस्य बभूव गौतममते निष्ठैकतामागतो मीमांसास्मृतिशास्त्रवेदनिपुणः साहित्यपारंगमः ॥
गाणेशो भुजगाधिराजभणितिं शिष्यान्सदाध्यापियज्ज्योतिःशास्त्रसरोजमानसरविः श्रीनीलकण्ठो बुधः ॥ ९ ॥
यन्नाम प्रथितं हि भूमिवलये शिष्यप्रशिष्यैर्महद्भूमीपालसमूहसेवितपदाद्योकब्बरेणान्वितः ॥
श्रीदिल्लीप्रभुणा हि ढो[टो]डरविभोरानंददं ज्यौतिषं त्रिस्कंधं स्वकृतैः सुपद्यनिवहैस्तत्ताजिकं चाकरोत् ॥ १० ॥
तस्यानुजो रामविधिज्ञ आसीत्सिद्धान्तवेत्ता नृपमान्यमान्यः ॥
ग्रंथं च यो रामविनोदसंज्ञं मुहूर्तचिंतामणिमप्यकार्षीत् ॥ ११ ॥
गोविन्दो नैलकण्ठिर्विविधविधिविदां मूर्द्धहीरः सुधीरोऽभूद्रामानुश्चंद्रिकाया हृदयसरसिजोल्लासने वासरेशः ॥
योऽज्ञासीच्छेषवाणीः पितृत इह तथा ज्यौतिषं भूरिभेदं मीमांसायामधीती स्मृतिषु सुनिपुणो वक्रतुंडैकभक्तः ॥ १२ ॥
योऽकार्षीद्धि मुहूर्तचिन्तनमणेः पीयूषधाराभिधां टीकां रामविनोदनामकरणव्याख्यां च सोदाहृतिम् ॥
सिद्धान्ते ऋतुवर्णनस्य विवृतिं विद्वन्मनोहारिणीं काव्येऽल्पे घटखर्परे सुविवृतिं सत्प्रीतये व्यातनोत् ॥ १३ ॥
सकलबुधविधिज्ञः प्रार्थनोद्युक्तचेता गुरुपदयुगभक्तिः प्राप्तबुद्धिप्रसादः ॥
पितृविरचितमेतद्दर्पसंपद्विवेकं सुललितपदबंधं संप्रति व्याकरोति ॥ १४ ॥
संज्ञाविवेकोदधिसिंधुमाशु प्रमथ्य सद्युक्तिसमेतदिव्याम् ॥ गोविन्दनामा कुरुते सुखाय भूमीश्वराणां विवृतिं रसालाम् ॥ १५ ॥
तत्र तावत्सकलमुनिश्रेष्ठगर्गवंशावतंसरूपो निखिलविद्वद्दैवज्ञमुकुटहारस्त्रिस्कंधज्योतिःशास्त्रनिबंधकृत् चिन्तामणिज्योतिर्वित्पौत्रानंतज्योतिर्वित्पुत्रश्रीनीलकण्ठो ज्योतिर्वित्संज्ञातंत्रवर्षतंत्रप्रश्नरूपप्रकरणत्रयात्मकजीर्णताजिकशास्त्रस्य प्रथमप्रकरणं संज्ञाविवेकनामकं सद्यः सदसत्कलौपयिकवंशस्थविराडाद्यनेकच्छंदःसहितं चिकीर्षुरनेकजन्मोपार्ज्जितदुरितसंभूतविघ्नध्वंसकामो निर्विघ्नग्रंथसमाप्तिप्रचयगमनाय शिष्टाचारपरिपालनाय च विशिष्टदेवतानां गणेशसूर्यपितृचरणकमलानां नमस्काररूपेण मंगलमाचरन्विषयप्रयोजनसंबंधाधिकारिणश्च सूचयन्कर्त्तव्यमुपजातिकातृतीयभेदेन प्रतिजानीते ॥......

मू. आ.—प्रणम्य हेरंबमथादिकारणम् — — — — — — —

टी. च.—इति स्वप्नचिन्ता ॥

दैवज्ञाग्रिमनीलकण्ठविदुषः श्रीचन्द्रिकायास्तथा पुत्रेणाहिगवीप्रसारितधिया नव्याब्दतंत्रस्य हि ॥
गोविन्देन विनिर्मिते नयनिधौ दिव्ये रसालाभिधे व्याख्याने मृगयाभुजिप्रभृतिकव्याख्यागमत्पूर्णताम् ॥ १ ॥

५०३ ताजिकरत्नाकरः-रत्नाकरदैवज्ञः ।

आ.–तमोगुणविनाशिनी सकलकालमुद्योतिनी धरातलविहारिणी जडसमाजविद्वेषिणी ॥
कलानिधिसहायिनी लसदलोलसौदामिनी मदंतरविलंबिनी भवतु कापि कादंबिनी ॥ १ ॥
कालो व्योमचरोदयो व्यवहृतिर्यात्राप्रवेशः स्वरस्तिथ्याद्यानयनं च वत्सरफलं भूव्योमगोलाकृतिः ॥
पश्चाज्जातकताजके शकुनकः प्रश्नाश्च संकीर्णकं रत्नैरेभिरितश्चतुर्दशमितैर्दैवज्ञरत्नाकरः ॥ २ ॥
ज्योतिर्वर्त्मनि लक्ष्यलक्षणकृते न्यायादिशास्त्रोल्लसदुद्यद्बुद्धिविशुद्धकौतुकतया श्रेयान्मया निर्मितः ॥
यः सिद्धांतगभीरनीरनिचयो दैवज्ञरत्नाकरस्तस्मात्ताजकरत्नमुद्धृतमिदं भूदेवभूपायताम् ॥ ३ ॥
दृष्ट्वा ताजकभूषणं गणपतेर्गौडस्य चूडामणेः सारं कल्पतरोस्तथैव गदितं श्रीनीलकण्ठस्य च ॥
अन्येषां कृतिनां कृतानि बहुशः संवीक्ष्य निष्कृष्य च श्रेयो यद्बहुसंमतं मतमिह ब्रूमः स्वपद्येन तत् ॥ ४ ॥

च.–वाग्देवीवदनादनादिरचनाविन्यासदीव्यन्नवद्वीपग्रामजनेरनेकदिवसं वाराणसीवासिनः ॥
विद्यासागरजागरोन्नतमतेर्भाव्या ममैषा कृतिर्विद्वद्भिः कृपया कयापि सहसा मात्सर्यमुत्सृज्य तैः ॥ २८ ॥
द्वैताद्वैतमतादिनिर्णयविधिप्रोद्बुद्धबुद्धिश्रुतो भट्टाचार्यशतावधान इति यो गौडोद्भवोऽभूत्कविः ॥
नानाशास्त्रविदा तदात्मजचिरंजीवेन यन्निर्मितं दिव्यं ताजकरत्नसम्प[मस्य]दशमी पूर्णा प्रभाभूदियम् ॥ २९ ॥
इति श्रीशतावधानभट्टाचार्यसुतदैवज्ञरत्नाकरोद्धृते ताजिकरत्नाकरे दशादिफलप्रकाशिका दशमी प्रभा ॥ १० ॥
श्रीरस्तु ॥ संवत् १९०९ ॥

५०४ तात्कालिकचन्द्रः-सटीकः ।

टी. आ.–सर्वज्ञत्वप्रकाशाद्ये[ये]श्वरेण भगवता महादेवेन नित्यज्ञानवता रविचंद्रभ्रमाभ्यामन्येषामपि भ्रमणमनुदिनं लग्ननवांशादिभागमिन्दुजोगतारलम्यैनऋजुवेधवक्रोद्भुतमाह ॥ अथात इति । अथशब्दो मंगले ॥

मू. आ.–अथातः संप्रवक्ष्यामि तत्कालेन्दुं परिस्फुटम् ॥ येन विज्ञानमात्रेण त्रैलोक्यं सचराचरम् ॥ १ ॥ ....
एनलानानि सर्वाणि सत्यतापतिभूतले ॥ तत्कालचन्द्रजज्ञानं समानं नैव भूतले ॥ इति तत्कालचन्द्रजमानम् ॥
मया तत्कालचन्द्रगतं तात्कालिकचन्द्रमूर्त्तिज्ञानं कथितमिति ॥ इति तात्कालिकचन्द्रे ऋजुवेधविवर्णनम् ॥ ....
अथ जातिज्ञानार्थम् ॥ तिथिवारर्क्षयोगानां करणस्य च संख्यकाः तत्काललग्नांशयोगात्सिद्धा ॥ ....

टी. च.–इति श्रीसामान्यतो द्वादशभावविचार्यपदार्थजातकं समाप्तम् ॥

५०५ त्रिविक्रमशतकम्-त्रिविक्रमः ।

आ.–नमस्कृत्य परं ब्रह्म गणकेंदुस्त्रिविक्रमः ॥ मुनिप्रणीतमखिलं व्यवहारं प्रवक्ष्यति ॥ १ ॥

च.–नारायणस्य तनयो ज्ञानविज्ञानविद्[ज्योतिरिह्लानुजो]द्विजः ॥ त्रिविक्रमः शतश्लोकं व्यवहारममुं व्यधात् ॥ १०५ ॥
किंचित्कलियुगे याते ब्रूते ब्रह्मा त्रिविक्रमम् ॥ तव जिह्वाग्रसंस्थः सन् [स्येन]शास्त्रमेतन्मया कृतम् ॥ १०६ ॥
इतिश्री त्रि० शतकं सं – – – – – –

५०६ त्रिविक्रमशतकं सटीकम् । टी०-हृषीकेशः ।

टी. आ.—नारंगरंगिवसनं श्वसनाहतं सदंगे परिस्फुरति यस्य तडिल्लतेव ॥
पादारविंदमकरन्दजुषः शुकाद्या देवं तमन्वहमहं शरणं प्रपद्ये ॥ १ ॥
यस्य गर्जितमाकर्ण्य वित्रस्ताः कविकुंजराः ॥ व्यासं श्रीसोमचंद्रं तं नौम्यहं पितरं निजम् ॥ २ ॥
प्रणम्य भास्करं सोमचन्द्रं च पितरं गुरुम् ॥ करिष्ये विवृतिं ब्रह्मव्यवहारे यथामति ॥ ३ ॥
इति जगति सर्वेऽभीष्टवस्तुनि प्रवर्त्तमाना अविकृताभीष्टदेवतानमस्कारपुरस्सरं प्रवर्त्तंत इति मत्वा श्रीमौद्गल्यगोत्रोद्भवगणकचक्रचूडामणेर्नारायणास्यांगजो महाकारुणिकस्त्रिविक्रमाचार्यः प्रथमश्लोकेनास्य प्रपंचजातस्याधारभूतं ब्रह्मैवादौ नमस्कृत्य संबंधप्रयोजनाभिधेयान्याह ॥

मू. आ.—नमस्कृत्य परं ब्रह्म — — — — — —

मू. च.—नारायणस्य तनयो ज्योतिरिह्लानुजो द्विजः ॥ त्रिविक्रमः शतश्लोकं व्यवहारममुं व्यधात् ॥ १०१ ॥
किंचित्कलियुगे याते ब्रूते ब्रह्मा त्रिविक्रमम् ॥ तव जिह्वाग्रसंस्थेन शास्त्रमेतन्मयाकृतम् ॥ १०२ ॥

टी. च.—इदानीं ग्रंथकर्ता निजजनकज्येष्ठभातृस्वनामानि ग्रंथाग्रं चाह ॥ त्रिविक्रमस्त्रिविक्रमनामा गणकः इमं व्यवहारं व्यधात् व्यवहार्ति उपनिबबंध किंभूतं शतश्लोकं शतश्लोकाह्वयं तथा किंविशिष्टो द्विजः द्विजन्मा पुनः किंविशिष्टः नारायणस्य तनयः नारायणस्य नाम्नो दैवज्ञस्य पुत्रः पुनः किंभूतः ज्योतिरिह्लानुजः लघुभ्राता ॥ अधुना शास्त्रस्यापौरुषेयत्वमाह ॥ किंचित्स्तोकं कलियुगे याते गते सति ब्रह्मा हिरण्यगर्भस्त्रिविक्रमं ब्रूते ब्रवीति यदेतच्छास्त्रं तव जिह्वाग्रस्थेन मया कृतमिति ॥ इति शास्त्रस्यास्य ब्रह्मवाक्यत्वात्स्वल्प[श्रैष्ठ्य]मुक्तम् ॥ इति व्यवहारविवृतिः समाप्ता ॥
इति श्रीव्याससोमचन्द्रात्मजेन प्रतिपक्षलक्षमुखकमलसंकीर्तितसकलेन महाकविना हृषीकेशेन त्रिविक्रमोक्तौ विरचिता कर्णामृतधाराप्रवर्षिणी परोपयोगिनी नाम टीका समाप्ता ॥ संवत् १९१३ ॥

५०७ दोषज्ञानरत्नावली-जयरत्नः ।

आ.—यस्योत्तमामलविभांचितपादपद्मद्वंद्वं सुरासुरकिरीटमणीमयूखैः ।
संरज्यते कनकरत्नसुपीतसंस्थं तं देवदेवमहमात्मनि चिंतयामि ॥ १ ॥
श्रीमद्गुर्जरदेशभूषणमणिस्त्रंबावतीनामके श्रीपूर्णे नगरे बभूव स गुरुः श्रीभावरत्नाभिधः ॥
तच्छिष्यो जयरत्न इत्यभिधया यः पूर्णिमागच्छवांस्तेनेयं क्रियते जनोपकृतये श्रीज्ञानरत्नावली ॥ २ ॥
च.—इति प्रश्नलग्नोपरिदोषरत्नावली संपूर्णा ॥

५०८ धीकोटिकरणम्-श्रीपतिः ।

आ.—चन्द्राङ्गनन्दो९६१नशकोर्क१२निघ्नश्चैत्रादिमासैर्युगतो द्वि२निघ्नः ॥
पंचो५निताः स्वीयनृपांक९६१भागलब्धं शरांगाप्त६५फलेन युक्तः ॥ १ ॥
च.—स्पर्शस्थितौ चंद्रमसोर्कमुक्तिः स्पर्शोब्जमुक्ताविति ते क्रमेण ॥
धीकोटिदं सत्करणोत्र सिद्धियुक् श्रीपतिः सारतरं चकार ॥ १९ ॥
इति श्रीश्रीपतिविरचिते धीकोटिदे करणे सूर्यपर्वाधिकारः ॥

५०९ नरपतिजयचर्या-नरपतिः ।

आ.—अव्यक्तमव्ययं शांतं नियतं योगिनां प्रियम् ॥ — — — — — — — — —

च.—स्वस्वमंत्रैर्बलिपूजां विधाय तदनु व्रजेत् ॥ २८ ॥

इति नरपतिविरचितानि यात्राप्रवेशनिमित्तशकुनानि समाप्तानि ॥

पूजयित्वा गणाधीशं तस्मै कार्यं निवेद्य च ॥ गृहीत्वा कुडवादिस्थं गंतव्यं रजकालये ॥ १ ॥

एकाग्रमानसः स्थित्वा तत्रोपश्रुतिमाहरेत् ॥ वाक्यकालिप[काल्पनि]कां शुद्धां यथोक्तफलदायिकाम् ॥ २ ॥

इति प्राणिनामुपश्रुतिज्ञानम् ॥

विद्यालये मालवसंज्ञदेशे धारापुरीरम्यनिवासवासी ॥

नानागमज्ञो नृपलोकपूज्यो नाम्ना प्रदेवो [नाम्नाग्रदेवो] विबुधः प्रसिद्धः ॥ १ ॥

स्वरवलफलवेत्ता देहतत्त्वेष्वभिज्ञो विदितशकुनशास्त्रस्तंत्रमंत्रप्रवीणः ॥

कलितगणितसारश्चारुचूडामणिज्ञो नरपतिरितिनामा तस्य पुत्रो बभूव ॥ २ ॥

ज्ञाने यः सर्वज्ञो नृपगणपूज्यः सरस्वतीसिद्धः ॥ तेन कृतं शास्त्रमिदं प्रचुरगुणं दोषरहितं च ॥ ३ ॥

यो वेत्ति शास्त्रमेतद्गुरुमुखकथितं सुयुक्तिसंयुक्तम् ॥ निवसति सदा समग्रा ज्ञानज्ञश्रीस्तस्य करकमले ॥ ४ ॥

हत्वा रिपुं नृपलक्ष्मीं दत्ते निजभूपतये न संदेहः ॥ एतच्छास्त्रज्ञबुधश्चतुर्विधे चैव संग्रामे ॥

श्रीमत्यणहिलनगरे ख्याते अजयपालनृपराज्ये ॥ श्रीमन्नरपतिकविना रचितमिदं तत्र संस्थेन ॥ ५ ॥

विक्रमार्के गते काले पक्षाग्निभानुवत्सरे ॥ मासि चैत्रे सिते पक्षे प्रतिपद्भौमवासरे ॥ ६ ॥

षड्भिरंगैश्चकारेदं नृपतीनां जयावहम् ॥ अनुष्टुप्छंदसां श्लोकैः सार्द्धैः षष्ठसहस्रकैः ॥ ७ ॥

समाप्तोऽयं नरपतिजयचर्याग्रंथः ॥

५१० पञ्चपक्षिटिप्पणम्-कल्याणकरः ।

आ.—आदौ शापविमोचनं कुर्यात् ॥ ॐ अस्य श्रीपंचपक्षिणां शापविमोचनविद्यामंत्रस्य महादेवऋषिर्गायत्री छन्दः पार्वती देवता शापविमोचनार्थे जपे विनियोगः ॥

ॐक्रींपंचपक्षिणां शापं मोचय मोचय सत्यं वद स्वाहा ॥

अस्य पुरश्चरणं दशसहस्रं प्रश्नादौ दशवारं त्रिवारं वा जप्त्वा पुनः प्रश्नं विचारयेत् इति ॥

च.—क्रमेण कमल इति सिद्धम् ॥

इति कल्याणकरशुक्लविरचितं पंचपक्षिटिप्पणम् सम्पूर्णम् ॥

५११ पञ्चश्लोकी सटीका । मू०-टी०-बालकृष्णः ।

आ.—श्रीमद्गुरुपदयुगलं नत्वा कुर्वे सुबोधिनीं टीकाम् ॥ लघुतरपञ्चश्लोकि[की]ताजिकजातैकभूषार्थम् ॥ १ ॥

अथ विघ्नध्वंसपूर्वकपरिसमाप्तिकामो ग्रन्थकृद्वेदबोधितशिष्टाचारागतमंगलाचरणपूर्वकस्वविघ्नोच्चाटनादिसविशेषेण हेतुग्रंथकरणप्रतिज्ञां समाकलयति ॥ देवं ध्यात्वेति ॥ बालकृष्णः पञ्चश्लोकैस्ताजिकं करोतीत्यन्वयः ॥

च.—अथोपसंहारः ॥

गुरुतरताजिकशास्त्राल्लघुतरमिदमुद्धृतं समूलं च ॥ ताजिकताजकभूषं लघुवितति प्रकाशतां यातु ॥ १ ॥

इति श्रीबालकृष्णविरचिता पंचश्लोकी सटीका संपूर्णा ॥

५१२ पञ्चस्वराटिप्पणम्-गौडभट्टाचार्यः ।

आ.—मृत्युवर्षज्ञाननिर्णये यथा ॥

ययोराशीश्वरानेकीकृत्य गणनां कृत्वा मृत्युवर्षज्ञानम् । गणनायां कृतायां सप्त शून्यानि यस्मिन्वर्षे भवंति तस्मिन्वर्षे मृत्युर्वाच्यः । स च यत्स्वरे यदि कुजसौरराहूणां पापानां सम्बन्धि भवति तदैव मृत्युर्भवति नान्यथा इति ॥

च.—इति श्रीगौडभट्टाचार्यकृतमिदं पंचस्वराटिप्पणं सम्पूर्णम् ॥

५१३ पञ्चस्वराटीका-परमसुखोपाध्यायः ।

आ.—श्रीगणेशं नमस्कृत्य सिद्धिबुद्धिप्रदायकम् ॥ पंचस्वराभिधानस्य क्रियते ग्रंथसंगतिः ॥ १ ॥

परमादिसुखेनापि ग्रंथं दृष्ट्वा सुविस्तरम् ॥ असमंजसमालोक्य क्रियते ग्रंथसंगतिः ॥ २ ॥

श्रीगुरोश्चरणौ नत्वा परमादिसुखाभिधः ॥ पंचस्वराभिधानस्याकृत ग्रंथस्य संगतिम् ॥ ३ ॥

अपास्य मरणं जीवं वाहयंति शुभाशुभम् ॥ मरिष्यंति यदादैवात्को भुंक्ते हि शुभाशुभम् ॥ ४ ॥

बालस्य जन्ममात्रे तु जन्मारिष्टं विचारयेत् ॥ तस्मात्सर्वप्रयत्नेन आयुर्दायं विचारयेत् ॥ ५ ॥

च.—समादाय यथारिष्टं यदुक्तं लग्नसंग्रहे ॥ पापयोगे भवेद्रिष्टं शुभयोगे भवेच्छुभम् ॥ ४४ ॥

इति श्रीसनाढ्यकुलावतंसपरमसुखोपाध्यायकृते पंचस्वराग्रंथे आयुर्दायाख्यो द्वितीयोध्यायः समाप्तः ॥

५१४ पञ्चस्वरोदाहरणम्-प्रजापतिदासः ।

आ.—इष्टदेवं नमस्कृत्य गोपालं कुलदैवतम् ॥ श्रीप्रजापतिदासेन क्रियते ग्रंथसंग्रहः ॥ १ ॥

वराहकृतसूत्रेण यत्किंचित्क्रियते मया ॥ ज्योतिर्विदः प्रपश्यंतु ग्रहाणां सुविचारतः ॥ २ ॥

अपास्य मरणं मूढाः प्रपश्यंति शुभाशुभम् ॥ मरिष्यति यदा दैवात्को भोक्ताऽत्र शुभाशुभम् ॥ ३ ॥

तस्मात्सर्वप्रयत्नेन आयुःस्थानं विचिंतयेत् ॥ बालस्य जन्ममात्रेण जन्मारिष्टं विचिंतयेत् ॥ ४ ॥

चतुर्विंशतिवर्षाणि यावद्गच्छंति जन्मतः ॥ तावद्रिष्टं विचार्यं तु गुप्तरूपं न चान्यथा ॥ इति ॥ ५ ॥..........

५१५ पाराशरसूत्रम् ।

आ.—पाराशरस्यानुमतानुसारं दायस्य संस्कारमहं प्रवक्ष्ये ॥ मेषादिराशिस्थनभोग्रहेषु लग्नादिभावेषु गतेषु वाक्यैः ॥ १ ॥

अथ पराशरमतेन मेषादिराशिस्थितेषु विलग्नादिभावगतेषु ग्रहेषु सत्सु वाक्य एवांकैः पृथग् पृथगायुः स्फुटाक्रि[त]योच्यते ॥

तत्रादौ सूर्यस्य वाक्यानि लिख्यंते ॥

वंदे त्रैलोक्यनाथं च॥१॥पार्वतीपरमेश्वरौ॥२॥नारायणो जगन्नाथः॥३॥भवानीपतिपूजितः॥४॥ गोपालप्रतिपादकः॥५॥

च.–विष्णुः स्यात्सदा विभुः ॥ १२ ॥ इति लग्नस्य वाक्यानि ॥ गुणनभाजनयोजनवियोजनहन्यादिकं सर्वं गुरूपदेशतो
ज्ञात्वा सुधीभिरायुःस्पष्टीकरणं विधेयं इदमायुः प्रतीतिजनकं भवतीति ॥
नमोऽस्तु गुरवे तस्मै इष्टदेवस्वरूपिणे ॥ यस्य वागमृतं हंति विषं संसारसंज्ञकम् ॥ १ ॥
इति श्रीपराशरविरचितं सूत्रं समाप्तम् ॥

५१६ पाराशरहोरायाष्टीका-लक्ष्मीपतिः ।

आ.– – – – श्रीमतिमा[श्रीपतिमा]प्रणम्य भक्त्या सुहृदां हृत्कमलप्रकाशहेतोः ॥
उडुदायोत्थफलप्रदीपटीका क्रियते सज्जनरंजनी मयैषा ॥ १ ॥
पराशरमतागमार्थगहनोदधिक्रोडगा शुभाशुभफलौघन – – वृत्तेन्दुबिम्बप्रभा ॥
पुरातनकथा कथं प्रकयितुं क्षमा धीर्ममेत्यजस्रमनुधावतीव हि न याति पारं यतः ॥ २ ॥
न पदच्छेदपदार्थविग्रहार्थान्वयसद्भावनिरुक्तियुक्तिबुद्धिः ॥
कुत आक्षेपसमाधृतिस्तथापीरयति श्रीगुरुगीर्लिखरयजस्रम् ॥ ३ ॥
पराशरपरापारापरासारपरम्परा ॥ गुरोर्गीः श्रुतिगा हृत्स्था लिपीरूपा वहत्यसौ ॥ ४ ॥
अस्य विप्रनिपत्यु[तिपत्त्यु]क्तौ योग्यत्वं न बृहस्पतेः ॥ का कथाधुनिकासा[नां] च प्रोतोक्षाकल्पमादृशाम् ॥ ५ ॥
अतो गुरुका व्याख्यैव न्यस्तेयं न स्वकल्पिता ॥ अत आगमवन्मान्या स्वकल्याणमभीप्सुभिः ॥ ६ ॥
अथ पराशरमतानुभावितांतःकरणः कश्चित्कविः तदुडुदायप्रदीपाख्यं ग्रन्थं कर्त्तुमुद्यतः स्वेष्टदेवं प्रणमति सिद्धान्तमिति ॥
च.–कान्यकुब्ज[ब्जाख्य]विषये पैतियाख्यप्रगात्मके ॥ श्रौतस्मार्त्तक्रियोपेतखोरग्रामनिवासिना ॥ १ ॥
पांडेइत्युपनाम्ना श्रीभारद्वाजसगोत्रिणा ॥ नेपालाधीशराजेन्द्रविक्रमप्रार्थिताङ्घ्रिणा ॥ २ ॥
कृष्णानंदात्मजेनेयं लक्ष्मीपातिद्विजन्मना ॥ कृता सम्योडुदायस्य टीका सज्जनरंजनी ॥ ३ ॥
वाल[ज]पेयिकुलोद्भूतरामचंद्राज्ञया मुदा ॥ प्रीयतामनया श्रीमान्विश्वेशो भगवान्स्वयम् ॥ ४ ॥
योडुदायप्रदीपाख्या टीका सज्जनरञ्जनी ॥ तस्याः पूर्तिमगाद्दायाध्यायव्याख्या सुनिर्मला ॥ ५ ॥
इत्युडुदायप्रदीपिका टीका यथामति लिखिता संपूर्णा ॥

५१७ प्रश्नग्रन्थः-विघ्नराजः ।

आ.–भूतं भविष्यत्प्रश्नांश्च विज्ञातं ज्यौतिषं कृतम् ॥ आयुःप्रश्नमिमं ग्रंथं चमत्कृतिकरं परम् ॥ १ ॥
च.–प्रश्नप्राप्तिमिमं ग्रंथं विघ्नराजेन निर्मितम् ॥ वाग्देवतामिषं भक्त्या त्वत्प्रसादात्करोम्यहम् ॥ ५६ ॥
इति प्रश्नांतरग्रंथः संपूर्णतामगात् ॥

५१८ प्रश्नतन्त्रम्-चिन्तामणिः ।

आ.–शुभाशुभफलप्रश्ने प्रथमं सकलं शुभम् ॥ तदा सर्वं शुभं ज्ञेयं अशुभे त्वशुभं भवेत् ॥ १ ॥
अथ कथं भविष्यतीति प्रश्नः ॥
तन्वष्टशकलं सौम्यं संतोषं च वदेत्सुधीः ॥ लाभराजगुरुत्वं च यशोवृद्धिं च संवदेत् ॥ २ ॥

च.—इति श्रीदैवज्ञचूडामणिश्रीमन्महाराजवंदितपदांबुजशिष्यजनानंददायकसर्वविद्याकुशलसर्वशास्त्रकृतश्रमश्रीमच्चिंतामणिपंडितवर्यविरचिते ज्योतिःशास्त्रे रमलशास्त्रं संपूर्णतामगमत् ॥

५१९ प्रश्नमाणिक्यमाला-परमानन्दः ।

आ.—श्रीमदभ्रमदभ्रमरराजिविराजमानगंडस्थलस्खलदमंदमदप्रवाहः ॥
प्रत्यूहनाशविधये भुवनैकवंद्यः पायादपारमहिमा गिरिजात्मजन्मा ॥ १ ॥
ब्रह्मादयोऽपि निजकार्यसमर्थभावं यस्य प्रसादकणतः समुपेयिवांसः ॥
तत्तत्त्वबोधजनने किल हेतुमेकं वाग्देवताचरणपद्मयुगं नमामि ॥ २ ॥
यस्य प्रसादमधिगम्य भवंति मूढाः सिद्धान्ततंत्रकरणैकपथाधिरूढाः ॥
तं श्रीमहाजनिसदाशिवनामधेयं वंदामहे निजगुरुं गणकाग्ररायम् ॥ ३ ॥
संप्राप्तसारस्वतवैभवस्य सारस्वतब्राह्मणपुंगवस्य ॥ सारस्वतार्थप्रतिलब्धहेतोः पितुः स्वकीयस्य पदं नमामि ॥ ४ ॥
नत्वाचार्याग्र्यगर्गप्रमुखमुनिगणांस्तत्प्रणीतार्थपूर्णग्रंथान्बुध्वा समग्रान्निजगुरुकृपया प्रश्नचंडेश्वरादीन् ॥
वेणीदत्तात्मजन्मा ग्रथयति परमानंदशर्मा प्रशस्तां प्राचीनैरेव पद्यैर्गणकवरमुदे प्रश्नमाणिक्यमालाम् ॥ ५ ॥
आलोच्य निखिलान्प्रश्नतंत्राञ्जातकताजिकान् ॥ उभयोः संग्रहः सम्यक्क्रियते गुर्वनुज्ञया ॥ ६ ॥ ....
इति श्रीसारस्वतज्ञातीयपाठकवंशावतंससमस्तविद्याविशारदमौनतंत्रज्ञवेणीदत्तात्मजदैवज्ञपरमानंदविरचितायां प्रश्नमाणिक्यमालायां नवमस्थानपृच्छाप्रकरणं द्वादशम् ॥
अथ दशमस्थानपृच्छा । तत्र राज्यलाभप्रश्ने — — — — — — — — — — —
च.—तद्वरकलत्रे हिमगौ विलग्नयोः ॥ १४२ ॥ ....

५२० प्रश्नमार्गः-मुरारिसुनः ।

आ.—मध्याटव्यधिपं दुग्धसिंधुकन्याधवं धिया ॥ ध्यायामि साध्वहं बुद्धेः शुद्ध्यै वृद्ध्यै च सिद्धये ॥ १ ॥
गुरुभ्यश्च ग्रहेभ्यश्च मया बद्धोऽयमंजलिः ॥ प्रसन्नमनसस्ते मे सत्यां कुर्वंतु भारतीम् ॥ २ ॥
नमः श्रीमंगलश्रेणिनिवासाय महात्मने ॥ सर्वं जानंति दैवज्ञा यदुक्तिश्रुतिचक्षुषः ॥ ३ ॥
चेत्पु[त्रिपु]री[रे]श्वरमानम्य शैलजावल्लभं मया ॥ शिष्याय देशिकायातं प्रश्नपद्योपलक्ष्यते ॥ ४ ॥ ....
सुतो मुरारेर्लब्धोदये — — — मध्ययनार्ये— — नाथ— — ॥
स प्रश्नमार्गाख्यमकार्षमेतच्छास्त्रं सुखं बोधयितुं स्वशिष्यान ॥ ....
द्वाभ्यां चैव त्रिंशता प्रश्नमार्गः पूर्णोऽध्यायैः संप्रदिष्टोऽयमासीत् ॥
दृढं गृहीत्वेश्वरपक्षपातं जनो यथा निंदति विष्णुभक्तान् ॥ तथैव ये मत्कृतिनिंदकाः स्युस्तेषामसौ तिष्ठति दूरदूरे ॥
स्वकल्पितः कश्चिदिहापि नार्थो ग्रंथांतरे क्वापि विनात्यदृष्टम् ॥
विश्वस्य शिष्याः प्रयतध्वमेवं भवंतु सत्याः सकला गिरो वः ॥
इति प्रश्नमार्गे द्वात्रिंशोऽध्यायः ॥
श्रीगणेशाय नमः ॥ प्रत्यूहप्रतिहंतारं प्रतिपत्य गणाधिपम् ॥ मुहूर्तावगमे मार्गमृजुं कर्तुं यतामहे ॥ १ ॥

उल्कोर्वीचलनोपरागगुलिका षष्ठाष्टमंत्र्यंदवो दृष्टारूढविमुक्तराशिसितदृक्सायाह्नसंध्यादयः ॥
गंडांतोड्डविषं स्थिरं च करणं रिक्ताष्टमीविष्टयोर्लाटैकार्गलवैधृतांघ्रिशिर(स)स्सर्वत्र वर्ज्या अमी ॥ २ ॥
च.–ह्रस्ववेगजमबुद्धिपूर्वकं क्षंतुमर्हति समीक्ष्य सज्जनः ॥
इति श्रीप्रश्नमार्गः समाप्तिमगात् ॥ संवत् १९१२ ॥

५२१ प्रश्नरत्नसागरः-विजयदयासूरिः ।

आ.–चंचत्कांचनरूचये देववधूटीसुनेत्रमुखराय ॥ नाभेयाय नमोऽस्तु केवलकमलात्मने तुभ्यम् ॥ १ ॥
उत्पत्तिस्थितिसंहृतिप्रभृतिभिर्योचित्करं [चीकरत्] जंगमस्थाणुप्राणभृतां प्रवृत्तिनिरतः स्वच्छंदलीलामलः ॥
धर्मं यो दशधानयत्सुकृतिनां योऽजीगणत्केवलो ब्राह्मीं वाचमनन्तसाररसिकः कश्चिद्विभुस्तं श्रये ॥ २ ॥
कौमारे युगधर्मिभिश्च सवयैः साकं सभायां स्थितस्तेषामग्निमयुग्मिना च कुतुकाविष्टेन पृष्टः प्रभुः ॥
देवास्मानमलं त्रिकालविषयं ज्ञानं शुभं दर्शयेत्युक्तः स्माह चमक्रियासु कुशलं शास्त्रं स्वयं रामलम् ॥ ३ ॥
आरभ्य तद्दिनमिदं सकलोपकारि प्रापत्सुविस्तरमनेकजनस्थलेषु ॥
तैस्तैर्वितत्य निहितं निजपुस्तकेषु वाचा स्वया जयति तद्रमलं त्विदानीम् ॥ ४ ॥
भूते भाविनि वर्त्तमानविषये यद्यद्यदाकांक्षितं तत्तत्प्रष्टुरभीष्टमिष्टमखिलं साक्षात्करोति स्वयम् ॥
प्रश्नोद्देशविधासु चिंतितमुखाख्येतत्तदा वाङ्मय सत्याकूतविभावनेन सुधियां चेतश्चमत्कारकृत् ॥ ५ ॥
संत्यन्येऽपि सहस्रशो यदि भुवि ग्रंथाः सुखप्रश्नदास्तेषामध्ययनक्रियासु कुशला भूयोऽपि ते भूरिशः ॥
संदेहप्रतिघातनाय सबलं नान्यद्विना रामलं तेनैतत्प्रतिसावधानमनसा यत्नं कुरुध्वं बुधाः ॥ ६ ॥ अथ च ॥
श्रीपुण्डरीकः प्रथमं सुधर्म्मा ततश्च जम्बूप्रमुखा बभूवुः॥संपूर्णपूर्वांगविदो महान्तः स्वष्टांगनैमित्तिकशास्त्रविज्ञाः ॥ ७॥
श्रीभद्रबाहुमुनिपुंगव एष पूर्वं सर्वाक्षरार्थनिपुणः प्रकटप्रभावः ॥
विद्याचमत्कृतिवशेन जगत्यखंडे चक्रे सुरासुरनरात्मनि चित्रमेकम् ॥ ८ ॥
श्रीभद्रबाहुगुरूणा बहुमुग्धबुद्धिबोधप्रदप्रकरणानि कृतानि पूर्वम् ॥
उद्धृत्य सारमखिलं च निवेश्य तेषु दत्तानि तानि पठनाय तदर्थिनृभ्यः ॥ ९ ॥
अथ रमलशास्त्रस्यादिः ।
कालिकनामाचार्यो भगिनीबंधनवितर्कगतयवनः ॥ तेन च तत्रस्थेन ददृशे चित्रं च विद्यायाः ॥ १० ॥
यवनाचार्यात्तस्माद्विज्ञातानेकशास्त्रसंभारः ॥ चक्रे रमलं विमलं तत्त्वचतुष्टयमिदं शास्त्रम् ॥ ११ ॥
अथ प्रवक्ष्ये यवनेषु यादृशी प्रसिद्धिरस्यास्ति तथैव तादृशीम् ॥
कुतः समुत्पन्नमिदं च रामलं कथं प्रवृत्तं किल केन भाषितम् ॥ १२ ॥
पेगंवराः कियंतो[तः]स्म संजाता भुवि विश्रुताः ॥ आदम् १ तथेदरिम् २ भूपः लुक्नासा ३ रमिआं ४ स्तथा ॥१३॥
असइयात ५ दानीआल् ६ एते चात्यंतपूजिताः ॥ यवनेषु महामान्या रमलस्य विदोऽभवन् ॥ १४ ॥
एकस्मिन्समये चादिम् वियुक्तो भार्यया सुतैः ॥ शोकाक्रांतमनास्तत्र क्षणमेकं स्थितः स्वयम् ॥ १५ ॥
पुत्रदारविशुद्ध्यर्थमाहूयनारदं मुनिम् ॥ कथितस्तत्पुरस्तेन वृत्तांतः शोकसंभवः ॥ १६ ॥

अब्रवीच कथं ज्ञास्ये गमनागमने तथा ॥ दुःखित्वं च सुखित्वं च स्त्रीसुतानां च तद्वद ॥ १७ ॥
श्रुत्वेति नारदः शीघ्रं जगाम परमेश्वरम् ॥ स्थित्वा च प्राह वृत्तान्तं प्रांजलिः सुसमाहितः ॥ १८ ॥
भगवानपि तद्वाक्यमाकर्ण्यैकां च पत्रिकाम् ॥ ददौ तस्मै स चोत्थाय पुनः प्रत्यागतश्च तम् ॥ १९ ॥
आदाय पत्रमेकं स भूमौ चारोपयत्स्वयम् ॥ तत्क्षणेन तदारोपाच्चत्वारो बिन्दवोऽभवन् ॥ २० ॥
महानादिमशिष्योपि बिन्दूंश्च चतुरोऽपि तान् ॥ समादाय चतुर्दिक्षु निचिक्षेप पृथक्पृथक् ॥ २१ ॥
चतुर्षु चैकमाग्नेयं वायव्यं च द्वितीयकम् ॥ तृतीयं तु भवेदाप्यं पार्थिवं च चतुर्थकम् ॥ २२ ॥
आग्नेयं दिशि पूर्वस्यां पश्चिमायां तु मारुतम् ॥ न्यस्तमाप्यं तथोदीच्यां दक्षिणस्यां च पार्थिवम् ॥ २३ ॥
एवमादिमशिष्टेन चत्वारि रचितानि च ॥ तत्त्वानि वह्निवाय्वम्बुभूमिजानि क्रमादिह ॥ २४ ॥
ऊर्ध्वाधो निहता एते चत्वारो बिंदवः क्रमात् ॥ तस्मिं शकलं जातं जायन्तेऽस्माच्च षोडश ॥ २५ ॥

च.—दुर्गा शंकरवल्लभा भगवती वागीश्वरी शारदा काली पर्वतपुत्रिका च विजया गौरी च लक्ष्मी जया ॥
हेमंकार्यथ भैरवी च शबरी तारा शती त्र्यंबिका मातोमा वरदा सदा विजयतामेभिश्चिरं धामभिः ॥ ८ ॥
इत्थं स्तुता शुभरदा वरदा भवानी श्रीशारदा चपलकुंडलभासमाना ॥
स्वप्ने वरं निजमुखोद्भूतचारुचंचत्तांबूलपिण्डसहितं च ददौ ममांबा ॥ ९ ॥
दत्वा वरं भगवती किल दिव्यवाणी नाम प्रदत्तमपि मेऽत्र महाकवीति ॥
दिव्यप्रभावरुचिराशु तिरोदधे सा वागीश्वरी हृदयमिष्टु[ष्ट] युतं भि[वि]धाय ॥ १० ॥
सोऽहं श्रीविजयादयागणधरः श्रीवर्द्धमानार्हतः पट्टे दिग्गजतर्कसंमतिवरेऽकार्षं स्वयं रामलम् ॥
शास्त्रं प्रश्नविचारसारसहितं लोके चमत्कारदं वर्षे चाष्टभिधानसंयममिते पौषे दशम्यां शितौ ॥ ११ ॥
यः सर्वातिशयैः श्रितः फणिपतिर्यं सेवते भक्तितो येन ध्वस्तमठः कठोभवदरं यस्मै नमो योगिने ॥
यस्मादाविरभूदखंडितत्वषो यस्यामलं शासनं यस्मिञ्ज्ञानमुखा गुणा गणनयातीताः स पार्श्वः श्रिये ॥ १२ ॥
श्रीपार्श्वनाथः स्तुतनाकिनाथो यन्नामपाथोधिरघप्रमाथः ॥ वामाप्रसूमानसराजहंसो जयत्यसौ पूर्व[सूर्य]पुरावतंसः॥१३॥
श्रीसूर्यमंडनजिनेश्वरपादपद्ममाहात्म्यतो विरचितो रमले निबंधः ॥
पद्यात्मकः प्रवरपाठकभोजनाम्ना निर्विघ्नशास्त्रपरिपूर्तिरपीह तस्मात् ॥ १४ ॥
प्रथमाद्द[द]र्शे लिखितं सूर्यपुरे भोजसा[ना]गरेणेदम् ॥ पाठकवरेण सम्यक्श्रीपूज्यादेशतः शास्त्रम् ॥ १५ ॥
इति श्रीयवनाचार्यप्रणीतरमलमहोदधिधर्मधारकश्रीविजयदयासूरिसमर्थिते प्रश्नरत्नसागरे पाठकभोजनागरसंदर्भितपदप्रकारे श्रीरमलतंत्रे सबीजमंत्रे परिसमाप्तोऽध्यायो द्वाविंशतितमः ॥ संवत् १९०९ ॥

५२२ प्रश्नविनोदः ।

आ.—लंबोदरं महाभीमं गजवक्त्रं गणाधिपम् ॥ एकदंतं विशालाक्षं तं वंदे गिरिजासुतम् ॥ १ ॥

च.—शेषाणि यानि ऋक्षाणि धनधान्यप्रदानि च ॥ इति नौकाचक्रम् ॥ इति प्रश्नविनोदः समाप्तिमगमत् ॥

५२३ प्रश्नशिरोमणिः-रुद्रमणिः ।

आ.—प्रणम्य केशाच्युतविच्युतापदं सदा सदानंदपदं शिवापदम् ॥
त्रिपाठिवाल्मीकिजरुद्रपंडितस्तनोति सत्प्रश्नशिरोमणिं मणिम् ॥ १ ॥

च.—इति रुद्रमणिप्रकल्पितो जगदंबापदयोः समर्पितः ॥ भवताच्छुभदः सुकर्मिणां पठतां प्रश्नशिरोमणिर्नृणाम् ॥ ८ ॥
इति श्रीवाल्मीकिवंशावतंसश्रीमत्रिपाठिरुद्रमणिप्रकल्पिते प्रश्नशिरोमणौ विशेषाध्यायः समाप्तः॥ संपूर्णोयं प्रश्नशिरोमणिः॥
शकेद्रिनंदभूपाख्ये शुचौ शुक्ले कथे [तथा] गुरौ ॥ मनसोपपदो रामो व्यलिखत्स्वार्थमेव वा ॥ संवत् १८४३ ॥

५२४ प्रश्नसंग्रहः-काशिनाथः ।

आ.—तिमिरांबुनिधौ मग्नं करैरुद्धृत्य यो जगत् ॥ प्रीणयत्यातुरं प्रीत्या तस्मै सर्वात्मने नमः ॥ १ ॥
मिहरेऽस्तमुपायाते तमसाढ्ये धरातले ॥ प्रश्नगेहे प्रदीपोऽयं काशिनाथकृतो बभौ ॥ २ ॥
च.—लग्ने च मकरे नारी नीचा ऱ्हस्वा च चेटिका ॥ विधवा पृच्छकस्येह मार्गे मिलति गच्छतः ॥ ६ ॥
इति काशिनाथकृतप्रश्नसंग्रहप्रकरणम् ॥

५२५ प्रश्नसारः-जीवाज्योतिर्वित् ।

आ.—वन्दे श्रीबगलामुखीं शशिकलाकोटिप्रभाभासुरां वीणापुस्तकधारिणीमभयदां मुक्ताफलैर्भूषिताम् ॥
यन्नामस्मरणेन मूकजडधीः काव्यादिकं प्राप्नुयात्कर्पूरागरुचन्दनादिघुसृणैर्देवैः सदा चर्चिताम् ॥ १ ॥
नरहरेर [नृहरितोऽ] ग्निचितस्तनयः कविः सकलप्रश्नमृजुं कुरुते हि सः ॥
निखिलकाव्यमिदं प्रकटीकृतं रसमयं बहुशास्त्रविनिर्मितम् ॥ २ ॥
च.—इत्येतत्प्रश्नसाराख्यं शिष्यार्थं हितकाम्यया ॥ भक्तियुक्ते सदा देयं जीवागुर्जरभाषितम् ॥ ६२ ॥
इति श्रीयाज्ञिकनरहरिसुतजीवाज्योतिर्विरकृतः प्रश्नसारः संपूर्णः ॥

५२६ वीजगणितटीका कल्पलता-कृष्णगणकः ।

आ.—शिवयोर्भजनातिगौरवाद्यत्सुतलीलाधृतकुञ्जरास्यरूपम् ॥ अपहन्तु ममांतरं तमस्तत्सततानन्दमयं महो महीयः ॥१॥
यदीयचरणांभोजस्मर्तुः सकलसिद्धयः ॥ भवन्ति वशवर्त्तिन्यः सिद्धेशीं तामहं भजे ॥ २ ॥
मिहिरमिव वराहमिहिरं वंदे संदेहभेदिनं जगताम् ॥ ज्योतिश्चक्रविभावनहेतुं जगदेकचक्षुरक्षुद्रम् ॥ ३ ॥
कविबुधजनमूर्द्धनि स्फुरंतं कविबुधसंततसेवनीयपार्श्वम् ॥ गणितनिपुणतां प्रवर्तयंतं प्रणमत भास्करमीप्सितार्थसिद्धयै ॥४॥
कदापि नैव सभूमःस्थितश्च भौममण्डले ॥ अपूर्वमार्गमाश्रयं जयत्यपूर्वभास्करः ॥ ५ ॥
आसिदसीमगुणरत्ननिधानकुंभः कुम्भोद्भवाभरणदिग्ललनाललाम ॥
आशैशवार्जितविशेषकलानुवर्ती श्रीकेशवः सुगणितागमचक्रवर्त्ती ॥ ६ ॥
तस्मादभूद्भुवनभूषणभूतमूर्त्तिः श्रीमानगण्यगुणगौरवगेयकीर्त्तिः ॥
ज्योतिर्विदागमगुरुर्गुरुसंप्रदायप्रज्ञातशास्त्रहृदयः सदयो गणेशः ॥ ७ ॥
भ्रातुः सुतस्तस्य यथार्थनामा नृसिंह इत्यद्भुतरूपशोभः ॥ अवर्द्धयद्यो जगतामभीष्टं प्रह्लादमाश्चर्यकरः सुराणाम् ॥ ८ ॥
तच्छिष्यो विष्णुनामा स जयति जगतीजागरूकप्रतिष्ठः शिष्टानामग्रगण्यः सुभणितगणितान्या[म्ना]यविद्याशरण्यः ॥
यद्वक्त्रोन्मुक्तमुक्ताफलविमलवचोवीचिमालागलंतो द्वित्राः सिद्धांतलेशा जगति विदधतेऽज्ञेऽपि सार्वज्ञ्यगर्वम् ॥ ९ ॥

तस्मादधीत्य विधिवत्त्रिस्कंधं ज्योतिषं गुरोः ॥ कृष्णो दैववविदां श्रेष्ठस्तनुते बीजपल्लवम् ॥ १० ॥
अव्यक्तत्वादिदं बीजमित्युक्तं शास्त्रकर्तृभिः ॥ तद्व्यक्तीकरणं शक्यं न विना गुर्वनुग्रहम् ॥ ११ ॥
अथ शांडिल्यगोत्रमुनिवरवंशावतंसजडविडनगरनिवासिकुंभोद्भवभूषणदिग्भूषणसकलागमाचार्यवर्यश्रीमहेश्वरोपाध्याय-तनयनिखिलविद्यावाचस्पतिगणितविद्याचतुराननधराणितरणिश्रीभास्कराचार्यः खगगणितरूपं सिद्धांतशिरोमणिं चिकीर्षुस्तदुपयोगितया तदध्यायभूतं व्यक्तगणितमुक्त्वा तथाभूतमव्यक्तगणितमारभमाणः प्रत्यूहनिरासाय शिष्टाचारपरिपालनार्थं च मंगलमाचरञ्शिष्यशिक्षार्थं तदुपजातिकया निबध्नाति ....

च.—गणक भणतिरम्यं बाललीलावगम्यं सकलगणितसारं सोपपत्तिप्रकारम् ॥
इति बहुगुणयुक्तं सर्वदोषैर्विमुक्तं पठ पठ मतिवृद्ध्यै लब्धिदं प्रौढिसिद्ध्यै ॥ ९९ ॥
गणकेति संबोधनम् । भणतयः शब्दास्तै रम्यं पदलालित्ययुक्तमित्यर्थः । शेषं स्पष्टम् ॥
अभूत्पृथिव्यां प्रथितो गुणौघैश्चिंतामणिर्दैववविदां वरिष्ठः ॥ संपूजनानेहसि यस्य गौरी स्मृता स्तुता प्रत्यहमाविरासीत् ॥१॥
तत्सूनवः पंच बभूवुरेषां ज्येष्ठोऽभिरामः किल रामनामा ॥ भविष्यदर्थज्ञतया हि यस्य विदर्भराजोऽपि निदेशवर्त्ती ॥२॥
रामादभूतां सीतायां पुत्रौ कुशलवाविव ॥ त्रिमल्लो गोपिराजश्च गुणैः सर्वैस्समन्वितौ ॥ ३ ॥
त्रिमल्लसूनुर्जयति द्विजेंद्रो बल्लालसंज्ञः शितिकण्ठभक्तः ॥ यः सन्ततं रुद्रजपातिसङ्गाद्ब्राह्मं महो मूर्तमिवावभाति ॥४॥
दैवज्ञवर्यगणसन्ततसेव्यपार्श्वो बल्लालसंज्ञगणकस्य सुतोऽस्ति कृष्णः ॥
रामानुजः स परमेश्वरतुष्टिहेतोर्बीजक्रियाविवृतिकल्पलतामकार्षीत् ॥ ५ ॥
यद्भास्करेण निजधामगुणातिरेकात्सम्पादितं सगुणवर्गघनं हि बीजम् ॥
तत्कृष्णभूमिमधिगम्य विचारवारिसंसिक्तमंकुरजनुष्यभवत्समर्थम् ॥ ६ ॥
यैर्यैः श्रमैर्विरचितोऽस्ति नवांकुरोऽसौ तेषामभिज्ञ इह कः परमात्मनोऽन्यः ॥
इत्थं विचिंत्य जगदीश तवैव तुष्ट्यै सर्वज्ञ ते चरणयोर्निहितस्ततोऽयम् ॥ ७ ॥ संवत् १९१२ ॥

५२७ बीजगणितटीका-रामकृष्णः ।

आ.—सर्वज्ञं भास्करं नौमि सोमनाथं च सद्गुरुम् ॥ मुनीश्वरमहाप्रौढतंत्रतत्त्वार्थपारगम् ॥ १ ॥
ज्योतिर्विद्रामकृष्णः स च वि(धि)विदुषां शीलतत्त्वं प्रपन्नो भ्रांत्वा पुण्यौघदेशान्गुरुपदभजनात्प्राप्तबोधो बुधोऽहम् ॥
प्रौढश्रीभास्करीयं लघुतरगणितं बीजसंज्ञानिषण्णं तस्योपायं च कुर्वे दिनकरसुमुदे सौदपालस्य भूयात् ॥ २ ॥
अथ शांडिल्यगोत्रोत्पन्नजड(विड)नगरनिवासी सकलागमाचार्यवर्यश्रीमहेश्वरोपाध्यायतनयनिखिलविद्यातत्त्वार्थविच्छ्रीमद्भास्कराचार्यो ग्रहगणितस्वरूपसिद्धांतशिरोमणिं चिकीर्षुस्तदुपयोगितया दध्यायात्मकं व्यक्तं गणितमुक्त्वा तथाभूतमव्यक्तगणितं प्रारब्धमानः [प्रारभमाणः] प्रत्यूहव्यूहनिरासाय शिष्टाचारपरिपालनार्थं च मंगलमाचरन् शिष्यशिक्षार्थं तदुपजातिकया निबध्नाति ॥ उत्पादकं ....
इति श्रीमन्नृसिंहदैवज्ञात्मजलक्ष्मणदैवज्ञसुतसिद्धांतविद्दैवज्ञरामकृष्णविरचिते बीजविवरणे बीजप्रबोधाख्ये अनेकवर्णसमीकरणखंडविवरणं समाप्तम् ॥
अथ ग्रंथसंख्या एवमादितो ग्रंथसंख्या एकमनेकवर्णसमीकरणखंडं प्रतिपाद्य मा[म]ध्यमाहरणसंज्ञं तद्विशेषं निरूपयितुं तदारंभं प्रतिजानीते ॥ ....

५२८ बीजगणितोदाहरणम्-कृपारामः ।

आ.–महेशानं गौरीगणपतियुतं शुद्धमनसा प्रणम्य ज्ञानांभोनिधिमिथ गुरुं कायवचसा ॥
कृपारामो मिश्रः प्रकुरुत ऋजुं बीजगणिते अबोधध्वांतौघप्रहरणपरोदाहृतिमिमाम् ॥ १ ॥
उत्पादकमिति ॥ ....

च.–देशे गुर्जरनाम्नि धाम्नि यशसः स्थानेऽमदावादके भारद्वाजकुलप्रसूतिरभवन्मोढद्विजौघाग्रणीः ॥
विद्यावेदकलामलाचलगतिः स्पुर्जन्मनि योजिता [स्फूर्जन्मतिर्योजितो]
मिश्रः श्रीमदमं(दवं)दितपदद्वंदश्चतुर्वेदिकः ॥ ३१ ॥
लक्ष्मीनारायण इति मतिख्यातकीर्तिर्धरित्र्यां तस्मादासीद्गगनगगतिज्ञानगीर्वाण एव ॥
सूनुस्तस्याध्ययनविधिनोपात्तसिद्धांतविद्यो लक्ष्मीनाथान्निजगुरुवराच्छ्रीकृपारामनामा ॥ ३२ ॥
भुवनात्यष्टिमे शाके सुनभःपूर्णिमा गुरौ ॥ बीजस्योदाहृतिमिमामकरोद्बालबोधिनीम् ॥ ३३ ॥
इति श्रीगुर्ज्जरब्राह्मणमोढचातुर्वेदिमिश्रलक्ष्मीनारायणात्मजमिश्रकृपारामदैवज्ञविरचिते बीजोदाहरणे बालबोधिन्याख्यग्रंथः समाप्तः ॥ संवत् १९१२ ॥

५२९ बीजबोधसुधाकरः-सूर्यगणकः ।

आ.–भाले प्रालेयरश्मिः सुनयनयुगलोन्मीलने सिद्धयोऽष्टौ कंठे श्रीकंठपीठे स्फुरति फणिफणासन्मणीनां प्रकान्तिः ॥
आस्ते ब्रह्मादिमौलिस्थलमधुपगणो धन्यदां यो[यत्पदांभो] जपीठे
प्राते[प्तो] नन्तप्रभावं गणपतिरिरिति यं ज्योतिरव्याहि[दि]हास्मान् ॥ १ ॥
प्रसादांबुरुप्रसादं [यत्पादांबुरुहप्रसाद] कणिकासंजातबोधादहं पीठी[पाटी]कुंदकबीजतंत्रगहनाकूपारपारंगमः ॥
छंदोलंकतिकाव्यनाटकमहत्संगीतशास्त्रार्थवित्तं वंदे निजजातपुत्रमगुणं [श्री]ज्ञानराजं गुरुम् ॥ २ ॥
चक्तेचक्त[व्यक्ताव्यक्त] विहंगयोरिवयुंति[युतिं] भि[नि]ब्रन्त्रिमोहक्षयं
विक्षेपे गणितार्थयोः कविमुखांभोजं समुल्लासयन् ॥
शृंगारादिरसानुसक्तविबुधेंद्राशामसौ पूरं[र] यन् शश्वद्विष्णुपदस्थिरो विजयते संबोधसूर्योदयः ॥ ३ ॥
स्फुरद्बीजांभोधौ विविधरचनागाधसलिले तितीर्षूणामभ्युदयमतमतीनां श्रमभरः ॥
विमुग्धानामित्याहृतसदयचेताः परिमितामिमां व्याख्यां नाच[प्ना]सपादि रचये सूर्यगणकः ॥ ४ ॥
बीजाक्षरार्थः प्रथम दुरापः का वासना तत्र विचारणीया ॥ तथापि सूर्योहमुदारबुद्धिर्बीजं सबीजं विशदीकरोमि ॥
तत्र श्रीमार्तंडमंडलाखंडप्रचंडकरनिकरविस्फारविधूतविततध्वांतक्रांतप्रदे शेषरूपोपकल्पितब्रह्मांडमंडपांतर्विधविविधलीलाविकसितत्रिलोकीमध्यवर्तिसकललोकानुगृहीतविग्रहेण वित्रणातदैहिकामुष्मिकफलसमर्थककर्मसात्पुण्यप्रयोजनाभिलाषिणा निखिलागमागमौलिकलिकालमहिम्नालुप्तमिन्दुमुद्धर्त्तुमज्ञानतमो निहंतुं जगदुपकर्त्तुमाविष्कततनुरसौ भास्करः प्रकतोपक्रमानुसारं व्यक्तं गणितं विरचय्य तद्बीजभूतमिदमतिगहनमव्यक्तगणितं विवक्षुरारब्धसमाप्तिकामनया प्रतिबन्धकविघ्नोत्सारणासाधारणकरणविशिष्टशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं स्वेष्टदेवतानमस्काररूपं मंगलं स्वयमनुतिष्ठन् व्यक्तप्रयोगमात्रेणानेकार्थैः पदैः संश्लिष्योपेंद्रवजावृत्तेन ग्रन्थतो निबध्नाति उत्पादकमिति ॥

च.–स्वमतिपरिचयादा–दितः सोपपत्तिः सुजनगणकनर्य्य [वर्यः] संनिरीक्ष्य प्रयातुम् ॥
सुदमिहम–दुक्त्वा सद्विशेषो[षा]नशेषान्सुखविवरविकासेयाहिसंतोप्यसंते ॥ ३ ॥
स्वहृद्गतमोहस्योकिंदर्शयन्तु
षष्टिशक्रगणगणिते कृते प्राप्यमिंदुगुणवत्सरे निजम् ॥ पंचविंशतिशतान्यनुष्टुभा ग्रंथसमितिरिहास्ति केवलम् ॥
व्याख्ये वासनयान्विते गणितयोर्लीलावतीबीजयोस्तद्वच्छ्रीपतिपद्धतं[ते]श्च गणितं बीजं तथैकं व्यधात् ॥
एवं स्या[ता]जकमन्युवाममपरं काव्यद्वा[द्व]यं प्रौढधीः सूर्यो बोधसुधाकराख्यमकरोदध्यात्मशास्त्रेष्टमम् ॥
परोपकारार्थमुदाहृतेन मद्वाग्विलासेन रसोज्ज्वलेन ॥ शब्दाभिधं ब्रह्म यतः प्रवृत्तं स प्रीयतां यादवराजसिंहः ॥

५३० बृहच्चिन्तामणिः सभाष्यः । मू०-गणेशः । टी०-विष्णुदैवज्ञः ।

आ.–यत्पादांबुजदर्शनात्परमतिर्दीप्यत्स्फुरद्रूपिणी स्वस्याज्ञानघनांधकारमनया चेतोगृहं शुद्ध्यति ॥
शुद्धे चेतसि चात्मचिन्तनमतो मुक्तिः किमस्यापरं तस्मात्तं गुरुमात्मरूपमपरं नित्यं नमस्कुर्महे ॥ १ ॥
वर्यं सद्गणितार्णवं निजधिया संशोध्य निष्काशितो हारः सद्गुरुणा गणेशगुरुणा चिंतामणिर्यो बृहत् ॥
अत्यंतं सुलघुक्रियः परमथोयं वासनादुर्गमस्तज्जिज्ञासुभिरार्यशिष्यगणकैः कार्येति संप्रार्थितः ॥ २ ॥
तस्मात्तस्य सवासनां स्फुटतरां टीकां प्रकुर्वे कृती श्रीमत्सद्गुरुपादपंकजयुगध्यानप्रसादात्प्रधीः ॥
वर्ये सद्गुशितागमेतिचतुरः श्रीविष्णुनामा द्विजः पश्यंत्वार्यधियो विदः प्रवरधीचित्रं विचित्रं मम ॥ ३ ॥
मदुदीरितवासनाविशेषं परिबुध्यैव हि तोषमेतु सुज्ञः ॥ अथवा तदबोधहेतुनैव प्रहसन्मां परितोषमेतु वाज्ञः ॥ ४ ॥
श्रीमत्कौशिकमुनिश्रेष्ठवंशोद्भवापरपारावारतीरनिकटनन्दिग्रामनिवासकृत् अगणितगणितशास्त्रविचारसारचतुरोनेककला-कलापचतुरो ज्योतिर्वित्कुलावतंसः श्रीमत्केशवदैवज्ञसुतो गणेशनामा गणितस्कंधैकदेशभूतं ग्रहलाघवाख्यं करणमादौ कृत्वेदानीं पंचांगसाधकमपूर्वमल्पक्रियं बृहच्चिंतामणिसंज्ञं ग्रंथं चिकीर्षुर्जन्मजन्मान्तरार्जितदुरितोत्पन्नप्रत्यूहव्यूहनिरासेन ग्रंथसमाप्त्यर्थं समाप्तेऽपि ग्रंथे तत्परिचयार्थं शिष्टाचारपरिपालनेन शिष्यशिक्षणार्थं नमस्कारलक्षणं मंगलाचरणं शार्दूल-विक्रीडितेनाह ॥ नत्वेति ॥
च.–इति श्रीसकलागमाचार्यवर्यदिवाकरदैवज्ञसुतविष्णुदैवज्ञविरचिते बृहच्चिन्तामणौ वासनाभाष्ये सूक्ष्मर्क्षदेशान्तरादि-साधनाध्यायः ॥

५३१ बृहज्जातकटीका सुबोधिनी ।

आ.–आत्मायते वासरयो[पो]ऽखिलानां मार्गायते जन्मविवर्जितानाम् ॥
दीपायते यो जगतामभीष्टं ददातु नः सोऽन्यतरानपेक्षम् ॥ १ ॥
या होरा रचिता वराहमिहराचार्येण नानार्थिनी तस्या मद्गुरुदेवताननसरोजन्यप्रसादागतम् ॥
एकार्थं परिगृह्य तस्य रचये टीकां सुबोधार्थिनीं मादृङ्मंदधियामनुग्रहकृते लोकोपचा[का]राय च ॥ २ ॥
अथाचार्येणास्य शास्त्रस्याविघ्नेन परिसमाप्त्यर्थम् आदिमश्लोकेन इष्टदेवतानमस्कारः क्रियते। मूर्त्तित्वे परिकल्पितः ॥.......

५३२ ब्रह्मतुल्यः सटीकः । मू०-भास्करः । टी०-पद्मनाभः ।

मू. आ.—गणेशं गिरं पद्मजन्माच्युतेशान्ग्रहान्भास्करो भास्करादींश्च नत्वा ॥
लघुप्रक्रियं प्रस्फुटं खेटकर्म प्रवक्ष्याम्यथ ब्रह्मसिद्धांततुल्यम् ॥ १ ॥

टी. आ.—ज्ञातुं सदुक्तिलवयुग्विवृतिं तु शिष्यैः संप्रार्थितोल्पविदपि प्रतिपद्य सूक्तिम् ॥
श्रीभास्करोदितपितामहतुल्यकीर्तिष्टीकां विधातुममलामहमुद्यतोऽस्मि ॥ १ ॥
गणेशं नार्मदं तातं गुरुं सूर्यं सरस्वतीम् ॥ प्रणम्य पद्मनाभोऽहं कुर्वे टीकां सवासनः ॥ २ ॥
तत्रादावविघ्नपरिसमाप्त्यर्थं ग्रंथारम्भेऽभिमतदेवतानमस्कारमाचार्यः प्रकुरुते ॥ अहं भास्करः ब्रह्मसिद्धान्ततुल्यं खेटकर्म प्रवक्ष्यामि ॥

मू. च.—आसीत्सज्जनधाम्नि विज्ञ उविडे शांडिल्यगोत्रो द्विजः श्रौतस्मार्तविचारसारचतुरः सौजन्यरत्नाकरः ॥
ज्योतिर्वित्तिलको महेश्वर इति ख्यातः क्षितौ स्वैर्गुणैस्तत्सूनुः करणं कुतूहलमिदं चक्रे कविर्भास्करः ॥

टी. च.—इति श्रीभास्कराचार्यविरचितब्रह्मतुल्यस्य श्रीनर्मदात्मजपद्मनाभविरचितायां नार्मदटीकायां ग्रहणसंभवाधिकारो दशमः

५३३ ब्रह्मस्फुटसिद्धान्तः-ब्रह्मगुप्तः ।

आ.—जयति प्रणतसुरासुरकिरीटरत्नप्रभाच्छुरितपादः ॥ कर्त्ता जगदुत्पत्तिस्थितिविलयानां महादेवः ॥ १ ॥
परिकर्म्मविंशतिं यः सङ्कलिताद्यां पृथग्विजानाति ॥ अष्टौ च व्यवहाराञ्छायांतान्भवति गणकः सः ॥ २ ॥

च.—दिङ्मात्रमेतदन्यज्ज्योत्पत्तौ कुट्टके च कथयिष्ये ॥ सङ्कलितादिष्वार्य्याः षट्षष्टिर्द्वादशोऽध्यायः ॥ ६६ ॥
इति श्रीभिल्लमाचार्यभट्टजिष्णुसुतब्रह्मगुप्तविरचिते ब्राह्मस्फुटसिद्धान्ते पाटीगणिताध्यायः द्वादशः ॥ १२ ॥
कुट्टकाध्याये ॥
गुणकश्छेदश्छेदो गुणको घनमृणमृणधनं कार्य्यम् ॥ वर्गे पदं पदे कृतिरन्ताद्विपरीतमाद्यं तत् ॥ १ ॥
योगोत्तरयुतहीनो द्विहृतः संक्रमणमंतरान्विभक्तम् ॥ वर्गान्तरमन्तरयुतहीनं द्विहृतं विषमकर्म्म ॥ २ ॥
तंत्रपरीक्षाध्याये ।
जानात्येकमपि यतो नार्यभटो गणितकालगोलानाम् ॥ न मया प्रोक्तानि ततः पृथक्पृथग्दूषणान्येषाम् ॥ १ ॥
आर्यभट्टदूषणानां संख्या वक्तुं न शक्यते यस्मात् ॥ तस्मादयमुद्देशो बुद्धिमतान्यानि योज्यानि ॥ २ ॥
अन्यैरप्युक्तमिदं यो यं सम्यग्ग्रहं विजानाति ॥ याति स तद्ग्रहलोकं ग्रहाष्टकज्ञः परं ब्रह्म ॥ ३ ॥

५३४ भद्रबाहुसंहिता ।

आ.—अथ भद्रबाहुकृतनिमित्तशास्त्रसंहिता लिख्यते ।
मागधेषु पुरं ख्यातं नाम्ना राजगृहं शुभम् ॥ नानापदजनाकीर्णं नानागुणविभूषितम् ॥ १ ॥
तत्रास्ति सेनजिद्राजा युक्तो राजगुणैः शुभैः ॥ तस्मिन्सैषु [देशे सु]विख्यातो नाम्ना पांडुगिरिः शुभः ॥ २ ॥
नानावृक्षसमाकीर्णो नानाविहगसेवितः ॥ चतुष्पादैः सरोभिश्च साधुभिश्चोपसेवितः ॥ ३ ॥

तत्रासीनं महात्मानं ज्ञानविज्ञानसागरम् ॥ तपोयुक्तं च श्रेयांसं भद्रबाहुं निराशयम् ॥ ४ ॥
द्वादशांगस्य वेत्तारं निर्ग्रंथांशं महाद्युतिम् ॥ वृतं शिष्यैः प्रशिष्यैश्च निपुणं तत्त्ववेदिनाम् ॥ ५ ॥
प्रणम्य शिरसाचार्यमूचुः शिष्यास्तदा गिरम् ॥ सर्वेऽपि प्रीतिमनसो दिव्यज्ञान बुभुत्सवः ॥ ६ ॥
पार्थिवानां हितार्थाय शिष्याणां हितकाम्यया ॥ मनुजानां हितार्थाय दिव्यज्ञानं ब्रवीहि नः ॥ ७ ॥
शुभाशुभसमुद्भूतं श्रुत्वा नानानिमित्ततः ॥ विजिगीषु[षुं]स्थिरमभि[ति]सुख[मुप]यातिमे[म]ही सदा ॥ ८ ॥
राजाभिपूजिताः सर्वे भिक्षवो धर्म्मचारिणः ॥ विहरन्ति निरुद्विग्नास्तेन राजाभिपूजिताः ॥ ९ ॥
पापमौत्याति[मौत्पत्ति]कं दृष्ट्वा जह्युर्देशांश्च भिक्षवः ॥ स्फीताञ्जनपदांश्चैव संश्रयेयुर्यथोदिताः ॥ १० ॥
श्रावकाः स्थिरसंकल्पा दिव्यज्ञानेन हेतुना ॥ शंश्रयेयुः परं तीर्थं यथा सर्वज्ञभाषितम् ॥ ११ ॥
सर्वेषामेव देवानां दिव्यं ज्ञानं सुखावहम् ॥ भिक्षुकाणां विशेषेण परपी[पिं]डोपजीविनाम् ॥ १२ ॥
विस्तीर्णं द्वादशांगं तु भिक्षुकाश्चाल्पमेधसः ॥ भवितारो हि बहवस्तेषां वै वेदमुच्यताम् ॥ १३ ॥
सुखग्राहं लघुग्रंथं स्पष्टं शिष्यहितावहम् ॥ सर्वज्ञभाषितं तथ्यं निमित्तं तु ब्रवीहि नः ॥ १४ ॥
उल्कां समासतो व्यासात्परिवेषांस्तथैव च ॥ विद्युतोभ्राप्सि[णि]संध्याश्च मेघान्वातात्प्रवर्षणम् ॥ १५ ॥
गन्धर्वनगरं गर्भान्यात्रोत्पातांस्तथैव च ॥ ग्रहचारं पृथक्त्वेन ग्रहयुद्धकृतस्ततः ॥ १६ ॥
वार्तिकं चाथ स्वप्नांश्च मुहूर्त्तांश्च स्थितिं तथा ॥ कारणानि निमित्तं च शकुनं पाकमेव च ॥ १७ ॥
ज्यौतिषं केवलं कालांत्सर्वास्तुव्ये च[न्सर्वांस्तु च] सुसंपदा[दां] ॥ लक्षणं व्यंजनं चिह्नं लग्नं स्वप्नांस्तथैव च ॥ १८ ॥
बलाबलं च सर्वेषां विरोधं च पराजयम् ॥ तत्सर्वमा[म]नुरूपेण प्रब्रवीहि महामते ॥ १९ ॥
सर्वानेतान्यथादिष्टान्भगवन्वक्तुमर्हसि ॥ प्रश्नशुश्रूषवः सर्वे वयमन्ये च साधवः ॥ २० ॥

च.–स्वप्नाध्यायांमिमिं [यमिमं] मुख्यं योधियंत [योऽधीते हि] शुचिः स्वयम् ॥
संपूज्यंलभतेराज्ञो नामापुन्यश्च [स पूजां लभते राज्ञो मानमायुश्च] साधवः ॥ ५६ ॥
इति श्रीज्योतिर्ग्रंथे भद्रबाहुके निमित्ते स्वप्नाध्यायः षड्विंशतितमोऽध्यायः समाप्तः ॥ २६ ॥ संवत् १८४६ शा० १७११ वर्षे मिती वैशाखशुदि ८ मीसूर्यवारयेकाम्या[दश्या]दिने एषा पुस्तके लिपिः कृता ॥

५३५ भास्वती उदाहरणटीकासहिता । मू०-शतानन्दः । उ०-गङ्गाधरः ।

उ. आ.–गणाधिराजं च नमामि नित्यं तां भास्वतीं च[वै] धिषणाप्तिहेतोः ॥
यन्नामधेयानि शुभानि सन्ति शास्त्रेषु बोधो यदनुक्रमे[ग्रहे]ण ॥ १ ॥
पश्चाद्यत्कुरुक्षेत्रत पुरवरं सन्मानकाख्यं शुभं तस्मिन्नेव गृहेऽभवतु यो विधिचंद्रज्योतिर्वित् ॥
तत्सूनुस्तु तदंघ्रियुग्मभजनाल्लब्धावबोधांशकः सिद्धांतेषु परिश्रमो द्विजवरो गंगाधराख्यः सुधीः ॥ २ ॥
शाके चाद्रिखतर्कभूपरिमिते मासे तथा भाद्रके शुक्ले बाणतिथौ मृगांकदिवसे शेषेऽधितुल्ये दिने ॥
कुर्वे बुद्धितरंगतः पितृपदद्वंद्वात्मभक्तौ रतो भास्वत्या हि स्वो[उ]दाहृतिं च विवृतिं व्यक्तां सतां प्रीतये ॥ ३ ॥
अथ श्रीशतानन्दनामा सकलविघ्नोपशमनार्थमिष्टदेवतानमस्कारपूर्वकं संबंधादिकमाह ॥

मू. आ.–नत्वा मुरारेश्चरणारविन्दम् – – – – – – – –

मू. च.—खखाब्धिवेदैः ४२०० प्रमिते युगाब्दे दिव्योक्तितः श्रीपुरुषोत्तमस्य ॥
श्रीमाञ्शतानन्द इतीदमाह सरस्वतीशङ्करयोस्तनूजः ॥
उ. च.—इति श्रीशतानन्दविरचितपंचसिद्धांतमतभास्वत्युदाहरणटीकायां गंगाधरविरचितायां परिलेखाधिकारोऽष्टमः ॥

५३६ भास्वतीविवरणम्-माधवः ।

आ.—सदानंदं सर्गस्थितिप्रलयहेतुं त्रिजगतो हृदिस्थं ध्यायंति द्रुहिणहरमुख्या दिविषदः ॥
यमाद्यं योगेशं निगमनुतमव्यक्तममरं नमस्तस्मै धाम्ने भवभयभरध्वंसपटवे ॥ १ ॥
कंसारिपादकमलार्चनपूतचित्तः श्रीकान्यकुब्जवसतिः करणोत्तमस्य ॥
कंदर्पयो गणितविद्गणकाभिरामां टीकां व्यधादनुपमामिह माधवाख्यः ॥ २ ॥
च.—शतानंद इति प्रसिद्धः सरस्वतीशंकरयोस्तनूजः स्पष्टार्थोऽयमिति ॥
असर्ववित्त्वान्मतिविभ्रमाच्च यदन्यथास्मिन्कथितं मया स्यात् ॥
कृत्वानुकंपां मयि तद्विशोध्यं सद्भिः समुद्भिर्गणितार्थविद्भिः ॥
इति मिश्रश्रीमाधवविरचिते भास्वतीविवरणे परिलेखाधिकारोऽष्टमः ॥ समाप्तमिदं भास्वतीविवरणम् ॥ संवत् १९१३ ॥

५३७ भास्वती सटीका । मू०-शतानन्दः । टी०-बलभद्रः ।

मू. आ.—नत्वा मुरारेश्चरणारविंदं श्रीमाञ्शतानंद इति प्रसिद्धः ॥
तां भास्वतीं शिष्यहितार्थमाह शाके विहीने शशिपक्षखेकैः ॥ १ ॥
टी. आ.—आदिमध्यान्तशून्याय त्रिधा विग्रहधारिणे ॥ ग्रहर्क्षाय स्वरूपाय नित्याय हरये नमः ॥ १ ॥
प्रसिद्धजन्मा विमलाकराख्यः ख्यातः सुशीलो द्विजदेवभक्तः ॥
तस्यात्मजः श्रीहरिपादभक्तो नित्यं हराराधनशक्ति[सक्त]चित्तः ॥ २ ॥
त्रिस्कन्ध(ज्ञ): श्रीमान् दैवज्ञः श्रीवसंतनामा (सीत्) ॥ शास्त्रार्थविदो गुणवान्द्विजगुरुपादार्चने सदा निरतः ॥ ३ ॥
बलभद्रस्तस्य सुतो हरिगुरुचरणारविंदकृतसेवः ॥ कुरुते गुणोपयुक्तां सदर्प्पणीं भास्वतीटीकाम् ॥ ४ ॥
मू. च.—खखाब्धिवेदैः प्रमिते युगाब्दे दिव्योक्तितः श्रीपुरुषोत्तमस्य ॥
श्रीमाञ्शतानंद इति प्रसिद्धः सरस्वतीशङ्करयोस्तनूजः ॥ ८ ॥
इति श्रीसर्वपृथ्वीशपूजिताङ्घ्रिपद्मसरस्वतीशंकरपुत्रशतानंददैवज्ञकृता भास्वती समाप्तेयम् ॥
टी. च.—व्याख्यायां यन्मया त्यक्तं यच्च युक्तिविवर्जितम् ॥ भ्रान्त्या वा लिखितं यच्च तत्कार्यं क्षम्यतां बुधैः ॥ इति मङ्गलम् ॥
इति श्रीवसंतात्मजबलभद्रदैवज्ञविरचितायां बालबोधिन्यां भास्वतीटीकायां परिलेखाधिकारोऽष्टमः समाप्तोऽयम् ॥

५३८ मकरन्दटिप्पणम् अभिनवनामरसाख्यम्-पुरुषोत्तमभट्टः ।

आ.—कौमारकेलिकिकलकूजितमैन्द्रनीलकैलासशैलशिखरेक्षणजं निशम्य ॥
संजातकांतपृषदं वदनं भवान्या दृष्ट्वा स्मितांचितमुखोऽवतु विश्वमीशः ॥ १ ॥

सेवंतु सन्मधुलिहो मकरंदलब्धा नित्यं शुभाभिनवतामरसं रसाढ्यम् ॥
सद्वाक्यराजिकरराजिविराजिताच्छतर्कार्कसंकरकृतातिविकाशकाशि ॥ २ ॥
इह सदाचारपरंपराप्राप्तमंगलं मनसि कृत्वा प्रेक्षावत्प्रवृत्तये ग्रंथादनु[दावनु]बंधचतुष्टयमाह । श्रीसूर्येति ॥
च.–इति श्रीपुरुषोत्तमभट्टविरचितं मकरंदटिप्पणमभिनवतामरसाख्यं संपूर्णम् ॥

५३९ मञ्जीरं सटीकम् । मू०-रामसेवकः ।

मू. आ.–पूर्णानन्दं परं ब्रह्म निर्विकल्पसमाधिना ॥ अधिगम्यमुदासीनं नमामि जगदीश्वरम् ॥ १ ॥
टी. आ.–पूर्णेति । जगदीश्वरं नमामि कीदृशमुदासीनं पुष्करपलाशवन्निर्लेपं............
मू. च.–स्ववंशावली ॥
जातो गोरक्षवंशे हरिपदकमलाराधने जृम्भितश्रीर्विद्यापीयूषधारापरिसरलहरीशक्तिहृत्पद्मनालः ॥
राधासाधारणांतःकरणवस[हर]र्हरिं रक्षयन् कुक्षपुच्छे मंजीरं मंजुनादं मधुमधुयशस्वं [मधुमधुरयशा] रामनामा विधत्ते ॥ ८१ ॥
इति श्रीरामसेवकत्रिवेदिकृतमंजीरं समाप्तम् ॥

५४० मनुष्यजातकं कर्मप्रकाशापरनाम सटीकम्-समरसिंहः ।

टी. आ.–उद्यत्कोटिदिवाकरद्युतिनिभं रक्तांगरागांशुकं हस्ते मोदकपाशमंकुशरदं वीणाद्यगीःसंयुतम् ॥
ब्रह्मेंद्रप्रमुखैश्च किन्नरगणैः सिद्धैश्च विद्याधरैः सेव्यं सत्सुखदं गजेन्द्रवदनं वाक्सिद्धिदं तं भजे ॥ १ ॥
अहं गजेंद्रवदनं भजे ध्यायामि कथंभूतं वाक्सिद्धिदं वाचां सिद्धिः वाक्सिद्धिः वाक्सिद्धिं ददातीति वाक्सिद्धिदस्तं पुनः कथंभूतं उद्यत्कोटिदिवाकरद्युतिनिभं पुनः कथंभूतं रक्तांगरागांशुकं पुनः कथंभूतं वीणाद्यगीःसंयुतं ब्रह्मेन्द्रमुखैः किन्नरगणैः सिद्धैः विद्याधरैः संसेव्यं पुनः किंभूतं सत्सुखदं सुतां सुखदमित्यर्थः ॥ इदानीं निर्विघ्ननेन ग्रंथसमाप्त्यर्थं ग्रंथादौ मंगलाचरणं नमस्काररूपं करोमि । गिरीशमित्यनेन श्लोकेन वृत्तिं करोमीति या प्रतिज्ञा सा शिष्यावधानार्थम् ॥
गिरीशं दिनेशं गिरां[रं]विष्णुरामां गुरुं खिंदिकं रोमकाचार्यवर्यान् ॥
प्रणम्याथ कर्मप्रकाशस्य वृत्तिं करोमीह बालावबोधाय सम्यक् ॥
गिरीशादीन्नत्वा कर्मप्रकाशस्य वृत्तिं बालावबोधायाहं कुर्वे इति ॥ नत्वेति कर्मप्रकाशकर्तुः प्रथमश्लोको व्याख्यायते । नत्वेति गिरां[रं] नत्वा पुनः किंकृत्वा गणपतिं नत्वा ....
मू. आ.–नत्वा गिरां [रं] गणपतिं ग्रहवर्गमुख्यं तं कर्मसाक्षिणमलक्ष्यगुणं गुरुं च ॥
श्रीखिंदिकोक्तगुरुताजिकतंत्रदीपात्कर्मप्रकाशमणुदीपकमुद्धरामि ॥ १ ॥
मू. च.–श्रीखिंदिकोक्तगुरुतन्त्रमिहाब्जवृंदादर्थेंदुबिंदुमुपजीव्य मदुक्तिशुक्त्या ॥
वातमृ[आमृत्यु]जन्मफलसौ[मौ]क्तिकमेतदेव लब्ध्वा गुणं सहृदयो रविहारलीलाम् ॥ ८ ॥
जिज्ञासथ जन्मफलं निधिमियदिति कीर्तिवृद्धये विबुधाः ॥ तं नियतनिर्विकल्पं जातकतंत्रोद्धृतं कल्पम् ॥ ९ ॥
त्रैलोक्यक्षितिपालमौलिसकलव्यापारपारंगमः प्राग्वाटान्वयभूर्बभूव सचिवः श्रीचंडसिंहाह्वयः ॥
श्रीमान् शोभनदेव इत्यभिजने तस्याभवत्सज्जनः श्रीसामंत इति ग्रसांतसुमतिस्तस्मादभूदंगभूः ॥ १० ॥

तस्यात्मजः समरनिष्ठकुमारसिंहनामा गुरुर्गणितगीतरिभाग्यगेहः ॥
तत्सूनुना गणकभृंगमुदे स्मरेण गन्धोऽभ्युदध्रियत ताजिकपद्मकोशात् ॥ ११ ॥
इति श्रीकुमारसिंहात्मजसमरसिंहसमुद्धृते ताजिकतंत्रसारे कर्मप्रकाशिका मनुष्यजातको[कं]नाम विंशोऽध्यायः ॥ २० ॥
संवत् १८४८ ॥
टी. च.–इति श्रीकर्मप्रकाशिकावृत्तौ प्रकीर्णकाधिकारविंशतिः ॥ समाप्तं चेदं मनुष्यजातकाभिधं नाम जातकम् ॥

५४१ मिताङ्कविवरणम्-ताण्डवकविः ।

आ.–सूरिः श्रीविश्वनाथो जगदुपकृतये सूर्यसिद्धांतसारं संगृह्यातिप्रयत्नादकुरुत करणं यन्मितांकाभिधानम् ॥
स्पष्टीकर्तुं तदेतद्विवरणसहितं तांडवः संविधत्ते तल्लब्ध्वा चांकविद्याजलनिधिः[जलधिमिह] बुधा गोष्पदं कल्पयंतु ॥१॥
ज्योतिःशास्त्रप्रकरणारंभे प्रत्यूहनिरासाय सूर्यस्यैव समुचिताभीष्टदेवतारूपत्वेन स्तुतिं चिकीर्षन्ग्रन्थकारस्तस्य स्वरूपतः
स्तोतुमशक्यतया तदीयकरांस्तदुपकरणत्वेन स्तौति उपकरणस्तवस्योपक्रियमाणं स्तवपर्यवसनं नत्वादिति.........
जयंतीति व्याख्यानं सुगमम्..................
च.–तदा दक्षिणशृंगोन्नतिर्ज्ञेया...........
इति श्रीताण्डवककविराजकृते मितांकविवरणे शृंगोन्नत्यधिकार :समाप्तः ॥

५४२ मुहूर्त्तकल्पद्रुमः-विठ्ठलः ।

आ.–अनाथबंधुं गणनाथमंतश्चित्ते निवेश्य क्षपितांतरायम् ॥ प्राचीनवाक्यानि विचार्य सम्यङ्मुहूर्तकल्पद्रुममारभेऽहम् ॥१॥
श्रीवाणि कल्याणि परंपराभिः संपूरयैनं मम वाङ्निगुंफम् ॥ मुहूर्तकल्पद्रुमनामधेयं विज्ञापनेयं तव पादपद्मे ॥ २ ॥
शाकः सार्कः १२ षष्टि ६० हृन्मानवोऽब्दः शेषः ख्यातो दक्षिणे नर्मदायाः ॥
सोऽयं नंदै ९ रन्वितो जैवसंज्ञो ह्यस्मिन्देशे वत्सरः संप्रदिष्टः ॥ ३ ॥
अथ नारदोक्तैरेव षड्भिः श्लोकैः षष्टिवत्सरानाह । प्रभवो १ विभवः २ शुक्लः ३ ....
च.–ग्रंथाननेकानवलोक्य सम्यक्संदर्भिते विठ्ठलदीक्षितेन ॥ मुहूर्तकल्पद्रुमनामधेये विचित्रसंज्ञं कुसुमं समाप्तम् ॥ २१ ॥
कृष्णात्रिगोत्रे सुतरां पवित्रे पवित्रकर्मोजनि व्रव[बूब]शर्मा ॥ तत्सूनुना विठ्ठलदीक्षितेन मुहूर्तकल्पद्रुम एष चक्रे ॥२२॥
कल्पद्रुमश्चेत्किमु रत्नमाला चिंतामणिं कर्करमेव मन्ये ॥ यदेकदेशं किल मंजरीयं सारं विचारं कुरु तत्त्ववेदिन् ॥२३॥
नानाफलाढ्यैः कुसुमैः समेतः कल्पद्रुमः कल्पितवस्तुदायी ॥
आकल्पमाकल्पविभूषितानां गेहेऽस्तु नित्यं विबुधाधिपानाम् ॥ २४ ॥
ग्रंथाननेकान – – – – – – – – – – – ॥ – – – – – – – – – – – सद्वंशसंज्ञं सफलं समाप्तम् ॥२५॥
इति मुहूर्त्तकल्पद्रुमः समाप्तः ॥

५४३ मुहूर्त्तचिन्तामणिः पीयूषधाराटीकासहितः । मू०-रामः । टी०-गोविन्दः ।

टी. आ.–दधानं भृंगालीमनिशममले गंडयुगले ददानं सर्वार्थान्निजचरणसेवासुकृतिने ॥
दयाधारं सारं निखिलनिगमानामनुदिनं गजास्यं स्मेरास्यं तमिह कलये चित्तनिलये ॥ १ ॥

निपीतध्वांताय प्रसृमरकरायोग्रमहसे निकामं कामानां वितरणविनोदव्यसनिने ॥
समस्तप्रत्यूहप्रशमनकृते श्रीदिनकृते नमस्तस्मै यस्मै स्पृहयति समस्ताम्बुजवनी ॥ २ ॥
लसल्लक्ष्मीलीलावसतिरनिशं वेदविहितस्फुरद्धर्माधारः श्रितसुखपयोदः प्रतिदिनम् ॥
अतिविप्रख्यातः स जयति गुणानां जननभूर्विदर्भाख्यो देशो हरिरिव सदानंदजनकः ॥ ३ ॥
तस्मिन्विदर्भविषये विषये वितृष्णश्चिंतामणिर्द्युमणिरेव बभूव मूर्त्तः ॥
जाग्रच्चतुर्मुखचतुर्मुखशायिविद्यामाद्यां प्रवर्त्तयितुमत्र पवित्रकीर्तिः ॥ ४ ॥
वादैर्विजित्य धरणीतलमासमुद्रमुन्निद्रतर्कशतकर्कशबुद्धिसिद्धैः ॥
चत्वार ऊर्जितसमर्जितकीर्तिदम्भस्तंभा दिशासु रचिताः सकलासु येन ॥ ५ ॥
ज्योतिर्विदुज्ज्वलयशोहरणाय किं वा चंद्रांशुनिर्मलकुलाभरणाय किं वा ॥
विद्यासरोरुहदृशः शरणाय किं वा श्रीमाननंत इति तत्तनयोऽजनिष्ट ॥ ६ ॥
तस्मात्पद्माख्यपत्न्यामतिविमलमती वाक्पती दिक्पतीनामाशाः कासारजाभस्फुरदधिकयशोराशिभिर्व्याप्यमानौ ॥
प्राभूतां तौ तनूजौ श्रुतिगणगणिताचारधारापवित्रो ज्येष्ठः श्रीनीलकंठस्तदनु गुणगुणालङ्कृतो रामनामा ॥ ७ ॥
सीमा मीमांसकानां कृतसुकृतचयः कर्कशस्तर्कशास्त्रे ज्योतिःशास्त्रे च गर्गः फणिपतिभणितिव्याकृतौ शेषनागः ॥
पृथ्वीशाकब्बरस्य स्फुरदतुलसभामण्डनं पण्डितेन्द्रः साक्षाच्छ्रीनीलकण्ठः समजनि जगतीमंडले नीलकण्ठः ॥ ८ ॥
रामो हेरंबभक्तेरधिगतविशदानेकविद्योऽनवद्यो बुद्धिप्रद्योतमानो गणितगुणवतां मानवानां सुखाय ॥
ग्रंथैर्नानाप्रकारैरतिकठिनतरग्रंथिनक्रे विशाले ज्योतिःशास्त्रार्णवे द्रागदृढतरमतुलं सेतुबंधं चकार ॥ ९ ॥
श्रुतिस्मृतिप्रोक्तसमस्तकर्मोपयुक्तमानंदितशिष्टलोकम् ॥ मुहूर्तचिंतामणिनामकं स ग्रंथं व्यधाच्छर्वपुरे स्वपद्यैः ॥१०॥
श्रीनीलकंठस्य बभूव पत्नी सा चांद्रिकाख्योभयवंशदीपा[पः] ॥
नारायणस्येव समुद्रकन्या शर्वस्य गौरीव विराजते या ॥ ११ ॥
तस्माद्दैवविदग्रगण्यतिलकाच्छ्रीनीलकंठात्तया गोविंदाख्यसुतोऽजनि स्वगुरुतः संप्राप्तविद्यागणः ॥
यः शास्त्रामृतसिंधुबंधुरवचोवीचीषु निष्णाततां सानंदं समवाप्य भूरि कृतवान्ग्रंथे श्रमं ज्यौतिषे ॥ १२ ॥
अनेकबुधमण्डलीविरचितां हि टीकाकृतौ निधाय हृदयेऽर्थनामिह मुहूर्त्तचिंतामणेः ॥
निगूढतरतद्गद[त]प्रचुरभावनात्युक्तिभिर्बुधा विवरणे करामलकमाशु कर्त्तुं यते ॥ १३ ॥
मुहूर्त्तचिंतामणिदुग्धसिंधुमामथ्य युक्तिव्रजमंदरेण ॥ गोविंदसंज्ञस्तनुते सुखाय पीयूषधारां भुवि भूसुराणाम् ॥ १४ ॥
तत्रादितो गणपतिं[श्रीगणपं] प्रणम्य पादाब्जयुग्मं विदुषां सुतुष्ट्यै ॥
शुभाशुभाध्यायभवां हि टीकां गोविंददैवज्ञ इमां करोति ॥ १५ ॥

मू. च.—इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्त्तचिंतामणौ शुभाशुभप्रकरणं समाप्तम् ॥

टी. च.—इति हेतुप्रकरणप्रकर्षादिसमाप्तिष्वित्यमरः ॥ श्रीशब्दो वाक्यालंकारे शुभः सिद्धियोगादिः अशुभं सिंहस्थादि तयोः प्रकरणं निरूपणम् । अन्यत्स्पष्टम् ॥
ज्योतिर्विद्वरनीलकण्ठविदुषः श्रीचंद्रिकायास्तथा पुत्रेणाहिगवीप्रसारितधिया मौहूर्त्तचिंतामणेः ॥
गोविंदेन विनिर्मिते नयनिधौ पीयूषधाराभिधे व्याख्याने हि शुभाशुभप्रकरणं पूर्णत्वमध्यागमत् ॥

इति श्रीदैवज्ञमुकुटालंकारनीलकंठज्योतिर्वित्पुत्रगोविंदज्योतिर्विद्विरचितायां मुहूर्त्तचिंतामणिटीकायां पीयूषधाराभिधायां शुभाशुभप्रकरणं समाप्तम् ॥

५४४ मुहूर्त्तदर्पणः-लालमणिः ।

आ.–तिथ्यादिकालावयवस्वरूपां जगत्प्रसूत्यादिकहेतुभूताम् ॥ कालत्रयज्ञानविधायिनीं तां वंदेऽहमाद्यामिह शास्त्रदेवीम् ॥१॥
जगद्रामतनूजन्मा नत्वा लालमणिः शिवम् ॥ मुहूर्त्तदर्पणं कर्तुमुपक्रममथाकरोत् ॥ २ ॥
च.–प्रयागाद्दक्षिणे कूले विंध्यादुत्तरमार्गगे ॥ जह्नुकन्यायमुनयोस्तीरे परमपावने ॥ ७३ ॥
आस्तेऽलर्कपुरं नाम नगरं भुवि विश्रुतम् ॥ चतुर्वर्णजनाकीर्णं वेदाध्ययनसंकुलम् ॥ ७४ ॥
त्रिस्कंधवेत्ता तत्रासीद्गंगारामो द्विजाग्रणीः ॥ येन वं[विं]ध्यो जनपदो यशोभिर्धवलीकृतः ॥ ७५ ॥
तस्मादभूज्जगद्रामः सर्वशास्त्रेषु कोविदः ॥ स्वकुलानंदकः श्रीमान्क्षीराब्धेश्चंद्रमा इव ॥ ७६ ॥
तस्यासंख्ययशःसुधाकुमुदिनीप्रालेयभानोरथ श्रीमल्लालमणिर्बभूव तनयस्तेनापि कौतूहलात् ॥
यत्प्रालां[चां] वचनप्रपंचरचनामालंब्य भव्योक्तिभिर्मौहूर्त्तग्रथनं व्यधायि मुदितो भूयात्तया[तः]सज्जनः ॥ ७७ ॥
इति ज्योतिर्विल्लालमणिविरचिते मुहूर्त्तदर्पणे मिश्राख्यप्रकरणं त्रयोदशं संपूर्णम् ॥ संवत् १९१२ ॥

५४५ मुहूर्त्तमञ्जरी-यदुनन्दनः ।

आ.–कारुण्यपूर्णौ चरणौ शरण्यौ वंदे गुरूणां तरुणांबुजाभौ ॥ ययोः स्मृतेर्ज्ञानसुखप्रदायाः प्रत्यूहपुंजः प्रलयं प्रयाति ॥१॥
च.–कार्तिके पांडुरे पक्षे पूर्भेद्वैकादशीषु च ॥ षट्द्वयद्रिभूमिते १७२६ वर्षे समाप्तिमियमागता ॥ ४९ ॥
गुच्छैश्चतुर्भिः सहिता सुमंजुला श्लोकैर्धरादिक्प्र १०१ मितैः समन्विता ॥
विनिर्मितेयं यदुनंदनेन सतां सुखायास्तु मुहूर्त्तमंजरी ॥ ५० ॥
इति श्रीमत्पंडितयदुनंदनविरचितायां मुहूर्त्तमंजर्यां सकलव्यवहारमुहूर्त्तविचारो नाम चतुर्थगुच्छः ॥ ४ ॥ समाप्तेयं मुहूर्त्तमंजरी ॥ संवत् १८५० ॥

५४६ मुहूर्त्तमुक्तावली-योगीन्द्रः ।

आ.–श्रीशं श्रीहरशारदां गणपतिं ब्रह्मेंद्रनाकौकसः श्रीसूर्यप्रमुखान्ग्रहानृषिगणान्भक्त्या नमस्कृत्य तान् ॥
नानाग्रंथसमस्तसारमखिलानालोक्य सम्यग्धियां वक्ष्येऽहं शिशुबोधनाय विशदां मौहूर्त्तमुक्तावलीम् ॥ १ ॥
च.–दस्युग्रामनिवेशनव्यनगरं उच्छेपणं चानिधिमल्लस्तोरणसध्वजं वसतरं स्याच्छत्रकं वाटिका ॥
मौहूर्त्तक्रमतो मया निगदितं षड्वेदमुक्तावली बालानां हि विबोधनाय सततं मौहूर्त्तमुक्तावली ॥ ६८ ॥
इति श्रीपरमहंसपरिव्राजकाचार्ययोगींद्रकृतमुहूर्त्तमुक्तावली संपूर्णा ॥

५४७ मुहूर्त्तशिरोमणिः-धर्मेश्वराचार्यः ।

आ.–गणपतिमभिवंदे विघ्नविध्वंसनार्थमभिमतफलसिद्धौ भारतीं भास्करादीन् ॥
सुललितपदगुंफज्ञप्तये रामचंद्रं पितरमपि गुरुं श्रीमाधवं विठ्ठलं च ॥ १ ॥

नानामुनिप्रवचनानि विचार्य सम्यग्धर्मेश्वरो निखिलदैवविदां हिताय ॥
संक्षिप्तमर्थबहुलं वितनोति रामचंद्रात्मजः शुभमुहूर्त्तशिरोमणिं तु ॥ २ ॥
च.–इति श्रीदैवज्ञरामचंद्रात्मजश्रीधर्मेश्वराचार्यविरचिते मुहूर्त्तशिरोमणौ राजाभिषेकादिप्रकरणम् ॥

५४८ यन्त्रचिन्तामणिः-दामोदरः ।

आ.–या योगमाया परमार्थविद्या विशेषपूज्या भृगुवंशजाता ॥ तस्यात्मजोऽभूद्भुवि धर्मशीलो नाम्ना महादेव इति प्रसिद्धः ॥१॥
नै[नि]सर्गवैरं प्रजहुश्च सत्त्वा यं प्राप्य दुष्टाहितरक्षकाद्याः ॥ – – – – – – – – – – – – – – – – ॥२॥
तस्मादासीत्सुसमन्तिकदेवदत्तकलाचारमान्यो राक्षां सदसि विदुषामाद्यगङ्ग[ङ्गा]प्रवाहः ॥
उत्कल्लोली दिशि दिशि जनाः कीर्तिपीयूषसिंधुर्यस्यास्यापि श्रवणपुटकैः कूजि[कुञ्चि]ताक्षाः पिबंति ॥ ३ ॥
गंगाधरस्तत्तनयो वशी च विवेकगांभीर्यगुणैरुदारः ॥
यां प्राप्य लक्ष्मीश्च सरस्वती च तत्पादयुग्मे स्थिरतांतनूनम् [गते नु] ॥ ४ ॥
दामोदरः सर्वकलाप्रवीणो बभूव तस्माद्गणनाथभक्तः ॥ लब्धप्रतिष्ठो गुरुदेवभक्तो मान्यः सतां धर्मपरायणोऽयम् ॥५॥
दृष्ट्वानेकशिवागमांश्च बहुधा चालोक्य सौरागमान्देवीशास्त्रमहागमांश्च विविधानालोक्य विस्तारतः ॥
कर्त्तुं वांछति संग्रहं सुमतिमान्दामोदरः स स्वयं लोकानां च हिताय यंत्रनिकरं मंत्रेण युक्तं स्फुटम् ॥ ६ ॥
प्रेरितश्चंद्रचूडेन स्वप्नेन द्विजपुङ्गवः ॥ चकार कल्पं यंत्राणां चिंतामणिरिति स्फुटम् ॥ ७ ॥
च.–येनार्चितो देववरो महेशः – – – – – – – –
इति श्रीयंत्रचिंतामणिनाम्नि महाकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे दामोदरपंडितोद्धृते षोडशपीठिकायां महाप्रभावो नामाष्टमः कल्पः संपूर्णः ॥

५४९ यन्त्रचिन्तामणिः सटीकः । मू०-चक्रधरः । टी०-रामदैवज्ञः ।

टी. आ.–नत्वा गणाधिपं रामो मधुसूदननन्दनः ॥ यंत्रचिंतामणेष्टीकां कुर्वेऽहं सोपपत्तिकाम् ॥ १ ॥
विलोकितानि यंत्राणि कृतानि बहुधा बुधैः ॥ मतः शिरोमणिस्तेषां यंत्रचिंतामणिर्मम ॥ २ ॥
यंत्रचिंतामणिः श्रेष्ठः कथं न गणिताद्भवेत् ॥ यस्माद्गणितविज्ञानं क्षेत्रज्ञमुपजायते ॥ ३ ॥
श्रूयते कल्पितार्थानां दाता कल्पतरुर्दिवि ॥ अकल्पितार्थदो दृष्टो यंत्रचिंतामणिर्भुवि ॥ ४ ॥
इच्छाफलप्रदः स्वर्गे यथा चिन्तामणिस्तथा ॥ यंत्रचिंतामणिर्भूमौ शीघ्रमिच्छाफलप्रदः ॥ ५ ॥
यंत्रचिंतामणेरब्धेः पारगामी स एव यः ॥ सिद्धान्तवित्कर्णधारां मट्टीकां नावमाश्रयेत् ॥ ६ ॥
तत्र तावज्ज्योतिःशास्त्रफलस्य लग्नबलमूलकत्वात्तस्य च ग्रहाश्रयत्वात्तेषां च कालगणितत्वात्तस्य यंत्रसाध्यत्वाद्यंत्रचिंतामणिनामकं यत्रं विवक्षुश्चक्रधरो नामाचार्यः पूर्वार्द्धेनेष्टदेवतानमस्काररूपं मंगलमाचरन्नपरार्द्धेन स्वचिकीर्षितमाख्यानकीछंदसा व्यंजयन्नाह । अहं चक्रधरस्तया यंत्रं प्रवक्ष्ये इत्यन्वयः ॥
मू. आ.–नत्वा भवानीं प्रमथाधिनाथं रविं गुरोरंघ्र्यरविंदयुग्मम् ॥
यंत्रं प्रवक्ष्ये गणितानपेक्ष्यं यथाशु बोधः समयादिकानाम् ॥ १ ॥

मू. च.—आसीदग्रजराजवंदितपदः श्रीवामनो विश्रुतो ज्योतिःशास्त्रमहार्णवामृतकरः सत्सूक्तिरत्नाकरः ॥
तत्सूनुः क्षितिपालमौलिविलसद्रत्नं ग्रहज्ञाग्रणीश्चक्रे चक्रधरः कृती सविवृतिं सद्यंत्रचिंतामणिम् ॥ ५ ॥

टी. च.—अग्रजराजैर्ब्राह्मणैर्वंदितचरणः तथा विश्रुतो नामप्रसिद्धः। तथा ज्योतिःशास्त्रमहार्णवो नाम समुद्रः तस्मिन्नमृतकरो नाम चंद्रः। सत्यो याः सूक्तयः तद्रत्नानामाकरः श्रीवामनो नामासीत्। तस्य सूनुः क्षितिपाला राजानस्तेषां मौलिषु विलसत् शोभमानं रत्नमिव रत्नम्। ग्रहज्ञा ज्योतिर्विदस्तेष्वग्रणीः तथा कृती कुशलः चक्रधरः सद्यंत्रचिंतामणिं सविवृतिं सटीकं चक्रे कृतवानित्यर्थः ॥ अत्राचार्येण केवलश्लोकव्याख्यानरूपा टीका कृतास्तीति सविवृतिमित्युक्तम् ॥
पदव्याख्यानरूपैव टीका ग्रंथकृता कृता ॥ अतो मया विदां प्रीत्यै कृतेयं सोपपत्तिका ॥
इति श्रीदैवज्ञमधुसूदनात्मजरामदैवज्ञविरचितायां यंत्रचिंतामणिटीकायां प्रकीर्णकाध्यायश्चतुर्थः ॥ संवत् १८५० ॥

५५० यन्त्रराजः सटीकः । मू०-महेन्द्रसूरिः । टी०-मलयेन्दुः ।

टी. आ.—प्रणम्य सर्वज्ञपदारविंदं सूरेर्महेन्द्रस्य पदाम्बुजं च ॥ तनोति तद्गुम्फितयंत्रराजग्रन्थस्य टीकां मलयेन्दुसूरिः ॥ १ ॥
अस्य प्रथमतः प्रातिचिकीर्षितस्य सकलगणितसारभूतस्य यंत्रराजग्रन्थस्य निरंतरांतरायनिवारणाय शिष्टाचारपरिपालनाय शिष्यप्रशिष्यपरंपरासु प्रचयगमनाय च भक्तजनमनःसंकल्पकल्पद्रुमायमाणस्वाभीष्टदेवतागुरुनमस्कारपूर्वं प्रयोजनसहितं ग्रंथाभिधेयमभिधत्ते ग्रंथकारः ॥

मू. आ.—श्रीसर्वज्ञपदाम्बुजं हृदि परामृश्य प्रभाव्यं परं श्रीमंतं मदनाख्यसूरिसुगुरुं कल्याणकल्पद्रुमम् ॥
लोकानां हितकाम्यया प्रकुरुते सद्यंत्रराजागमं नानाभेदयुतं चमत्कृतिकरं सूरिर्महेन्द्राभिधः ॥ २ ॥
स्पष्टार्थमेतत् ॥

टी. च.—अभूद्भृगुपुरे च [महा] गणकचक्रचूडामणिः कृती नृपतिसंस्तुतो मदनसूरिनामा गुरुः ॥
तदीयपदशालिना विरचिते सुयंत्रागमे महेंद्रगुरुणोदिताजनि विचारणा यंत्रजा ॥ ७ ॥
श्रीपेराजमहेंद्रसर्वगणकः पृष्टो [कप्रष्ठो] महेंद्रप्रभुर्जातः सूरिवरस्तदीयचरणांभोजैकभृंगैर्द्युता[गायता] ॥
सूरिश्रीमलयेन्दुना विरचितेऽस्मिन्यंत्रराजागमव्याख्याने प्रविचारणादिकथनाध्यायोऽगमत्पञ्चमः ॥ ८ ॥
श्रीयंत्रराजः सटीकः समाप्तः ॥

५५१ युद्धजयोत्सवः-गङ्गारामः ।

आ.—नत्वा श्रीरघुनाथपत्कजयुगं सिद्धेश्वरीं भैरवीं गौरीपुत्रमथो समीरतनयं रुद्रं यशोदासुतम् ॥
वक्ष्ये युद्धजयोत्सवं ग्रहविदां प्रीतिप्रदं प्रस्फुटं नानायामलतो विलोक्य रचितं राज्ञां परं प्रीतिदम् ॥ १ ॥
च.—ग्रंथं युद्धजयोत्सवाख्यमुररीकुर्वंतु रागाद्बुधा गंगारामकृतं सधर्मपृथिवीपालारिविध्वंसकम् ॥ ७७ ॥
इति श्रीगंगारामकृते चारुग्रंथे युद्धजयोत्सवे दुर्गादिवृत्तौ प्रकाशः शरसंमितः समाप्तः ॥

५५२ योगरत्नावली-द्विवेदियुगराजः ।

आ.—क्षित्यादिभिः पंचभिरात्मरूपैर्व्यनक्ति विश्वं विविधं सदा नः ॥
यो व्यक्तभावावयवादिहीनः पायादपायात्स जगन्निवासः ॥ १ ॥

नत्वा वागीश्वरीं देवीं सर्वशास्त्रार्थदायिनीम् ॥ योगरत्नावलीं वक्ष्ये महार्णवसमुद्भवाम् ॥ २ ॥
अथ मनोज्ञयोगमाह ॥ ....
च.—जन्मांगतो जन्मनि जातकज्ञैर्योगाः सदैवेति विचिंतनीयाः ॥ वर्षप्रवेशे मुथहागृहाद्वा विचारणीयाः खलु जातकज्ञैः ॥ २८ ॥
इति श्रीद्विवेदयुगराजविरचिता योगरत्नावली संपूर्णा ॥

५५३ योगसिद्धान्तः ।

आ.—अथ योगसिद्धान्तयात्रायोगा लिख्यंते ॥ काश्यपोक्तिः ॥
पंचमे ज्ञो रविः षष्ठे वर्त्तते नवमे गुरुः ॥ भाग्ययोगाभिधे योगे निहता वैरिणः सदा ॥ १ ॥
च.—यावत्सिन्दूरवर्णं गगनतलगतं भानुबिंबं च नास्तं यावन्नो दिक्षु शांतिं व्रजति खुरखुरैरुद्गतो रेणुसंघः ॥
तावन्नैवास्ति दोषः प्रभवति तरसा क्रूरदृष्टिग्रहाणां यात्रायां वा विवाहे सकलशुभकरी सर्वकार्येषु सिद्धिः ॥ ७७ ॥
इति योगसिद्धान्तग्रन्थः समाप्तः ॥

५५४ योगार्णवः-व्येङ्कटेशः ।

आ.—नत्वा तं मनसा मतंगवदनं श्रीव्येंकटेशः सतां श्रीमानप्पयभूसुरात्मजवरो होराविदां प्रीतये ॥
ज्योतिःशास्त्रमहार्णवप्रतरणे संग्रह्य शास्त्रांतराद्वक्ष्ये जातकशास्त्रमार्गफलदं योगार्णवाख्यं स्फुटम् ॥ १ ॥
ऊहापोहविशारदः पटुमतिः श्रीतुंडदेशोद्भवः श्रीमत्काश्यपवंशजो गुरुकृपालब्धप्रसादो भुवि ॥
त्रिस्कंधार्थविदां विनायकपुरे जातः प्रशिष्यः कविर्जंबूनाथपदारविंदरसिकः स्कंधत्रयीमर्मवित् ॥ २ ॥
द्वितीये द्वादशे पार्श्वद्वये खेचरसंयुते ॥ शीतांशोः सुनफायोगस्त्वनफायोग उच्यते ॥ ३ ॥
च.—आचार्यवर्यो निगमांगशास्त्रे विनिश्चितार्थः सुमतिः सुशीलः ॥ श्रीव्येंकटेशो भुवि मानवानां चकार योगार्णवमत्र भूत्यै ॥ ३९ ॥
इति योगार्णवेऽष्टमोऽध्यायः ॥ संवत् १९१२ ॥

५५५ योगिन्यादिदशाविभागः ।

आ.—स्फुरच्छरच्चन्द्रमरीचिपांडुरो नगात्मजोल्लासितवामभागः ॥ जटाकलापं दधदुग्रपिङ्गलः सदाशिवो मे विदधातु मङ्गलम् ॥ १ ॥
अमूर्मङ्गला पिङ्गला धान्यका च तथा भ्रामरी भद्रिका च कटा[चोल्किका] च ॥
तथा सिद्धिका संकटाष्टौ शिवस्तु शिवायाः पुरो योगिनीरुक्तवांश्च ॥ २ ॥
दशानामथान्तर्दशानां सदैव प्रपूजां विशेषाद्विरुद्धार्चनं च ॥
प्रकुर्वन्नरः सर्वसिद्धिं प्रयाति रिपूणां जयं कीर्त्तिमारोग्यमायुः ॥ ३ ॥
च.—सुखसदनविहारी देवतारीन[रिप्र]हारी मदनकदनकारी सच्चिदानंदरूपी ॥
सकलदुरितहारी शूलधारी करोतु प्रचुरशिवमनादिर्मे सदा वासुदेवः ॥ १३ ॥
इति श्रीउमामहेश्वरसंवादे रुद्रयामले योगिनीदशान्तर्दशोपदशाविदशाविभागः सम्पूर्णः ॥

५५६ रमलतत्त्वशिरोमणिः-शिवरामः ।

आ.—अविरलमदनिर्वहं भ्रमरकुलाऽनेकसेवितकपोलम् ॥ अभिमतफलदातारं कामेशं गणपतिं वन्दे ॥ १ ॥
मोहमदं अताकविरभूदिंद्रप्रस्थे विशेषवित् ॥ तेन रम्लं विनिर्णीतं मञ्जदल्म इतीरितम् ॥ २ ॥
तन्मतं च विलोक्याऽथ कुर्वे रम्लशिरोमणिम् ॥ शिवरामद्विजो विश्वग्रम्लशास्त्रार्थकीर्त्तिव[वि]त् ॥ ३ ॥

च.—इंद्रप्रस्थप्रशस्तराजनगरे योऽभून्महमदअता तस्येयं कृतिरुत्तमातिविमला प्रश्नैर्मनोज्ञैर्युता ॥
नुक्तासारविचारसारचतुरो रम्लार्थविरकोविदः – – – – – – – – – – – – – ॥ १ ॥
श्रीमत्कायस्थकुलजसदानंद इति स्मृतः ॥ पारसी तेन लिषि[खि]ता विमला विशदाक्षरा ॥ २ ॥
तस्मान्मया व्यलोकिष्ट शिवरामेण चादरात् ॥ पुस्तकं संस्कृतयुतं स्पष्टार्थं विशदाक्षरम् ॥ ३ ॥
वर्षे वि(क्र)मके ष[ड]ष्टवसुभूमाभाद्रे सिते चाष्टमीजीवे मैत्रभसंयुतेऽपि च सदा योगे तथा वैधृतौ ॥
– – – – – – – – – – – – – – उल्लासत्रयसंयुतं च नगरे कोले मनोज्ञे मया ॥ ४ ॥
अधुना पठनाय पाठकानामत्राशीति च[रिति] यद्वदामि सम्यक् ॥
मेषां बुद्धिप्रकाशनाय यस्माद्वाचः सिद्धिसुपेशला भवंतु ॥ ५ ॥
ज्ञात्वा ग्रंथं नत्वा विप्रान्पूजयित्वाऽक्षतैर्धनपुष्पै रमलं लिखितम् ॥ योग्यं शुभशकुलैः[नैः] शुभवचनैरुभौ युक्तौ ॥६॥
इति रमलशास्त्रे रमलतत्त्वे तृतीयं प्रकरणम् ॥

५५७ रमलदिवाकरः-रामप्रसादः ।

आ.—श्रीगोपालं नमस्कृत्य गणेशं भारतीं रविम् ॥ गुरुपादांबुजं चैव सर्वविघ्नोपशांतये ॥ १ ॥
यमनानि[यवनानां[विलोक्यैव रमलापारसागरम् ॥ रत्ननिष्कासयत्नेन सुशिष्यसुखहेतवे ॥ २ ॥
कृतो रामप्रसादेन ग्रंथो रम्लदिवाकरः ॥ देयः शिष्याय पुत्राय न देयो यस्य कस्यचित् ॥ ३ ॥
गुरोर्ह्यधीत्याखिलरम्लविद्याः पीयूषवक्ता कुशलं[लः] क्रियासु ॥
स्वेष्टं सदाराधयतस्तपस्वी गुरोः पदांभोरुहभक्तिशीलः ॥ ४ ॥

च.—गौडान्वये रामप्रसादशर्मा करोमि ग्रंथं जगकारणहेतुः [जगतो हिताय] ॥
प्रश्नार्थगर्भं च मितक्रियान्वितं सद्योपकारी फलशीघ्रदाता ॥ ४६ ॥
सर्वोपरि विजानीयाद्ग्रंथं रम्लदिवाकरम् ॥ देशपांचालकप्राप्तगुरुयवनप्रसादतः ॥ ४७ ॥
इति श्रीगौडान्वये रामप्रसादशर्मणः कृतौ रम्लदिवाकरग्रंथः समाप्तः ॥

५५८ रमलनवरत्नम्-परमसुखोपाध्यायः ।

आ.—लंबोदरं विघ्नविनाशनं च नत्वा भवानीतनयं गजास्यम् ॥
यस्य प्रसादेन सुराः समस्तास्तिष्ठंति स्वे स्वे च पदे सदैव ॥ १ ॥
नत्वा श्रीरमलाचार्यान्परमाद्यसखाभिधैः ॥ उद्धृतं रमलांभोधेर्नवरत्नं सुशोभनम् ॥

श्रीकाशिराजद्विजगौतमवंशमुख्यो बलवंतसिंहनृपतेरवसानसिंहः ॥
मंत्री तदन्वयभवोऽतिपराक्रमाढ्यस्तस्माच्च तस्य तनयात्खलु लब्धवृत्तिः ॥ ३ ॥
सनाढ्योपाध्यायद्विजवरकुले मे जनिरभूत्पिता सीतारामो वरमतिरनूपा च जननी ॥
वसन्काश्यां तीर्थाटनकृतधियादौ च विहितादवंत्यां संप्राप्तो रुचिरनवरत्नान्यकुर्वन्[न्यकरवम्] ॥ ४ ॥
च.–प्रोतं द्विजानां प्रीत्यर्थं रम्ले च नवरत्नके ॥ ६ ॥
इति श्रीसनाढ्यकुलावतंसपरमसुखोपाध्यायकृतं रम्लनवरत्नानां कथनं समाप्तम् ॥ समाप्तोऽयं ग्रंथः ॥ संवत् १९१२ ॥

५५९ रमलविन्दुः ।

आ.–तत्रादौ रमले पातिते रमलमलबिंदवो गणितव्याः ॥ अथ द्रव्यप्राप्तौ प्रश्नः । विंदुगणनाकृतेन द्वाभ्यां २ भागः एक १ शेषे धनप्राप्तिः द्विशेषे न प्राप्तिः ॥
च.–तदा कार्ये सिद्धिपरिणामं षोडशगृहे विचारणीयम् ॥ १६ ॥ इति श्रीरमलबिन्दुः संपूर्णः ॥

५६० रमलरहस्यम्-भयभञ्जनशर्मा ।

आ.–गणनाथं नमस्कृत्य प्रणवाद्यं गुरुं तथा ॥ कुर्वे सारतरं प्रश्नं येन मानसिकं वदेत् ॥ १ ॥
रमलरहस्यं नामेदं शास्त्रं सारतरं ब्रुवे ॥ ....
इति श्रीभयभंजनशर्म्मकृतौ रमलरहस्ये सारसंग्रहे वजदहक्रमनामद्वितीयप्रकरणस्य पंचमोऽध्यायः ॥
अथ संख्याक्रमं विवक्षे ॥
च.–तत्त्वात्यष्टाध्यायो यतो मनोभिलषितसिद्धौ दिनावधिं वदेत् ॥ ....

५६१ रमलसंहिता ।

आ.–श्रीकृष्णं शिरसा प्रणम्य कमलां भक्त्या तथा शङ्करं श्रीनागेन्द्रसुतासुतं गणपतिं वाणीं सदा वै गुरुम् ॥
दृष्ट्वानेकविधान्बहून्सुविमलग्रंथान्सुमत्या शुभान्कुर्वे प्रश्नविधानरम्यरुचिरां स्कंधत्रयां संहिताम् ॥ १ ॥
पुरा शिवेन यत्प्रोक्तमादमाय द्विजन्मने ॥ दानीयालाय तेनैव लिख्यतेऽत्र मयाऽधुना ॥ २ ॥
संज्ञास्कंधं तु प्रथमं द्वितीयं प्रश्नसंज्ञकम् ॥ तृतीयं मिश्रसंज्ञं तु ज्ञेयमेव प्रयत्नतः ॥ ३ ॥
च.–करोति मुद्रां संख्यां वै चागमं वांछति ध्रुवम् ॥ इति रमलसंहिता संपूर्णा ॥

५६२ रमलेन्दुप्रकाशः-रुद्रधरः ।

आ.–जेयाजेयाञ्जयति दितिजान्यत्प्रसादेन विष्णुर्जिष्णुर्लोकानवति सकलान्यत्पदार्चाप्रसादात् ॥
स्रष्टा स्रष्टान्हरति च हरः प्राप्तकाले च सांबा विघ्नेशो वा हरतु दुरितं मे सुसिद्धिं विधत्ताम् ॥ १ ॥
गौरत्रिपाठिभगवान्भगवत्सुतोऽभूद्वाल्मीकिनामविस[श]दो विशदो गुणौघैः ॥
वाल्मीकिवज्जगति यः कविचक्रवर्ती श्रीमच्छिवाचरणलब्धवरप्रसादः ॥ २ ॥

प्राचि प्रागब्धिवेलां वरुणदिशि तथा पश्चिमांभोधिवेलां याम्यायां याम्यशैलं तुहिनदिशि हिमं यावदन्योन्य[न] तादृक् ॥
सर्वज्ञेंद्रोस्ति तेन स्वगुणसमगुणः काण्वरत्नेन रुद्रः श्रीमद्वाल्मीकिनाम्नी [म्ना] स्वजनि समुदितेनेव दीपेन दीपः ॥ ३ ॥
ज्योतिर्विदां सुबोधाय रमलांभोधिसारतः ॥ रमलेन्दुप्रकाशोऽयं शकलैस्तेन तन्यते ॥ ४ ॥
च.–इति रुद्रधरत्रिपाठिकल्पितो रमलेन्दुप्रकाशः संपूर्णः ॥

५६३ रात्रिसंवित्प्रदीपयन्त्रम्-दामोदरः ।

आ.–नत्वा सूर्यं मृडानीं गिरिशमथ गणधीश्वरं शार्ङ्गपाणिं चंडीदासद्विजाग्र्यो गणकगणशिरोरत्ननीराजितांघ्रिः ॥
ज्ञात्वा सिद्धान्ततत्त्वं स्वगुरुवचनतो रात्रिसंवित्प्रदीपं सुस्पष्टं येन विद्यानिशिसमयमिमं[दं] यंत्रमेतद्ब्रवीमि ॥ १ ॥
च.–दहनगिरियुगेंदौ १४७३ संमिते शाककाले मधुसितदिवसाद्ये वासरे तिग्मरश्मेः ॥
कृतमिदमथ यंत्रं रात्रिपूर्वं प्रदीपं सुगणकसुखकृत्स्याद्ब्रह्मणो वासरांतम् ॥ ३ ॥
श्रीमत्पंडितशालियोधनगरे श्रीमल्लदेवे नृपे राज्यं शासति राघवो द्विजवरः शांडिल्यगोत्रोऽभवत् ॥
यः ख्यातः स्वगुणैः क्षितौ पृथुयशा दामोदरस्तत्सुतो यंत्रं श्रेष्ठमिदं चकार महितं रात्रिप्रदीपं बुधैः ॥ ४ ॥
इति श्रीराघवसुतदामोदरेण विरचितं रात्रिप्रदीपयंत्रं समाप्तम् ॥

५६४ रामविनोदः-रामभट्टः ।

आ.–गणपतिमभिवन्द्य श्रीशपादारविंदस्मरणविदिततत्त्वोऽनंतजो रामचन्द्रः ॥
अकबरनृपशाकाद्व्यक्ति पंचांगपत्रं ग्रहगतिसमवेतं रामभूपालतुष्ट्यै ॥ १ ॥
सूर्यभूपमितिविक्रमशाके लब्धवानखिलभूमिपतित्वम् ॥
ख्यापयन्निजशकः[कं] किल सम्राड्भात्यसावकबरः क्षितिपालः ॥ २ ॥
साहीअकबरराज्यतो गतसमाः पञ्चाग्नि३५हीना गुणैर्निघ्नाः क्षेपयुतास्तिथिप्रमुखतो वारादिकेंद्रं तथा ॥
ऊर्ध्वांकोऽभ्रगुणै३०स्तिथेर्नगयमै२७र्भस्याश्वनेत्रै२७र्युतैर्वाराश्वैः ७ खगुणै३०स्तथा तिथिभयुक्केंद्रस्य तष्टस्ततः ॥ ३ ॥
च.–रामेण यत्नादिह रामदासप्रीत्यै कृते रामविनोदनाम्नि ॥ श्रीसूर्यसिद्धान्तमतानुसारी पाताधिकारः परिपूर्त्तिमागात् ॥२७॥
दैवज्ञभूषणमिदं कण्ठे धृत्वा विपश्चितः ॥ मदमायान्तु सिद्धान्तसंदोहामृतनिर्भराः ॥ २८ ॥
इति श्रीप्रौढप्रचंडदोर्दंडकुंडलितकोदंडविनिस्सरत्कांडखंडितारातिमुंडमंडलीमंडितचंडीशमूर्तिमहिमंडलमंडनश्रीमदकबरसाहिपरमामात्यधुर्यश्रीमहाराजाधिराजश्रीरामदासकारिते दैवज्ञानंतभट्टसुतदैवज्ञरामभट्टविरचिते रामविनोदाख्ये पाताधिकारः ॥

५६५ लम्पाकः सटीकः-पद्मनाभः ।

टी. आ.–गणनाथं रविमुख्यखेचरान्कुलदेवीविधिविष्णुशंकरान् ॥
प्रणिपत्य सदाशिवः स्वमूर्ध्ना लंपाके तिलकं करोति सम्यक् ॥ १ ॥
अरुपल्ल्युपनामकोऽथ कर्णाटकमुख्यो जनिरस्य शौनकाख्ये ॥ बहुशास्त्रविचारसारभूतं गिरिजेश[स्य]मुदे विदां च तुष्ट्यै ॥२॥
अथ लंपाकशास्त्रस्य प्रारंभनिमित्तं नमस्कारात्मकं मंगलमाहुरध्यासीनमिति ॥

मू. आ.—अध्यासीनं महादेवं महापद्मे द्विषड्दले ॥ विघ्नराजं नमस्कृत्य वक्ष्ये लंपाकमुत्तमम् ॥ १ ॥
मू. च.—नागाष्टिलोकसंबद्धं धीमतां भूभुजां मुदे ॥ पद्मनाभकृतं शास्त्रं लंपाकं लोकभूषणम् ॥ १२ ॥
इति श्रीपद्मनाभविरचिते लंपाकशास्त्रे नष्टादिचिंताप्रकरणं सप्तमोऽध्यायः ॥
टी. च.—नागाष्टीति स्पष्टम् ॥ १२ ॥
इति श्रीपद्मनाभविरचितायां लंपाकशास्त्रव्याख्यायां नष्टादिचिंताप्रकरणं नाम सप्तमोऽध्यायः ॥ संपूर्णो ग्रंथः ॥

५६६ लीलावतीटीका निसृष्टार्थदूती-मुनीश्वरः ।

आ.—पश्योदंचन्मधुश्रीकुसुमपरिमलाकृष्टतारुण्यघूर्णद्भृंगरपुष्पंधृता[धया]लीमुखरितककुभो निष्कुटक्षोणिभागान् ॥
चंडि त्वं मुंच मानं मयि वितर दृशं सुभ्रु लीलावतीत्थं राधां लक्ष्मीनिवासश्चटुभिरनुनयन्नाविरास्तां सदांतः ॥ १ ॥
बह्वर्थस्फुटचारुकोमलपदा लीलावती मानतो यन्नाविष्कुरुते प्रसादमनृजुप्राचीनमंदोक्तिभिः ॥
तस्मात्तच्चतुरप्रसादजननीस्रष्टं[नीं सृष्टां] निसृष्टार्थिकां दूतीं सुज्ञमुनीश्वरः प्रयतते लीलावतीच्छुप्रियाम् ॥ २ ॥
त्रुट्यादिप्रलयांतकालकलनामानप्रभेदः क्रमाचारश्च द्युसदां द्विधा च गणितमित्याद्युक्तक्रमेण सिद्धांतशिरोमणिग्रंथकृद्भास्कराचार्यः पाताधिकारानंतरं द्विधा गणितं वक्तुकामः प्रथमं ग्रहगणितज्ञानोपजीव्यां व्यक्तगणितपरिपाटीं विविक्षुरादौ तन्निर्विघ्नसमाप्तिकामनया कृतं गणेशनमस्काररूपं मंगलं शिष्यशिक्षायै शार्दूलविक्रीडितवृत्तेन निबध्नन् चिकीर्षितं सप्रवृत्त्यंगं प्रतिजानीते प्रीतिमिति ॥ ....
च.—अयं लीलावत्याः पटुदुरवगाहोऽतिगहनो मनोभावो भूयांस्तदधिगतये यां व्यरचयत् ॥
मुनीशस्तामेतां कृतिमकृतिदुष्प्राप्यविषयां निसृष्टार्थां दूतीमिव भजत भावेन चतुराः ॥ १ ॥
इति श्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकात्मजमुनीश्वरगणकविरचिता लीलावतीविवृतिर्निसृष्टार्थदूती संपूर्णा ॥

५६७ लीलावतीटीका-परशुरामः ।

आ.—नत्वा रमापतिगणेशसरस्वतीनां पादाम्बुजानि परशूपपदो हि रामः ॥
लीलावतीप्रकरणं प्रकरोति तच्च विद्वज्जनाः स्वमतितः परिशोधयंतु ॥ १ ॥
शिष्टाचाराद्देवतानमस्काररूपं मंगलमाचरन्प्रयोजनाभिधेये प्रतिजानीते ॥ प्रीतिं भक्तजनस्य..................
च.—त्यक्तं न यत्र समये क्षममर्थजातं नो वा किमप्यनुपयुक्तमतं व्यलेखि ॥
रामेण तेन परशूपपदेन तच्च लीलावतीविवरणं कृतिनां मुदेऽस्तु ॥
इति श्रीश्रीहर्षसूनोः परशुरामस्य कृतौ लीलावतीविवरणेंकपाशः समाप्तः ॥ संवत् १९१२ ॥

५६८ लीलावतीटीका बुद्धिविलासिनी-गणेशः ।

च.—मया सदुपपत्तयः कतिचिदन्यम[द]प्यग्र[त्र]यत्स्वधीलवविकासितं यदि सदोषमत्रास्ति यत् ॥
तदीयपरिशोधनं सुजनसुज्ञवर्योचितं यतो दिनकरोदये क्व तमसो जनेऽवस्थितिः ॥ १ ॥
दृष्ट्वा केचिदिहोपपत्तिममलां तुष्यंतु ये सज्जनाः केचित्सत्कविताविशेषरचनां व्याख्यादिकं केचन ॥
केचिद्विब्रुवतेऽथ किंचिदपि नापूर्वं चि[व]चोऽस्तीति ते तुष्यंतु स्वगिरैव तेऽपि निखिलं पश्यंति संतः समम् ॥ २ ॥

श्रीमत्सज्जनधामवृंदरुचिरे क्षारांबुधेः प्राक्तटे नंदिग्राम इहावसन्द्विजवरः श्रीकेशवोऽस्यात्मजः ॥
तत्पादाब्जयुगाप्तशास्त्रविभवः श्रीमद्गणेशः कृती नानायुक्तिमतीमिमां हि कृतवाँल्लीलावतीव्याकृतिम् ॥ ३ ॥
श्रीशालिवाहनशकेद्रिरसेंद्रतुल्ये १४६७ विश्वावसौ शरदि मासि मधौ सिताजे ॥
लीलावतीसुवृष्टिकृतिं [सुविवृतिं कृत] वान्गणेशः श्रीकेशविर्गणकवर्यकुलावतंसः ॥ ४ ॥
इति श्रीसकलागमाचार्यवर्यश्रीगणेशदैवज्ञकृता लीलावतीटीका बुद्धिविलासिनी समाप्ता ॥

५६९ लोकभास्करः सटीकः-लोकनाथः ।

टी. आ.—निर्विघ्नपरिसमाप्त्यर्थं आदौ विष्णुदेवताचरणकमल(ध्यान)रूपं मंगलमन्यत्र वेदोक्तं पंचदेवताध्यानमेव नमस्कार-रूपमंगलमातनुते । श्रीमन्नंदेति ॥
मू. आ.—श्रीमन्नंदमुदावहं भगवतः पादारविन्दद्वयं पूर्णाचंद्रकचंद्रिकानखरुचिध्वान्ताविविध्वंसनम् ॥
ध्यात्वोद्धृत्य शिवाशिवार्कगणपान्सारं च सिद्धान्ततो वक्ष्येऽहं खलु लोकभास्करमिदं[मं] श्रीलोकनाथः कृतम्[ती] ॥१॥
मू. च.—इति श्रीलोक(नाथ)विरचिते लोकभास्करे ग्रहध्रुवाधिकारः प्रथमः ॥ १ ॥

५७० लोमशसंहिता ।

आ.—परजातं कथं ज्ञेयं कथं ज्ञेयं शुभाशुभम् ॥ दशा कस्य कदा ज्ञेयं ग्रहाणां राशीनां फलम् ॥ ....
भावानां द्वादशानां च सर्वेषां फलमादिशेत् ॥ भावस्थानां ग्रहाणां च फलं ते कथितं मया ॥ १०७ ॥
अतः परं प्रवक्ष्यामि दशाभेदाननेकशः ॥ ....
यत्र भूमिस्थितं द्रव्यं शल्यं तोयं च दैवतम् ॥ कथं ज्ञानं भवेत्तस्य केनोपायेन लभ्यते ॥ १ ॥ ....
च.—इति श्रीलोमशसंहितायां त्रयोदशोत्थाने लोमशऋषिसुजन्मविप्रसंवादे अदृष्टाश्रुतवस्तुनिर्णयो नामैकचत्वारिं-शतित[शत्त] मोऽध्यायः ॥ संवत् १९१२ ॥

५७१ वर्षतन्त्रविवृतिः शिशुबोधिनी-माधवः ।

आ.—हेरंबं भुवनस्य शीर्षमधुलिट्संसक्तपादाम्बुजं गौरीहृत्कमलप्रकाशतरणिं विघ्नाटवीपावकम् ॥
दृप्यद्वैरिकुलांतकं सुमनसां श्रीसिद्धिवुद्धिप्रदं सिंदूरारुणगंडयुग्ममनिशं भालौषधीशं भजे ॥ १ ॥
प्रभाकरं सर्वजगत्प्रभाकरं त्रयीतनुं ब्रह्महरीश्वरात्मकम् ॥ लोकस्य सृष्टिस्थितिनाशकारकं वन्दे ग्रहाधीशमभीष्टसिद्धये ॥२॥
श्रीचिंतामणिदैववित्तनुभवोऽनंतो द्विजन्माग्रणीर्भूमीमण्डलशोभिभूपतिकुलैः संमानितः सादरम् ॥
सर्पाधीशगवीविचारचतुरो गर्गो मुनिर्ज्यौतिषे देशादेस्य[ष] विदर्भतो बुधवरो वाराणसीमाविशत् ॥ ३ ॥
तत्सूनुर्गणितार्णवैकतरणिः श्रीनीलकण्ठो बुधोऽभूद्वेदस्मृतितर्कशास्त्रनिपुणो भूमीपमालार्चितः ॥
ज्योतिःशास्त्रमिदं त्रिधा समकरोद्यट्टोडरानंददं श्रीशेषाहिसरस्वतीं सविवृतिं शिष्यान्सदाध्यापयत् ॥ ४ ॥
गोविंद एकरदपादसरोजभृंगस्तस्मादभूद्बुजगराजगवीप्रवीणः ॥
ज्योतिर्नयप्रचुरटिप्पणकृत्कृ[च्छु]तिज्ञः श्रीगार्ग्यवंशतिलको गणकावतंसः ॥ ५ ॥

तस्मादभूवान्विबुधेज्यकल्पास्त्रय: सुता ज्यौतिषशास्त्रनिष्ठा: ॥
ज्येष्ठो ह्यनंतोऽनु च माधवाख्यश्चिंतामणिस्तत्परतो विपश्चित् ॥ ६ ॥
तेषु श्रीगणनाथभक्तिविलसद्विद्यागणो माधव: शिष्यप्रार्थनयोररीकृतवचा: संक्षिप्तटीकाकृतौ ॥
श्रीगोविंदगुरो: प्रणम्य चरणांभोजन्म कुर्वे ततो लब्ध्वा बोधलवं पितामहकृते सत्ताजिके व्याकृतिम् ॥ ७ ॥
जीर्णाम्निटीकामद[ह]तीति मूलं तत्स्थं विचारं मुनिसंमतिं च ॥
हित्वाहमल्पां शिशुबोधनीं तां संज्ञाविवेकस्य करोमि टीकाम् ॥ ८ ॥

च.–अस्ति प्रशस्तधरणीसुरसंघसेव्यो गोदावरीजलपवित्रितभूमिजात: ॥
नानाविधापणिकषुङ्नगराकरालो देशो विदर्भ इति दैवतहर्म्ययुक्त: ॥ १ ॥
तत्र धर्मनगरीति राजते पूर्वजाश्च[च] जनता रथोद्धता ॥ स्वीयपूर्वजनिवासभूमिका शैवमंत्रजपनिष्ठमुक्तिदा ॥ २ ॥
तत्राभूद्गार्ग्यवंश्यो विविध(विधि)विधां[दां]मूर्द्धि हीरो ह्यनन्तो श्रीमद्दैवज्ञचिंतामणितनयवरोऽध्यापितानेकशिष्य: ॥
भूमींद्राधीशमान्यो व्यतनुत विबुधानंददां जातकीयां वार्द्धक्ये – – – सावकृत सुरसरिच्चारुकाशीनिवासम् ॥ ३ ॥
तस्मात्पद्माख्यपत्न्यां समजनि विधुवन्नीलकण्ठ: स्तुति[सुती]क्ष्ण: स्वाचारात्यन्तनिष्ठो विजितमुनिगण: – – – – ॥
त्रिस्कंधं ज्यौतिषं य: समकृत विशदं टोडरानन्दसंज्ञं सादित्यज्ञानपूर्ण: स्मृतिषु च निपुणोऽकब्बरक्ष्मेशमान्य: ॥ ४ ॥
गोविन्दश्चंद्रिकायां समभवदमुतो दैवविद्वंद्यपादो विश्वप्रख्यातकीर्त्ति: स्मृतिनिपुणमतिर्गार्ग्यवंशावतंस: ॥
त्रिस्कंधज्यौतिषज्ञ: प्रचुरगुणनिधि: श्रीमहाभाष्यवेत्ता यो ज्योतिर्ग्रंथकर्त्ता नृपतिवरजहांगीरसाहातिमान्य: ॥ ५ ॥
श्रीहेरंबपदांबुजन्मविलासद्भक्ति: श्रुतिज्ञ: स्मृतिज्ञाता पाणिनिशास्त्रविदिपतृकृपासंप्राप्तविद्यागुण: ॥
ज्योति:शास्त्रविचारणादुपमतिर्दैवज्ञचूडामणिर्गोमत्यां समभूत्क्षितीश्वरनुतस्तस्मात्सुतो माधव: ॥ ६ ॥
श्रीमत्पितामहकृतस्य सुताजिकस्य सच्छिष्यसंघविहितार्थतया प्रसन्न: ॥
स्वल्पामुदाहृतियुतां शिशुबोधनीं तां श्रीवर्षतंत्रविवृतिं सुगमामकार्षीत् ॥ ७ ॥
सुजनगणकवर्या अत्र चेद्दोषलेशस्तमखिलमपनीय प्रामुदध्वं गुणेषु ॥
यदि नववसनेस्मिन्नीलिकासूत्रमार्यैस्तदपसरणतो हि ग्राह्यमेवास्ति वस्त्रम् ॥ ८ ॥
अक्षबाणशरभूमित १५५५ शाके शुक्लपक्षकशुचौ शिवपूर्वा[पुर्या]म् ॥
ग्रंथपूरि[र्ति]सुकृतार्प्पणमस्मान्मह्यमिष्टफलदो गणनाथ: ॥ ९ ॥
इति श्रीविद्वद्दैवज्ञमुकुटभूषणगोविन्दज्योतिर्विद्विरचितायां समाविवेकटीकाविवृतौ शिशुबोधिन्यां मासाधिफल–साध्याध्याय: समाप्त: ॥

५७२ वर्षपद्धति:-मिश्रमोतीराम: ।

आ.–ॐ प्रणम्य वासरेशितु: पदाम्बुजद्वयं मया ॥ तदज्ञबोधदायिनी वितन्यतेऽब्दपद्धति: ॥ १ ॥
च.–रामशैलधृतिश्चापि १८७३ मधुशुक्लद्विके शनौ ॥ मोतीरामबुधेनेयं निर्मिता वर्षपद्धति: ॥
इति श्रीमिश्रमोतीरामविरचिता वर्षपद्धति: संपूर्णा ॥

५७३ वर्षप्रबोधे मेघमहोदय:-मेघविजयगणि: ।

आ.–श्रीतीर्थनाथवृषभं प्रभुमाश्वसेनिं शंखेश्वरं नतसुरेंद्रनरेंद्रचक्रम् ॥
ध्यायन्स मेघविजयं सुखभाववृद्धयै शास्त्रं करोमि किल मेघमहोदयार्थम् ॥ १ ॥

येनायं प्रभुपार्श्वमाप्तवृषभं विश्वैकवीरं हृदि स्मारं स्मारमहर्निशं पटुधिया ग्रंथः समारभ्यते ॥
त्रेधा तस्य सुवर्णसिद्धिकमला मेधाबलात्सैधते राजद्राजसभागु[सु] भासुरतया कीर्त्तिर्निरीनृत्यति ॥ २ ॥
दीपोत्सवदिने प्रातर्ग्रंथः प्रारभ्यते मया ॥ अस्मिञ्जगद्गुरोर्भक्त्या भूयाद्वाक्सिद्धिसंनिधिः ॥ ३ ॥
स्थानांगे दशमस्थाने न्यवेदि सुख[ष]मोदयः ॥ श्रीमद्वीरजिनेंद्रेण सर्वलोकहितैषिणा ॥ ४ ॥
वृष्टेः कालाकालरूपस्थानाद्यर्थनिरूपणात् ॥ सौत्रं विवरणं स्पृ[स्प]ष्टं ग्रंथेऽस्मिन्नभिधीयते ॥ ५ ॥
च.–त्रयोदशोऽधिकारोऽभूच्छास्त्रेऽस्मिञ्छकुनाश्रयः ॥ तदेकविंशतिद्वारैर्ग्रंथोऽलभत पूर्णताम् ॥ ८८ ॥
स्थानांगसूत्रविषयीकृतवर्षबोधज्ञानाय तत्प्रकरणं विहितं वितत्य ॥
भक्त्या व्यदीपि जिनदर्शनमेव तेन लोकः सुखी भवतु शाश्वतबोधलक्ष्म्या ॥ ८९ ॥
श्रीमत्तपागणविभुः प्रसरत्प्रभावः प्रद्योतते विजयतः प्रभनामसूरिः ॥
तत्पट्टपद्मतरणिर्विजयादिरत्नः स्वस्मी[श्री]गण(स्य)महसा विजितद्युरत्नम्[त्नः] ॥ ९० ॥
तच्छासने जयति विश्वविभासनेऽभूद्विद्वान्कृपादिविजयो दिविजन्मसेव्यः ॥
शिष्योऽस्य मेघविजयाह्वयवाचकोऽसौ ग्रंथः कृतः सुकृतलाभकृतो[ते]ऽत्र तेन ॥ ९१ ॥
क्वचित्प्राच्यैर्वाच्यैरतिशयरसाच्छ्लोककथनैः क्वचिन्नव्यैः श्रव्यैः प्रकरणमभूदेतम[द]खिलम् ॥
सतां प्रामाण्याय – – – क्वचिल्लोकोक्तिरुचिरं जिनश्रद्धाभाजामपि चतुरराजां समुचितम् ॥ ९२ ॥
अनुष्टुभां सहस्राणि त्रीणि सार्द्धानि मानतः ॥ ग्रंथोऽयं वर्षबोधाख्यो यावन्मेरुः प्रवर्ततात[म्] ॥ ९३ ॥
यतः[त्] पुनरुक्तमयुक्तं दुरुक्तमिह तद्विशोधितुं युक्तम् ॥ बद्धांजलिनेति मया न्यर्थं[र्थ्यं]ते सकलगीतार्थाः ॥ ९४ ॥
मेराविजयकल्लैयादलंघ्या मेरुविद्विया ॥ भक्त्या मेरोचितः शिष्यः श्रीमेरुविजयः कविः ॥ ९५ ॥
भाविवत्सरबोधाय तस्य बालस्य शालिनः ॥ कुरुतां गुरुतां ग्रंथो हिताद्बालस्य पालनात् ॥ ९६ ॥
इति श्रीतपागच्छीयमहोपाध्यायश्रीमेघविजयगणिविराचितवर्षबोधे मेघमहोदयसाधने शकुननिरूपणं नाम त्रयोदशोऽधिकारः संपूर्णः ॥ संवत् १८४९ ॥

५७४ वास्तुमण्डनम्-सूत्रधारः ।

आ.–स्रष्टारं जगतामीशमनेकाश्चर्यरूपिणम् ॥ पालकं सर्वसत्त्वानां वन्दे शक्तिमयं शिवम् ॥ १ ॥
वास्तुवेदोदधेः किंचित्सारमादाय मंडनः ॥ बालानामवबोधाय तनुते वास्तुमंडनम् ॥ २ ॥
च.–सुतेन देवसिंहेन प्रार्थितः क्षेत्रनन्दनः ॥ स्थपतिः सृजति स्मेदं मंडनो वास्तुमंडनम् ॥
इति श्रीसूत्रधारविरचिते वास्तुमंडने वास्तुशास्त्रे प्रकीर्णकाध्यायोऽष्टमः ॥ श्लोकसंख्या १०९ ॥

५७५ वास्तुशास्त्रं राजवल्लभाख्यम्-मण्डनः ।

आ.–आनन्दं वो गणेशार्कविष्णुगौरीमहेश्वराः ॥ कुर्युः श्रियं(तथा)सौख्यमारोग्यत्वं[ग्यं च] गृहे सदा ॥ १ ॥
देवं नमामि गिरिजात्मजमेकदंतं सिंदूरचर्चितवपुःसुविशालतुन्दम् ॥
नागेन्द्रमण्डिततनुं युतसिद्धिबुद्धिं सेव्यं सुरोरगनरैः सकलार्थसिद्ध्यै ॥ २ ॥

या ब्रह्माद्यैरलक्ष्म्या[क्ष्या] त्रिभुवननमिता ब्रह्मपुत्री शिवाद्या ब्रह्मा विष्णुश्च रुद्रः प्रणमति बहुशो यां सदानंदरूपाम् ॥
वाणी चैतन्यरूपे वसति च सकले प्राणनिद्राक्षुधातृट् सा नित्या सुप्रसन्ना वितरतु विभवं विश्वरूपा च लोके ॥ ३ ॥
कंबासूत्रांबुपात्रे वहति करतले पुस्तकं ज्ञानसूत्रं हंसारूढस्त्रिनेत्रः सुरमुकुटशिरःसर्वतोवृद्धकायः ॥
त्रैलोक्यं येन सृष्टं सकलसुरगृहं राजहर्म्यातिहर्म्यं देवोऽसौ सूत्रधारो जगदखिलहितः पातु वो विश्वकर्मा ॥ ४ ॥
स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदं जंतूनां लयनं सुखास्पदमिदं शीतांबुघर्मापहम् ॥
वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते गेहं पूर्वमुशंति येन विबुधाः श्रीविश्वकर्मादयः ॥ ५ ॥
च.–श्रीमेदपादे[टे]नृपकुंभकर्णस्तदंघ्रिराजीवपरागसेवी ॥ स मण्डनाख्यो भुवि सूत्रधारस्तेन[ना] कृतो भूपतिवल्लभोयम् ॥४३॥
गणपतिगुरुभक्त्या भारतीपादतुष्ट्या मुनिमतमिदमुक्तं वास्तुशास्त्रं सुवृत्तम् ॥
गणितममितसारं शाकुनं सारभूतं भवतु चतुरयोग्यं विश्वकर्मप्रसादात् ॥ ४४ ॥
इति श्रीवास्तुशास्त्रे राजवल्लभमंडने शकुनलक्षणं नाम चतुर्दशोऽध्यायः ॥ १४ ॥

५७६ वास्तुशिरोमणिः-शंकरः ।

आ.–गंडव्यामुग्धरोलंबमंबाक्रोडावलंबिनम् ॥ लंबोदरमहं वंदे सिंदूरद्युतिसुन्दरम् ॥ १ ॥
केले[लौ] कदंबे विहितावलम्बो बिंबाधरालंबितरम्यवेणुः ॥ सविद्युदंभोदनिभः शुभं मे पीताम्बरः श्यामतनुस्तनोतु ॥२॥
पुष्पाणामिव वृष्टयः सरभसं वृन्दारकैः कल्पिता
– – लैर्बहुसंगलाय कुतुकं मु [स्त्रीरत्नैर्बहुमंगलाय कुतुकाद्] त्क्षिप्तलाजा इव ॥
नृत्योद्धूतशशांकशेखरजटाजूटाचलप्रस्खलद्गंगाम्भःकणिका ममाभिलषिते कुर्वन्तु विघ्नक्षतिम् ॥ ३ ॥
पर्युद्यत्प्रकटप्रतापविजितक्ष्मापालनम्रो[म्रौ]भवच्चूडामौलिमणिप्रभातिशुभगः प्रोत्तुंगसिंहासनः ॥
दानोद्यत्करकल्पवृक्षजनितासंख्यानकल्पद्रुमः श्रीमन्माननरेन्द्रजो विजयते श्रीश्यामसाहो नृपः ॥ ४ ॥
विद्वद्भिः परिशीलितानि बहुशस्तंत्राणि संख्यावतां पूर्वेषां प्रविलोक्य सारमखिलं ज्ञात्वैव संक्षेपतः ॥
साहश्यामनृपाज्ञया बुधवरः श्रीमान्गुरुः शंकरो रम्यं वास्तुशिरोमणिं वितनुते विद्वज्जनप्रीतये ॥ ५ ॥
च.–इति श्रीमन्महाराजाधिराजश्यामसाहगुरुशंकरकृतौ वास्तुशिरोमणौ ग्रहप्रवेशप्रकरणं नामाष्टमम् ॥

५७७ विजयकल्पलता-चक्रपाणिः ।

आ.–नत्वा गुरून्समालोक्य स्वरशास्त्राणि भूरिशः ॥ वक्ष्ये युद्धजयो[य]ज्ञानं धार्मिकाणां महीक्षिताम् ॥ १ ॥
बहुधा विदधे सदाशिवोऽत्र स्वरतंत्राणि तदेकवाक्यतां तु ॥
भगवानयमेव वेद सम्यग्गुरुमार्गानुगतोऽपरस्तु लोकः ॥ २ ॥
वक्ष्याम्यहं ह[य]दिह किंचन सर्वसारमेतावदेव परिचिंत्य नृपः प्रवृत्तः ॥
एकोऽपि कोटिभटलोलपतंगदीपलीलां मुदानुभवतु स्फुटकौतुकेन ॥ ३ ॥
च.–बल्लालसंज्ञनगरे सुजनालयेऽभूद्विप्राग्रणीर्विमलकाश्यपवंशजन्मा ॥
निःशेषपंडितनमस्कृतपादपद्मः ख्यातिं गतो निजगुणैर्भुवि वासुदेवः ॥ ३० ॥

तस्यात्मजो जयति जातकवेदिवृंदचूडामणिर्गजमुखांघ्र्यरविंदभृंगः ॥
श्रीकामराजगणकः क्षितिपालवांछाविस्पष्टबालकुशलः स्वरविद्वरिष्ठः ॥ ३१ ॥ ....

५७८ विजयप्रशस्तिः-रत्नजित् ।

आ.–नत्वा वामे यमोरूपं वर्णानामिव मुख्यगम् ॥ विजयप्रशस्तिसंज्ञं ग्रंथं लिखति रत्नजित् ॥ १ ॥
अरुणधवलनीलैर्यो मयूखैरभिख्यां रचयति यमुनायाः शोणगंगानुषक्तेः ॥
भवलयभवहेतुर्मुद्रणोन्मुद्रणाभ्यां कलयतु कुशलं नः कालिकायाः कटाक्षः ॥ २ ॥
शतमखमुखलेखैर्लालितायाः शिरोभिः कविषु किमपि बीजं काव्यकर्तृत्वशक्तिः ॥
मुनिजनमनसां या मोहपाशैकहर्त्री जयति गिरिसुतायाः पादपंकेरुहश्रीः ॥ ३ ॥
परवचनविलासे तोषमायांति संतो रटति कटुवचोभिर्दोषमन्ये हसंतः ॥
यदपि शबरपोतः श्यामिकारोपणेन त्यजति मृगमदं तत्सौरभे को नु दोषः ॥ ४ ॥
नवरसमयमूर्त्तिः सद्गुणा दोषहीना वदनकमलरङ्गस्वा[स्था]नमामंडयंती ॥
ध्वनिभिरभिहरंती चित्तवित्तं जनानां जयति जयति भव्या भारती भारती नः ॥ ५ ॥
सद्वर्णचक्रविपुला वलराजमाना विस्तीर्णकालकलना विधिमंत्रसारा ॥
श्रीकृष्णमूर्त्तिरिव भूपतिराजलक्ष्मीर्मन्निर्मिता विजयतां विजयप्रशस्तिः ॥ ६ ॥
स्वर्णोज्ज्वला जयकरी कमनीयबंधाप्यालोकिता वितनुते मनसोऽनुभावम् ॥
धर्मात्मनोवति यतेस्स्वरवारिसो[शो]भां गृह्णं[ह्णा]तु वा कथमियं न कृतिर्मदीया ॥ ७ ॥
शास्त्रं स्वरोद्भवमिदं स्वयमाह रुद्रस्तत्वं हि तस्य निखिलं च स एव वेत्ति ॥
अश्रौषमाननसरोरुहतो गुरूणां संक्षिप्य तद्विरचयामि हिताय राज्ञाम् ॥ ८ ॥ ....

५७९ विवाहदीपिका-वासुदेवकविः ।

आ.–श्रियं कवीनामनुवर्णगामिनी कविक्रियाकारणबोधदायिनी ॥ प्रवृद्धहत्तामरसाधिवासिनी सदैव नो यच्छतु वागधीश्वरी ॥ १ ॥
यस्याः प्रसादादपि मादृशः शलिः क्रियामभिज्ञोदितनीतिसम्मताम् ॥
क्षमोऽहमासाधयितुं कलावतीं प्रणम्य तां वच्मि विवाहदीपिकाम् ॥ २ ॥
च.–विवाहदीपिकाकाव्यं तथापि मदुदीरितम् ॥ विधाय करुणां सन्तः शोधयन्तु दयालवः ॥ ७४ ॥
इति श्रीनीलकंठात्मजवासुदेवकविविरचितायां विवाहदीपिकायां त्रयोदशी कला १३ ॥ समाप्तोऽयं दीपिकाग्रंथः ॥
संवत् १८६९ ॥

५८० वीरसिंहोदयः-विश्वनाथः ।

आ.–प्रसूतिः सर्ववस्तूनां यतः संपत्तिरेव च ॥ दीर्घायुर्भोगसंपन्नः प्रभवे जायते नरः ॥ १ ॥
च.–इति श्रीमहाराजाधिराजवीरसिंहकारिते सर्वशास्त्रविशारददैवज्ञरामसुतविश्वनाथविरचिते वीरसिंहोदये जातकखंडे चंद्रस्य राशिविशेषफलानि ॥

५८१ वृद्धयवनजातकम्-मीनराजः ।

आ.—सृष्ट्यै विधात्रे जगतां शिवाय संहारकाले स्थितयेच्युताय ॥ तुभ्यं नमः सर्वगताय नित्यं त्रयीमयायामलभास्कराय ॥१॥
यदुक्तवान्पूर्वमुनिस्तु शास्त्रं होरामयं लक्षमितं प्रमाय ॥ तं मीनराजो निपुणं स्वबुद्ध्या विचिंत्य चक्रेष्टसहस्रमत्र ॥२॥......

५८२ वृद्धवशिष्ठसंहिता महासंहितापरनाम्नी-ब्रह्मर्षिः ।

आ.—प्रह्वांभोजभवामरेंद्रनिकरस्फूर्जत्किरीटोल्लसत् — — — — —
च.—इति वृद्धवशिष्ठब्रह्मर्षिविरचितायां महासंहितायां नक्षत्रजतिथिजवारजतद्योगजयोगतरफलतच्छांतिजपहोमबलिदान-
विधानतदंतर्गतकुहूयोगविधानाध्यायः पंचचत्वारिंशत्तमः संपूर्णः ॥ ४५ ॥ संवत् १९०६ ॥

५८३ व्यवहारवृन्दः-शुकदेवः ।

आ.—श्रीकृष्णेशगणेशसूर्यप्रमुखान्वंदे पदाब्जं गुरोर्वक्ष्येऽहं व्यवहारवृंदमगभूशैलाक्षियाते कलौ ॥
विप्राग्र्यार्चितगौडवंशप्रवरो दामोदरो वेदवित्तत्सूनुः शुकदेवमिश्रमथुरापुर्यां कविर्ज्योतिर्वित् ॥ १ ॥
च.—सांवत्सरं मासतिथिश्च भानि सद्गोचरं संस्कृतयो विवाहाः ॥ प्रकीर्णयात्राविधिवास्तुभेदाः क्रमेण ग्रंथेऽत्र उदाहृतास्ते ॥२८॥
इति श्रियाढ्यं व्यवहारवृंदं विलोक्य नानामुनिप्रोक्तसारम् ॥ कृतं हि मिश्रेण शुकेन रम्यं वास्तुप्रभेदं च ग्रहप्रवेशः ॥२९॥
इति श्रीमिश्रशुकदेवविरचिते व्यवहारवृंदे वास्तुप्रकरणं दशमं समाप्तम् ॥

५८४ शाकुनशास्त्रं सटीकम्-भानुचन्द्रगणिः ।

टी. आ.—स्वस्तिश्रीसदनं यदीयवदनं वेधा विधायाद्भुतं वीक्ष्याश्चार्यमवाप सस्पृहतया सन्मार्ज्जयन्वाससा ॥
क्षिप्तं तत्र तथाविधैरणुगुणैर्वैशयस्य मायादितं मन्ये सम्प्रति लक्ष्यते घनपथे शीतद्युतेर्मण्डलम् ॥ १ ॥
आनम्रत्रिदशेन्द्रमौलिमुकुटप्रोद्दामरत्नांशुभिर्यत्पादद्वितयं विचित्ररचनाभंगीभिरंगीकृतम् ॥
दिङ्नागैश्च यदीयकीर्तिरतुला कर्णावतंसीकृता स श्रीवीरविभुर्दधातु भवतां शश्वन्मनोवांछितम् ॥ २ ॥
यस्त्रैलोक्यरमाभिरस्पृहतया सानन्दमालोकितं तीक्ष्णैः स्वर्गवधूकटाक्षविशिखैर्यो लक्षतां नागमत् ॥
ज्ञानैः स्वात्मसमुत्थितैश्च निखिलान्भावान्समावेदयन्स श्रीमान्भुवनावतंसकमणिः पायादपायात्प्रभुः ॥ ३ ॥
प्रादुर्भूता यदा[दं]गात्प्रसरति भुवने भारती भव्यरूपा वक्तुं यत्सृष्टिजाता न हि विभुरविभुः सद्विशेषानशेषान् ॥
तद्वक्त्रं स्फीतिभावं दधदहिमरुचान्यक्षितिर्निर्मि(मी)ते ज्ञानद्वैतप्रकाशः स भवतु भवतां भूपते[तये] नाभिजातः ॥४॥
नमस्त्यु[:सु]कृतसंदोहशालिने परमात्मने ॥ संभवे सर्ववेदार्थवेदिने भवभेदिने ॥ ५ ॥
जाग्रज्ज्योतरकब्बरक्षितिपतेरभ्यर्णमातस्थिवान्सिद्धार्द्रैः करमोचनादिसुकृतं योऽकारयत्साहिनाम् ॥
जीवानामभयप्रदानमधिकं सर्वत्र देशे स्फुटं श्रीमद्वाचकपुंगवः स जयतां श्रीभानुचन्द्राभिधः ॥ ६ ॥
तच्छिष्यः सुकृतैकभूर्मतिमतामग्रेसरः केशरी शाहिस्वांतविनोदनैकरसिकः श्रीसिद्धिचन्द्राभिधः ॥
पूर्वं श्रीविमलाद्रिचैत्यरचनां दूरीकृतां शाहिना विज्ञाप्यैव मुहुर्मुहुस्तमधिपं योऽकारयत्तां पुनः ॥ ७ ॥

यावन्या किल भाषया प्रगुणितान्ग्रंथानशेषांश्च तान्विज्ञाय प्रतिभागुणैस्तमधिकं योऽध्यापयन् शाहिराट् ॥
दृष्ट्वानेकविधानवैभवकलां चेतश्चमत्कारिणीं चक्रेषु स्फुटमेति सर्वविदितं गोत्रं यदीयं हि सः ॥ ८ ॥
तद्बुद्धिवैभवकृतेऽत्र वसन्तराजसच्छाकुनस्य विवृतिं प्रणयत्यभिज्ञः ॥
श्रीसूरिचन्द्रचरणांबुजचंचरीकः श्रीशाहिराजकृतसत्कृतिभानुचन्द्रः ॥ ९ ॥
इह हि ग्रन्थकृन्निर्विघ्नसमाप्तिकामो मंगलमाचरेदित्यलौकिकाविगीतशिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकत्वेन प्रथमत एव मंगलमाविष्कर्व्वन्नाह ॥

मू. आ.—विरञ्चिनारायणशंकरेभ्यः शचीपतिस्कन्दविनायकेभ्यः॥ लक्ष्मीभवानीपतिदेवताभ्यः सदा नवभ्योऽपि नमो ग्रहेभ्यः॥१॥
अस्यार्थः । एभ्यो नमः अस्तु इत्यन्वयः ॥

टी. च.—इति श्रीशत्रुंजयकरमोचनादिसुकृतकारिमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायां वसन्तराजटीकायां ग्रंथप्रभावकथनं नाम विंशतितमो वर्गः २० ॥ इति वसन्तराजटीका संपूर्णा ॥ संवत् १९०७ ॥

५८५ संवत्सरकल्पलता-सोमदैवज्ञः ।

आ.—स्वानंदाय सनंदनादिनुतनयत्पादारविंदद्वयं नानानंदनिदानमेकरदनं— — — —सद्वयम् ॥
भालेंदुं मदमत्तदंतिवदनं दानं दधानं सदा तं देवं मदनारिनंदनमहं वंदे सतुंदं मुदा ॥ १ ॥
मर्दि[त्स्यें]द्रनाथचरणस्मरणप्रवीणः श्रीरुद्रभट्टतनयो विनयोपपन्नः ॥
सोमाभिधानगणकोत्तह — — — तुष्ट्यै संवत्सरादिफलकल्पलतां तनोति ॥ २ ॥

च.—वृष्ट्यादिपातकांता ये क्रमात्प्रोक्ता विंशोपकाः ॥ तद्योगो नखर २० हृच्छेषात्सर्वनिष्पत्तिरीरिता ॥ २२ ॥
इति विंशोपकानयनम् ॥ इति श्रीरुद्रभट्टात्मजसोमदैवज्ञविरचिता संवत्सरादिफलकल्पलता समाप्ता ॥ संवत् १९१२ ॥

५८६ संहिताखण्डरत्नम्-शिवरामः ।

आ.—नित्यं श्रीमच्छक्तियुक्तं गणेशं ब्रह्मेशाद्यैः पूजितं विघ्नराजम् ॥
गौरीहृत्पद्मावबोधैकभानुं भक्ताभीष्टार्थाप्तिदातारमीडे ॥ १ ॥
दैवज्ञश्रीराममानम्य तातं तत्पादांभोजन्मसेवाप्तविद्यः॥ दैवज्ञानां संमुदे नाल्पसारं कुर्वे नूनं संहिताखंडरत्नम् ॥ २ ॥......
विद्यापारावारपारप्रपातदैवज्ञश्रीरामसूनोः शिवस्य ॥
प्रोक्त सूक्ते संहिताखंडरत्ने पूर्णः सुयोद्द्यात[सूर्योद्योत]आद्यो हि रश्मिः ॥ १ ॥

च.—ज्ञेयं चैतद्गोचरे नो व्यधश्चेद्वेधे वेधर्क्षोत्थमेवादिशेद्दः ॥ ९ ॥.........
विद्या — — — — — — — — — — — ह्येकत्रिंशो गोचराख्यो हि रश्मिः ॥ ३१ ॥.........

५८७ संहितादीपकः-अनन्तः ।

आ.—पातैष्यकालविषयागमने स्फुटाय वेदशु[वेदाम्]तैकनिलयाय तमोहराय ॥
भूयोभिसंमतगुणैर्विलसन्महिम्ने पित्रेऽमराय च नमः पुरुषोत्तमाय ॥ १ ॥

दृष्ट्वा गर्गपराशरादिमुनिभिः शास्त्रं प्रणीतं चिरं तद्वल्लल्लवराहपूर्वकृतिभिर्भूयः प्रसादाद्गुरोः ॥
वक्ष्ये दुर्गमसंहिला[ता]लयगतालोकप्रदीपं स्फुटं रम्यं स्वल्पमनल्पसारममलं होराविदां प्रीतये ॥ २ ॥
च.–इति श्रीभट्टपुरुषोत्तमात्मजपंडितानंतविरचिते संहितादीपके उत्पातलक्षणं समाप्तम् ॥ संवत् १९१२ ॥

५८८ सङ्केतचन्द्रिका-नन्दरामः ।

आ.–श्रीगोविंदपदांभोजं नमस्कृत्य खचारिणाम् ॥ स्वभावचेष्टावस्थानां कुर्वे संकेतचन्द्रिकाम् ॥ १ ॥
भावाः षड्द्वादशावस्थास्तिस्रश्चेष्टाः प्रकीर्तिताः ॥ खेटानां शंभुना तस्मात्तत्फलमिह ब्रुवे ॥ २ ॥
लज्जितः क्षुधितः क्षुब्धो मुदितो गर्वितस्तथा ॥ तृषितश्चेति खेटानां षट्स्वभावाः प्रकीर्तिताः ॥ ३ ॥
च.–इति श्रीमिश्रनंदरामविरचिता शतश्लोकी संकेतचन्द्रिका सम्पूर्णा ॥

५८९ सज्जनवल्लभः-भानुपण्डितः ।

आ.–श्रीशं श्रीशिवमीश[मीश]तनयं विश्वस्तुतां भारतीं नत्वार्कप्रमुखांश्च खेचरवराञ्श्रीविश्वनाथं गुरुम् ॥
ज्योतिःशास्त्रमनेकसूरिरचितं भानुर्विलोक्यादराच्छास्त्रं सज्जनवल्लभं वितनुते श्रीविश्वनाथात्मजः ॥ १ ॥
च.–श्रीमान्धातृपुरं चकास्ति जगति श्रीगुर्जरे मंडले तस्मिन्वे[खे]टकविप्रमंडनमणिः कौडिन्यगोत्रो गुणी ॥
विद्वाञ्श्रीपतिभक्तिमान्समवसद्गंगाधरो याज्ञिको येनादायि मखे रसायुतयुतं लक्षं द्विजेभ्यो वसु ॥ २२ ॥
वंशे तस्य गुणान्वितो द्विजवरः सारंगपुत्रोऽभवद्धीमानाश्रितकेशवः श्रितवृषः श्रीविश्वनाथाभिधः ॥
सत्यानंदितसज्जनोऽन्नवसुगोवस्त्रैर्द्विजांस्तोषयन्सत्कीर्त्तिः कमलापतिर्विनयवान्गांभीर्यरत्नाकरः ॥ २३ ॥
यज्वा दानवराभिनंदितबुधः श्रीविश्वनाथाह्वयो यं पुत्रं कमलाभिधा च सुषुवे भानुं ततः श्रीशिवम् ॥
स श्रीविद्गुरुविश्वनाथचरणाब्जप्राप्तविद्याऽखिलः शास्त्रं सज्जनवल्लभं समतनोज्ज्योतिर्विदां तुष्टये ॥ २४ ॥
आदौ सत्तिथिजो विधिर्निगदितो वाराह्वयस्त्याज्यको भाख्यः संस्तितिजस्ततो व्रतविधिर्वैवाहिकोऽग्न्याहुतिः ॥
वेश्माह्वः शुभयात्रिको ग्रहवरः सांक्रांतिको लग्नजो देवस्थापनिको विधिर्ग्रहदशाख्योऽत्र प्रयुक्तो मया ॥ २५ ॥
इति श्रीभानुपंडितविरचिते सज्जनवल्लभे ग्रहदशांतर्दशाप्रकरणं समाप्तम् ॥

५९० सज्ज्ञातन्त्वं सटीकम् । मू०-नीलकण्ठः । टी०-विश्वनाथः ।

टी. आ.–चंडीकुं[कुं]डलमाकलय्य कुतुकाड्डाभशुंडाग्रगं कृत्वा तांडवडंबरे पशुपतेः खेलन्खलूच्छृङ्खलम् ॥
चंडांशोरिव मंडलं तदपरं संदर्शयन्नंबरे हेरंबो जगदंबिकां विहसयन्वः श्रेयसे गर्ज्जताम् ॥ १ ॥
दिवाकरो नाम बभूव विद्वान्दिवाकरोभो[राभो]गणितेषु नन्ये[नान्यः] ॥
स्वकल्पितैर्येन निबंधवृंदैर्बद्धं–जगद्दैतविश्वरूपम् ॥ २ ॥
तस्यात्मजाः पंच समा बभूवुः पंचेंद्रकल्पा गणितागमेषु ॥ पंचानना वादिगजेन्द्रभेधे पंचाग्निकल्पा द्विजकर्मणा च ॥ ३ ॥
अजनिष्ट कृष्णनामा ज्येष्ठस्तेषां कनिष्ठानाम् ॥ विद्यानवद्यवाचां प्राचीं[चां] वेत्ता जगद्व्याप्तः ॥ ४ ॥
तस्माज्जातः कनिष्ठो विबुधयु[बु]धगणश्रेष्ठतां प्राप जाग्रज्ज्योतिःशास्त्रेण शश्वत्प्रकटितविभवा यस्य शिष्याः प्रशिष्याः ॥
विष्णुर्ज्योतिर्विदुर्वीपतिविदितगुणो भूमिदेवाकरेंद्रो ग्रंथव्याख्यानखर्वीकृतत्रिबुधगुरुर्गर्वहा गर्वभाजाम् ॥ ५ ॥

आसीदासिंधुदासीकृतगणकगणग्रामणीगर्वभेत्ता वेत्ता ग्रंथांतराणामतिगुरुरनुजस्तस्य कस्याऽथ[प्य] जेयः ॥
मल्वा[ल्ला]रिर्वार्कवृंदप्रशमरविधये कोऽपि मल्लारिनामा व्यक्ताव्यक्तप्रवक्ता जगति विशदयन्सर्वसिद्धांतवेत्ता ॥ ६ ॥
तस्यानुजः केशवनामधेयो ज्योतिर्विदानंदसमुद्रचंद्रः ॥ वाणीप्रवीणान्वचनामृतेन संजीवयामास कलाविलासी ॥ ७ ॥
तस्यानुजः संप्रति विश्वनाथो विष्णुप्रसादाद्गुणमात्रजिष्णुः ॥ सर्वज्ञदैवज्ञविलासविज्ञो नृसिंहतः साधितसर्वविद्यः ॥ ८ ॥
आसीद्वेदांतवेदी स्मृतिनिगमपटुग्रामणीगर्वभेत्ता कर्त्ता ग्रंथांतराणां फणिपतिनिगमस्यापि वेत्ताधिकाशि ॥
वक्ता श्रीनीलकंठात्मजभजनपटुर्नीलकंठः स चक्रे संज्ञातंत्रं दुरूहं सकलशुभदशादुर्दशादर्शभूतम् ॥ ९ ॥
गोदातीरस्थगोलाभिधपुरवसतिः पार्थदेशैकभूषा संज्ञातंत्रस्य टीकां व्यदधदभिनवां गद्यपद्यानवद्याम् ॥
शश्वद्विश्वोपकृत्यै विशदतरतया दैवविद्विश्वनाथो ग्रंथोग्रग्रंथिभेत्ता ग्रहगणितविदामग्रगण्योप्यवर्गः[गर्वः] ॥ १० ॥
निर्विघ्नग्रन्थसमाप्त्यर्थं मङ्गलमाचरञ्चिकीर्षितं प्रतिजानीते ॥

मू. आ.—प्रणम्य हेरंबमथो दिवाकरं— — — — — — —

मू. च.—अथ स्ववर्णनमाह ।
पद्मांबयासावि ततो विपश्चिच्छ्रीनीलकण्ठः श्रुतिशास्त्रनिष्ठः ॥ विद्वच्छिवप्रीतिकरं व्यधात्तं संज्ञाविवेकं सहमाव्रतंसम् ॥
इति श्रीनीलकंठविरचिते संज्ञातंत्रे सहमाध्यायस्य व्याख्यातोदाहृतिः समाप्ता ॥

टी. च.—अकारि विश्वनाथेन संज्ञातंत्रप्रकाशिका ॥ टीका टीकाकृतं कुर्यात्सहमज्ञानबंधनम् ॥ १ ॥

५९१ सन्तानदीपिका ।

आ.—गुरुनाथं नमस्कृत्य गणनाथं प्रणम्य च ॥ वाग्देवींवंदनं कृत्वा स्मृत्वा तं कमलोद्भवम् ॥ १ ॥
शंकरं विष्णुमभ्यर्च्य संपूज्य च नवग्रहान् ॥ वासुदेवं गुरुं ध्यात्वा वक्ष्ये संतानदीपिकाम् ॥ २ ॥
वराहहोराना[आ] लोक्य तथा जातकपद्धतिम् ॥ सारावलीं ततो दृष्ट्वा पराशरमतं तथा ॥ ३ ॥
प्रश्नशास्त्राणि चान्यानि समालोक्य मुहुर्मुहुः ॥ ततस्तत्सारमुद्धृत्य वक्ष्ये संतानदीपिकाम् ॥ ४ ॥
अज्ञातमल्पबुद्धीनां हितार्थं वक्ष्यते मया ॥ संतानदीपिकाशास्त्रमुपदेशार्थदर्शनम् ॥ ५ ॥
नराणां चानपत्यत्वं दक्षपुत्रादिलक्षणम् ॥ पुत्रशोकमपुत्रत्वं बहुपुत्रत्वमुच्यते ॥ ६ ॥

च.—संतानदीपिकाशास्त्रं दशाधिकशतं च यत् ॥ हृद्यैः पद्यैश्च यत्प्रोक्तं तज्जनैः परिगृह्यताम् ॥ १११ ॥
इति संतानदीपिका संपूर्णा ॥ संवत् १८०६ ॥

५९२ सम्राट्सिद्धान्तः-जगन्नाथः ।

आ.—गजाननं गणाधिपं सुरासुरार्चितं सदा समस्तभक्तकामदं शिवासुतं सुखप्रदम् ॥
वितंडचंडयोगिनीसमाजमध्यवर्त्तिनं प्रशस्तभूतिभूषितं नमामि विघ्नवारणम् ॥ १ ॥
लक्ष्मीनृसिंहचरणाम्बुरुहं सुरेशैर्वन्द्यं समस्तजनसेवितरेणुगन्धम् ॥
वाग्देवतां निखिलमोहतमोपहंत्रीं वंदे गुरुं गणितशास्त्रविशारदं तम् ॥ २ ॥

श्रीगोविंदसमाह्वयादिविबुधान्वृन्दाटवीनिर्गतान्यस्तत्रैव निराकुलं शुचिमनोभाव: स्वशक्त्याऽनयत् ॥
म्लेच्छान्मानसमुन्नतान्स्वतरसा निर्जित्य भूमंडले जीयाच्छ्रीजयसिंहदेवनृपति: श्रीराजराजेश्वर: ॥ ३ ॥
करं जनार्द्दनं नाम दूरीकृत्य स्वतेजसा ॥ भ्राजते दु:सहोऽरीणां यथा ग्रैष्मो दिवाकर: ॥ ४ ॥
राजाधिराजो जयसिंहदेवो यो मत्स्यदेशाधिपतिश्च सम्राट् ॥
श्रीरामपादाम्बुजसक्तचित्तो यज्वा सदा दानरत: सुशील: ॥ ५ ॥
गोलादियंत्रेषु नवीनयुक्तिप्रचारदक्षो गणितागमज्ञ: ॥ सत्यप्रिय: सत्यरत: कृपालुस्तिग्मप्रतापो जयति क्षमायाम् ॥६॥
येनेष्टं वाजपेयाद्यैर्महादानानि षोडश ॥ दत्तानि द्विजवर्येभ्यो गोग्रामद्विपवाजिन: ॥ ७ ॥
स धर्मपालो गणितप्रवीणाञ्ज्योतिर्विदो गोलविचारदक्षान् ॥
कारुंस्तथाहूय चकार वेधं गोलादियंत्रैर्द्युसदां च भानाम् ॥ ८ ॥
तेन श्रीजयसिंहेन प्रार्थित: शास्त्रसंविदा ॥ करोति श्रीजगन्नाथ: सम्राट्सिद्धान्तमुत्तमम् ॥ ९ ॥
च.–अध्यायत्रयमेकोनषष्टि ५९ क्षेत्राणि संति ॥ इति० ॥

५९३ सर्वतोभद्रम् ।

आ.–अथात: सम्प्रवक्ष्यामि चक्रं त्रैलोक्यदीपकम् ॥ विख्यातं सर्वतोभद्रं सद्य: प्रत्ययकारकम् ॥ १ ॥
च.–दीपो यथा गृहस्यांते उद्योतयति सर्वत: ॥ तथैवं सर्वतोभद्रं सत्यं सत्यं वदाम्यहम् ॥ १ ॥
व्यवहारराजसेवार्थं संग्रामग्रामधाममंदिरेषु ॥ ज्ञातेऽपि च जन्मराशौ फलमुन्नेयं नामराशिवत ॥
इति सर्वतोभद्रम ॥

५९४ सिद्धान्ततत्त्वम्-त्रिविक्रमाचार्यः ।

आ.–य: स्रष्टा सचराचरस्य जगतो भूयोऽपि गोपायिता संहर्त्ता च गुणत्रयेण तनुते मूर्त्तित्रयं सर्वदा ॥
तं केशाख्यमजं पुराणममरं सम्यक्प्रणम्याधुना वक्ष्ये शिष्यसुखावबोधकरणं सिद्धान्ततत्त्वं स्फुटम् ॥ १ ॥
च.–शांडिल्यासितदेवलप्रवरके वंशे महादेव इत्यासीत्सद्गणको गुणैकनिलयो विप्र: प्रतिष्ठानके ॥
वृत्तैस्तत्तनयस्त्रिविक्रम इदं संक्षिप्य शास्त्रार्णवं चक्रे सज्जनतोषकारि करणं सिद्धांततत्त्वं स्फुटम् ॥ ४३ ॥
अविज्ञाय शास्त्रं गतिं यो ग्रहाणामिमां वक्ति सांवत्सरस्तच्च[स्य] भावात्[न्] ॥
स वक्षस्यचंद्रक्षपायां घनर्तौ व्यतीतं चिरं कैर्भुजंगप्रयातम् ॥ ४४ ॥
इति श्रीत्रिविक्रमाचार्यविरचिते सिद्धान्ततत्त्वे ब्रह्मगुप्तसिद्धान्तसंमते चित्रकाध्याय: ॥ ११ ॥ समाप्तोऽयं ग्रंथ: ॥

५९५ सिद्धान्ततत्त्वविवेक:-कमलाकर: ।

आ.–ब्रह्माण्डोदरसंस्थितावनिजलान्यूर्ध्वेन्दुपूर्वग्रहर्क्षोर्ध्वस्थप्रवहांतगोलरचनासृष्टिर्यथावस्थिता ॥
कालेऽस्मिन्गहनेऽव्ययेस्ति सततं यस्मादियं तज्जपरयाद्यं निर्गुणमीशमव्ययपरं ब्रह्मैकतत्त्वं शुभम् १ ॥
यदुत्पत्तिलयौ साम्यौ सृष्टिर्यस्माच्च देहिनाम् ॥ ब्रह्मादीनां विभु: सोऽयं व्यक्तोभूत: सनातन: ॥ २ ॥

ब्रह्माण्डांतस्तमोहंता भगवांस्तेजसां निधिः ॥ नाम्नानिरुद्धः कालात्मा सूर्योऽयं सवितेति च ॥ ३ ॥
मण्डलांतरगोऽजस्रं भुवनानि परिभ्रमन् ॥ जलगोलग्रहर्क्षाणां भास्करः सर्वगोऽव्ययः ॥ ४ ॥
शास्त्रप्रवर्त्तको ध्येयस्तत्त्वज्ञैः कालबोधकृत् ॥ त्रयीमयः सर्ववंद्यो जयत्येकोंऽबरस्थितः ॥ ५ ॥
केचित्प्रत्यक्षसूर्याच्च भिन्नोऽयमिति यद्बलात् ॥ वदन्तीहार्थवादस्याप्रामाण्यात्तदसद्ध्रुवम् ॥ ६ ॥
यच्छास्त्रब[वृ]द्धा नयनानुसारं ब्रह्मेन्दुपूर्वा ऋषयोऽपि चक्रुः ॥
स्वं स्वं च सिद्धान्तमनल्पकार्यं गूढं सतां गोलविदां सुबोधम् ॥ ७ ॥
अस्ति चाधमपरंपरयाज्ञैर्नाशितं सदपि सौरमतं तत् ॥ तत्कृतेरनवबोधत एवेत्थं किलोह्यमधुनातनवर्यैः ॥ ८ ॥
सा[स्या]द्गोलवासनाबाह्यैः करणग्रंथयुक्तितः ॥ सुस्थूलव्यवहारार्थस्वाचार्यत्वप्रसिद्धये ॥ ९ ॥
वस्तुतस्तमबुध्वैव स्वार्षैः साकं विरोधतः ॥ बहुभिर्बहुधा पूर्वं सिद्धांताः स्वधिया कृताः ॥ १० ॥
अतः सांवत्सराचार्यं गुरुं श्रीमद्दिवाकरम् ॥ नत्वा नृसिंहजोऽर्कस्य मताच्छ्रीकमलाकरः ॥ ११ ॥
कृती तत्त्वविवेकाख्यं पूर्वास्प[स्पृ]ष्टं सवासनम् ॥ सिद्धान्तं गोलवित्तुष्ट्यै करोति स्वधियोत्तमम् ॥ १२ ॥
ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा ॥ सौरं च सावनं चांद्रमार्क्षं मानानि वै नव ॥ १३ ॥

च.—ये पाठयंति च पठंति लिखंति चैनं सार्थं सवासनमलं निखिलं समीक्ष्य ॥
तेषां यशोविनयगौरवनैपुणानि प्रत्नेंदिरादिसहितानि भजंति वृद्धिम् ॥ २८ ॥
इति श्रीसकलगणकसार्वभौमश्रीविद्वन्नृसिंहात्मजश्रीमद्दैवज्ञकमलाकरविरचितः सिद्धांततत्त्वविवेकः संपूर्णः ॥संवत् १९०२॥
अधिकमासज्ञानम्
नागद्वयंकै९२८र्वियुक्शाको भक्तोंकाब्जै१९र्नभो हयः ७ ॥
भूपे१६षु५विश्वा१३क्षि२दिशो १० शेषे मासोऽधिको मधोः ॥ १ ॥
अन्यदपि ॥
शाके बाणशरांककै९५५र्विरहिते नंदेंदुभिर्भाजिते शेषोऽग्नौ ३ तु मधुः शिवे ११ तदपरो ज्येष्ठोंऽबरे चाष्टके ८ ॥
आषाढो नृपतौ १६ नभश्च शरके ५ विश्वे १३ नभस्यस्तथा बाहौ २ चाश्विनसंज्ञको मुनिवरैर्मासोऽधिकः कथ्यते ॥२॥
अथ मस्तकभाद्रात्रिज्ञानम् ॥

श० ध० पू० उ० रे० अ०
तारा यवानीर शिखा खरूपगं भवांगनाकावकरीव केशवाम् ॥

कृ० रो० आ० पु० पु० अ०
कोपामरागेश पुनातुते कचं गोनासि मारोसि गवासिलेर्किजम् ॥ १ ॥

पू० उ० ह० चि० स्वा० वि० अ० ज्ये०
तैलाजमीमाज विरोधि मागधी शूरान्य वावन्य विनाप्पसूययुक् ॥

मू० पू० उ०
सालोक्य वै कार्य विगोर्यते क्रमात्पदार्थनाडी भगणादिवैष्णवात् ॥ २ ॥
काद्ये नवांकानवरादयश्च याद्याः शरांका वसुयादयश्च ॥
इत्यधिमासज्ञानं लग्नज्ञानं च नक्षत्रतः समाप्तम् ॥

५१६ सिद्धान्तराजः-नित्यानन्दः ।

आ.–नित्यानंदं नित्यमव्यक्तमीशं सच्चिद्रूपं निर्गुणं निर्विकारम् ॥
एकं व्यापि ब्रह्मवेदान्तवेद्यं यत्तं वन्दे विश्वरूपं मुकुंदम् ॥ १ ॥
श्रीसूर्यसोमपरमेष्ठिवशिष्ठगर्गाचार्यात्रिरोमकपुलस्त्यपराशराद्यैः ॥
तंत्राणि यानि गदितानि जयन्ति तानि स्फूर्जद्द्विधागणितगोलपरिस्फुटानि ॥ २ ॥
मयार्य्यभटजिष्णुजाः खचरवध[र्ध]ने वेधसो वराहमिहरादयो यदनुसारमात्रं ययुः ॥
द्विधा गणितचातुरी निखिलगोलनैपुण्ययोर्विभुर्जयति भास्करो गणकचक्रचूडामणिः ॥ ३ ॥
सिद्धान्तेषु विनिर्मितेषु दिनकरसोमादिभिर्दैवतैः पाटीकुट्टकबीजगोलरचनासद्युक्तियुक्तेष्वपि ॥
अन्यैः क्वापि चिरान्नरैर्निजधिया यल्लिप्तमूहं विना तस्यालोकनकौतुकाय भवति प्रायो मदीयोद्यमः ॥ ४ ॥
लघूपकरणेन चेद्भवति कुत्रचित्स्थूलता हितालसयु[जु]षां नृणां त्वरितकार्यसंसिद्धये ॥
किमर्थमसकृत्फलैर्मृदुचलैरमी सत्कृताः कृपालुहृदयैः पुरा मुनिवरैर्ग्रहाः प्रस्फुटाः ॥ ५ ॥
श्रौतस्मार्त्तविधौ पुरा मुनिवरैर्यः काल उक्तः स्फुटः सोऽद्याज्ञानविलुप्तवास्तवफलैरन्यैर्गृहीतोऽन्यथा ॥
प्रायेणांधपरंपरेव पतिता दुर्लक्ष्यकूपे च ये तेषां सत्पथदर्शनाय सुहृदां ज्ञानांजनं निर्ममे ॥ ६ ॥
तस्मात्कैश्चित्प्रमेयैर्विमलबहुधियामेव विज्ञानवेद्यैर्वक्ष्ये सिद्धांतराजं नवनवरचनं दोषकुद्दालरूपम् ॥
सम्यग्विज्ञाय विज्ञा गुणमगुणमिह प्रस्फुटं प्रस्तुवन्तु प्रायो वा दूषयन्तु क्वचिदपि न भयं केवलं मौढ्यतो भीः ॥ ७ ॥
सर्वागमेषु निपुणा गुणिपक्षपाताः स्वीकुर्वते यदि मदीयकृतिं स्वरुच्या ॥
किं तैस्तदा कुमतिभिः कुवचोभिरन्यैः सूर्योदयेऽबुजमुदे न घनोऽतरायः ॥ ८ ॥
इहानेकैश्चक्रे स्वकृतिरकृतार्थेव कृतिभिः पुरा पारंपर्यादनवरचनैश्चारुवचनैः ॥
ममापि ग्रंथोऽयं नवनवसुयुक्त्युक्तिसहितो विलोक्यो धीमद्भिः कुतुकमिव सिद्धान्तकुशलैः ॥ ९ ॥
सिद्धांत इत्यनुगतार्थपदप्रयोगाद्यद्वस्तु सूक्ष्मतरमत्र तदेव सिद्धम् ॥
नान्यच्च गोलगणितद्वययुक्तिहीनं किं वोपलब्धिरहितं सुधियेति चिंत्यम् ॥ १० ॥
अत्यन्तसूक्ष्मतरमूहविदामपीष्टं ब्रह्मापि यन्न खलु साधयितुं समर्थः ॥
आसन्नतां तदपि किंचिदिहानयामि स्थूलं न केवलमलंकुरुतां कृतिर्मे ॥ ११ ॥
लघ्वी क्रिया भवतु क्वापि महत्तरा वा का नः क्षतिर्विविधचारुविचारभाजाम् ॥
युद्धे पदातिगु[ग]ण एव नियोजितश्चेत्किं नाद्रियेत गजवाजिरथादिरूढैः ॥ १२ ॥
ततोऽल्पया प्रक्रियया महत्या किं वा यथार्थं वितनोमि वस्तु ॥
सूक्ष्मप्रकारं बहुयुक्तियुक्तं दृष्टिप्रतीतं खलु वासनाढ्यम् ॥ १३ ॥
दृष्ट्वा रोमकसिद्धं सौरं च ब्रह्मगुप्तकम् ॥ पृथक्स्पष्टान्ग्रहान्ज्ञात्वा सिद्धांतं निर्ममे स्फुटम् ॥ १४ ॥
रोमकोदितखचारिचातुरी दृक्तुलां व्रजति सर्वथा सदा ॥ सौरतंत्रमिह वेदवद्विदुर्जिष्णुजोक्तमपि युक्तयुक्तियुक् ॥ १५ ॥
अथ कः किल रोमकोऽभवन्मुनिदेवादिषु गण्यते तु यः ॥ कथयामि तदीयमुत्तरं शृणु सूर्य्यारुणपूर्वसंमतम् ॥ १६ ॥
इतिहासकथाप्रसंगतो विदितो भास्कर एव रोमकः ॥ पुरुहूतविरंचिशापतो यवनो रोमकपत्तनेऽभवत् ॥ १७ ॥

पुनरेव तयोरनुग्रहाच्च्युतशापः सविता स्वयं पुरा ॥ कृतवानिह तन्त्रमुत्तमं श्रुतिरूपं किल रोमकच्छलात् ॥ १८ ॥
अथ तेन निजप्रसादतो हृदि मे तत्सकलं प्रकाशितम् ॥ न मयाधुनिकोदितं पुनर्गणितं स्वीकृतमत्र केवलम् ॥१९॥
च.—चावकस्य किल वेधविधानं सर्वलोकविदितं बहुधात्र ॥ तेन विस्तरमपास्य यदुक्तं तत्स्वबुद्धिवस[श]तः प्रथयन्तु ॥४७॥
इत्येतस्यामिन्द्रपुर्यां वसन्सन्नित्यानंदो देवदत्तस्य पुत्रः ॥
सारोद्धारे सर्वसिद्धांतराजे यंत्राध्यायं प्रापयंस्त[य त्त]त्र पूर्त्तिम् ॥ ४८ ॥
श्रुतिस्मृतिव्याकरणप्रवीणैर्विशिष्टशिष्टाचरणैकदक्षैः ॥ श्रीमत्कुरुक्षेत्रसमीपसंस्थद्विजोत्तमैरिंद्रपुरी विभाति ॥ १ ॥
तस्यां वसन्गौडकुलप्रसूतोनुशासनेनापि डुलीनहट्टः ॥ इच्छाभिधो मुद्गलगोत्रजन्मा बभूव पूर्वं स तथा मनीषी ॥ २ ॥
तस्यात्मजः श्रौतविधिप्रयुक्तो वेदांतशास्त्रादिकपारगामी ॥
तपोधनो ज्यौतिषशास्त्रदक्षो विचक्षणो लक्ष्मणसंज्ञकोऽभूत् ॥ ३ ॥
तदीयपुत्रस्तपसा वरिष्ठः सदा गरिष्ठो द्विजमण्डलीषु ॥ सदा सदाचारयुतो मनीषी नारायणो धर्म्मपरायणोऽभूत् ॥४॥
तस्यात्मजो ज्यौतिषशास्त्रदक्षो विद्याविनोदेषु विलग्नचेताः ॥ जितेंद्रियः सत्यतपःसमेतः श्रीदेवदत्तोखिल नरेन्दमान्यः ॥५॥
नित्यानंदस्तस्य पुत्रो द्विजानामाज्ञाकारी सूर्यलब्धप्रसादः ॥ षड्गोभूपैर्विक्रमार्कस्य शाके याते चक्रे सर्वसिद्धांतराजम् ॥६॥

५९७ सिद्धान्तशिरोमणिगोलाध्यायस्य वासनावार्त्तिकम्-नृसिंहः ।

आ.—विश्वेश्वरं नमस्कृत्य मल्लारिं च गजाननम् ॥ भास्करीयस्य गोलस्य वार्त्तिकं क्रियतेऽधुना ॥ १ ॥
कविज्ञमार्गादुपरि स्फुरंतं समं व्रजंतं कविना बुधेन ॥ अधस्थितिं चाप्यवलंबमानमुच्चं गुरोर्भास्करमानतोऽस्मि ॥ २ ॥
च.—श्रीमत्कौंकणवासिकेशवसुतप्राप्तावबोधाद्बुधाद्भट्टाचार्यसुताद्दिवाकर इति ख्याताज्जनिं प्राप्तवान् ॥
यः कृष्णस्तनयेन तस्य रचिते सद्वासनावार्त्तिके सत्सिद्धांतशिरोमणेः सुविषमा ज्योत्पतिरेषागमत् ॥
इति श्रीसकलगणकचक्रचूडामणिकृष्णदैवज्ञसुतनृसिंहगणकविरचते सिद्धांतशिरोमणिवासनावार्तिके ज्योत्पतिः ॥
बुद्धेर्विवृद्ध्यै गणितप्रबंधविचारसारामृतमावहंती ॥ सद्वासनावासितमानसानां मदुक्तिरेषा मुदमादधातु ॥ १ ॥
गुणवेदशरेंदु१५४३संमिते शककाले नगरे पुरेशितुः ॥ वसता वरणासिमध्यगे नरसिंहेन विनिर्मितं त्विदम् ॥ २ ॥
निजतत्त्वमिते वर्षे सौरभाष्यं मया कृतम् ॥ पंचत्रिंशन्मिते वर्षे वासनावार्त्तिकं कृतम् ॥ ३ ॥
नवीनयुक्तिप्रतिपादनेन पूर्वोक्ततंत्रादपसद्विशेषम् ॥ नरप्रणीतान्नहरिप्रणीतं स्वीकार्यमार्यैः स्वधिया विचार्य ॥ ४ ॥
गोदावरीसौम्यतटोपकंठग्रामे च गोलाभिधया प्रसिद्धे ॥ विप्रो महाराष्ट्रसुगीतकीर्तिर्बभूव रामो गणकार्यवंद्यः ॥ ५ ॥
अग्रणीस्तैत्तिरीयाणां भट्टाचार्यस्तु तत्सुतः ॥ आसीन्मीमांसकश्रेष्ठः कुमारिल इवापरः ॥ ६ ॥
गोत्रे भरद्वाजमुनेः पवित्रे दिवाकरस्तत्तनयो बभूव ॥ वेदांतशास्त्राभ्यसनेन काश्यां यः पुण्यराश्यां तनुमुत्ससर्ज ॥ ७ ॥
सांवत्सरार्यस्य दिवाकरस्य श्रीकृष्णदैवज्ञ इति प्रसिद्धः ॥ बभूव पुत्रः सुतरां पवित्रः सत्तीर्थकर्त्ताखिलशास्त्रवेत्ता ॥ ८ ॥
तज्जस्तु तस्यैव कृपालवेन तातानुजावाप्तसमस्तविद्यः ॥ सद्वासनावार्तिकनामधेयं ग्रंथं नृसिंहो रचयांबभूव ॥ ९ ॥
न या वराहेण च जिष्णुजेन पृथूदकेनार्यभटेन जुष्टाः ॥ असंस्तुता भास्करदर्शनेन ता वासना वार्त्तिक एव लभ्याः ॥ १० ॥
मदुक्तिसाधूक्तिजलांजलीभिः संदेहमंदेहवधं विधाय ॥ बुध— —भास्करदर्शनोत्थामास्वादयंतोभिमतानि कुर्युः ॥ ११ ॥
इति गणकचक्रचूडामणिनृसिंहकृते सिद्धांतशिरोमणिवासनावार्त्तिके ग्रंथसमाप्त्यलंकारः ॥

५९८ सिद्धान्तशिरोमणिटीका गणितार्थतत्त्वचिन्तामणिः-लक्ष्मीदासः ।

आ.–सिद्धांतोक्तप्रगुणगणितज्ञानगोष्ठयां सनिः स्या[मतिश्चे] द्वोले छेदेप्यमलविपुलोल्लासभृद्वासनायाम् ॥
तेषां चित्ते निवसतिमियाद्युक्तियुक्ता स[म]मैषा व्याख्या विद्याभिरतिनिरतस्याच्युतार्चापरस्य ॥ १ ॥
शिष्टा अभीष्टग्रंथारंभे प्रत्यूहनिराकरणकारणमिष्टदेवतानमस्कारं संबंधाभिधेयप्रयोजनानि च प्रतिबध्नंति तदपि भास्कराचार्यः सिद्धांतशिरोमणिं चिकीर्षुर्निजेष्टसूर्यं मनोवाक्कायैर्नमस्कृत्य तस्मादेवाभीष्टार्थस्याशंसनं प्रतिजानीते। यत्र त्रानुं– –
च.–सिद्धांतोक्तप्रगुणगणितज्ञानगोष्ठयां मतिश्चेद्वोले छेदेप्यमलविपुलोल्लासभृद्वासनायाम् ॥
तेषां चित्ते निवसतिमियाद्युक्तियुक्ता ममैषा व्याख्याविद्याभिरतिनिरतस्याच्युतार्चापरस्य ॥
इति श्रीमद्वाचस्पतिमिश्रसूनुलक्ष्मीदासविरचिते सिद्धांतशिरोमणिव्याख्याने गणितार्थतत्त्वचिंतामण्याख्ये ज्योत्पत्तिःसंपूर्णा

५९९ सिद्धान्तशिरोमणिटीका मरीचिः-विश्वरूपः ।

आ.–प्रातर्बोधितपद्मपत्रविकसन्नेत्रो नवीनांबुदश्यामः पीतदुकूलशोभिततनुः श्रीवत्समुद्रान्वितः ॥
वंशीवादनतत्परो रविसुतातीरोपगो नैचकी गोपीभिः परिवेष्टितो मम मनस्यास्तां रमावल्लभः ॥ १ ॥
यः पूरयन्ननुदिनं प्रणतस्य कामान्स्वांतस्थितान्सकलविघ्नचयं तिरस्य ॥
सिंदूरपूरपरिपूरितकुंभयुग्मो भूयान्मुदे गणपतिर्गजराजवक्त्रः ॥ २ ॥
या भारती सर्वबुधावलीनां मुखाब्जरंगे नटनं करोति ॥ सा मे मुखे वास्तुविधिं करोतु वस्तुं सदालंकृतिभूषितांगी ॥३॥
यो बोधयत्यनुदिनं विबुधारविंदं तत्पूर्वपक्षरजनीतिमिरं निरस्य ॥
ज्योतिर्विभावनविधेस्तु निदानभूतं श्रीमद्वराहमिहिरं मिहिरं च वन्दे ॥ ४ ॥
येनाधायि कुतूहलादतितमां पारेसुधांभोनिधि प्रौढाहंकृतिवादिवारणगणन्यक्कारट[ढ]क्कारवम् ॥
ज्योतिःशास्त्रदुरंतकाननमहासंचारपंचाननं तं चातुर्यकलाकलापकुशलं श्रीभास्करं भावये ॥ ५ ॥
गौरीभर्तुर्भजनकलया नीतकालः पितृव्यः श्रीमद्रामो निखिलविषये लब्धबुद्धिप्रकाशः ॥
ज्योतिस्तर्कानलकवलने मूलभूतश्चकोरः कृष्णः[ष्ण]भ्राता जयति नितरां मद्गुरुर्वर्यवर्यः ॥ ६ ॥
सिद्धांतांबुजबोधनैकमिहरस्त्रिस्कंधपारंगमो न्याये नीतमतिः कविस्वकरणे साक्षात्पुराणो मुनिः ॥
आम्नायप्रतिपादितार्थघटनाविख्यातसारस्वती विष्णुः कृष्णगुरुर्जयत्यतितरां श्रीमद्गुणेशायुधीः [मद्गणेशात्तधीः] ॥ ७ ॥
यः श्रीकृष्णपदांबुजाहितमतिः सिद्धांतवारांनिधेः पोतः श्रीजहगीरभूमितिलकस्यानन्यविश्वासभूः ॥
षट्शास्त्रेषु कृतश्रमोखिलगुरुर्मान्यो वदान्यो विदां श्रीकृष्णः किमु वर्णनीयविभवः श्रीकृष्ण एवापरः ॥ ८ ॥
श्रीरंगनाथाभिधतातपादाः कृष्णानुजाः श्रीकमलाधिपास्ते ॥ त्रिस्कंधपारंगमरंगमल्ला बल्लालजा भूमितले जयंति ॥९॥
नारायणो गणितशास्त्रकलाकलापः श्रीसेवितः सकलशास्त्रसरोजभृंगः ॥
दैवज्ञकृष्णगुरुपादरतो गुरुर्मे क्ष्मायां जयत्यखिलपंडितवंद्यपादः ॥ १० ॥
मुनीश्वरापराख्येन विश्वरूपेण घृष्यते ॥ मरीच्यर्थं बुद्धिशाणे सत्सिद्धांतशिरोमणिम्[णिः] ॥ ११ ॥
अत्रोपपत्तिविषये तु मया यदुक्तं तत्सर्वमेव परिभावितमस्ति मन्ये ॥
मान्यान्प्रणम्य विहितांजलिरेप याचे सद्भिस्तथापि परिभाव्य विशोधनीयम् ॥ १२ ॥

ग्रंथारंभे विशिष्टशिष्टाचारानुमितश्रुतिबोधितनिर्विघ्नप्रारिप्सितसमाप्तिकारणं मंगलमाशीरूपं च शिष्यशिक्षायै निबध्नाति यत्र त्रातुमिदं – – –

च.–दैवज्ञवर्यगणसंततसेव्यपार्थ[र्श्वे]श्रीरंगनाथगणकात्मजनिर्मितेऽस्मिन् ॥
मध्यः शिरोमणिमरीच्यभिधे समाप्तिं यातोऽधिकार इति खेचरनिर्णयोऽयम् ॥ १ ॥
इति श्रीसकलगणकसार्वभौमश्रीबल्लालदैवज्ञसूनुरंगनाथगणकात्मजमुनीश्वरापरनामकविश्वरूपनिर्मितसिद्धांतशिरोमणि-मरीचौ मध्यमाधिकारः संपूर्णः ॥

६०० सिद्धान्तसिन्धुः-नित्यानन्दः ।

आ.–सिद्धं साध्यमिदं विधेरपि जगद्यच्चेतसि ध्यायतो यत्स्मृत्वैव पुरा पुराणपुरुषोऽपीच्छावतारान्दधौ ॥
यज्ज्योतिः परमं निधाय हृदये तेपे तये[पो]पीश्वरस्तस्मै मंगलमूर्त्तये त्रिविबुधाराध्यैक तुभ्यं नमः ॥ १ ॥
वेदाज्ञापरिपालनाय जगतो निःशृंखलस्य स्थितौ यश्चक्रे श्रुतिसम्मतार्थकलना नाना पुराणस्मृतीः ॥
आचारव्यवहारमस्य कृपया सत्यं परं दर्शयन्संसारार्णवतारणौ[णो]विजयते सोऽयं मुनीनां गणः ॥ २ ॥
यस्योपदेशवचनौषधभक्तिपथ्यप्रायोनिसे[षे]वन[ण]निरस्तसमस्तमोहः ॥
विद्वत्सभामुपविविक्षुरिवास्मि तस्मै विज्ञानकल्पतरवे गुरवे नमोऽस्तु ॥ ३ ॥
जंबूद्वीपांतरालावनिकमलदृशो याखि कर्णस्य भूषा वर्षेस्मिन्भारताख्ये जनपदनगरीनागरीमौलिमाला ॥
यस्याश्चाग्रे समग्रा विबुधवसतयः किं पुनर्यक्षपुर्यः सेयं ढिल्लीमतल्ली वरधरणिभुजां राजते राजधानी ॥ ४ ॥
आसीत्तैमूरनामा चतुरदधिधराधीश्वरो यश्च गंता मीरासाहाभिधानस्तदनु सुतनयस्तस्य राजाधिराजः ॥
तद्राः[ज्जः] सुल्लामहंमक्षितिपतितिलकोस्यात्मजो बूसयीदो भूभृन्नक्षत्रचंद्रो रिपुकुलदलनोद्दामधामैकमल्लः ॥ ५ ॥
तदनु तत्तनयोऽतिपराक्रमः सकलराजगजोद्धतकेशरी ॥ उमरशेष[ख] इति प्रथितो नृपः समभवन्नृपवंशविभूषणम् ॥ ६ ॥
यवनवरचगंतानामवत्ता समेहस्तिमुरनृपतिवंशे स्यौतकर्णावतंसः ॥
निखिलधरणिचक्रे चक्रवर्त्यस्य सूनुः क्षपितरिपुगणोऽसौ बाबरोस्यावरोऽभूत् ॥ ७ ॥
तदीयतनयो नयोवितत[नयान्वित]पदे पदं प्रक्षिपन्प्रतापतपनातपैररिकुलं परं तापयन् ॥
विचारचतुरः स्वयं गणकचक्रशक्रो यतो रराज हिमदीधितिच्छवियशा हुमाऊनृपः ॥ ८ ॥
तत्सूनुर्द्धर्म्ममूर्तिः सकलगुणनिधिः ख्यातकीर्तिप्रतापः शत्रूनुत्कृत्य सर्वान्निखिलवसुमतीमंडलाखंडलोऽभूत् ॥
गंगापानीयसिक्तप्रतिविथसलसत्[पथविलसत्]सत्यसंतानवल्लिश्चक्रे सप्तांगराज्यं नृपतिरकबरः शाहजल्लालदीनः ॥ ९ ॥
येन स्वल्पप्रसादादपि तृणलम[घ]वो निर्मिता मेरुतुल्या यद्दंडत्रासतो न प्रबलतनुरपि स्वल्पसत्थ[त्त्वं]श्व[ब]बाधे ॥
यश्चातुर्वर्ण्यधर्म्माचरणदमना रक्षको गोहिना[द्विजा]नां सोयं रेजे पृथिव्यामकबरतनरा[यः]श्रीजहांगीरभूपः ॥ १० ॥
तत्पुत्रः प्रबलप्रचंडविलसद्दोर्दंडखंडीकृतारातिव्रातधृतातिनिर्मलयशःप्रक्षालितक्ष्मांबरः ॥
प्रत्यक्षप्रतपत्प्रतापतपनध्वस्तांधकारव्रजः श्रीमान्साहजहां समस्तजगतीराजाधिपो राजते ॥ ११ ॥
द्वेष्येऽभीष्टे भवति समता न्यायमार्गेण यस्य प्रायो नीत्या पशुमृगखगा सर्वे– – – – – ॥
जानोति त्वा[किंवा]सकलकमलां षड्गुणैर्भूपतीनां सद्यो जेतुं मनसि यतता शक्तिभिर्लोकपालान् ॥ १२ ॥

साम्ना साधून्वशयति तथा दुर्गातान्द्रव्यदानैर्भेदैरन्यान्नयति वशतां भेदसाध्यान्नृपालान् ॥
दंडैर्दंड्यान्विपथपथिकान्दंडयत्येव योऽसौ सर्वोपायप्रखरचतुरो राजते राजराजः ॥ १३ ॥
नीर्गर्वीक्ष[निर्गर्वीकृ]तसर्वहाटकगिरिश्रीश्रीदरत्नाकरः कोशो यस्य पुनः स्वयं सुरतरुः स्वामीव शं[सं]शोभते ॥
यस्यामात्यगणो बृहस्पतिसमो देशोखिला मेदिनी दुर्गो व्यूहपरिस्थितिर्बलमितिस्त्वक्षौहिणीकोटयः ॥ १४ ॥
गर्ज्जत्कुंजरपुंजकुंजनिलयो विंध्याचलोंऽगीकृतो येनास्यैव च पारसीकविषया दत्तोपहाराः सदा ॥
प्रायो भानुशशांकयोरपि रथौ यस्यालये तिष्ठतो यस्याग्रेसरवच्चलंति पदगाः सर्वे नृपालाः पुरः ॥ १५ ॥
मित्रं यस्य समस्तकामफलदो विश्वंभरो वर्तते राज्यांगानि शदेति पूर्णं क्षपया [सदातिपूर्णकृपया] सदैव संपूरयन्
यश्चोत्पाट्य महीरुहानिव परान्भूयः समारोपयंस्तत्रैव स्थितये नृपानिति क्ष[कृ]ती भूमंडलं रक्षति ॥ १६ ॥
यो दृप्यद्वरवाहिनीपतिरपि प्रायात्स्वतो वीर्यवान्योपीन्दूदयवर्द्धमानमहसा वेलां निजां नोज्झति ॥
दुष्प्रापोपि च मत्स्यकच्छपगणो यो रत्नदाता सतां स श्रीशाहजहा समुद्रवदसौ ववर्त्ति दिल्लीपतिः ॥ १७ ॥
आक्रम्य क्षितिमंडलं क्षितिभृतां चूडामणीयं स्या[णियैः स]तां जंबूद्वीपविभूषणं कनकवान्प्रत्यक्षतेजोनिधिः ॥
पं[यं]चामित्यवशंति सर्वविबुधा गंधर्वविद्याधराः स श्रीशाहजहाँ नृपो विजयते दिल्लीश्वरो मेरुवत् ॥ १८ ॥
हस्तन्यस्तैककुंतारणिमथनभवो दीप्तसप्रतापज्वालाजिह्वाकरालज्वलनपरिपतद्वैरिदृप्यत्पतङ्गः ॥
रिंगद्गंगातरङ्गोच्छलदमलजलस्वःसरित्कीर्तियुक्तो योसौ शाहिजहार्यो जयति च जगतीमंडलाखंडलः सः ॥ १९ ॥
यस्य प्रस्थानवेलाहयखुरगलितोद्धूतधूलिप्रपूरैर्बद्धे सेतौ समुद्रे समलयवलये सेनया पूर्यमाणे ॥
लंकेशः शंकितोभूदिति रघुतिलको भूय एवावतीर्णः स श्रीशाहेजहार्यो जगति विजयते द्वीपदीप्यत्प्रतापः ॥ २० ॥
तस्यामात्यगणेषु भेषु विधुवद्वृक्षेषु कल्पद्रुवत्पृथ्वीभृत्सु सुमेरुवद्ग्रहचये ध्वांतक्ष—द्विवत् ॥
यो यक्षेषु कुबेरवत्सुरगणे देवेंद्रवद्धारयसौ मंत्री वासफखाँ बृहस्पतिसमो ववर्ति सर्वोपरि ॥ २१ ॥
तेजोभिर्द्युतिमान्विशुद्धमतिमद्भावात्कलानां निधिर्दष्या[श्वा] मंगलमूर्तिरेव विबुधैर्बुद्ध्या बुधो बुध्यते ॥
ज्ञाचिद्ये[साचिव्ये]न गुरुः कविः सुवचनैर्भेदोऽपकारे सतां सोयं वासफखाँ विभाति भुवने सर्वग्रहात्मा कृती ॥ २२ ॥
यो राज्याह्वयमंडपस्य सुदृढः स्तंभः स्थितो निश्चलः संसारार्णवधर्म्मपोततरणे यः कर्णधारः क्ष[कृ]ती ॥
यः पृथ्वीपतिरत्नयोज्यकनकं भूपार्थशब्दोथवा सोयं वासफखाँ विभाति सकलान्वर्णाश्रमान्पालयन् ॥ २३ ॥
तस्य प्रेरणया नृपालमुकुटालंकारचूडामणेर्मामाज्ञापितवान्सुतंत्रकरणे लोकोपकाराय यत् ॥
श्रीमत्साहजहांप्रकाशममलं सिद्धांतसिंधुं स्फुटं नित्यानंद इति प्रसिद्धगणकः कर्तुं समीहे ततः ॥ २४ ॥
सत्यं सत्यपयोनिधे तव यशोमुक्ताफलानां गणास्तेजोरत्नचयाश्च कुत्र न महीपृष्ठे विकीर्णा स्थिताः ॥
किं ते तान्गुणवत्तयेव सुधियो बध्वा स्वकीयैर्गुणैः कंठेषु श्रवणेषु च त्रिजगतामाभूषणीकुर्वते ॥ २५ ॥
अपारसंसारगभीरनीरधौ स्वतंत्ररत्नानि कियंति संति न ॥
तथापि दृक्प्रत्ययकारखेचरं तनोमि तंत्रं यवनोक्तिउ[यु]क्तिभिः ॥ २६ ॥
यत्किंचित्कथितं मयात्र विशदं तत्रास्ति यो विस्तरो बालानामवबोधनाय तदहो दोषो न मे दीयताम् ॥
एतस्मादपि यावनेऽधिकतरस्तंत्रोत्तमे[मे]विस्तरः किं वा किं भयमि[म]त्र तंत्रविदुषां ब्रह्मांडविज्ञानिनाम् ॥ २७ ॥
ये केचिज्जडबुद्धयोपि गणितं ज्ञातुं विधातुं तथा किं वा तंत्रविचारसारचतुराः सद्बुद्धयोऽपि स्वयम् ॥
किं वा मध्यमबुद्धयोऽपि गणका वांछंति चेल्लीलया सिद्धांतं यवनौक्तिउ[यु]क्तिकमिमे सर्वे फुटंतु स्फुटम् ॥ २८ ॥

प्रत्येकलिप्तागणितं सुसूक्ष्मं सद्वास्तवं वासनया समेतम् ॥
अस्माभिरस्मिँल्लिखितं समस्तं विलोक्यतां सद्गणकैः प्रवीणैः ॥ २९ ॥
यदवद्यमिहोदितं मया भ्रमतस्तद्विबुधैर्विभूष्यताम् ॥ न भवंति कदापि सज्जना गुणवंतः परदोषसंग्रहाः ॥ ३० ॥
पंचाष्टभूपोन्मितसौरवर्षैः १६८५ श्रीविक्रमार्कस्य शकेछ[ग]ते(सौ) ॥
तस्थौ समस्तक्षितिपालसिंहः सिंहासने शाहजहांनरेंद्रः ॥ ३१ ॥
श्रीशालिवाहनशको–गतस्तदैव व्योमाक्षपंचशशिभिः १५५० स्फुटसौ(र)वर्षैः ॥
जल्लालदीननृपतेरपि वर्त्तमानः शाकः खपंचविशिखै ५५० रिह सौरवर्षैः ॥ ३२ ॥
च.–यःश्रीशाहजहांनृपालमुकुटालंकारचूडामणिस्तस्याज्ञामवलंब्य दुस्तरममुं सिद्धांतसिंधुं तरन् ॥
नित्यानंद इति द्विजोत्तरकतः[मकविः]श्रीदेवदत्तात्मजस्त्रिप्रश्नप्रचुरोक्तियुक्तिसहितं कांडं द्वितीयं ह्यगात् ॥

६०१ सुन्दरसिद्धान्तः-ज्ञानराजः ।

आ.–भाले यस्य कलानिधिर्मधुमिलद्भृंगावली गंडयोः कण्ठेहिर्विलसत्स्थलं पदयुगे गीर्वाणचेतोगणः ॥
ब्रह्माप्यत्र जगत्सिसृक्षुरभजन्निर्विघ्नसंसिद्धये श्रीमन्मङ्गलमूर्तिमाघ[द्य]मलयं तं नौमि भक्तप्रियम् ॥ १ ॥
यन्नामाक्षररश्मिभिस्तनुगतैश्चंचत्कलावान्भवेद्भक्तस्वांतनिशाकरो हन[त] तमास्तन्नोचरद्भिः क्रमात् ॥
नत्वा तां भुवनेश्वरीमपि गुरून्सिद्धान्तसत्सुन्दरं सुज्ञानंदकरं करोमि चतुरं ज्ञानाधिराजः स्फुटम् ॥ २ ॥
यन्नारदाय गदितं चतुराननेन ज्ञानं ग्रहर्क्षगतिसंस्थितिरूपमग्र्यम् ॥
शाकल्यसंज्ञमुनिना निखिलं निबद्धं पद्यैस्तदैव विवृणोमि सवासनं स्वैः ॥ ३ ॥
च.–क्रान्त्योः साम्यं मुहुरिति भवेत्सन्मुनीनां सुगम्यम् ॥ १९ ॥
इत्थं श्रीमन्नागनाथात्मजेन प्रोक्ते तंत्रे ज्ञानराजेन रम्ये ॥ ग्रंथागाराधारभूते प्रभूते पाताध्यायो युक्तिसंयुक्त उक्तः ॥१॥
इति श्रीनागनाथात्मजज्ञानराजविरचितः सिद्धांतसुन्दरः सम्पूर्णः ॥

६०२ सूर्यसिद्धान्तगूढार्थप्रकाशकम्-रङ्गनाथः ।

आ.–यत्स्मृत्याभीष्टकार्य्यस्य निर्विघ्नां सिद्धिमेष्यति ॥ नरस्तं बुद्धिदं वंदे वक्रतुंडं शिवोद्भवम् ॥ १ ॥
पितरौ गोजिबल्लालौ जयंतोम्बाशिवात्मकौ ॥ याभ्यां पञ्च सुता जाता ज्योतिस्संसाध्यहेतवः ॥ २ ॥
सार्वभौमजहांगीरविश्वासास्पदभाषणम् ॥ यस्य तं भ्रातरं कृष्णं बुधं वन्दे जगद्गुरुम् ॥ ३ ॥
नानाग्रन्थान्समालोच्य सूर्यसिद्धान्तटिप्पणम् ॥ करोमि रङ्गनाथोऽहं तद्गूढार्थप्रकाशकम् ॥ ४ ॥
अथ ग्रहादिचरितजिज्ञासून्मुनींस्तत्प्रकारकान्प्रति स्वविदितं यथार्थतत्त्वं सूर्यांशपुरुषमयासुरसंवादं वक्तुकामः कश्चिदृषिः प्रथममारम्भणीयतत्कथननिर्विघ्नसमाप्त्यर्थं कृतं ब्रह्मप्रणाममंगलं शिष्यशिक्षायै निबध्नाति । अचिन्त्याव्यक्त ———
च.–रङ्गनाथेन रचिते सूर्य्यसिद्धान्तटिप्पणे ॥ पाताधिकारः पूर्णोऽयं तद्गूढार्थप्रकाशके ॥
सूर्यसिद्धान्तगूढार्थप्रकाशकमिदं दलम् ॥ रंगनाथकृतं दृष्ट्वा लभंतां गणकाः सुखम् ॥ १ ॥
इति श्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचिते गूढार्थप्रकाशके पूर्वखंडं परिपूर्त्तिमगमत् ॥

६०३ सूर्यसिद्धान्तसारणी-गोकुलनाथः ।

आ.–लोका यत्प्रोक्तमार्गेण कालं विज्ञाय तत्त्वतः ॥ व्यवहारे प्रवर्त्तंते तस्मै श्रीभास्वते नमः ॥ १ ॥
ज्योतिरलंकारगुणसंख्यावत्प्राणनाथतनुजन्मा ॥ गोकुलनाथस्तनुते कौतुकमेतन्मुदे विदुषाम् ॥ २ ॥
इह हि सर्वव्यवहारासिद्धये भगवता सूर्येण कृपापरवशतया सिद्धांतोभिहितः स्वल्पयत्नेन तद्गणितसिद्धये श्रीमकरंदाचार्य्यः सारणीं कु[कृ]तवान् ॥ इदानीं लेखकदोषतया भिन्नभिन्नानि दृश्यंते सूर्यसिद्धांते गणितभेदस्तु न दृश्यते । अतस्तदुपपत्तिज्ञानमंतरा पुस्तकशोधनं कथं स्यादित्याशंक्य लोकानामुपपत्तिज्ञानाय यत्नोयमारभ्यते ॥
च.–कृष्णचतुर्दशीशुक्लाप्रतिपदोरंतस्योचितकालात्पूर्वं सत्त्वेऽपिचन्द्रास्तमयोदययोरुषसि प्रदोषे वा व्यपदेशवदिति ॥
· इत्युदयास्तमयकेंद्रांशोपपत्तिः ॥

६०४ हस्तसंजीवनटीका-मेघविजयगणिः ।

आ.–उँनमः सिद्धमर्हंतं ध्यायन्निति कृतांजलिः ॥ हस्तसंजीवनव्याख्यां कुर्वे स्मृत्वा गुरोर्गिरम् ॥
तत्रादौ शिष्टाचाराय निमित्तशास्त्रे देवसांनिध्यादेव वाक्सिद्धये च मंगलमाह ॥ श्रीशंखेश्वरपार्श्वमिति ॥
अर्हन्सिद्धो हि भगवानेको ध्येयः स तात्त्विकैः ॥ नानानामाकृतिस्थानध्यानज्ञानासनादिभिः ॥
यथा स्याद्गुरुवाक्येन स्याद्वादपरिशीलनात् ॥ लभ्यः सम्यजनैः शुद्धज्ञानभक्तिवृतैर्विभुः ॥
तत्तद्देवादिसांनिध्यात्तत्तत्कामितपूरणात् ॥ इष्टः शास्त्रकृतः पार्श्वः श्रीमान् शंखेश्वराश्रयः ॥
तेन तं प्रणमन् ॥ ....
अथाभिधेयस्याकारमाह । अंगेति ॥
अष्टानां निमित्तानां भूतभविष्यद्वस्तुज्ञानस्य कारणानां न तु पदार्थोत्पादहेतूनां मुख्यानां सर्वनिमित्तानां तदंतर्भावात् तिर्यङ्मनुष्याणां सत्त्वादिस्वभावात्तादिप्रकृतिरसादिधातुशारीरवर्णादिनिम्नोन्नतांगप्रत्यंगदर्शनादिसुखदुःखादिज्ञानमंगमिति प्राचामुक्तेः । तत एवोक्तम् श्रीसमवायांगसूत्रवृत्तौ अंगविद्यासूत्रं लक्षश्लोकप्रमाणं वृत्तिः कोटिप्रमाणा वार्त्तिकमपरिमितं शेषनिमित्तानां सूत्रं सहस्रं श्लोका वृत्तयो लक्षमिताः वार्त्तिकं कोटिश्लोकप्रमाणमिति । सांप्रतं तु कालदोषान्मेधाद्यपचयेन अंगविद्यां प्रवक्ष्यामि नारदेन स्वयंकृतामित्यादिरंगविद्या स्वल्पा लभ्यते तथापि ग्रंथान्तरानुमानात् उच्यते तत्र पूर्वं तिथिचक्रं कामशास्त्रात् यदुक्तं गौरिकापुत्रेण ॥
मूर्द्धोरःस्थलवामदक्षिणकरे वक्षोरुहोरुद्वये नाभिर्गुह्यललाटजाठरकटीपृष्ठेषु तिष्ठत्यसौ ॥
कक्षश्रोणिभुजेषु च प्रतिपदं प्रारभ्य कृष्णामधः श्वेतायाः प्रभृतिक्रमेण मदनो मूर्द्धानमारोहति ॥
अनंगरंगे तु ॥
सीमंता १ क्ष्य २ धरे ३ कपोल ४ तदधः ५ कक्षा ६ कुचो ७ रःस्थले ८
नाभि ९ श्रोणि १० वरांग ११ जानुविषये १२ गुल्फे १३ पदे १४ गुष्ठके १५ ॥
कृष्णाकृष्णविभागतो मनसिजस्तिष्ठेत्क्रमाद्योषितां वामांगेष्वथ मूर्द्धतोभिगमनान्मासस्य पक्षद्वये ॥
नंदिकेश्वरमते सर्वजातिसाधारणत्वे पुनरेवम् ॥
अंगुष्ठे १ पद २ गुल्फ ३ जानु ४ जघने ५ नाभौ ६ च वक्षःस्थले ७

कक्षे ८ कंठ ९ कपोल १० दंतवसने ११ नेत्रा १२ लके १३ मूर्द्धनि १४ ॥
शुक्लाशुक्लविभागतो मृगदृशामंगेष्वनंगस्थितिरूर्ध्वाधोगमनेन वामपदगा पक्षद्वये लक्षयेत् ॥
दक्षिणपादांगुष्ठमारभ्य आशिरसं पंचदशस्थानेषु पूर्णिमापर्यंतं कंदर्प्प ऊर्ध्वं दक्षिणभागेनारोहति । कृष्णाप्रतिपदमारभ्य वामभागे मस्तकादंगुष्ठपर्यंतं क्रमेणावरोहति इत्यर्थः ॥
विवेकविलासे तु पादांगुष्ठेनेत्याद्यग्रे वक्ष्यते । इति तिथिचक्रम् ॥

च.—शास्त्रेस्मिंस्तत एव सोन्नतिपदं भूयात्सुदृष्टिः सताम् ॥
इति श्रीहस्तसंजीवनव्याख्यायां सामुद्रिकलहर्य्यां महोपाध्यायश्रीमेघविजयगणिविरचितायां द्वितीयः स्पर्शाधिकारः सम्पूर्णः ॥

६०५ हिल्लाजताजिकम् ।

आ.—विघ्नेशं जगदम्बिकां रविमुखाञ्श्रीकेशवाख्यं गुरुं ज्योतिःशास्त्रविदम्बुजैकतरणिं नत्वा ब्रुवे जातकम् ॥
शास्त्रे ताजिकसंज्ञके प्रकथितं श्रीरोमकाद्यैस्तथा श्रीमत्ताजिकखिंदिकादिविबुधैर्हिल्लाजसंज्ञं शुभम् ॥ १ ॥
अन्यैस्ताजिकशास्त्रतः पृथगिदं स्पष्टं च नोक्तं यतस्तस्मिन्नप्यतिदुर्गमं त्विह जने सम्यक्प्रतीतिप्रदम् ॥
तस्मात्ताजिकशास्त्रवारिनिधितो रत्नं किलोद्धार्यते नाम्ना ताजिकरत्नमत्र खगविद्ग्रैवेयकं चोत्तमम् ॥ २ ॥
वाह्मं[ब्राह्मं] वापि वशिष्ठजं शिवशिवासंवादिसौरं रवेर्यल्लब्धं तु मयेन रोमकसुते म्लेच्छोद्भवार्कोदितम् ॥
म्लेछे रोमककेऽथ यन्मुनिगणैः श्रीपौलिशोक्तं परं ज्योतिःशास्त्रमिदं हि षड्विधमभूद्दिव्यं रहस्यं परम् ॥ ३ ॥
पूर्वं रोमकपत्तने दिनपतिर्म्लेच्छेभ्य आदिष्टवान्म्लेच्छत्वाधिगतो हरीशकमुखोद्भूतात्तु शापादिदम् ॥
सृष्ट्यादावपि रोमके तु रविजं शास्त्रं भवेत्ताजिकं सम्यक्प्रत्ययदं जनेषु च ततोऽध्येतव्यमेतद्द्विजैः ॥ ४ ॥ ....

६०६ हिल्लाजदीपिका-नृसिंहः ।

आ.—श्रीशार्ङ्गिधातृगिरिशादिकमौलिकोटिसंघट्टितांघ्रिकमलांग — — — कांतिम् ॥
विघ्नौघवृंददलनं स्मरणान्नराणां वंदे गजाननमुमाप्रियसूनुमेकम् ॥ १ ॥
पविमत्स्यकजारिचिह्नयुक्ते सुकुमारत्वजिताब्जकेसरौघे ॥ गुरुवर्यगणेशपादयुग्मे मम मूर्द्धा भ्रमरायितोऽस्तु नित्यम् ॥२॥
श्रीरोमकप्रभृतिखिंदिककोविदैर्यच्छास्त्रे पुरा प्रकथितं किल ताजिकाख्ये ॥
हिल्लाजजातक[ताजिक]मिदं प्रकटीकरोमि गूढार्थतः पृथगिदं न कृतं यदन्यैः ॥ ३ ॥
कृते पितामहप्रोक्तं त्रेतायां बादरायणः ॥ गार्गेयं द्वापरे प्रोक्तं कलुसू[कलावु]क्तं च ताजिकम् ॥ ४ ॥
कलियुगे घटते किल ताजिकं स्वनुभवावहमेतदनाकुलम् ॥ सुविमलैः सुमनोहरवृत्तकैरविदुषामतिबुद्धिविवृद्धये ॥ ५ ॥
ब्राह्मं वशिष्ठगदितं शिवजं मयाय प्राक्सौरमर्ककथितं मुनिपौलिशं च ॥
म्लेच्छेषु रोमकमतं स्वनुभूतसिद्धं स्याज्ज्यौतिषं रसविभेदमिति क्रमेण ॥ ६ ॥
केशविष्णुमुखनिर्गतछायान्म्लेच्छताधिगततिग्ममरीचेः ॥ रोमकेण परिलब्धमशेषं तद्द्विजातिभिरतोऽध्ययनीयम् ॥७॥

च.–क्षोणीमंडलमंडनं द्विजकुलालंकारहीरः क्षितौ श्रीमत्कौशिकवंशभूषणमणिः श्रीकेशवस्तत्सुतः ॥
नंदिग्रामनिवास्यनेकगुणवान्रामाभिधो दैवविन्नानाशास्त्रकलाकलापचतुरः सौजन्यरत्नाकरः ॥ १ ॥
तदात्मजः सर्वजनाभिरामो नृसिंहनामा ग्रहविद्वरिष्ठः ॥ पितृव्यतः श्रीगुरुतो गणेशाद्गणेशरूपात्समवाप्तबुद्धिः ॥ २ ॥
खिंदिकादिमताद्युक्तं जातकं वीक्ष्य यत्नतः ॥ हिल्लाजदीपिकां[का]नाना वृत्तैश्च सुगमं[मा]स्फुटम्[टा] ॥ ३ ॥ ...
इति श्रीनृसिंहदैवज्ञविरचिता हिल्लाजदीपिका समाप्ता ॥

६०७ होरारत्नम्-बलभद्रः ।

आ.–होरापाथोनिधेः पारं दुष्पारं तर्तुमिच्छतः ॥ महागणपतेः शुंडावलंबाय प्रजायताम् ॥ १ ॥
अस्ति श्रीमत्कान्यकुब्जाभिधानं सद्विप्राणां संभवे यन्निदानम् ॥
तत्रैवाभूच्छ्रीभरद्वाजवंशे श्रीमल्लालः कीर्तिविद्याविशालः ॥ २ ॥
तदात्मजोभूत्कृतिदेविदासो विद्यारमाकीर्तिसुखैकवासः ॥
सत्पद्धतौ श्रीपतिनिर्मितायां व्यक्तां च टीकामकरोद्विचित्राम् ॥ ३ ॥
तस्माल्लघुर्ज्यौतिषशास्त्रविज्ञः श्रीखेमकर्णः समभूद्विधिज्ञः ॥
नारायणोऽभूच्च ततः कनिष्ठः सर्पाधिपोक्तौ सुतरां यविष्ठः ॥ ४ ॥
ततोऽभवन्मिश्रचतुर्भुजाख्यः सत्तर्कवेदान्तविदग्रगण्यः ॥ समस्तभूमीपतिलब्धमानः श्रीरामभक्तो विहितैकतानः ॥५॥
ततोऽभवद्रूपसभास्वजेयः कृती च दामोदरनामधेयः ॥
श्रीभास्करोक्ती[क्ते]रकरोन्मनोज्ञां टीकां मनोज्ञां बुधवृंदयोग्याम् ॥ ६ ॥
दामोदरस्य पुत्रौ जातौ बलभद्रहरिरामौ ॥ बलभद्रहरिकृतं प्राक्सवासनं टिप्पणं च मकरंदे ॥ ७ ॥
ततष्टिप्पणं भास्करीये च बीजे कृतं ताजिके वर्षरत्नं स्वपूर्वम् ॥
निबन्धं गुरोः पादपद्मप्रसादात्ततो जातके सन्निबंधं करोमि ॥ ८ ॥
यद्यपि कृता निबन्धाः सुविस्तरा जातके पूर्वैः ॥ विद्वंस्ततो विशेषा मयोदिता बुद्धिपूर्वकं वीक्ष्य ॥ ९ ॥
नत्वा दामोदरं तातं गुरुं श्रीरामसंज्ञकम् ॥ होरावलं वितनुते बलभद्रः सतां मुदे ॥ १० ॥
च.–वशिष्ठगर्गादिमुनिप्रणीतान्वराहकल्याणकृतान्निरीक्ष्य ॥ सज्जातकाञ्जन्मफलक्रमार्थं सुसंप्रदायाद्रचितं मयेदम् ॥ १ ॥
औदार्यगांभीर्यविराजमानः स्वतेजसारातिहताभिमानः ॥ कलान्वितः सद्गुणतानिधानः पृथ्वीपतिः साहसुजाधिनाथः ॥२॥
तदंतिकस्थेन कृतं मयैतत्खचन्द्रसप्तेन्दुमितेटकाले ॥ मधौ चतुर्थ्यां सितपक्षजायां विमत्सराणां कृतिनां सुखाय ॥३॥
इति श्रीदैवज्ञवर्यपंडितदामोदरात्मजबलभद्रविरचिते होरारत्ने स्त्रीजातकाध्यायो दशमः ॥ समाप्तोऽयं ग्रन्थः ॥

६०८ अगस्त्यसंहिता ।

आ.–संध्यायै स्तवराजेन प्रोक्तरूपां परात्पराम् ॥ आह्लादिनीं हरेर्वेदाः [वन्द्यां] शक्तिं सात्वतसेविताम् ॥ १ ॥
च.–इत्युक्त्वा भावनामूर्त्तिः सीताजनकनंदिनी ॥ कृपापात्राय तस्मै सा प्रादाद्वरांतरं पुनः ॥ ६६ ॥
इति श्रीअगस्त्यसंहितायां एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

६०९ अज्ञानध्वान्तदीपिका-सोमनाथः ।

आ.—सीताकांतं हृदि ध्यात्वा सोमनाथो महेशजः ॥ कुर्वे बालावबोधार्थमज्ञानध्वान्तदीपिकाम् ॥ १ ॥
सिद्धिदा मातृकाणां च दैवज्ञानां यशःप्रदा ॥ सिद्धिदा बालवैद्यानां सांगीतानां सुखप्रदा ॥ २ ॥
शान्तिदा शान्तिकर्तॄणां विषज्ञानां विषापहा ॥ कौतुका शाकुनीनां तु रसज्ञानां तु वृद्धिदा ॥ ३ ॥
इति शास्त्रप्रशंसा ॥
न मंत्रेण विना सिद्धिर्जायते भुवि देहिनाम् ॥ तेनात्र मंत्रसिद्ध्यर्थं क्रियते मंत्रपद्धतिः ॥

च.—सर्वग्रहकरा देवी सर्वग्रहविनाशिनी ॥ अक्षतैः सर्षपैश्चैव रक्षायां विधिबंधनैः ॥
इति श्रीमहामहोपाध्यायश्रीमहेशभट्टसुतश्रीसोमनाथभट्टविरचितायामज्ञानध्वांतदीपिकायां शावरमंत्रकथनं नाम दशमः प्रकाशः ॥ १० ॥

६१० अष्टश्लोकी सटीका । मू०-पराशरभट्टार्यः । टी०-वैष्णवदासः ।

मू. आ.—अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृन्मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम् ॥
उकारोऽनन्यार्हं नियमयति संबंधमनयोस्त्रयीसारस्त्र्यात्मा प्रणव इममर्थं समदिशत् ॥ १ ॥

टी. आ.—श्रीपराशरभट्टार्य्यः श्रीरंगेशपुरोहितः ॥ श्रीवत्सांकसुतः श्रीमाञ्श्रेयसे मेऽस्तु भूयसे ॥ १ ॥
अखिलचिदचिदीशः श्रीनिवासो दयालुः स्वपदकमलयुग्मप्रापकः संश्रितानाम् ॥
निगमशिखरगम्यो नित्यमव्याजबंधुर्विलसतु मम चित्ते व्यंकटेशो मुकुंदः ॥ २ ॥
प्रणम्य देशिकान्सर्वानष्टश्लोक्या यथाश्रुतम् ॥ अर्थो वैष्णवदासेन बालबोधाय वर्ण्यते ॥ ३ ॥
अथ परमकारुणिको भगवान् श्रीपराशरभट्टार्यः सकलचेतनोज्जीवनाय सर्ववेदसारतया स्वरूपोपायपुरुषार्थप्रतिपादकतया च सदा मुमुक्षुभिरनुसंधेयस्य रहस्यत्रयस्य संप्रदायपरंपराप्राप्तमर्थं दर्शयितुकामः स्वरूपज्ञानपूर्वकत्वादभीष्टोपायप्रवृत्तेः स्वरूपप्रतिपादनपरं सकलशास्त्ररुचिपरिगृहीतमष्टाक्षरमन्त्रमादौ विवृणोति चतुर्भिः श्लोकैः ।

टी. च.—इत्थं हि बालबोधार्थमष्टश्लोक्या यथोचितम् ॥ वर्णितोर्थो महात्मानः क्षन्तुमर्हथ साहसम् ॥ १ ॥
इति श्रीअष्टश्लोकीव्याख्यानं समाप्तम् ।

६११ आपदुद्धारवटुकभैरवपञ्चाङ्गम् ।

आ.—प्रणवं पूर्वमुद्धृत्य देवीप्रणवमुद्धरेत् ॥ बटुकायेति वै पश्चादापदुद्धरणाय च ॥

च.—एतच्छ्रुत्वा ततो देवं नामाष्टशतमुत्तमम् ॥ भैरवाय प्रहृष्टाभूत्स्वयं चैव महेश्वरी ॥
इति श्रीविश्वसारे तंत्रे आपदुद्धारकल्पे बटुकभैरवस्तवराजः समाप्तः ॥

६१२ ऋभुगीता ।

आ.—शिवरहस्ये षष्ठांशे ऋभुगीतायाम् ॥
आकाशो भूर्जलं वायुरग्निर्ब्रह्मा हरिः शिवः ॥ यत्किंचिदन्यत्किंचिच्च सर्वं चिन्मयमेव हि ॥ १ ॥

च.—लक्ष्मीमेवासनं ब्रह्म सुखमेव हि केवलम् ॥
इति ऋभुनिदाघसंवादे गी० समाप्ता ॥

६१३ कर्पूराख्यं स्तोत्रं महाकालसंहितान्तर्गतं सटीकम् । मू०-आदिनाथः ।

मू. आ.—कर्पूरं मध्यमान्त्यस्वरपरिरहितं सेनु वामाक्षियुक्तं बीजं ते मातरेतत्रिपुरहरवधू[धु]त्रिःकृतं ये जपन्ति ॥
तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्यैव वाचः स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् ॥ १ ॥
टी. आ.—या सूते सचराचरं जगदिदं यद्भासया भासते यत्कारुण्यकणार्पणाप्तविभवं स्वस्थं परं तिष्ठति ॥
— ॥
टी. च.—चिरं जीवन्मुक्तः प्रभवति स भक्तः प्रतिजनुः २२ ॥
इति श्रीमदादिनाथविरचितायां पञ्चाशत्साहस्र्यां महाकालसंहितायां कर्पूराख्यस्तवस्य टीका समाप्ता ॥

६१४ कल्पसूत्रम्-परशुरामः ।

आ.—अथातो दीक्षां व्याख्यास्यामो भगवान्परमशिवभट्टारकः श्रुत्याद्यष्टादशविद्याः सर्वाणि दर्शनानि लीलया तत्तदवस्थापन्नः प्रणीय सविमर्त्या भगवत्या भैरव्या स्वात्माभिन्नया पृष्टः पंचभिर्मुखैः पंचाम्नायान्परमार्थरूपान्प्रणिन्ये । तत्रायं सिद्धांतः षट्त्रिंशत्तत्त्वानि विश्वशरीरं कंचुकितः शिवो जीवि[वो] निष्कंचुकः परमशिवः सविमर्षः[र्शः]
च.—य इमां दशखंडीमहोपनिषदं महात्रिपुरसिद्धांतसारसर्वस्वभूतामहरहरधीते स सर्वेषु यज्ञेषु यष्टा भवति यं यं क्रतुमधीते तेन तेनास्येष्टं भवतीति श्रूयते ॥ इत्युपनिषदिति शिवम् ॥ १० ॥
इति श्रीदुष्टक्षत्रियकुलकालांतकरेणुकागर्भसंभूतमहादेवप्रधानशिष्यश्रीमन्नारायणावतारमहामहोपाध्यायश्रीपरशुरामविरचितं कल्पसूत्रं समाप्तम् ॥

६१५ कौमारसंहिता ।

आ.—द्वाभ्यां विभ्राजमानं वरकनकमहाशृंखलाभ्यां भुजाभ्यां बीजापूरादिबिभ्रद्दशभुजललितं चंद्रचूडं त्रिनेत्रम् ॥
संध्यासिंदूरवर्णं सुरभरनमितं तुंदिलं सस्मितं तं कंठादूर्ध्वं करीन्द्रं युवतिमयमधः स्तौमि विद्यागणेशम् ॥ १ ॥
रत्नसिंहासनारूढं दृष्टुं देव्या महेश्वरम् ॥ समागतोऽहं ब्रह्मास्मि प्रणिपत्य कृपानिधिम् ॥
बद्धांजलिपुटो भूत्वा तुष्टाव परमेश्वरम् ॥
च.—इति कौमारसंहितायां सप्तमोऽध्यायः ॥

६१६ गङ्गालहरीटीका-सदाशिवः ।

आ.—पितुः स्कंधे स्थित्वा विमलमुकुरालोकनधिया हिमांशुं व्याकर्षन्नहिभयविद्र[दा]नेन मनसा ॥
विधुं हित्वा वह्निं सरसमणिबुद्ध्या गिरिभुवा शुभं भीतो नीतो दिशतु भवतामेकरदनः ॥ १ ॥
अत्रैवं श्रूयते । कविर्जगन्नाथो दिवि[ल्ली]वल्लभाश्रितस्तद्यवनीसंसर्गदोषभाक्सन् गंगासकाशात् द्विपंचाशत्सोपानान्तरितनिजगृहे स्थितः सन् तत्रैव जाह्नव्यागमनस्पर्शनात्मशुद्धिं कामयमानः सन्
काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ॥ सद्यः परनिर्वृतये कांतासंमिततयोपदेशयुजे ॥

इति काव्यप्रकाशोक्तेः शिवेतरक्षतिफलकं गंगास्तुतिरूपं काव्यं चिकीर्षुर्विघ्नविघाताय वस्तुनिर्देशात्मकं मंगलमाचरन्स्वाभिमतं प्रार्थयते । समृद्धमिति ॥

च.—यद्यप्यहं मंदमतिस्तथापि टीकासमाप्तिर्हि बभूव शीघ्रम् ॥
नात्रापरं कारणमस्ति किञ्चिच्छ्रीभास्कराज्ञा किल किं त्वमोघा ॥ १ ॥
शाके कीलकसंज्ञके नृसुखके सन्मासके चैत्रके वारे भार्गवके तिथौ करणके सर्पस्य संबालवे ॥
मूले भे विबुधौघचित्तसुखदा टीका समाप्तानया तोषं यातु समस्तपापहरणी गंगा महेशांगगा ॥ २ ॥
नृपं द्विपं वा तुरगं मृगं वा शुकं बकं वा महिषं वृषं वा॥हरिकरोष्यंग न कं हि गंगे स्नातं भवत्यां सकृदीशसंगे॥३॥
नारायणो यस्य पितामहोऽभून्माणीकभट्टश्च पिता यदीयः ॥
गोपी यदीया जननी सुशीला टीका कृता तेन सदाशिवेन ॥ ४ ॥
भक्तोद्रपम[पद्रव]हेतोः केदारकिंपर्वते सिस्वा[स्थित्वा] ॥ तत्राप्यागत्य हित्वांस्य शिवं याचे हि तत्कृत्सवः ॥ ५ ॥
इति गंगालहरीटीका समाप्ता ॥

६१७ गङ्गाष्टकं सटीकम् । मू०-वाल्मीकिः । टी०-हरिनाथः ।

मू. आ.—मातः शैलसुतासपत्नि वसुधाशृंगारहारावलि स्वर्गारोहणवैजयंति भवतीं भागीरथीं प्रार्थये ॥
त्वत्तीरे वसतस्त्वदंबु पिबतस्त्वद्वीचिषु प्रेंखतस्त्वन्नाम स्मरतस्त्वदर्पितदृशः स्यान्मे शरीरव्ययः ॥ १ ॥
टी. आ.—श्रीमान्नाथाद्विधो [न्नाथद्विजो] नत्वा नृहरेः पादपंकजम् ॥ वाल्मीकिकृतगंगाष्टटीकां वितनुतेऽमलाम् ॥ १ ॥
टी. च.—यद्य(द)र्थं पठितं तत्तदेवार्थदमित्यर्थः ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोवर्द्धनधरानंदपुरीपादपद्मपरागरंजितभालस्थलश्रीगोस्वामिहरिनाथेन श्रीगोस्वामिहरसूनुना विरचिता गंगाष्टकटीका समाप्ता ॥
श्रीगंगाष्टकटीकेयं हरिनाथेन कल्पिता ॥ कृपाकटाक्षैः सत्कुर्वन्त्वेनां संतो दयालवः ॥

६१८ गायत्रीपुरश्चरणचन्द्रिका-काशीनाथः ।

आ.—अनंताख्यं गुरुं नौमि कवित्वप्रतिभास्करम् ॥ शास्त्रवल्मीजलधरं स्फुरत्कीर्तिकरं परम् ॥ १ ॥
अनाघा[द्या]याखिलाद्या[द्या]य मायिने गतमायिने ॥ अरूपाय सरूपाय दक्षिणामूर्तये नमः ॥ २ ॥
नत्वा ब्रह्ममयीं देवीं सच्चिदानंदरूपिणीम् ॥ काशिनाथः प्रतनुते पुरश्चरणचंद्रिकाम् ॥ ३ ॥
तत्र मूलवचनानि श्रीशारदातिलके ॥ अथ वक्ष्यामि गायत्रीम् ....

च.—गायत्र्यास्तु महाचक्रं लिंगरूपं विचिंतयेत् ॥ इति ॥ ३ ॥
इति श्रीमद्भट्टोपनामजयरामभट्टसुतवाराणसीगर्भसंभवकाशीनाथभट्टविरचिता गायत्रीपुरश्चरणचंद्रिकाख्या – – –

६१९ चक्रन्यासकवचम् ।

आ.—कैलासशिखरे रम्ये सुखासीनं सुरार्चितम् ॥ गिरीशं गिरिजां स्तुत्वा स्तोत्रैर्वेदार्थगोचरैः ॥ १ ॥
च.—धरणी क्षेत्रतां याति यावद्वा दशयोजनम् ॥ इति चक्रन्यासकवचं समाप्तम् ॥

६२० चण्डिकार्चनदीपिका-काशीनाथः ।

आ.–करधृतवीणां वाणीं जगत्प्रवीणां प्रसूनभृद्वेणीम् ॥ विद्वत्प्रवीणताप्यै शोभनवाणीमहं प्रणमे ॥ १ ॥
एकवीरापदद्वंद्वं निधाय हृदि सुंदरम् ॥ काशीनाथः प्रतनुते चंडिकार्चनदीपिकाम् ॥ २ ॥
च.–इति श्रीमद्भट्टोपनामकजयरामभट्टसुतवाराणसीगर्भसम्भवकाशीनाथविरचिता चंडिकार्चनदीपिका समाप्ता ॥

६२१ चण्डीकुचपञ्चाशती-लक्ष्मणाचार्यः ।

आ.–श्रीचंडीचरणौ वंदे– – – – – – –
श्रियं नौमि देवीं परां पारिजातां पदांभोजरेणूपसेवापराणाम् ॥ – – – – – – – – – – – – – – – ॥
च.–यद्यत्कृतं यदपि भाव्यमशेषमातर्यद्यत्करोम्यखिलमस्तु तवार्पणं तत् ॥ ८१ ॥
इति श्रीसामगोपनामकवेणिमाधवाचार्यसूनुरसालंकारधुरीणलक्ष्मणाचार्यकृता श्रीचंडीकुचपञ्चाशती समाप्ता ॥

६२२ ज्ञानार्णवः ।

आ.–देव्युवाच । गणेश नंदिचन्द्रेश सुरेन्द्रपरिचारित ॥ जगद्वंद्य कलाधीश किं त्वया ल[ज]प्यते सदा ॥ १ ॥
अक्षमालेति किन्नाम संशयो मे हृदि स्थितः ॥ शेसृऽष्टा[सृष्ट्य]तीतं परं ब्रह्म त्वमेव परमात्मवित् ॥ २ ॥
च.–योगिन्यो योगिनश्चैव ब्राह्मणा विविधा गणाः ॥ पूज्या हि परमेशानि यदीच्छेत्सिद्धिमात्मनः ॥ २३ ॥
इति श्रीज्ञानार्णवे नित्यातंत्रे पवित्रार्पणविधिस्त्रयोविंशतितमः पटलः ॥

६२३ तन्त्रराजः ।

आ.–अनाद्यंतोऽपराधीनः स्वाधीनभुवनत्रयः ॥ जयत्यविरतो व्याप्तविश्वः कालो विनायकः ॥ १ ॥
देव्युवाच । भगवन्सर्वतंत्राणि भवतोक्तानि मे पुरा ॥ नित्यानां षोडशानां च नव तन्त्राणि कृत्स्नशः ॥ २ ॥
तेषामन्योन्यसापेक्षाज्जायते मतिविभ्रमः ॥ तस्मात्तु निरपेक्षं मे तंत्रं तासां[तेषां] वद प्रभो ॥ ३ ॥
च.–यस्तंत्रमेतत्सकलं नित्या विद्यास्तु षोडश ॥ शक्त्या संगृह्य विधिवद्भजते स मदंशकः ॥ १०० ॥
शिवतत्त्वमयी व्याप्तिरिति सम्यक्समीरिता ॥ अस्या निःशलना[निश्चलता] चित्ते तत्तत्वं स्वात्मसात्कृतम् ॥ १०१ ॥
इति श्रीतन्त्रराजः समाप्तः ॥

६२४ तन्त्रराजटीका मनोरमा ।

आ.–श्रीमहात्रिपुरसुंदर्यै नमः । आद्यश्लोकेन प्रबंधवाक्यार्थगर्भविनायकस्तुतिः क्रियते तत्र अनाद्यंतः कालस्याद्यन्तरहितत्वात्...
च.–नित्यनैमित्तिकादिप्रोक्तक्रमात्सः भजनपरः मदंशकः चित्स्वरूप ईश्वर इति यावत् ॥ १०० ॥
इति श्रीषोडशनित्यातंत्रेषु श्रीकादिमताख्यस्य परिपूर्णस्य तन्त्रस्य प्रपंचसारसिंहराजप्रकाशाभिधानेन सुभगानंदनाथेन

विरचितायां मनोरमाख्यायां देवतादेशिकशिष्यप्रपंचादीनां परमार्थस्वरूपप्रकाशनपरं षट्त्रिंशं पटलं परिपूर्णम् ३६ ग्रंथसंख्या ॥
षट्त्रिंशे पटले ज्ञेया शिवतत्त्वमयेऽत्र च ॥ अध्यर्द्धसमषष्टिश्च व्याख्या ग्रंथाशतद्वयम् ॥ १२६७ ॥
तंत्रे प्रकरणान्यत्र श्रीमत्कादिमनोह्वये[रमे] ॥ शतानां नवकं त्वेकत्रिंशता च समन्वितम् ॥ ९३१ ॥
भुक्तिभूमानमाधुर्य्यभाग्यगंधेर्द्धसिद्धिगा ॥
संक्षत्सुरश्रीरित्येकविंशत्यक्षरसंख्यया यंत्राणि स्यु: २२७७७३९० ३११९९०५४६४ कादिमते तंत्रे प्रोक्तानि तत्र तु कोष्ठत्रये यंत्राण्यनंतानि आदिवर्णोत्थितानि च संभूय श्रीकादिमते तंत्रे व्याख्यानसंख्यया ॥
श्रीमत्कादिमते तंत्रे व्याख्यानं ग्रंथसंख्यया ॥ सहस्राणां द्वादशकं न्यूनं पंचाशतेरितम् ११९५० ॥
काश्मीरराजस्य गुरु: श्रीकंठेशो द्विजेश्वर: ॥ दक्षिणापथपुण्यौघपरिणामाद्दयोदधि: ॥
कदाचिदागतो द्रष्टुं रामसेतुं स्वलीलया ॥ तेनैवानुगृहीतोभून्मध्येमार्गं नृसिंहराट् ॥
तंत्राण्यधीतवांस्तस्मान्नित्यानां तेषु निर्मिता ॥ व्याख्या मनोरमाभिख्या तेन कादिमतस्य तु ॥
सुभगानंदनाथेन द्वाविंशपटलावधि ॥ तदाज्ञयावशिष्टानां पटलानां विनिर्ममे ॥
चतुर्दशानां तच्छिष्य: प्रकाशानन्ददेशिक: ॥ तां सुंदरवरक्ष्मात्तै[भृ]द्व्याख्यां प्राक्संप्रदायम:[त:] ॥
समाप्ता चेयं तंत्रराजटीका मनोरमाख्या ॥
आकाशरसतर्केन्दुमितेऽब्दे कार्त्तिके सिते ॥ तंत्रराजस्य टीकेयं पूर्णायां पूर्णतामगात् ॥ १ ॥

६२५ ताराभक्तिसुधार्णवः-नरसिंहः ।

आ.—सैनासीरपणप्रवीणजलदग्रामाभिरामच्छविं नृत्यत्पीतपटद्वयैककपटप्रोद्यत्परागोज्वलम् ॥
वंशीवादनकैतवप्रविलसद्गंभीरधीरध्वनिं वन्दे किञ्चिदहं मुदा मधुलिहं हृत्पद्ममध्यस्थितम् ॥ १ ॥
हासव्याजविराजमानकुसुमां वक्षोजराजत्फलामुद्यत्कुन्तलकैतवप्रविल(स)न्मत्तालिमालाकुलाम् ॥
स्थाणुस्थां रमणीयनूपुरक[यु]तां बालामपर्णामहं काञ्चित्कल्प(ल)तां नमामि ललितां शैलाधिराजोद्भवाम् ॥ २ ॥
ललाटतटसंगमाद्व्रजति बालचंद्रात्मतां शिरोरुहनिवेशनाद्भवति जाह्नवीरूपधृक् ॥
विभाति हृदि कौस्तुभात्मकतया सतां य: सदा गुरोश्चरणरेणवे निरूपमाय तस्मै नम: ॥ ३ ॥
नाना तन्त्राणि विज्ञाय गदाधरगुरोर्मुखात् ॥ करोति नरसिंहोऽयं ताराभक्तिसुधार्णवम् ॥ ४ ॥
शंभुप्रणीतवचनानि विचिन्वतोऽपि नैपुण्यमन्यजनतो न विभाति किं मे ॥
मध्येसमुद्रमुपजातमहामणीनां न्यासो गुणेन गुणिनां किमु कौतुकाय ॥ ५ ॥
श्रीरुद्रयामले श्रीमहादेव उवाच । अत: परं किं वक्तव्यं कथयस्व हरिप्रिये ॥
पार्वत्युवाच । महाविद्यां महादेव कथयस्व मम प्रियाम् ॥

च.—आसीत्कीर्त्तिकरस्ततो हरिहरस्तस्मादभूत्सत्कवि: श्रीमान्पण्डितपुंगवो रुचिकर: श्रीकृष्णशर्म्मा तत: ॥
तस्मादेव गदाधर: समभवत्तर्काम्बुधे: पारगस्ताराभक्तिसुधार्णवं समतनोत्तन्नन्दन: कौतुकात् ॥
इति श्रीमहामहोपाध्यायसत्ठक्कुरश्रीनरसिंहविरचिते ताराभक्तिसुधार्णवे विंशतितमस्तरंग: ॥ ७ ॥

६२६ त्रिपुरार्चनमञ्जरी-ज्ञानानन्दः ।

आ.–विमर्शनाथं स्वगुरुं विविज्ञं प्रकाशनाथं परमं गुरुं च ॥ अनंतनाथं परमेष्ठिसंज्ञं परात्परं यामलसंज्ञकं च ॥ १ ॥
आनंदमध्यान्प्रणमामि सांबाञ्चितामणौ वासग्र[गृ]हे स्थितांश्च ॥
पाशांकुशौ चापशरान्दधानान्कामेशकामेशिसमानरूपान् ॥ २ ॥
च.–विद्याप्रदान्सर्वगुरून्वंदे सर्वसमृद्धिदान् ॥ वराभयकराञ्शांतान्सर्वशास्त्रविशारदान् ॥ ११ ॥
विलोक्य सर्वतंत्राणि यामलानि तथैव च ॥ अर्णवां[आगमां]श्चापि सर्वेषां मतमालोक्य तत्त्वतः ॥ १२ ॥
मांत्रिकाणां प्रकाशाय गृहीत्वा स्वगुरोर्मतम् ॥ ज्ञानानंदेन रचिता त्रिपुरार्चनमंजरी ॥ १३ ॥

६२७ त्रिपुरासारसमुच्चयः-नागभट्टः ।

आ.–प्रह्वप्राचीनबर्हिप्रमुखसुरवरानीककोटीरकोटिश्लिष्टस्पष्टेंद्रनीलामलमणिरुचिरश्रेणिजुष्टं कृषीष्ठ[ऋषीष्टम्] ॥
श्रीपादांभोजयुग्मं नखमुखविलसद्रश्मिकिंजल्कपुंजगुंजन्मंजीरहंसीमुखरितमनिशं मंगलं वो भवान्याः ॥ १ ॥
भक्त्या गुरोर्भवपयोनिधिसेतुहेतुच्छ्रीपादपद्मयुगरेणुकणान्प्रणम्य ॥
लम्बोदरं च कथयामि गुरूपदिष्टमाराधनक्रममहं कुलनायिकायाः ॥ २ ॥
स्नात्वा यथाविधिविधौतकराननांघ्रिराचम्य सम्यगमलांबरयज्ञसूत्रः ॥
प्रागाननो धनददिग्वदनोऽथवापि बद्धासनो गणपतिं च गुरुं च नत्वा ॥ ३ ॥
च.–मन्त्रश्च स्ववशोदितः प्रतिपदं तत्प्रत्यगाशामुखं लिंगं च स्थितमित्ययं विजयते नित्यो जपस्त्रैपुरः ॥ ७७ ॥
इति श्रीनागभट्टविरचिते त्रिपुरासारसमुच्चये दशमः पटलः ॥ समाप्तो ग्रन्थः ॥

६२८ दक्षिणामूर्त्तिचन्द्रिका-काशीनाथः ।

आ.–यत्पादांबुरुहं ध्यायन्क्षुद्रो भवति वाक्पतिः ॥ तं नौमि परमात्मानं गुरुमद्वैतरूपिणम् ॥ १ ॥
नत्वा गणेश्वरं देवीं पितरौ राघवं शिवे[वं] ॥ क्रियते तत्प्रसादेन दक्षिणामूर्त्तिचंद्रिका ॥ २ ॥
तत्रादौ गुरुलक्षणं पद्मपुराणे ....
च.–मंडलेशयु[पुरा]धीशः श्रीमद्रंगणवेंकटः ॥ तस्याश्रयप्रतापेन निर्मिता कृतिरुत्तमा ॥
इति श्रीभडोपनामकशिवरामभट्टांगजजयरामभट्टाभिधशिवभक्तसूनुमंत्रशास्त्रप्रवीणकाशीनाथविरचिता दक्षिणामूर्त्तिचंद्रिका समाप्ता ॥

६२९ दक्षिणामूर्त्तिसंहिता ।

आ.–श्रीमच्छ्रीकोशहृदयं पंचसिंहासनात्मकम् ॥ फलं कल्पलतानां तु पंचरत्नस्फुरत्कलम् ॥ १ ॥
चतुरायतनानंदिचतुरन्वयकोशगम् ॥ नित्यानंदिपरं ब्रह्म धाम नौमि सुखाप्तये ॥ २ ॥
श्रीदेव्युवाच ॥ दयां कुरु महादेव कथयानंदमंदिरम् ॥ किं तद्ब्रह्ममयं धाम श्रोतुमिच्छामि तत्त्वतः ॥ ३ ॥
च.–एवं च कुरुते विद्वान्दमनारोपणे क्रमम् ॥ तस्य सांवत्सरी पूजा श्रीविद्याधिष्ठिता भवेत् ॥ २५ ॥
इति श्रीदक्षिणामूर्त्तिसंहितायां दमनारोपणनैमित्तिकाभिधाननाम ६६ पटलः ॥

६३० दत्तात्रेयगोर्षनाथसंवादः तन्त्रमहार्णवान्तगर्तः ।

आ.–**गोर्षनाथ उवाच** । गुरुनाथ महायोगिन्सर्वशास्त्रविशारद ॥ नमस्तुभ्यं सदा देव कृपां कुरु मम प्रभो ॥ १ ॥
भक्तानां च हितार्थाय सद्यज्ज्ञानं कथस्व मे ॥ छवमात्रे[यच्छ्वमात्रे] भवेत्सिद्धिः का नु विद्याकलौ युगे ॥ २ ॥
च.–**योगशास्त्रं** पठेन्नित्यं किमन्यैः शास्त्रविस्तरैः ॥ यत्स्वयं चादिनाथस्य निर्गतं वदनांबुजात् ॥ ९८ ॥
स्नातं तेन समस्ततीर्थसलिलैर्दत्ता च पृथ्वी द्विजे यज्ञानां च हुतं सहस्रमयुतं देवाश्च संपूजिताः ॥
सत्यं तेन सुतर्पिताश्च पितरः स्वर्गं च नीताः पुनर्येषां ब्रह्मविचारणे क्षणमपि प्राप्नोति धैर्यं मनः ॥ ९९ ॥
इति श्रीगोर्षनाथशतं० सम्पूर्णम् ....

६३१ दीक्षातत्त्वप्रकाशिका-रामकिशोरः ।

आ.–**नत्वोमेशपदं** रामकिशोरेण विरच्यते ॥ सारं निर्णीय तंत्राणां दीक्षातत्त्वप्रकाशिका ॥ १ ॥
च.–**मंत्रमात्रप्रकथनमुपदेशः** स उच्यते ॥
इति श्रीरामकिशोरन्यायालंकारभट्टाचार्यकृतायां दीक्षातत्त्वप्रकाशिकायां षष्ठः परिच्छेदः समाप्तः ॥

६३२ दुर्गाटीका-गदाधरः ।

आ.–**चंडि चंडिमपराक्रमांचिते** भर्गभामिनि ममांतरं तमः ॥ संहर त्रिदशशत्रुनाशिनि हारिणि त्रिजगति प्रकाशिनि ॥ १ ॥
प्रणम्य गुरुमिष्टार्थदायिनं सर्वसिद्धिदम् ॥ कुर्वेऽहं चंडिकास्तोत्रव्याख्यानं च यथामति ॥ २ ॥
तपस्यन्तं महात्मानं मार्कंडेयं महामनुम् ॥ व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत ॥ ३ ॥
अथ चतुर्वर्गफलेप्सुर्जैमिनिः पप्रच्छ तपस्यंतमिति जैमिनिर्महामनुं मार्कंडेयं पर्यपृच्छत जैमिनिनामा मुनिर्महांश्चासौ मनुश्च महामनुस्तं चंडिकाया महामंत्ररूपं स्तोत्रं मुख्यं कर्मेदं मार्कंडेयात्पर्यपृच्छत अकथितं चेति पृच्छतेर्द्विकर्मकत्वात् ......
च.–**प्रोक्षणीयैरिति** पाठे प्रोक्षणं यज्ञियपशूनां सेकस्तदर्हंति प्रोक्षणीयास्तैर्मेध्यपशुभिरित्यर्थः । अहर्निशं दिवारात्रौ अहर्दिवमिति पाठ उचितः दिने दिने इत्यर्थः ....

६३३ दुर्गाटीका लघुशान्तनवी-नारायणः ।

आ.–**नत्वा रामं** घनश्यामं दृष्ट्वा शान्तनवीकृतम् ॥ नारायणेन दुर्गायाः क्रियते सारसंग्रहः ॥ १ ॥
प्रारिप्सितस्य ग्रंथस्य निष्प्रत्यूहपरिसमाप्त्यर्थं नमस्क्रियावस्तुनिर्देशलक्षणं मंगलमाचरति उँनमश्चंडिका इति उँ अवत्यद्यादुपासकमिति विगृह्य अव रक्षणे अवतेष्टिलोपश्चेति मन[न्]तस्य प्रत्ययस्यैव टिलोपो न तु प्रकृतेः ॥
च.–**काश्यपान्वयसंभूतनरसिंहात्मजो** मुदे ॥ लघुशांतनवीं दुर्गाटीकां नारायणोऽव्यधात् ॥
इति श्रीवेदरकरोपनामश्रीनृसिंहपंडितात्मजनारायणकृतायां लघुशांतनवीसमाख्यायां दुर्गाटीकायां त्रयोदशोऽध्यायः ॥ १३ ॥

६३४ दुर्गाटीका चण्डीप्रसादिनी-भट्टसूरिः ।

आ.—प्रत्यूहव्यूह — — — — — —

इह खलु वाङ्मयामृतांभोधिमवगाहमानस्य काव्यनाटकालंकारनवरसावर्त्तभ्रममाणचित्तस्य साहित्योपमानतरंगलोलायितस्य प्रकृतिस्थपरमजाड्यजडबुद्ध्यादिकरणस्य परमाग्रहग्राहास्यनिपतितस्य च सकलापच्छमनाय श्रीपरदेवतास्वरूपस्य च गुरोरुभयोश्चरणपंकजवंदनमेव मंगलमुररीकृत्य प्रयोजनमुद्दिशति ॥

च.—अतिप्रख्याताख्यो गणपतिरभूत्कश्यपकुले परः शास्त्राख्याता तपसि परिनिष्ठायितमतिः ॥
त्रिकालज्ञो निःस्वोप्यखिलजनयांच्यानिविमुखः स्वसंतुष्ट्या तुष्टो वचसि रसवान्वाक्पतिरिव ॥
सुतस्तस्याप्यासीदतुलगुणवांस्त्र्यंबक इति प्रतीतः सत्कर्माचरणपरितुष्टांबचरणः ॥
स वक्ता शास्त्राणां तदनु च पुराणार्थचतुरः सभाचंद्रस्तस्याप्यनुगुणगणः सूनुरभवत् ॥
महाराष्ट्रो[महाराष्ट्रे सर्वो]त्तमगुणवति श्रीशिवगिरेः समीपे गोदायाः पु[र]मपि च यस्योत्तरपुरम् ॥
तपस्वी शांतात्मा सकलविबुधप्रेमनिलयः श्रिया वाचा पूर्णो[ललित]ललिताश्रीचरणदृक् ॥
पिता भट्टेत्याख्यामवददवदंस्तामभिजना यमंबाप्यंबावत्परिचरति कारुण्यकलया ॥
स संविद्व्यात्मा सुगमनिगमार्थागमगणप्रचारज्ञष्टीकामरचयदिमां सज्जनकृते ॥
इति श्रीमत्सकलनिगमागमप्रपंचप्रपंचितायां चरणारुणश्रीत्रिलोचनात्मजश्रीमद्भट्टसूरिविरचितायां चंडीप्रसादिन्यां सप्तशतीटीकायां प्राकृतिकं तृतीयं मूर्तिरहस्यं नामादि(त)स्त्रयोदशोऽध्यायः ॥

६३५ दुर्गाटीका गुप्तवती-भास्करराय: ।

आ.—श्रीरामं प्रति पुष्कराभिधमहायक्षेण वेदत्रयव्याख्यानावसरे विशिष्य कथितं श्रीविष्णुधर्मोत्तरे ॥
एतां धेनुमुपह्वयामि सुदुघामित्यग्रतं शंकराचार्यं शिष्यचतुष्टयेन सहितं वंदे गुरूणां गुरुम् ॥ १ ॥
विधिविष्णुमुखामरोदयस्थितिनाशेषु शिवोऽप्यनीश्वरः ॥ जगदंब तव स्वयं कृमः क्षणमुद्दालकपुष्पभंजिका ॥ २ ॥
कवचार्गले च कीलकमादौ मध्ये त्रयोदशाध्यायी ॥ अंते प्राधानिकवैकृतिके मूर्त्तिऽत्रयं रहस्यानाम् ॥ ३ ॥
इति मार्कंडेयपुराणाध्यायेषूनविंशतौ गुप्तान् ॥ अर्थान्प्रकटीकुरुते भास्कररायोग्निचिरकतिचित् ॥ ४ ॥
सप्तशती लुप्तसृती रासवती सत्यतीव तप्तवती ॥ मम तु मती रचितवती गुप्तवतीनाम बिभ्रतीं विवृतिम् ॥ ५ ॥
काव्यव्याकृतितार्किकौपनिषदेष्वेकैकविद्भिः कृताष्टीकाः संति चतुर्विधा अपि चमत्कारावहास्तद्विदाम् ॥
ताश्चंडीजपहोमतर्पणमुखानुष्ठानमात्रोपयोग्यर्थज्ञानमभीप्सतां न विदुषां चित्ते चमत्कुर्वते ॥ ६ ॥
एतद्ग्रंथरसास्वादसामर्थ्यं विदुषां यदि ॥ किमिति प्रार्थनीयास्ते न चेत्प्रार्थनयापि किम् ॥ ७ ॥
कैः पुष्पैरक्षतान्दत्वा भृंगा भुवि निमंत्रिताः ॥ केन वा चंपकेनार्धचंद्रं दत्वा निराकृताः ॥ ८ ॥
यत्सप्तशत्यापुपि गुप्तवत्यामपेक्षणीयं तदवेक्षणीयम् ॥ चंडीसपर्याक्रमकल्पवल्ल्यां यत्तत्र गुप्तं तदिहास्ति कृत्स्नम् ॥ ९ ॥
बह्वृच इति विशेषणेन काण्वबुद्धिसिद्धवदायातग्राहिबुद्धिमथितेयं न भवतीति ध्वनितम् ॥
इति गुप्तवत्यां तंत्रान्तरोक्तमंत्रविभागनिष्कर्षः ॥ ....

६३६ दुर्गाटीका-रघुनाथभास्करः ।

आ.—शंके हे[ऽहं]तव धाम वामन विभो पृथ्वी भवेद्वा कथं किं वा तत्र तवैव शक्तिरपरा संसूचितैव त्वया ॥
सा किं तेन भवेद्द्वितीयधरणीसंपादने वा क्षमा तस्माद्याचनवंचना तव विभो भृत्येषु नैवोचिता ॥ १ ॥
अबंध्यगाधे रघुनाथनाम्ना व्याख्यानरूपः स्वधियैव सेतुः ॥ सखंडितः सप्तशतीसमुद्रे गतागतं साधुजनस्तनोतु ॥ २ ॥
च.—विख्याते शुभचंद्रवंशतिलके नारायणे क्ष्मापतौ टीकेयं रघुनाथभास्करकृतायायात्समाप्तेः फलम् ॥
इति श्रीमद्रघुनाथभास्करकृतसप्तशतीटीकायां सुरथवैश्ययोर्वरदाननामात्रयोदशोऽध्यायः ॥ १३ ॥

६३७ दुर्गाटीका पुष्पाञ्जलिसमाख्या-लालमणिः ।

आ.—या श्रीर्वक्षसि शार्ङ्गिणो हरतनौ गौरी विधेः प्रेयसी वाणी याति निहंति संवितनुते विश्वं गुणैरुज्वलम् ॥
आत्माप्येष न यां विना प्रभवति श्रेयस्करीं देवतां तां मूलप्रकृतिं प्रपंचभयतो मुक्त्यै सदोपास्महे ॥ १ ॥
अथ ग्रंथकर्तृजातिप्रस्तावना ।
पुरा हि जनमेजयो मखचिकीर्षुरादौ द्विजानयाविषुवरान्कुरूननयदात्मना गौरुतः ॥
चतुर्द्दशशतीमदाद्विविधशासनानां तदा तदागमनहर्षितो मुनिकुलाय तस्मै नृपः ॥ ३ ॥
स्वर्णं भूर्यपि दयिमानममुना नो गृह्णते स्म प्रभुर्ग्रामाख्यात उदंतदानपिश्रुतं पत्रं विलेख्य स्वयम् ॥
तांबूलं तदथो निधाय च ततस्तांबूलमग्र्यं ददौ प्रत्याख्येयमिदं न हीति जगृहुर्विप्राः स्मृतिज्ञा यतः ॥ ४ ॥
आत्मानं परिवंचितं द्विजकुलं मत्वा निजग्रामभूभागेऽतिष्ठदहर्निशं सुनिगमव्याख्यानदक्षं ततः ॥
उत्पन्नास्तनयाः स्वशासनजुषस्तेषां कुलान्यद्रुतेन्द्रप्रस्थादिसमाश्रितानि कुरुषु भ्राजंति गौडाख्यया ॥ ५ ॥
महीं[हा]रंगग्रामो जयति कुरुभूभागतिलकं षडंगानां साम्नां कुथुमकठशाखाप्रणयिनाम् ॥
सदैवाध्येतारो विदधति निवासं तदभिधा द्विजा यत्र क्षोणीपरिवृढपरिक्षिस्तुतहिताः ॥ ६ ॥
कुले तेषां जातो मनुरिव मनुर्नामसु कृती ततः श्रीमान्विद्वानजनि जगदीशो द्विजवरः ॥
सुतस्तस्य व्याख्यातपसि बलभद्रः सुविदितो नये तर्क्के जेतुं धिषणमपि योऽवांच्छदनघः ॥ ७ ॥
शिवरामसदारतिस्ततः शिवरामोऽजनि शास्त्रपारगः ॥ यदुनाथपदांबुजालिनस्तनयस्तस्य बभूव नंदनः ॥ ८ ॥
विद्यारत्नसमुद्रकः सुजनतारुद्वैर्यरत्नाकरः पीयूषद्रववाक्सुरेज्याधिषणः पाश्चात्यगौडाग्रणीः ॥
या[प्रा]ज्ञः सामसु पाणिनीयमतविद्वेदांतवेला हरेर्भक्तो लालमणिश्चकास्ति तनयस्तस्य क्षमासागरः ॥ ९ ॥
दृष्ट्वा शास्त्रपुराणसंघमखिलं वेदोपवेदांस्तथा यो गोविंददयावशंवदतया चक्रे निबंधान्बहून् ॥
सोहं लालमणिर्गिरीशदयितापदकंजपुष्पंधयः कुर्वे सप्तशतीस्तिवस्य विवृतिं पुष्पांजलिं नामतः ॥ १० ॥
च.—मंत्रपर्यायत्वादेतस्य स्तोत्रस्य मंत्रत्वं सूचयति ॥ मंगलार्थं च मनुपदम् ॥ १७ ॥
इति श्रीकुरुदेशोद्भवगौडवर्यमहारंगकुलोद्भवशिवरामसूरिप्रियतनयविद्यारण्यविहारिकंठीरवश्रीनंदशर्मज्येष्ठपुत्रेण विद्वद्वरेण लालमणिसूरिणा गोविंदनाम्नः स्वकनिष्ठभ्रातुः सुखबोधाय कृतायां सप्तशतीटीकायां पुष्पांजलिसमाख्यायां देवीमाहात्म्यपठनश्रवणवैश्यसुरथवरलाभो नाम त्रयोदशाऽध्यायविवेचनं नाम कुसुमावचयः ॥ १३ ॥

६३८ दुर्गाटीका दंशोद्धारनाम्नी-राजारामः ।

आ.—मदोन्माद्यदुद्दामदिग्दंतितुण्डो मदोन्माद्यदिन्दिन्दिरालीविराजन् ॥
अनायासमायासमायासपन्नः स पायादपायादुमायास्तनूजः ॥ १ ॥
विद्वत्कुलशिरोरत्नं नत्वा तातं समासतः ॥ दंशोद्धारं सप्तशत्यास्तनोमि विदुषां मुदे ॥ २ ॥
च.—सप्तशत्या मया यस्तु दंशोद्धारो यथामति ॥ निबद्धस्तेन गिरिजा प्रीयान्नः कुलदैवतम् ॥ १८ ॥
इति श्रीमत्समस्त — — — अनवद्यविद्योद्योतितदिक्चक्रश्रीमद्भुछोपनामढुंढिराजभट्टसूरिसूनुराजारामेण विरचिते सप्तशतीदंशोद्धारे त्रयोदशोऽध्यायः ॥

६३९ दुर्गाटीका-भीमसेनः ।

आ.—जाग्रत्त्रैलोक्यराज्योद्भवविभवपरीरंभसंभावितांघ्रिक्षीराकूपारकन्याललितकरतलोन्मृष्टपादारविंदम् ॥
कांचीश्रीवत्सहारांगदमुकुटलसत्कौस्तुभोद्भासितांगं लक्ष्मीकांतं प्रसन्नं हृदयसरसिजांतःस्थितं संस्मरामि ॥ १ ॥
मार्कंडेयमुनीश्वरेण मनुजन्यव्याजमालामनुः प्रोक्तो व्यासविकासितोऽपि मलिनैर्मूढैः कदर्थीकृतः ॥
कश्चिद्गौडवरोऽभवद्भगवतीभक्तोऽथ तेनोद्धृतो वह्नेः सोऽपि खलः स्वकल्पितपदैर्नीतो विपत्तिं पराम् ॥ २ ॥
प्राचीनान्बहुपुस्तकांश्चिरतरं दृष्ट्वाथ पृष्ट्वा मुहुः शिष्टान्मंत्रविवेकविद्गुरुमुखात्संप्राप्य तत्त्वं पुनः ॥
आराध्याथ हृदंबुजोदरगतश्रीकृष्णपादांबुजद्वंद्वं द्वंद्वविवर्जितेन मनसा लब्धं यदेतत्परम् ॥ ३ ॥
सारं सप्तशतीमनोस्तदखिलं भूयः करोमि स्फुटं पौत्रः श्रीमुरलीधरस्य सुकवेः श्रीभीमसेनाभिधः ॥
श्लोकाः पर्वतवह्निबाणविदिताः५३७ काष्ठार्द्धयुक्तास्तथा वंशस्थद्वययुग्वसंततिलकाग्न्यक्षीं२३ द्रवज्रा दिशः १०॥ ४ ॥
च.—पाठार्थे च विवेकशून्यहृदयाः पश्यं(ति) नात्मानयं शास्त्रे दोषमुदाहरंति कलिकाले वा वृथाज्ञा नराः ॥
एतन्मत्कृतचंद्रिकाप्रकटितं श्रीसप्तशत्याः परं सारं साध्ववधार्य साधयति चेत्सिद्धं न किं (किं) फलम् ॥
इति सप्तशतीटीका समाप्ता ॥

६४० देवीमहिम्नः स्तोत्रं सटीकम् । मू०-दुर्वासाः । टी०-नित्यानन्दः ।

मू. आ.—श्रीमातस्त्रिपुरे परात्परतरे देवि त्रिलोकीमहासौंदर्यार्णवमंथनोद्भवसुधाप्राचुर्य्यवर्णोज्ज्वलम् ॥
उद्यद्भानुसहस्रनूतनजपापुष्पप्रभं ते वपुः स्वांते मे स्फुरतु त्रिलोकनिलयं ज्योतिर्मयं वाङ्मयम् ॥ इति ॥ १ ॥
टी. आ.—श्रीश्रीविद्यानंदनाथांघ्रियुग्मं स्मृत्वा स्वांतध्वान्तभानुप्रभावम् ॥
सर्वोत्कृष्टं क्रोधभट्टारकोक्तं स्तोत्रं श्रीमत्सुंदरीश्रीमहिम्नः ॥ १ ॥
पूर्वं कैश्चिद्व्याकृतं नेति भीतो गूढार्थत्वादल्पबुद्धिस्तथापि ॥
शिष्टैरिष्टैरीरितोऽहं गुरूक्त्या नित्यानंदः सादरं व्याकरोमि ॥ २ ॥
न शब्दशास्त्रव्युत्पत्तिर्न्न न्यायनिपुणा मतिः ॥ केवलं गुरुपदानुस्मृतिरत्र गतिप्रदा ॥ ३ ॥
इह खलु सकलागमाचार्य्यचक्रवर्त्ती साक्षाच्छिव एवानुरूपागर्भसंभूतः क्रोधभट्टारकाख्यदुर्वासा महामुनिः श्रीमहात्रिपुरसुंदर्याः सानुभावं महिम्नः स्तोत्रं चिकीर्षुरादौ कूटत्रयदेवताभावनारूपं मंगलमाचरति हे मातस्ते वपुः ········

टी. च.–सिद्धये च – – – –

सतां साधकानां सुविद्यैः सुधीरैश्चिरं लोकनीयं हृदा निश्चलेन ॥ १ ॥

इति दुर्वाससा कृतं महिम्नः स्तोत्रं सटीकं समाप्तम् ॥

६४१ नवार्णपञ्चाङ्गम् ।

आ.–नवार्णपटलं वक्ष्ये सर्वाभीष्टप्रदायकम् ॥ वश्यादिषट्प्रयोगेषु विधिना त्विष्टदं सदा ॥ १ ॥

च.–पुत्रार्थी लभते पुत्रं मोक्षार्थी मोक्षमुत्तमम् ॥

इति श्रीरुद्रयामले तंत्रे नवार्णहृदयस्तोत्रं सम्पूर्णम् ॥

६४२ नागार्जुनम् ।

आ.–यः शांतः परमान्वयः परशिवः कंकालकालात्मको ध्यानातीत अनादिनित्यनिचयः संकल्पसंकोचकः ॥

आभासांतरभास्करः समरसः सर्वात्मना बोधकः सोऽयं सर्वमयो ददातु जगतां विद्यादिसिद्ध्यष्टकम् ॥ १ ॥

या नित्या कुलकेलिशोभितवपुर्बोधोदिता जृंभते पूर्णाभाभृतकुंडला परपरा मंत्रात्मिका सिद्धिदा ॥

मालापुस्तकधारणी त्रिनयना कुंदेंदुवर्णाचला नित्यानंदकुलप्रसादजननी वाग्देवतामाश्रये ॥ २ ॥

येषां वक्त्राच्छ्रुतं किंचिन्मणिमंत्रौषधादिकम् ॥ तत्कर्माणि[तेषां कर्माणि] तत्पूर्वं प्रणमामि महात्मनः ॥ ३ ॥

संसारे बहु विस्तीर्णे विद्यासिद्धिमनेकधा ॥ प्रोक्तवान्शंकरः पूर्वं यदि पृच्छसि[ति]पार्वति[ती] ॥ ४ ॥

अन्यैर्देवगणैः सिद्धैर्मुनिदेशिकसाधकैः ॥ यद्यदुक्तं हि शास्त्रेषु तत्सर्वमवलोकितम् ॥ ५ ॥

शांभवे यामले शाक्ते कौले मौले य[च]डामरे ॥ स्वच्छंदेलाकुले शैवे राजतंत्रेभूतेश्वरे ॥ ६ ॥

उड्वीशे वातुले तंत्रे उच्छिष्टसिद्धिसावरे ॥ किंकिनीमेरुतंत्रे च क्रियाकालगुणोत्तरे ॥ ७ ॥

हरमेखलके ग्रंथे इंद्रजाले रसार्णवे ॥ अथर्वणे महावेदे चार्विके गरुडेऽपि च ॥ ८ ॥

इत्येवमागमोक्तं च वक्त्राद्वक्त्रेण यच्छ्रुतम् ॥ ....

च.–महाभूताक्षरं यंत्रहृदयपरं एतावत्प – – – – – – – – –

६४३ नामामृतस्तोत्रम्-गोकुलचन्द्रः ।

आ.–यदास्यजलजालोकाज्जनानां प्रेमपूरितम् ॥ भवत्यहर्निशं चित्तं तन्नामानि भजे सदा ॥ १ ॥

च.–आनंदलिप्सुभिः स्तोत्रं पाठ्यमेतदहर्निशम् ॥ किमन्यत्साधनायासैस्तेषामिति मतिर्मम ॥ ३० ॥

इति श्रीगोपीजनवल्लभचरणैकतानश्रीगोकुलचंद्रविरचितं नामामृताभिधं स्तोत्रं समाप्तम् ॥

६४४ पञ्चाशन्नाम-शंकराचार्यः ।

आ.–अकारे विजयं विद्याद्धनप्राप्तिं तथैव च ॥ सिध्यंति सर्वकार्य्याणि पुत्रलाभो भवेद्ध्रुवम् ॥ १ ॥

च.–सर्वत्र लभते सिद्धिं रुद्रवाक्ये न संशयः ॥ ११ ॥

इति श्रीमच्छंकराचार्य्यविरचितं पंचाशन्ना० संपूर्णम् ॥ – – – – – – – –

६४५ परात्रिंशिकालघुवृत्तिः तत्त्वविमर्शनी ।

आ.—यत्र तेजांसि तेजांसि न प्राप्तिं च न यान्त्यलम् ॥ एनेतांसि च न प्रांस्ये तद्वंदे ज्योतिरनुत्तरम् ॥ १ ॥
सदागमप्रवाहेण बहुधा व्याकृतं त्रिकम् ॥ श्रीमदुत्पलदेवीयं मंत्रसारं नु वर्ण्यते ॥ २ ॥
सदाभिनवगुप्तं यत्पुराणं च प्रसिद्धिमत् ॥ हृदयं तत्परोक्षास्यै रचयं स्फूर्जन्त्यनुत्तरम् ॥ ३ ॥
तत्र स्वात्मदेवतैव प्रबोध्यमानावस्थायां स्वात्मानं परामर्शिनावतरंती पृच्छति यत उच्यते देव्युवाचेति तदाह अनुत्तरं कथं देव स्वन:[वद] लौकिकसिद्धिदम् ॥ येन विज्ञानमात्रेण खेचरीसमतां व्रजेत् ॥ १ ॥ इति ॥
च.—समाप्तेयमनुत्तरतत्त्वविमर्शनीपरात्रिंशिका लघुवृत्तिरित्यभिनवगुप्तस्येति शिवम् ॥

६४६ प्रपञ्चसारविवरणम् ।

आ.—अवर्णविग्रहं देवं वर्णविग्रहवर्जितम् ॥ वर्णविग्रहवेत्तारं नमामि स्तौमि संश्रये ॥ १ ॥
इह खलु लोकानुग्रहैकरसतया कृतशरीरपरिग्रहो भगवान् शंकराचार्योऽपरोक्षीकृतदेवतात्मतत्त्व: परमां विभूतिकाष्ठां प्राप्त: स्वयमेकाकी संपदा लज्जमाना[नो] दु:खिजनकारुण्याक्रांतमानसश्च सन् तदनुग्रहाय समस्तागमसारसंग्रहप्रपंचागमसारसंग्रहरूपं ग्रंथं चिकीर्षुरभिमतसकलप्रयोजनसिद्धये प्रथमत: परदेवतातत्त्वानुस्मरणलक्षणमाशीर्लक्षणं च मंगलमाचरन् ग्रंथारंभौपयिकं विषयादिकमप्यर्थात्सूचयति ॥ अकचटतपयाद्यैरित्यादिना ॥
च.—अवदानाद्वितीयं विभागद्वयादपि आमलप्रमाणं हविरादाय मिश्रीकृत्यावदानद्वयं स्त्रीपुंसयो: — — — — — — —
इति श्रीप्रपंचसाराविवरणे षट्त्रिंश: पटल: ॥ ३६ ॥

६४७ प्रपञ्चसारसंग्रहः-गीर्वाणेन्द्रसरस्वती ।

आ.—नत्वा श्रीशंकराचार्य्यममरेन्द्रयतीश्वरम् ॥ कुर्वे प्रपंचसारस्य सारसंग्रहमुत्तमम् ॥ १ ॥
तत्र प्रपंचसारे यद्यच्छंकराचार्य्यैरुक्तं मंत्रयंत्रप्रयोगादि तत्सर्वमपि सारभूतमेव तथापीदानीं विस्तरतो ज्ञातुमनुष्ठातुं चाशक्यमित्यत्यन्तोपकारभूतत्वेन यत्सारतरं तदल्पग्रंथेनैव यथा सर्वं मंत्रयंत्रतंत्रसारग्रहणं स्यात्तथा सर्वत: सारं गृहीत्वा मया सत्संप्रदायसर्वस्वाभिधव्याख्यानोक्तमार्गेण वक्ष्यते । तत्र पुन: प्रसंगात्तत्र तत्र मंत्रकल्पांतरे मंत्रसारक्रमदीपिका-सनत्कुमारोक्तशारदातिलकमंत्रदेवताप्रकाशिकादौ यद्यन्मंत्रतंत्राद्युक्तं तदपि किंचिद्वक्ष्यते ॥तत्र प्रपंचसारे प्रथमं तावत्क्षीराब्धौ शेषपर्यंकशायिनं महाविष्णुं प्रति ब्रह्मादिभिस्त्रिमूर्त्तिभि: स्वेषामुत्पत्त्यादिविषय: प्रश्नप्रकार: प्रथमे पटले निरूपित:॥
च.—इत्यक्षमालाजपविधि:
इति श्रीमदमरेन्द्रसरस्वतीशिष्यश्रीविश्वेश्वरसरस्वत्या: प्रियशिष्येण गीर्वाणेन्द्रसरस्वत्या संग्रहीत: प्रपंचसारसंग्रह: समाप्त:॥

६४८ भार्गवार्चनदीपिका-सावाजी ।

आ.—इश्वर दुवाच । वामदक्षिणसिद्धांतं कथितं च महद्गुणम् ॥ पुण्यानां परमं पुण्यं पवित्रं पापनाशनम् ॥
रुद्राक्षधारणं श्रेष्ठं इह लोके परत्र च ॥
कार्त्तिकेय उवाच ....

च.–नियमेनैकसंध्यं वा जपेदष्टोत्तरं शतम् ॥
इति श्रीमदविनाशिरामभक्तश्रीप्रतापराजापरपर्यायश्रीसावाजीपंडितविरचितायां भार्गवार्चनदीपिकायां पुरश्चरण-प्रकारनिरूपणम् ॥

६४९ भूतडामरतन्त्रम् ।

आ.–स जयति सिंधुरवदनो देवो यत्पादपंकजस्मरणम् ॥ वासरमणिरिव तमसां राशिं नाशयति विघ्नानाम् ॥ १ ॥
कैलासशिखरे रम्ये नानाधातुविचित्रिते ॥ नाना द्रुमलतोपेते नानागणसमन्विते ॥ २ ॥ ....
एकाकी यतचित्तात्मा समाधिष्ठो महेश्वरः ॥ १० ॥
सर्व्वैः पर्यंकबंधेन समासीनोचलो यथा ॥ तत्रागतस्तदा शीघ्रं स्वर्णाकर्षणभैरवः ॥ ११ ॥ ....
प्रणम्य दंडवद्भूमौ कृतांजलिरभाषत ॥ १३ ॥
च.–तस्मात्त्वमेनं सततं मुदा युतोऽभ्यासेन मंत्रैस्तपसाराधनेन ॥
स्वंतर्गतं वा कुरु माविलंबं स्थिताः करेऽष्टौ तव सिद्धयः स्युः ॥ ४३ ॥
इति श्रीभूतडामरे महातंत्रे पातालखंडे शिवपौलस्त्यसंवादे मंत्रफलस्तुतिकथनं नामाष्टाविंश उल्लासः ॥ समाप्तोऽयं खण्डः ॥

६५० भैरवस्तोत्रं सटीकम् । मू० अभिनवगुप्तः ।

मू. आ.–ॐ व्याप्तचराचरभावविशेषं चिन्मयमेकमनंतमनादिम् ॥ भैरवनायमनाथशरण्यं त्वन्मयचित्ततया हृदि वंदे ॥ १ ॥
टी. आ.–प्रथमार्थः सैव[शैवे]स्पष्टः ॥ अथ वैष्णवार्थः हेनाथमनाथ नाथानां प्रजापतीनां मालक्ष्मीस्तस्या मंत्रणं कारणानामपि कारण नाथ कीदृस[श] भैः सूर्य्यादिभिरेकं केवलं व्याप्तचरं भूतपूर्वं चरट् – – – – – – – – – –
मू. च.–वसुरसपौषे कृष्णदशम्यामभिनवगुप्तः स्तवमिममकरोत् ॥
येन विभुर्भवमरुसंतापं शमयति जगति जनस्य दयालुः ॥ १ ॥ इति स्तवः समाप्तः ॥
टी. च.–अभिनवशब्देन निर्मलशब्दो लक्ष्यते योभिनवः स निर्मलः निर्मलवादित्वमत एव निर्मलेन गुप्तो निर्मलगुप्तः शैशवं गुप्ततत्वा निर्मलतनुजस्य ख्याप्यते ॥ अतश्च निर्मलगुप्त इव निर्मलगुप्तः निर्मलवद्वा पंडितवेदवादितनुजः इत्यमभिनव-गुप्तपद्यनवकं स्तवं शिवस्तवं न तु विवृतिमकरोत् ।अथवा निर्मलगुप्तः यो निर्मलः स शोभाकारः अत एव निर्मलशब्देन शोभा-करेति नाम तस्य ख्याप्यते शोभाकरश्च गुप्तः निर्मलगुप्त इति स्तवमिममकरोत्। किमर्थमित्याह । येन वेदसंख्यार्थवाचित्वेन यो विभुर्नारायणादिः स तस्य भवमरुसंतापं शमयति । कुत इत्याह कृपालुरिति वचनात् १० । इति स्तवं[स्तोत्रं] समाप्तं स्तव[स्तोत्र]मिदं अभिनवगुप्तस्तवाख्यं पद्यनवकम् एतस्य तु संकेताभिप्रायः समाप्तः ॥
इति श्रीमदभिनवगुप्तकृतं भैरवस्तोत्रं समाप्तम् ॥

६५१ मन्त्रकोशः-आशादित्यः ।

आ.–प्रणम्य सूर्यं विघ्नेशं शिवंदुर्गां हरेः कलान्[लाः] ॥ प्रकटीकृत्य सन्मंत्रान्वक्ष्ये सांगान्य[प्र]गोपितान् ॥ १ ॥
आगमेषु मया ज्ञाताः प्रयोगा गुर्वनुग्रहात् ॥ पूजामात्रं तथाप्यत्र लिख्यते ग्रंथगौरवात् ॥ २ ॥

च.–एतद्व्यतिरिक्तानपि मंत्रान् जानीमः तानि[ते] ग्रंथगौरवान्न लिखितानि[ताः] ॥
भो सज्जना मम नतिः सततं भवस्तु कार्ये न जातु खलु सर्व्वजनीनमेतत् ॥
व्यक्तीकृता यदिह मुख्य[युक्त]तमास्तु मंत्राः सौकर्यतोऽत्र भवतां कतिचित्तदेतत् ॥
इति श्रीमद्दा[दा]शादित्यत्रिपाठिसंगृहीते मंत्रकोशे विंशतितमः परिच्छेदः ॥

६५२ मन्त्रदर्पणः ।

आ.–प्रथमकोष्ठोद्धारे अकहथचक्रअक्षराणां कोष्टोद्धारदेशिका प्रथमा तृतीया रुद्राणां ग्रहपक्षयुग्मं तथा – – – –
च.–इति प्रत्यंगिराविधानम् ॥ इति श्रीमंत्रदर्प्पणग्रंथे मंत्रराजविधानं संपूर्णम् ॥

६५३ मन्त्ररत्नाकरः-विजयरामाचार्यः ।

आ.–पंचैते प्रभवंति पंचसु यतः सृष्ट्यादिकार्येषु कः शार्ङ्गी रुद्रमुखाः स्वशक्तिकरणाः शुद्धाध्वहेतौ परम् ॥
तत्त्वातीतमनंतशक्तिविभवं नित्यं निरीहं विभुं संभाव्यं निखिलात्मभिः किमपि तच्छुद्धं महाश्रितये ॥ १ ॥
सरहस्यानि तंत्राणि ज्ञात्वा गुरुमुखांबुजात् ॥ साधूपकृतये वक्ष्ये मंत्ररत्नाकराभिधम् ॥ २ ॥
सांकर्य्यं संप्रदायानां ग्रंथेष्वाधुनिकेषु वै ॥ विलोक्य शुद्धद्रविडसंप्रदायोऽत्र कथ्यते ॥ ३ ॥
त्रिपदार्थं चतुष्पादं महातंत्रं प्रचक्षते ॥ पादाः पदार्थनिष्कर्षः संक्षेपेणात्र कथ्यते ॥ ४ ॥
भोगमोक्षक्रियाचर्याभिदाः पादास्तु कीर्त्तिताः ॥ एतेषां लक्षणान्यग्रे कथयिष्यामि तत्त्वतः ॥ ५ ॥
च.–उच्चाटयेन्महाघोरं दारुणं ब्रह्मराक्षसम् ॥
इति श्रीमच्चतुर्भुजाचार्य्यचरणसरोजनिवसितमनश्चंचरीकास्वादितचिन्मकरंदश्रीमद्विजयरामाचार्यविरचितो मंत्ररत्नाकरः समाप्तः ॥

६५४ मन्त्राराधनदीपिका-यशोधरः ।

आ.–यन्नामस्मरणेन पातकमलप्रक्षालनं जायते यस्मिन्कर्णपथं गते तु सुमहत्पुण्योदयं[यः] प्राप्यते
यत्र न्यस्तमतिः प्रयाति पुरुषो मोक्षं महादुर्लभं वंदे तं परमेश्वरं त्रिजगतामाद्यन्तमध्येश्वरम् ॥ १ ॥
पाणौ पायसपिंडमाहितरसं बिभ्रन्मुदा दक्षिणे सव्ये शारदचंद्रमंडलनिभं हैयंगवीनं दधत् ॥
कंठे कल्पितपुंडरीकनखमत्युद्दामदीप्तिं वहन्देवो दिव्यदिगंबरो दिशतु वः सौख्यं यशोदाशिशुः ॥ २ ॥
मखाहान्वये जातो राजन्यकुलदीपकः ॥ बभूव नयमल्लो वै नृपो भूमिपुरन्दरः ॥ ३ ॥
स्वपक्षपरिपोषकः सकलशत्रुदावानलः समस्तनृपसेवितो विविधदानविद्यारतः ॥
प्रभूतधनवाहनो धरणिदेवदुःखापहो बभूव तदनंतरं जगति कालिदासो नृपः ॥ ४ ॥
तस्माद्राजारजानीः सकलनृपयुतः शत्रुपक्षस्य हंता वक्ता भोगी वदान्यः सुरपतिसदृशः सर्वलोकैकजेता ॥
संग्रामे स्कंदतुल्यो हरिचरणरतः पुत्रपौत्रप्रपौत्रैः संयुक्तो बंधुवर्गैस्तुरगगजयुतो राज्यमुर्व्यां करोति ॥ ५ ॥
स्पर्द्धन्ते यत्पदत्तैर्वसुभिरनुदिशं भिक्षवो वित्तनाथं यद्बुद्धीनां विलासास्त्रिदशकुलकविं लीलया लंघयन्ते ॥
यस्याज्ञा विश्वचक्रे प्रभवति भुवनाधीश्वरस्येव विष्णोरस्ति श्रीमान्रजानीर्नृपवरतिलकः कल्पशाखी द्विजानाम् ॥ ६ ॥

आनन्दो नृपमण्डलस्य नितरां संतापनो विद्विषां श्रीदेव्याः सरसीरुहं सुरतरोर्दानैकदक्षः करः ॥
आर्त्तानाममृतं समस्तजगतां रत्नावतंसः सतामावासो भुवि राजते नृपगुणैः श्रीमद्रजानीनृपः ॥ ७ ॥
भ्रांत्वा वारिधिमेखलां वसुमतीं यत्कीर्तिहंसी गता रंतुं दुःसहकामबाणानिहता धातुर्मरालालयम् ॥
तत्रानेकविधप्रभूतसुरतक्रीडारुतं शृण्वती स्वर्गंगा निजनाथमंजुलजटाजूटे चकारास्पदम् ॥ ८ ॥
मौलिर्माधववंदनैः श्रुतियुगं विष्णोः कथाकर्णनैर्नेत्रे तत्प्रतिमेक्षणेन रसना नामग्रहैः श्रीपतेः ॥
पाणी तस्य सपर्यया बहुविधैर्ध्यानैश्च चेतस्तथा येनैवं सफलीकृतं स जगतां रायोऽर्जुनः शोभते ॥ ९ ॥
तस्याज्ञामुपलक्ष्य वीक्ष्य च महामोहांधकारे जगन्मग्नं तस्य कृते दयांचितमनाः सारं समुद्धृत्य वै ॥
मन्त्रार्थान्वितरां द्विजातिहृदयानंदैकसंदायिनीं मंत्राराधनदीपिकां वितनुते कंसारिसूनुः कृती ॥ १० ॥
लक्ष्मीकांतं नमस्कृत्य भवानीं तदनंतरम् ॥ यशोधरेण क्रियते मंत्राराधनदीपिका ॥ ११ ॥

च.–एता मुद्रा महेशानि त्रिपुराया मयोदिताः ॥ पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः ॥
शाके नागगजाब्धिचंद्र १४८८ प[स]हिते पक्षे च कृष्णेतरे मासे चाश्विनसंज्ञके शशिदिने विष्णौ दशम्यां तिथौ ॥
आदेशादरजानिदेवनृपतेरानंदसंदायिनीं मंत्राराधनदीपिकां रचितवान्कंसारिमिश्रात्मजः ॥
इति श्रीराजकुलकमलप्रकाशनैकभास्करश्रीमन्महारायकालिदासात्मजमहाराजाधिराजारजानीदेवकारितायां कंसारिमिश्रात्मजमिश्रयशोधरविरचितायां मंत्राराधनदीपिकायां षोडशः प्रकाशः समाप्तः ॥ १६ ॥

६५५ मन्त्रार्थरहस्यं सटीकम् ।

मू. आ.–श्रीमद्धंसं प्रणम्याथ कुमारान्नारदं मुनिम् ॥ ब्रह्मविद्यां प्रवक्ष्यामि गुह्याद्गुह्यां सनातनीम् ॥ १ ॥

टी. आ.–सारं सर्वस्य शास्त्रस्य कल्याणगुणसागरम् ॥ अनंताचिंत्यशक्तिं श्रीकृष्णं सर्वेश्वरं गुरुम् ॥ १ ॥
प्रणम्य चाद्यमाचार्यमज्ञानतिमिरापहम् ॥ ब्रह्मविद्यारहस्यस्य व्याख्यां कुर्वे यथामति ॥ २ ॥
तत्र तावद्ब्रह्मविद्यां व्याचिकीर्षुः शिष्यशिक्षार्थं मंगलं निबध्नन् ब्रह्मविद्यां प्रस्तौति श्रीमद्धंसमित्यादिना ॥

मू. च.–इति गुह्यतमं मंत्ररहस्यं साधुसत्तमैः ॥ ऋते शिष्यान्न देयं चानुष्ठेयं गुरुयोगतः ॥ १९ ॥
इति श्रीरहस्यमीमांसायां मंत्रार्थरहस्यं समाप्तम् ॥

टी. च.–यन्मयत्वेन गोविंदे ये नरा न्यस्तचेतसः ॥ विषयत्यागिनस्तेषां विज्ञेयं च तदंतिके ॥ इत्यादिस्मृतेश्च ॥
इति श्रीमंत्रार्थरहस्यटीका समाप्ता ॥

६५६ महालक्ष्मीरत्नकोशः ।

आ.–भद्रकृत्यामनोर्देवि अंगिरा ऋषिरुच्यते ॥ छंदो गायत्रमेव स्याद्भद्रकृत्या तु देवता ॥ १ ॥
क्षं बीजं ऱ्हीं ततः शक्तिः फट् कीलकमुदाहृतम् ॥

च.–एतासामपि पूर्वोक्तं यंत्रयोगं च पार्वति ॥ कृत्यासूक्तेन सदृशो नैव लोकेस्ति कश्चन ॥ १ ॥
गोप्यानामपि गोप्यं च (पर) कृत्याविनाशनम् ॥ सर्वक्षुद्रहरं श्रेष्टं तव प्रीत्या मयोदितम् ॥ २ ॥
इति श्रीमहालक्ष्मीरत्नकोशे त्रिसप्ततितमः कुमारसंहितायां अष्टादशोऽध्यायः ॥ १८ ॥

६५७ महिम्नः स्तोत्रस्य टीका-मधुसूदनसरस्वती ।

आ.–विश्वेश्वरं गुरुं नत्वा महिमाख्यस्तुतेरयम् ॥ पूर्वाचार्य्यकृतव्याख्यासंग्रहः क्रियते मया ॥

एवं किलाख्यायते कश्चिद्गन्धर्वराजः कस्यचिद्राज्ञः प्रमदवने कुसुमानि हरन्नासीत् तज्ज्ञात्वा च शिवनिर्माल्यलंघनेन मत्पुष्पचौरस्यान्तर्द्धानादिका सर्वापि शक्तिर्नंक्ष्यतीत्यभिप्रायेण राज्ञा पथि शिवनिर्माल्यं निक्षिप्तम् । तदप्रतिसन्धाय च गन्धर्वराजस्तत्र प्रविशन्नेव कुण्ठशक्तिर्बभूव । ततः शिवनिर्माल्यलंघनेनैव ममैतादृशवैक्लव्यमिति प्रणिधानेन विदित्वा परमकारुणिकं भगवंतं सर्वकामदं तमेव तुष्टाव ॥

च.–हरिशङ्करयोरभेदबोधो भवतु क्षुद्रधियामपीह यत्नात् ॥ उभयार्थतया मयेदमुक्तं सुधियः साधुतयैव शोधयन्तु ॥

यत्नतो वक्रमार्गेण कर्तुं शक्यं विधान्तरम् ॥ यद्यपीह तथाप्येवं ऋजुमार्गः प्रदर्शितः ॥

श्लोकानुपात्तमिह न प्रसंगात्किंचिदीरितम् ॥ श्लोकोपात्तमपि श्लोकैरक्षरैः प्रतिपादितम् ॥

महिमाख्यस्तुतेर्व्याख्या प्रतिवाक्यं मनोहरा ॥ इयं श्रीमद्गुरोः पादपद्मयोरर्पिता मया ॥

भूतिभूषितदेहाय द्विजराजेन राजते ॥ एकात्मने नमो नित्यं हरये च हराय च ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीविश्वेश्वरसरस्वतीचरणारविंदमधुकरश्रीमधुसूदनसरस्वतीविरचिता महिम्नः स्तोत्रस्य व्याख्या समाप्ता ॥

६५८ महेश्वरतन्त्रम् ।

आ.–पार्वत्युवाच ॥ देव देव महादेव करुणार्णव शंकर ॥ हर शंभो शिव मृड पशुनाथ नमोऽस्तु ते ॥ १ ॥

च.–इति ते कथितं देवि तदाराधनलक्षणम् ॥ समासेन महेशानि किं भूयः श्रोतुमिच्छसि ॥ ८५ ॥

इति श्रीमहेश्वरतंत्रे उमामहेश्वरसंवादे उत्तरखंडे एकत्रिंशत्तमं पटलं समाप्तम् ॥

६५९ मातृकानिघण्टुः ।

आ.–श्रीनृसिंहं गणेशानं भारतीमीश्वरीं शिवाम् ॥ नत्वा वक्ष्ये मातृकाद्या[या] निघण्टुं बालवृद्धये ॥ १ ॥

च.–मातृकाक्षरसंज्ञास्तु ज्ञात्वा तांश्चोद्धरेन्मनून् ॥ ५७ ॥

इति मातृकानिघण्टुः समाप्तः ॥

६६० मानसिकपूजा-शंकराचार्यः ।

आ.–अनंते सच्चिदानंदे निर्विकल्पैकरूपिणि ॥ स्थिते द्वितीयभावे वै कथं पूजा विधीयते ॥ १ ॥

च.–किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम् ॥ आत्मना पूरितं सर्वं महाकल्पाम्बुना यथा ॥ १० ॥

इति परमहंसपरिव्राजकाचार्यशंकराचार्यविरचिता निर्गुणस्य निर्द्रव्यमानसिकपूजा समाप्ता ॥

६६१ मुद्राप्रकाशः-रामकिशोरः ।

आ.–द्रुहिणहरिहया[रा]द्यैर्देववृन्दैर्नमस्यं ददद‌भिमतमर्थं भक्तिभाजां जनानाम् ॥

परिहृतसकलार्थैर्योगिभिर्ध्यायमानं हरचरणसरोजं क्षेमकामा भजध्वम् ॥ १ ॥

नत्वा गुरुपदं रामकिशोरेणेष्टसिद्धिदम् ॥ साधकानां मुदे मुद्राप्रकाशोऽयं विरच्यते ॥ २ ॥

च.–संपूर्णोऽयं परिच्छेदः ॥

योे जज्ञे सुकृती धरासुरवराद्धीरोत्तमाद्राधवस्तस्माद्रामकिशोर ईश्वरसमाद्यो रुद्रनारायणात् ॥

जातो युग्मशरस्थिराधरधरामाने शकाब्दे गते तेनासौ त्रिपुरारिराजनगरे मुद्राप्रकाशः कृतः ॥

इति श्रीरामकिशोरशर्मविरचितमुद्राप्रकाशः समाप्तः ॥

६६२ यन्त्रचन्द्रिका-काशीनाथः ।

आ.–विश्वेश्वरं नमस्कृत्य मातरं पितरं तथा ॥ काशीनाथः प्रतनुते सिद्धिदां यंत्रचंद्रिकाम् ॥

च.–नित्याचिंता[त्य]स्वात्मशुद्धिकृत्यमात्मवतां सदा ॥ विश्वेश्वरं विशालाक्षीं ढुंढिराजं च माधवम् ॥

दण्डपाणिं कालराजं स्मरन्सिद्धिमवाप्नुयात् ॥ इति दिक् ॥

इति श्रीभडोपनामकशिष्यरामभट्टांगजजयरामभट्टाभिधशिवभक्तसूनुमन्त्रप्रवीणदक्षिणाचारमतप्रवर्त्तककाशीनाथविरचिता यंत्रचंद्रिका समाप्ता ॥

६६३ योगिनीहृदयटीका-अमृतानन्दनाथयोगी ।

आ.–जगद्द्वंद्वाविंतौ गणपबटुकौ विश्वविनतौ जगद्रक्षाशीलौ जयनिरतसाहित्यवरदौ

रथाङ्गे सन्नद्धौ रविशशिकृशानूज्ज्वलदृशौ मयि स्यातां रक्षापरवशधियौ मद्गुरुमयौ ॥ १ ॥

यन्नित्यं ज्योतिषां ज्योतिर्जयत्येकमनुत्तरम् ॥ न तद्भासयते सूर्यो न शशांको न तारकाः ॥ २ ॥

विमर्शरूपिणी शक्तिरस्य विश्वगुरोः परा ॥ परिस्फुरति सैकापि नानानामानुरूपिणी ॥ ३ ॥

पश्यंत्यादिक्रमादेतौ जातौ प्रश्नोत्तरात्मना ॥ तंत्रावतारं तन्वी[न्वा] ते सर्वत्रानुजिघृक्षया ॥ ४ ॥

तद्वामकेश्वरे तंत्रे सूचितार्थान्परापरान् ॥ व्यक्तीकर्तुं प्रयत्नेन योगिनीहृदयेधुना ॥ ५ ॥

मानुषीहृदयं मर्त्यो वेत्ति नैकोपि तत्त्वतः ॥ योगिनीहृदयं ज्ञातुं कः समर्थः शिवं विना ॥ ६ ॥

अनन्योद्घाटितं दिव्यागमकोशगृहांतरम् ॥ उद्घाट्यते मयेदानीं महार्घो गृह्यतां बुधैः ॥ ७ ॥

तदनेकार्थसंदर्भं नानासंकेतसंकुलम् ॥ विवृणोम्यमृतानंदः शिवयोरेव शासनात् ॥ ८ ॥

अन्यथावादिसंसारे केनेदं व्याकृतं पुरा ॥ तदा न किं संति संतः किं वा नात्र प्रयोजनम् ॥ ९ ॥

शिवादिगुरुपर्यंतं पारंपर्य्यक्रमागतम् ॥ एतज्ज्ञानं मया लब्धमक्रमाणामगोचरम् ॥ १० ॥

इह खलु भगवान् प्रकाशमूर्त्तिः परमशिवः स्वात्मानं विमर्शांशेन विभज्य पश्यन्त्यात्मादिक्रमात्पृच्छाति । श्रीदेव्युवाचेति ।

शिव एवाहं वैखरीपर्यंतं व्यावृत्य विमर्शांशेन पृष्टवानिति यावत् ॥

च.–शिवेनातिरहस्यत्वादविस्पष्टतयोदितम् ॥ तद्रूपनाथचरणाद्विवृतं मोक्षमच्युतम् ॥

इति श्रीमत्परमयोगीन्द्रपुण्यानंदशिष्यामृतानंदनाथयोगिप्रवरविरचितायां योगीनीहृदयदीपिकायां पूजासंकेतस्तृतीयः समाप्तः ॥ ३ ॥

६६४ राममहिम्नः स्तोत्रम्-विजयरामाचार्यः ।

आ.—महामोहावर्त्ते पतितमिह मां ते शरणगं शरण्यस्त्वत्तोऽन्यः प्रभवति न कोऽप्यत्र जगति ॥
अतस्त्वत्पादांभोरुहयुगलमाश्रित्य नितरामिति[ती]हे संसाराद्वृजिननिचयादुद्धर विभो ॥ १ ॥
च.—मोहश्चेद्ध्यानयोगे मम भवतु पुनर्मत्सरोमत्सरे वै त्वत्तोऽ—द्रामसौख्यस्थितिमिह नितरां नैव यस्यापि भूमौ ॥ ८५ ॥
इति श्रीमच्चतुर्भुजाचार्य्यचरणसरोजनिवसितमनश्चंचरीकास्वादितमकरंदश्रीमद्विजयरामाचार्यविरचितं श्रीराममहिम्नः स्तोत्रं समाप्तम् ॥

६६५ लावण्यलहरी-केशवः ।

आ.—भवानि स्तोतुं त्वां प्रभवति चतुर्भिर्न वदनैः प्रजानामीशानस्त्रिपुरमथनः पंचभिरपि ॥
कुमारः षड्भिर्वा दशशतमुखैरप्यहिपतिस्तदन्येषां केषां कथय कथमस्मिन्नवसरः ॥ १ ॥
च.—श्रीलौगक्षिकुलारविंदतरणिर्माध्यंदिनाम्नायविन्मीमांसायुगतर्कतंत्रचतुरः साहित्यरत्नाकरः ॥
गौरीसंस्तुतिमाततान सुकृती गोदातटप्रोल्लसत्पुण्यस्तंभनिवासिकेशवसुताऽनंतात्मजः केशवः ॥ २८ ॥
संसारसिंधुलहरीदूरीकरणचातुरीम् ॥ गौरीलावण्यलहरीमुररीकुरुतामिमाम् ॥ २९ ॥
इति श्रीमाध्यंदिनीयलौगाक्षिगोत्रसंभूतसकलपण्डितमण्डलाकारचूडामणिश्रीमद्भट्टकेशवसुतानंतभट्टसुतकेशवविरचिता लावण्यलहरी संपूर्णा ॥ लि० सं० १७८३ ॥

६६६ वरिवस्यारहस्यं सटीकम्-भासुरानन्दनाथः ।

आ.—विद्यानां चैव मनूनां मनुसंख्यानां च विद्यानां हि रहः ॥ उपदेष्टा जयतितरां नरसिंहानंदनाथगुरुः ॥
वरिवस्यारहस्याख्यो ग्रंथो यः स्वेन निर्मितः ॥ तत्र दुर्घटशब्दानामर्थः संक्षिप्य कथ्यते ॥
च.—गुरुचरणैकसहायो भास्कररायो जगन्मातुः ॥ वरिवस्यातिरहस्यं वीरनमस्यं प्रजग्रंथ ॥ १६५ ॥
वीरैरहमिरणांगणे इदमो वैरिणो नाशं कुर्वाणैः परापंचाशिकादौ प्रसिद्धैरिति सर्वमनवद्यम् ॥ १६५ ॥
इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणसर्वतंत्रस्वतंत्रश्रीनृसिंहानंदनाथचरणारविंदमिलिंदेन श्रीमद्गंभीरराज-भारतीदीक्षितात्मजेन भास्कररायापरनाम्ना भासुरानंदनाथेन प्रणीतं वरिवस्यारहस्यं सव्याख्यं समाप्तिमगमत् ॥

६६७ विद्योपास्तिमहानिधिः-शिवरामः ।

आ.—तद्धामाविजयत्यनंतविभवं यत्तारकव्याहृतिप्रासादार्कगजांगवर्णविजयादिव्यात्मवाक्यात्मताम् ॥
गायत्रीललितात्मतां च विलसद्बिंदुत्रयीविग्रहां भक्तेच्छावशतः प्रयाति सकलातीतं जगद्विग्रहम् ॥ १ ॥
तंत्रराजरहस्यार्थान्पद्मपादप्रसादतः ॥ याधिगम्याकरोत्सूत्रं तां वंदे बिम्बसुंदरीम् ॥ २ ॥
नानैकागमतन्मताह्निकमहाविस्तारशंकातमोव्याप्तस्वांतशिवोपसक्तिविरमक्लेशाकुलानां सताम् ॥
विद्योपास्तिसुखानुभूतिसुगमोपायाय संग्रथ्यते ताहक्कादिमतार्थसंततिरिह श्रीमत्प्रकाशात्मना ॥ ३ ॥

स्वतंत्रतंत्रसंप्रोक्तविद्योपास्तिमहानिधिः ॥ प्रकाशमागतोनंन्तपुण्याय सुभगोदयः ॥ ४ ॥
प्रतिष्ठानिधिराद्योऽत्र नाथपूजानिधिः परः ॥ विद्यानित्यक्रमनिधिः संक्षेपार्चानिधिद्वयम् ॥ ५ ॥
महाचक्रगविश्वात्मविग्रहार्चानिधिस्ततः ॥ नैमित्तिकनिधिः पूर्णाभिषेकाख्यः प्रकीर्णकः ॥ ६ ॥
नवोपनिधयो ह्यत्र विद्योपास्तिमहानिधौ ॥ विद्योद्धारस्तु नाथैकलभ्यत्वान्नेह कीर्त्यते ॥ ७ ॥

च.—इति श्रीमदशेषागमपरिकर्मितांतःकरणसुभगानंदनाथशिष्यगोदापरिसरसमीरपुनीतपुण्यस्तंभनिवासिटुल्लूपनामकभट्टगोपालतनूजशिवरामप्रकाशीये[शिते] विद्योपास्तिमहानिधौ नित्योपासनादिप्रकाशनपरः प्रकीर्णनिधिर्नवमः ॥ ९ ॥
केरलामृतसिंधूत्थद्विजराजः श्रुतिप्रियः ॥ सुभगानंदनाथाख्यः सर्वतंत्रार्थतत्त्ववित् ॥ १ ॥
पुरीं वाराणसीं गच्छन्मुक्तसंगः स्वदेशतः ॥ दैवात्प्राप्तस्त्रिसंध्याख्यं क्षेत्रं त्र्यंबकभूषितम् ॥ २ ॥
जटाजूटाटवीतिर्यग्गंगा यत्र शिवापतेः ॥ गंगाधरत्वं लोकानां प्रत्यक्षं दर्शयत्यसौ ॥ ३ ॥
स वसंस्तत्र दिव्येन चक्षुषा ब्राह्मणात्मजान् ॥ परीक्षयन्पंक्तियोग्यगुणस्तोमविभूषितान् ॥ ४ ॥
गणरात्रमथैकस्मिन्दिने संपूजयन् शिवाम् ॥ तत्क्षेत्रसिद्धिदस्थाने त्रिसंध्येश्वरसन्निधौ ॥ ५ ॥
कौशिकान्वयसंभूतभट्टगोपालसंभवम् ॥ शांडिल्यवंशसम्भूतद्वारिकामातृनन्दनम् ॥ ६ ॥
प्रदक्षिणीकृत्य शिवं कामदं त्र्यंबकेश्वरम् ॥ सुनियत्येरितं द्रष्टुं त्रिसंध्येश्वरमागतम् ॥ ७ ॥
तत्रत्यमपि केनापि पुण्यस्तंभकृतस्थितिम् ॥ सिषेवयिषया शंभोः पुनस्तत्र निवासिनम् ॥ ८ ॥
दृष्ट्वानुकंप्य विधिवद्दीक्षयित्वा निजेच्छया ॥ तंत्राण्यध्यापयामास प्राधान्यात्संप्रदायतः ॥ ९ ॥
अभिषिच्य प्रकाशं यं शिवरामाभिधं व्यधात् ॥ स तत्कटाक्षविज्ञानतंत्रसारो मुहुर्मुहुः ॥ १० ॥
विमृश्य तानि गणशो वर्षाण्यथ तदाशया ॥ नानातंत्रनिबद्धार्थग्रंथोपप्लुतचेतसाम् ॥ ११ ॥
संप्रदायविदां सम्यगुपास्त्यै गुरुसंमतात् ॥ तंत्रात्कादिमतात्पूर्णादुद्धृत्यार्थान्निधीन्नव ॥ १२ ॥
अमुना पूरयामास विद्योपास्तिमहानिधौ ॥ एतानालोच्य विधिवन्निर्वृत्ताः स्वार्थलाभतः ॥ १३ ॥
गुरुभक्तात्मविज्ञानाः सर्वभूतानुकंपिनः ॥ भवंतु ललितात्मानः संप्रदायमहोदयाः ॥ १४ ॥
याताब्देषु कलावंगखाष्टवेदमितेषु ४८०६ वै ॥ शकाब्देषु च यातेषु सप्तद्वयंगेंदुसंख्यया १६२७ ॥ १५ ॥
पार्थवीयनभस्याष्टमंगलायां कुजाहनि ॥ सस्वभूमिमरुद्वह्निनित्यायां च चरोदये ॥ १६ ॥
त्रैलोक्यमोहनेकारे परावृत्तेभितोततः ॥ समाप्तिमगमद्ग्रंथो विद्योपास्तिमहानिधिः ॥ १७ ॥

६६८ वैकुण्ठस्तोत्रं सटीकम् । मू०-श्रीवत्साङ्कमिश्रः । टी०-तच्छिष्यः ।

मू. आ.—यो नित्यमच्युतपदांबुजयुग्मरुक्मव्यामोहितस्तदितराणि तृणाय मेने ॥
अस्मद्गुरोर्भगवतोऽस्य दयैकसिंधो रामानुजस्य चरणौ शरणं प्रपद्ये ॥ १ ॥

टी. आ.—श्रीवेंकटाचार्य्यवर्य्यस्य चरणौ शरणं वृणे ॥ यदीयसेवा सर्वेषां सूते तत्त्वार्थनिर्णयम् ॥ १ ॥
वेदांतवेद्यविभवं विविधावतारमादित्यवर्णमुदितं तमसः परस्तात् ॥
वैकुंठनायकमनायकमादिमूलं पत्नीपरिच्छदविभूतियुतं नमामि ॥ २ ॥
यो विष्णुरेव परतत्त्वमिति प्रतिज्ञां प्रत्यर्थिसंसदि समर्थयते स्म सत्याम् ॥
वेदांतवाक्यगतिभिर्विविधैश्च तर्कैः श्रीवत्सचिह्नगुरुमेनमुपाश्रयामि ॥ ३ ॥

अथ भगवद्भाष्यकारसकाशात्समधिगतपरापरतत्त्वयाथार्थ्यज्ञानः श्रीवत्सांकमिश्रो वेदांतैकसमधिगम्यं पत्नीपरिच्छद-समेतं परमप्राप्यं नित्यमुक्तभोग्यं श्रीवैकुंठनाथं वेदांतवाक्यार्थानुसंधानक्रमेण सकलजगदुज्जीवनार्थं स्वोज्जीवनार्थं च स्तोतुकामः प्रथमं स्वाचार्यं प्रबंधादौ प्रणमति पादांबुजयु — — — — — —

मू. च.–निर्बंध एष यदि ते यदशेषवैधसंसेविनो वरद रक्षसि नेतरांस्त्वम् ॥
तर्हि त्वमेवमपि शक्यविकारवांछाप्रत्यूहशांतिमितरच्च विधेहि विश्वम् ॥ १०० ॥
इति श्रीमद्रामानुजाचार्यशिष्यश्रीवत्सांकमिश्रविरचितं वैकुंठस्तोत्रं सम्पूर्णम् ॥

टी. च.–कर्मज्ञानभक्तिसंपादने वाहं रक्षणीय इति सर्वं समंजसम् ॥ १ ॥

६६९ शारदातिलकं सटीकम् । टी०-राघवभट्टः ।

मू. आ.–नित्यानंदवपुर्निरंतरगलत्पंचाशदर्णैः क्रमाद्व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् ॥
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमंतर्गतं तद्वोऽव्यादनिशं शशांकसदनं वाचामधीशं महः ॥ १ ॥
अंतःस्मितोल्लसितमिंदुकलावतंसमिन्दीवरोदरसहोदरनेत्रशोभि ॥
हेतुस्त्रिलोकविभवस्य नवेंदुमौलेरंतःपुरं दिशतु मंगलमादराद्वः ॥ २ ॥
संसारसिंधोस्तरणैकहेतून्वन्दे गुरून्मूर्ध्नि शिवस्वभावान् ॥ रजांसि येषां पदपंकजानां तीर्थाभिषेकश्रियमावहंति ॥ ३ ॥
सारं वक्ष्यामि तंत्राणां शारदातिलकं शुभम् ॥ धर्मार्थकाममोक्षाणां प्राप्तं प्रथमकारणम् ॥ ४ ॥
शब्दार्थसृष्टिर्मुनिभिश्छंदोभिर्दैवतैः सह ॥ विधिश्च मंत्रयंत्राणां तंत्रेऽस्मिन्नभिधीयते ॥ ५ ॥

टी. आ.–श्रीकंठं निजतांडवप्रणवताप्रोद्दाममोदोदयं पश्यंत्याः कुतुकाद्भुतप्रियतया संजातभावं मुहुः ॥
मंदांदोलितमुग्धसिंधुलहरीलीलालसं लोचनप्रांतालोकनमातनोतु भवतां भूतिं भवान्याः शुभम् ॥ १ ॥
संसेव्यमानमृषिभिः सनकादिमुख्यैर्योगैकगम्यमविनश्वरमादिभूतम् ॥
संसारहृन्निगमसारविचारसारं शैवं महो मनसि मे मुदमादधातु ॥ २ ॥
भद्राय भवतां भूयाद्भारती भक्तिभाविता ॥ स्मृतेरुज्जृंभते यस्या वाग्विलासोऽतिदुर्लभः ॥ ३ ॥
शारदातिलके तंत्रे गुरूणामुपदेशतः ॥ पदार्थादर्शटीकेयं राघवेण विरच्यते ॥ ४ ॥
संप्रदायागतं किंचिद्भणितागमसंमतम् ॥ यदुक्तमत्र तत्संतो विचारयितुमर्हथ ॥ ५ ॥
पिशुनो दूषकश्चेत्स्यान्न तद्दोषाय दूषणम् ॥ दोषावहा हि विकृतिर्नैस्वभावोऽतिदुस्त्यजः ॥ ६ ॥
अथेश्वरः सर्वा अपि श्रुतीर्भवपाशबद्धानां जंतूनां स्वर्गाय मुक्तये च समुपदिशति स्म अन्येषां स्मृतिशास्त्रादीनां तन्मूल-कत्वेन तदर्थप्रतिपादकत्वेन प्रामाण्यमिति सुप्रसिद्धतरम् ॥

मू. च.–अनाद्यन्ता शंभोर्वपुषि कलितार्द्धेन वपुषा जगद्रूपं शश्वत्सृजति महनीयामपि गिरम् ॥
सदर्थां शब्दार्थस्तनभरनतां शंकरवधूर्भवद्भूत्यै भूयाद्भवजनितदुःखौघशमनी ॥
इति श्रीशारदातिलके पंचविंशतितमः पटलः ॥ २५ ॥

टी. च.–पुरं गोदावर्या विलसदुपकंठे जनततं जनस्थानं नाम प्रथितमभवद्दक्षिणदिशि ॥
महाराष्ट्रे देशे जनकतनयालक्ष्मणवृतः पुरा रामस्तस्मिन्नवसदतितुष्टेन मनसा ॥ १ ॥

तस्मिन्पुरे ब्राह्मणसत्तमानां कुले विशुद्धे महति प्रसिद्धे ॥ श्रीभट्टरामेश्वर इत्युदारो गुणैरभूद्बादिमहेभसिंहः ॥ २ ॥
तस्मादभूत्तीक्ष्णकुशाग्रबुद्धिः श्रीभट्टपृथ्वीधरनामधेयः ॥ अनेकधाध्यायपदेश्य[ष]भाट्टवेदांतशास्त्रं फणिभाषितानि ॥३॥
भूगीर्वाणार्य्यवर्य्यो दिवि कृतवसतिर्यद्भयादेव शंके शेषः पातालमूलं स च सपदि पराभूतिभीत्या विवेश ॥
अन्येषां कैव वार्त्ता कृतकृतकवचश्चापलानां कृतं तैः सम्यक् शक्योऽस्य वक्तुं न हि वदनशतैरप्यशेषप्रभावः ॥ ४ ॥
कैश्चिद्दिनैरतिपवित्रचरित्र एष वाराणसीमभिगमच्छिवराजधानीम् ॥
तत्रैव वासमकरोत्तदनुप्रतीतकायावसानमवधिं परिचिंत्य धीरः ॥ ५ ॥
तस्माद्राघवभट्ट एष समभूद्वेदांतसन्न्यायवित्ख्यातो भट्टनये समस्तगणिते साहित्यरत्नाकरः ॥
आयुर्वेदनिधिः कलासु कुशलः कामार्थशास्त्रे गुरुः संगीते निपुणः सदा निगमधेः पारं प्रयातः परम् ॥ ६ ॥
श्रीदुर्गे गणनायक ग्रहगुरो गोविंद गौरीपते युष्मानर्थवशेन तेन शिरसा सोयं प्रबद्धोञ्जलिः ॥
मंत्रार्चादिविवेचने यदि भवेद्बालत्वमत्र भ्रमात्का[त्क्वा]चित्कं मम भक्तिभावितहृदो दासस्य तत्क्षम्यताम् ॥ ७ ॥
अत्युग्रं तीक्ष्णधीभिर्जगदुपकृतये राघवो यद्विवव्रे गूढार्थं मन्त्रशास्त्रं निधिमिव परमं संप्रदायांजुने[यार्जवे]न ॥
संतः संतोषमस्मिन्वितरत तरसा स्वादितः स्वस्वकामाद्दृष्ट्वा दौष्ट्यं स्वकीयं अहितहितधिया नान्यथार्थागमो वः॥८॥
पिशुनजनोंतर्मलिनः परगुणसंतोषविषसुखमतिः ॥ तत्र मनो न विषीदति दूषणमात्रानु यत्र विरतोऽयम् ॥ ९ ॥
कायस्था इव वाचकाः कति च न प्रायेण मूका इव श्रोतारस्त्वपरे शुका इव परे साध्रुप्रलापाः पुनः ॥
ग्रंथग्रंथिविवेचनैकचतुरा ये कोविदाः केवलं द्वित्रास्ते तदुदीरितावगतये विज्ञाः पुनः पञ्चषाः ॥ १० ॥
आकाशेषुशरक्ष्मापरिमिते १५५० रौद्राभिधे वत्सरे पौषे मासि सिते दले रवितिथौ पक्षे च सिद्ध्यन्विते ॥
तंत्रेऽस्मिन्सुधिया व्यधायि रुचिरा श्रीराघवेण स्फुटा टीका सद्गुरुसंप्रदायविमला विश्वेशपुर्यामिति ॥ ११ ॥
इति श्रीशारदातिलकटीकायां राघवभट्टविरचितायां सत्संप्रदायकृतव्याख्यायां पदार्थादर्शाभिख्यायां पंचविंशः पटलः ॥ २५ ॥

६७० शिवताण्डवं सटीकम् । टी०-प्रेमनिधिशर्मा ।

टी. आ—स्वभक्तत्वाभावेऽप्यपरसुरभक्तत्वविरहात्स्वपाल्यत्वं मत्वा रुचिरतमकामात[न] नुजनम् ॥
प्रयच्छंतं त्वय्यप्यकृतवसतीन्सत्वरतरं पतिं माहिष्मत्याः कमपि भज चेतः प्रतिदिनम् ॥ १ ॥
कौबेर्य्यां दिशि ताकमेत्यभिधया ख्यातोऽस्ति कश्चिद्गिरिर्गंडक्याः सविधे हि तत्र नृपतिः श्रीसाहिमल्लोऽभवत् ॥
यं प्राप्याऽमृतभानुमानुबलभित्कंदर्प्पकल्पद्रुतासंदेहं बहुवेदिनोपि मनुजा आकल्पमापेदिरे ॥ २ ॥
तस्माज्जातः श्रीघनश्याममल्लः संतं तातं राज्यलक्ष्मीर्विहाय ॥
यवत [व्यक्तं] भेजे सूचितं तद्धि कोन्यो लक्ष्मीनाथः श्रीघनश्यामदेवात् ॥ ३ ॥
तदीयः सुतः श्रीमलैवर्म्मनामा नृपालः स्वदं[वं]शावतंसीभवंतः ॥
वरे यं यमाहुर्हि संतोऽयमीशो जयत्यर्थिसार्थार्थितायुष्यवृद्धिः ॥ ४ ॥
सत्याकेत्रांगिरो भवंति तदनुध्यानेन तस्या गुणा ध्यातर्य्येवमसौ नृपो भगवतः श्रीरामचंद्रस्य यत् ॥
ध्यानानेककलत्रता सुरवरावासोल्लसत्सेतुता शंभुस्थापकतादिकानिह गुणानावासयत्युत्तमान् ॥ ५ ॥

अमुष्यैवानल्पा भवति करुणा लोकनिवहे सतां दत्वा द्रव्यप्रभृति बहुदुःखं शमयतः ॥
समुद्रा व्यर्थ्यौंघौर्दिव दमितदुःखव्ययकृते दुरूहां यन्त्रालीं प्रकटयितुमाज्ञां रचयतः ॥ ६ ॥
— ॥
यंत्रावलीं रचयतः शिवतोपि चासौ भूयान्कृपालुरिह तां प्रकटीकरिष्यन् ॥ ७ ॥
नृपालेनादिष्टो दिनकरगुरूच्छिष्टभजनः प्रभोर्माहिष्मत्याश्वरणनखशीतांशुकिरणैः ॥
गतापाताज्ञानव्रजतिमिरशब्दार्थरचनः कथं बालो[लः] कुर्यादयमपि जनो ग्रंथममलम् ॥ ८ ॥
शिवतांडवयंत्राणां ग्रंथार्थादर्शतां गतः ॥ मल्लादर्शो मम ग्रंथः परं जयतु पंडितान् ॥ ९ ॥
शिवतांडवटीकेयं स्वल्पाल्पापि सुधीरणां — — — ॥ व्याख्येयार्थगुणोघैः सर्वार्थाकर्षिणी भवति ॥ १० ॥
अथ जगदेव स्वस्वपूर्वजन्मसंचितदुरदृष्टसामर्थ्यनियमितदारिद्र्यादिनानाविधदुःखपंकनिमग्नमुद्दिधीर्षुः परमकारुणिको भगवान्सदाशिवः संहितोड्डामरयामलादिनानातंत्रेषु रुद्रदीपमहादीपजपहोमपुत्तलादिरूपममितमुपायमुदाजहार। तस्य चासामर्थ्यानधिकारादिना न सर्वविषयत्वं भवतीत्यपरितुष्टोऽल्पक्लेशतो धारणामात्रादेव समीहितपरंपरामव्यभिचाराद्दुल्ला-सयंतीमंकयंत्रावलीमाविर्भावयितुं नेदमजिज्ञासवेनापि स्वप्रियं भावमदधात्तेनापि स्वभक्तायोपदेश्यामिति सूचयितुं शिवतांडवाख्ये तंत्रविशेषे देवीशरीरं प्रविष्टत्वेन स्वीकृत्य तदुत्तरकथनव्याजेन पूर्वं वक्ष्यमाणयंत्रोपयोगिपदार्थसार्थमाह दक्षिणामूर्तिरुवाचेत्यादिना ॥

मू. आ.—दक्षिणामूर्तिरुवाच। अथ देवि प्रवक्ष्यामि परमाद्भुतकारणम् ॥ यन्न कस्यचिदाख्यातं तत्ते वक्ष्यामि सांप्रतम् ॥१॥

मू. च.—डाकिन्यादिभयं न चौरशिखिनोर्द्वारि स्थिते वेश्मनां नारीगर्भविबन्धमोक्षमचिरात्प्राप्नोत्यवश्यं भुवीति ॥ ९ ॥
इति श्रीदक्षिणामूर्त्तिपार्वतीसंवादे सर्वतंत्रोत्तमोत्तमे नगेन्द्रप्रमाणे शिवतांडवे षोडशकोष्ठलिखनप्रकारकथनं चतुर्दशः पटलः ॥ १४ ॥

टी. च.—अधीतं नैवैतन्न च सुगमवाक्यं न मिलितो मदाशंकोच्छेदी न हि च मम सिद्धत्वपदवी ॥
तथाप्येष ग्रंथो यदिह परिपूर्णोऽत्र करुणा प्रभोर्माहिष्मत्याश्वरणयुगयोर्हेतुरुदितः ॥ १ ॥
शिवादिष्टे तंत्रे विषममदकध्वांतनिबिडे बुधानां मत्याथ व्रजनकृतिकं चेन्मम गतिः ॥
अखंडा तर्हि श्रीदिनकरगुरोर्हैहयपतेः प्रदीपस्योपास्तेरपि किमपि जाने फलमिति ॥ २ ॥
रविविश्वशक्रपटलैर्व्याख्यातैः सर्वमेवेधम्[वमनवद्यम्] ॥ व्याख्यातप्रायमिदं तंत्रं तस्माद्विरम्यतां चेतः ॥ ३ ॥
हृद्या द्यन्यनिबंधलोपजनिका हृद्या तु मद्दास्यकृद्गुता व्यर्थपरिश्रमा प्रकटिता दुष्टेषु दोषावहा ॥
सम्यक्चेतसि भाविताऽन्यविषयव्यावृत्तिदा भाविता दुर्बोधासिकृते विचित्रचरिता त्वं केशवायार्ष्पिता ॥ ४ ॥
महर्षो[महार्थो]पि ग्रंथः खलखलगतः खंडितपदः समल्पस[ल्पार्थो]ग्रंथोप्यमलगृहगः पूजितपदः ॥
भवत्यस्माज्जाने खिलविषयगौ दूषणगुणौ स्वभावाभ्युत्थानौ पितुखलबुधाधीनजनकौ ॥ ५ ॥
शिवतांडवटीकेयं मल्लादर्शाभिधा चार्वी ॥ प्रेमनिधिशर्मविहिता दात्री स्याद्विबुधप्रेमनिर्वितायाः ॥ ६ ॥
य[या]त्पोद्योतमती सती गुणवती माता पितोमापतिर्भामप्रेमनिधिर्गुरुर्दिनकरः कूर्मांचलो जन्मभूः ॥
सूपास्यं कृतवीर्य्यजाच्युतपदं वाराणसीवासभूर्मल्लादर्श इति श्रुतो विरचितो ग्रंथोमुनी[ना]धीमता ॥ ७ ॥
इति श्रीशिवतांडवटीका समाप्ता ॥

६७१ शिवपूजातरङ्गिणी-काशीनाथः ।

आ.–विश्वनाथपदद्वंद्वं निधाय हृदि सुन्दरम्॥ काशीनाथः प्रतनुते शिवपूजातरंगिणीम् ॥ १ ॥
श्रीमान्साधकेंद्रो ब्राह्मे मुहूर्ते उत्थाय स्वशिरसि गुरोः.................
च.–स्वयमपि भुक्त्वा शिवरूपः सुखं विहरेत् ॥
इति श्रीमद्भडोपनामकजयरामभट्टसुंगवाडाथरीगर्भसंभवकाशीनाथविरचिता शिवपूजातरंगिणी समाप्ता ॥

६७२ श्रीस्तवः सटीकः । मू०-श्रीवत्साङ्कमिश्रः ।

मू. आ.–स्वस्ति श्रीर्दिशतादशेषजगतां सर्गोपसर्गस्थितीः स्वर्गं दुर्गतिमापवर्गिकपदं सर्वं च कुर्वन्हरिः ॥
यस्या वीक्ष्य मुखं तदिंगितपराधीनो विधत्तेऽखिलं क्रीडेयं खलु नान्यथास्प[स्य]रसदा स्यादेकरस्यातया ॥ १ ॥
टी. आ.–अथ सर्वेश्वरानुरूपगुणविभवां सकलचेतनानां सकलपुरुषार्थप्राप्तौ पुरुषकारभूतां सर्वेश्वरवत्स्वयमपि प्राप्यप्रापक-भूतां लक्ष्मीं स्तोतुकामः श्रीवत्सांकमिश्रः सकलजगज्जीवनार्थं आशीर्वादमेव प्रबंधमुखेन निबध्नाति । स्वस्तीति ॥
मू. च.–यस्याः कटाक्षवीक्षाक्षणलक्षिता महेशाः स्युः ॥ श्रीरंगराजमहिषी श्रीसामभिवीक्षतां लक्ष्मीः ॥ ११ ॥

६७३ सिंहसिद्धान्तसिन्धुः-शिवानन्दभट्टः ।

आ.–यस्यांघ्रिद्वयपूजनेन निखिलाः सिद्धीर्लभंते नरा वृद्धीः प्राप्य वसंति वेश्मसु परास्तेषां समाः संपदः ॥
भक्तस्वान्तनितान्तमोहदलने दक्षं विपक्षं वरं विघ्नानां प्रणमाम्यनारतमहं तं श्रीगणाधीश्वरम् ॥ १ ॥
सर्वं संतमसा वृतं जगदिदं भाभिः समुद्भासयन्नम्भोजानि विकासयन्विरहिणः कोकान्समाश्वासयन् ॥
शीतांशुं परिहासयन्गतरुचिं संत्रासयन्वैरिणो भक्तक्लेशमुदासयन्स भवतु क्षेमाय भासां पतिः ॥ २ ॥
कर्पूरस्फुटकैरवेश्वरगिरिप्रालेयगोत्राधरः स्वः सिंधूदकपूर्णशारदविधुस्वच्छप्रभाभासुराम् ॥
सद्वृत्तामलमौक्तिकावलिकृतैर्भूषागणैर्भूषितां वाग्गुंपा[फा]द्भुतशक्तिदाननिपुणां वागीश्वरीमाश्रये ॥ ३ ॥...........
दृप्यद्वैरिसमुच्चयक्षयकरः कीर्तिद्युतिद्योतिताशेषाकाशदिगंतरः पटुतरः प्राज्ञौघवित्तार्पणे ॥
राजद्राजसभासभाजितगुणग्रामोभिरामोऽभवत् भक्तः श्रीनृहरेर्विभाति भुवने बुंदेलभूपान्वयः ॥ ७ ॥
यत्पाणी नृहरेः सदैव चरणावानर्चतुः सादरं दाने चांघ्रियुगं महीदिविषदां प्रक्षालयांचक्रतुः ॥
युद्धे चिक्षिपतुश्च मार्गणगणं हंतुं परानीकिनीं त्रैलोक्यप्रथिताह्वयो मधुकरो राजा स यत्राभवत् ॥ ८ ॥
संफुल्लानि तनोति सर्वसुजनस्वांतांबुजन्मानि या सौख्यं व्यातनुते श्रुता श्रवणयोः स्तुत्या कवींद्रव्रजैः ॥
स्वर्लोके बलिसद्मनिक्षितितले यस्याः प्रकाशोऽनिशं ख्याता चित्रचरित्रयुग्विजयते यत्कीर्तिसत्कौमुदी ॥ ९ ॥
यदीयनाराचहता रणाग्रे नाराचतामापुरहो द्विषन्तः ॥
तीक्ष्णाः सपक्षास्तपनस्य बिम्बं भित्वा द्रुतं यद्विविशुर्दिवं ते ॥ १० ॥
सन्मानदाननिपुणस्तु तदात्मजन्मा सन्मानसस्थहरिभक्तिरुदारशक्तिः ॥
कौक्षेयकक्षतविपक्षजनो जगत्यां श्रीरामसादिरिति नाम नृपो बभूव ॥ ११ ॥

रामास्त्रयो भक्तिभरेण तुष्टास्तस्मै ददुः स्वीयगुणान्समस्तान् ॥
लोकास्ततस्तं प्रथितप्रभावं श्रीराम इत्येव समाख्ययोचुः ॥ १२ ॥
युद्धे युद्धविदोऽर्जुनं नयविधौ धीरा गिरामीश्वरं सौंदर्ये सुदृशः स्मरं महसि यत्तेजस्विनो भास्करम् ॥
धर्मे धर्मविदोऽपि धर्मतनयं दानेऽर्थिसार्था बलिं मन्यंते स्म महीतले समभवच्छ्रीरामसादिर्नृपः ॥ १३ ॥
आसीत्तदीयतनयो विनयोपपन्नः स्वच्छाशयो बहुदयो विबुधव्रजेषु ॥
युद्धे निकाममभयो विनयोर्जितश्रीः संग्रामसाहिरिति भूमिपतिः प्रसिद्धः ॥ १४ ॥
यत्सैन्ये चलिते प्रचेलुरचला जातास्थिराप्यस्थिरा धूलीभिर्निचितेऽबरे समभवद्भास्वानभास्वानलम् ॥
अत्युच्चध्वजसंकुले सुरपथे भूदासगोनाशुगो मेदिन्यां स बभूव भूरिविभवः संग्रामसाहिर्नृपः ॥ १५ ॥
तस्यात्मजो बलरजोभररुद्धभानुर्दृप्तद्विषद्दलनतीव्रमदः कृशानुः ॥
अत्यद्भुतो गुणगणैः प्रथितो धरण्यां श्रीभारतिर्बहुलदानरतो बभूव ॥ १६ ॥
यत्सैन्याखर्ववाजिव्रजखुरनिकरक्षुण्णभूमीरजोभिश्छन्नं मार्त्तण्डबिंबं समभवदखिलं वृष्टिकाले यथाभ्रैः ॥
यस्येभान्वीक्ष्य मेघप्रतिमतनुरुचीन्संपराये जनौघा नाद्रिभ्रांतिं तदायुर्यदिह मघवता संति ते लूनपक्षाः ॥ १७ ॥
तेरुः केपि नदीर्वनेषु विकलाश्चेरुर्निगूढाः परे शैलानारुरुहुः श्रमेण मुमुहुश्चान्ये क्षुधाबाधिताः ॥
भेजुः केचन भिक्षुवेषमपरे रेजुर्वधूरूपिणः श्रुत्वा शत्रुनृपाः प्रयाणपटहं श्रीभारतक्ष्मापतेः ॥ १८ ॥
अत्युच्चैर्द्विरदा घना भटरवो भीमो भृशं गर्जितं दीप्ताः खड्गलताश्च यत्र तडितो बाणास्तु धारोत्कराः ॥
येनेत्थं विषयो व्यधायि समरो मेघागमस्तद्भवा रक्तौघाः सरितोऽसृजन्निरुपमो वीरोद्भवद्भारतः ॥ १९ ॥
यत्कीर्त्तिः कविकीर्त्तनीयमहिमा चक्रे त्रिलोकीं सितां हित्वा यद्रिपुभूभुजामपयशो विद्वेषबुद्ध्यापरम् ॥
तत्तु श्वैत्यमवाप्तुमात्मकलुषं त्यक्तुं द्विजानां पतिं शुभ्रांशुं शरणं गतं तदधुनाप्यास्ते तदंकच्छलात् ॥ २० ॥
यस्माद्दानमवाप्य भूरि भवनं स्वीयं यतामर्थिनां मार्गेऽन्ये मिलिता वनीपकगणास्तद्भूपतो लिप्सवः ॥
तेभ्यस्तैस्तु तथा समीहितधनं दत्तं यथा तोषितास्ते याताः स्वगृहानभूद्भुवि नृपो दातेदृशो भारतः ॥ २१ ॥
तत्सूनुः परिपन्थिमाथिविलसद्वीरोऽतिधीरो रणे वल्गत्तुंगतुरंगनिष्ठुरखुरक्षुण्णक्षमामण्डलः ॥
दानांभःशमितार्थिनैस्थ्यदहनः ख्याताभिधानः क्षितौ देवीसिंहनरेश्वरो निरुपमो राजोत्तमो राजते ॥ २२ ॥
निकामं कामं यो जयति निजरूपेण सुधिया नये देवाचार्य्यं हरिचरणसेवावशमनाः ॥
स किं दारिद्र्यारिर्भुवनगतो लोचनपथं नृपो देवीसिंहो यदसिविपदा विह्वलतमः ॥ २३ ॥
व्यक्तीकुर्वंति दानं मदकलकरिणो विग्रहे यत्स्वकीये तन्मन्ये स्वप्रभूणां स्वविषयकमतीन्बोधयत्येव दानम् ॥
एतत्तद्भावबोधस्त्वपरमभवद्भारताधीशसूनो यत्त्वं मत्तान्मदंभान्वितरसि सततं दानिनो याचकेभ्यः ॥ २४ ॥
देवीसिंहमहीमहेन्द्र भवतः प्रौढप्रतापोदये त्रासादौज्झि परस्परं क्षितितले वैरं समस्तैर्नरैः ॥
तच्चित्रं न यतस्त्वदीयविदुषां गेहेषु वासोऽनिशं हित्वान्योन्यविरोधमद्भुततमो देव्यो[द्विष्ट्यो]रपि श्रीगिरोः ॥ २५ ॥
या नैवोष्णकरं कदापि ददृशुर्यासां न चेलांचलं कंप्रं गंधवहश्चकार न दधुर्भूमौ स्वतल्पात्पदम् ॥
देवीसिंह तवारिवर्गवनिता घर्मेण शुष्कानना वात्याप्रोत्थरजोमलीमसरुचो व्यग्रा भ्रमन्त्यद्रिषु ॥ २६ ॥
देवीसिंह भवद्भयेन रिपवस्त्रस्ताः समस्तास्तथा वाक्यानि ब्रुवते हि यत्र भवतो नामाक्षराणि स्फुटम् ॥
भिक्षां देहि नृपाधिराज न वयं वीरा न सिंधोरपि प्रांते सद्गतिरस्ति देवशरणं त्वं मंथनैको हरिः ॥ २७ ॥

सौंदर्य्ये कुसुमेषयंति विबुधा: श्रीभारतेशात्मजं प्पी[शी]लत्वे शचिकांतयन्ति विनये वागीशयन्ति ह्यमी ॥
दाने कल्पपलाशयंति समरे सेनानयंत्युद्भटे तेजस्युष्णगयंति पालनविधौ श्रीविष्णुयंति क्षितौ ॥ २८ ॥
राजानः केपि शूरा अविधरणिपदे स्थूललक्षा नयज्ञा: केचित्काव्येष्वभिज्ञा नृपतिलक परे केपि सौजन्यवन्तः ॥
देवीसिंह त्वमन्यैः प्रगुणगुणगणैस्तैश्च युक्तस्ततस्ते सम्यद्धोराजवाच्यास्त्वमसि परमिह प्राणतो ब्रह्म यद्वत् ॥ २९ ॥
आसते भुवि नृपा: सहस्रशो भारतात्मज न ते भवत्समाः ॥
नंदने कति न संति शाखिन: कोपि कल्पतरुसन्निभ: श्रुत: ॥ ३० ॥
सिंधुर्यथा निजजलं बहुलं घनेभ्यो विश्राणयन्नपि सदा परिपूर्ण एव ॥
एवं भवानपि ददन्द्रविणं द्विजेभ्यः श्रीभारतात्मज तदाढ्यतमोस्तु नित्यम् ॥ ३१ ॥
यावद्राज्यं विधत्ते विबुधपतिरसौ स्वर्गलोकस्य शक्रः सृष्टिं नाना प्रकारां रचयति रुचिरां यावदार्य: स्वयंभूः ॥
यावल्लोके स्वकीये विलसति विबुधैर्वर्णितः पद्मनाभो देवीसिंहः क्षितीन्द्रः प्रगुणगुणयुतस्तावदव्यादनंताम् ॥ ३२ ॥
आसीत्तस्य गुप्ते[रो]र्गुरुर्गुणगणैर्मंत्राब्धिपारंगमः श्रीगोस्वामिजगन्निवास इति सन्नाम्ना जगद्विश्रुतः ॥
यस्याज्ञावशवर्त्तिनः क्षितिभुजस्ते तेऽभवन्भूरिशो येषां कीर्त्तिरतीव भाति भुवने दाने कृपाणेऽपि च ॥ ३३ ॥
तत्तातस्तु तथाभवद्भवसमः श्रीश्री[नि]वासः कृती ज्ञानोदारकुठारदारितजगज्जाड्योरुभूमीरुहः ॥
नानातंत्रविबोधमाप्य मनुजा यस्यानुकंपानिधेः शिष्या दैवतसेवनैरभिमतामग्रीयसिद्धिं गताः ॥ ३४ ॥
यस्यांघ्रिपद्मकृपया प्रथितः पृथिव्यामेताद्दगत्र जयति स्म जगन्निवासः ॥
यः सर्वसिद्धिसहितो जगति द्विजानां तोषं व्यधादविरतं विविधोपकारैः ॥ ३५ ॥
ज्येष्ठस्तस्य सुतो जनोदितशिवानंदाभिधानः क्षितौ श्रीविद्याचरणारविंदयुगलध्यानैकतानोऽनिशम् ॥
देवीसिंहनृपेण धर्मकलितस्वांतेन संप्रार्थितस्तत्प्रीत्यै वितनोति धार्मिकजनश्रव्यं निबंधोत्तमम् ॥ ३६ ॥
गुरुचरणसरोजानुग्रहप्राप्तबोधः श्रवणजनितभक्तस्वांतभूरिप्रमोदः ॥
निखिलमनुरहस्योद्बोधकोऽयं निबंधो जयतु जगति नाम्ना सिंहसिद्धांतसिंधुः ॥ ३७ ॥
अत्र प्रातःकृत्यमादौ प्रोक्तं स्नानविधिस्ततः ॥ पश्चाद्वासोधारणं च ततस्तिलकधारणम् ॥ ३८ ॥

च.—साधयेदित्यथर्वणलक्षं तत्तद्विधायहयमारैश्च लोहितैः रक्तकरवीरपुष्पैरित्यर्थः ॥
इति श्रीजगन्निवासात्मजगोस्वामिश्रीशिवानन्दभट्टविरचिते सिंहसिद्धांतसिंधौ अष्टाशीतितमस्तरंगः ८८ समाप्तः ॥

६७४ सुदर्शनसंहिता ।

आ.—पार्वत्युवाच । जय शंकर सर्वात्मन्नीलकंठ नमोऽस्तुते ॥ ममैकः संशयश्चास्ति वक्तुमर्हसि तं प्रभो ॥ १ ॥
पुरा नारायणः साक्षादवतीर्य युगे युगे ॥ संहृत्याखिलरक्षांसि महाबलपराक्रमः ॥ २ ॥
एतत्कलियुगे देव विष्णोः स्वस्थानवासतः ॥ केन वा रक्षते विश्वं रक्षोभूतगणादिभिः ॥ ३ ॥

च.—इदं गुह्य कुलेशानि न देयं यस्य कस्य चित् ॥ ३२ ॥
इति सुदर्शनसंहितायां उग्रास्त्रप्रयोगो नाम षड्विंशतितमः पटलः ॥ २६ ॥

६७५ सुन्दरबाहुस्तोत्रं सटीकम् । मू०-श्रीवत्साङ्कः । टी०-तच्छिष्यः ।

मू. आ.—श्रीमंतौ हरिचरणौ समाश्रितोऽहं श्रीरामानुजमुनीन्द्र[मुनिवर्य]लब्धबोधः ॥
निर्भीकस्तत इह सुंदरोरुबाहुं स्तोष्ये तच्चरणविलोकनाभिलाषी ॥ १ ॥
टी. आ.—यो विष्णुरेव परतत्त्वमिति प्रतिज्ञां प्रत्यर्थिसंसदि समर्थयते स्म सत्याम् ॥
वेदान्तवाक्यगतिभिर्विविधैश्च तर्कैः श्रीवत्सचिह्नगुरुमेनमुपाश्रयामि ॥ १ ॥
अथ श्रीमद्भगवद्भाष्यकारसकाशाल्लब्धपरावरतत्त्वयाथात्म्यावबोधः श्रीवत्सांकमिश्रः कावेरीमध्यगतात् श्रीरंगक्षेत्राद्दक्षिणस्यां दिशि वनगिरिवृषगिरिसिंहगिरिप्रभृतीनामपि प्रसिद्धे महापर्वते कृतावतारं सुन्दरबाहुं सुन्दरालंकारादिनामभिर्व्यवह्रियमाणदिव्यप्रबंधवैभवं महाविष्णुं स्वजीवनार्थं सकलप्राणिहितार्थं च स्तोतुकामः प्रथमं स्तोत्रारम्भं प्रतिजानीते ॥
मू. च.—इदं भूयो भूयः पुनरपि च भूयः पुनरपि स्फुटं विज्ञिप्स्यामीत्यगतिरबुधोऽनन्यशरणः ॥
कृतागोदुष्टात्मा कलुषमतिरस्मीत्यजवदैर्दयायास्ते पात्रं वनगिरिपते सुंदरभुज ॥ १३३ ॥...........

६७६ सूर्यशतकस्तोत्रम्-राघवेन्द्रसरस्वती ।

आ.—सांख्या मुख्यं प्रधानं पुरुषमविकृतं कर्म मीमांसमानाः काणादाश्चाक्षपादाः प्रणयपरिचयादीश्वरं सावधानाः ॥
यं विद्वानवद्यं विदुरधिकधियो ब्रह्मवेदांतवेद्यं सोऽयं विश्वप्रकाशः प्रदिशतु भगवान् भावुकं वो विवस्वान् ॥ १ ॥
च.—शाके वेदेन्दुबाणक्षितितलगणने भूमिपालप्रवीणे राज्यं जालालदीने स भवति सुतरां त्रातुसंघप्रलीने ॥
प्रसज्यागत्य वृंदाविपिनसुसदने राघवेन्द्रेण गौडात्संतोषाय प्रणीतं रविशतकमिदं याति साहस्य तस्य ॥ १०१ ॥
इति श्रीराघवेन्द्रसरस्वतीप्रणीतं सूर्यशतकं नाम स्तोत्रं समाप्तम् ॥

६७७ सौभाग्यशुभोदयः-श्रीनिवासभट्टः ।

आ.—नमस्तस्मै गणेशाय सर्वविघ्नविनाशिने ॥ कार्यारंभेषु सर्वेषु पूज्यते यः सुरेश्वरि ॥ १ ॥
सुन्दराचार्यशिष्येण श्रीनिवासेन धीमता ॥ वक्ष्ये सौभाग्यविद्याया जननं सर्वकामदम् ॥ २ ॥
सौभाग्यशुभोदयं नाम प्रकाशात्रि समुद्धरेत् ॥ नित्यं नैमित्तिकं कर्म संक्षेपेण वदाम्यहम् ॥ ३ ॥
च.—इति पंचपंचिकात्मकसिंहासनपूजा ॥
इति श्रीश्रीनिवासभट्टविरचितः सौभाग्यशुभोदयः संपूर्णः ॥

६७८ प्राकृतव्याकरणम्-विद्याविनोदाचार्यः ।

आ.—प्राक्सर्गादेक एकस्मिन्बहुधा योऽवभासते ॥ तं वन्दे नित्यमानन्दं नन्दनन्दनमीश्वरम् ॥ १ ॥
पूर्वं ग्रामिकुले कलानिधिनिभश्छत्री सुमेरुः स्थितो भ्राता तस्य जटाधरो द्विजवरो बाणेश्वरस्तत्सुतः ॥
तत्पुत्रः प्रथितोऽभवत्कविवरो नारायणो नामतस्तेनेदं क्रियते सुखाय विदुषां यत्प्राकृतं लक्षणम् ॥ २ ॥
कृतिना यत्कृतं पूर्वं तन्निरस्तं दुरात्मना ॥ इदानीं तत्समुद्धृत्य संक्षेपेणोच्यते मया ॥ ३ ॥
प्राकृतं संस्कृतयोनि । अथाजादेशविधिः । समृद्ध्यादिष्वादेरत आद्वा । आदेरत इत्यधिकारः । पासिद्धी पसिद्धी प्रसिद्धिः । ....
इति श्रीविद्याविनोदाचार्यकृतौ प्राकृतपादे प्रथमः परिच्छेदः ॥ १ ॥
च.—असंयुक्तस्यानादौ कगचजतदपयवः प्रायोलोपः ।
इति श्रीविद्याविनोदाचार्यविरचिते प्राकृतव्याकरणेऽष्टमः परिच्छेदः समाप्तः ॥